The Sanskrit of LS, is not the Standard Classical Sanskrit, but a type of Mixed Sanskrit usually called Jain Sanskrit. Several scholars including Bloomfield, Upadhye and Sandesara have so far offered their studies of Jain Sanskrit with regard to a particular text or group of texts[15] Great linguistic diviersity has been a patent characteristic of India since the earliest times. Due to development of regional dialects during the Middle Indo-Aryan and New Indo-Aryan periods on the one hand, and concurrent literary use of Sanskrit, Prakrits and Apabhraṁśa on the other, a highly complicated picture of linguistic contacts and convergences has characterized the middle and modern stages of Indo-Aryan. The resulting mixed Sanskrits were of various types, depending upon the proportion and intimateness of the admixture. It now seems quite evident that taking into account the inscriptional Sanskrit, the Maṇi-pravāla type of language mixtures, Persianized Sanskrit[16] of some later works and the language of many modern Sanskrit writings and discourses, the categorizations like Buddhist Sanskrit and Jain Sanskrit appear simplistic and superficial. Proper understanding of mixed literary languages during various periods of Indo-Aryan demands a much more sophisticated model of classification which takes into account the kind and amount of influence on the phonology, morphology, syntax, lexicon and semantics of the Standard Classical Sanskrit.[17] This is however no place to consider these issues, and in the following note on some noteworthy features of the Sanskrit of LS, I will go by Bloomfield's classification.

(1) One large group of words and expressions of LR. derive directly from the Sanskrit grammatical and lexicographical literature. Jinaratna freely uses forms of various types of aorists, perfect (including the periphrastic variety), desiderative, freequentative, various types of denominatives [18] and *Cvi*-formation, and in the case of the last four, occurrence of the forms of various tenses is remarkable, because it is un-

15. For a brief account of the work so far done and some important references see Bhayani H.C., Introduction (in Gujarati) to *Pañcaśatī Prabandha-sambandha* (also called *Prabandha-pañcaśatī*), ed. by Mṛgendra Muni, 1968, pp. 7-9.
16. See for example Sukumar Sen (ed.), *Sekasubhodaya*, Bibliotheca Indica no. 256, 1963.
17. See in this connection M.W. Sugathapal de Silva, 'Convergence in diglossia' in Southworth and Apte (eds.), *Contact and Convergence in South Asian Languages*, 1974, pp 60-91.
18. *Kalpa-latāśliṣṭa-pārijāta-līlāyita* (XI 263) is an instance of the past passive participle of a denominative formed from a long compound.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

usual. Forms with suffixes like *ṇamul* and *itac*, compounds and nominal and verbal derivatives for which Sanskrit grammars give special rules and lists, monosyllabic nominal bases ending in a consonant, and unusual pronominal forms like *asmi*, *asi*, *asakau* are freely used. Two features of the vocabulary of LS. are noteworthy in this connection. Firstly there is a remarkable proliferation of descriptive synonyms To cite only one example out of scores, LS., has क्ष्माप, क्ष्माशक्र, अवनिनायक, भूवज्र, क्षितिवज्र, भूपुरन्दर, महीमेघवाहन, पृथ्वीपाकशासन, वसुधासुधांशु and many more similar expressions for 'king'. Secondly, for some of the r re usages of words and grammatical forms in LS., we find parallels from either well-known classical works like the *Harṣacarita*, *Mālatīmādhava*, *Śiśupālavadha*, *Bhaṭṭikāvya*, *Naiṣadhīya*, *Pañcatantra*, *Kathāsaritsāgara*, works of Rājaśekhara etc, or from Jain works like the *Pariśiṣṭaparvan*. In the Glossary of important words given at the end, we have pointed this out at relevant places, mostly on the basis of Monier-Williams's Sanskrit dictionary. Jinaratna belonged to the great tradition of Jain monks who were well-versed in Sanskrit Kāvya and Śāstric literatures[19], and many of whom were keen to give evidence of this in their writings.

(2) Use of technical terms of Jain philosophy, mythology and dogmatics is another customary feature of the Jain Kāvya and Kathā literatures in Sanskrit, and this characterizes the language of LS. also. Some of these terms are Sanskritizations of originally Prakrit terms.

(3) Use of words and expressions deriving from Prakrit, Apabhraṁśa or Old Gujarati is another feature of LS., which it shares with numerous other Jain works in Sanskrit. In the Glossary references have been given to Turner's dictionary of Indo-Aryan languages in the case of the words of New Indo-Aryan source, and parallels from Gujarati have been also pointed out. Many of the idioms and proverbs also referred to above derive from Apabhraṁśa or Old Gujarati. Several proper names (e.g. Jasaravi, Jasāditya, Devadinna, Devaḍa, Vaggaḍa. Dehaḍa, Somaḍī, Rannaḍī, and several names in the list given at IV 57-64) are Prakritic. Of course most of such material of Prakritic or New Indo-Aryan origin appears in a Sanskrit garb. This is true also of the un-Sanskritic causals like *vācāpay* - XIV 312), *vandāpay* -(XXI 25), *vardhāpay* -, *śulkāpay*-(VI 93), *śikṣāpay*- etc. which are back-formations from MIA. causals in *āv*-. There are numerous cases of translation-loans or calques from Old Gujarati. It should be observed however, that on the scale of using vernacularized Sanskrit LR. is considerably lower than say, the Jain Sanskrit Prabhandhas or the Sanskrit works of the authors like Śubhaśīlagaṇin.

19. LS. has numerous passages indicative of its author's knowledge of Arthaśāstra, Nimitta-śāstra, Śakuna, Nīti, Darśanas etc.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# लीलावती-सारः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# जिनरत्नसूरि-कृतः

जिनेश्वरसूरि-विरचित-**निर्वाणलीलावती**-महाकथेतिवृत्तोद्धारात्मकः

# लीलावतीसारः

## प्रथम उत्साहः

× × × के लीलासङ्गसङ्गिपादाम्बुजन्मने ।
नमोऽमरालीशसेव्यात्मने × × × × × × ॥१
वर्धमानप्रभोः पादास्ताद्दगौन्नत्यशालिनः ।
मोक्षाचलारोहि × × × × × × × × श्रये ॥२
द्वाविंशतेर्जिनेन्द्राणां गावः पान्तु रवेरिव ।
× × × × × × × × × यो वासरसङ्गताः ॥३
[पृ]थिवीवसुभूत्यादिनन्दन × × × × × ।
[श्रीगौत]मगणेन्द्राय सुधर्मास्वामिने नमः ॥४
श्रीवर्धमानः × × × × × × × च्चन्द्रोभयः ।
श्रीजिनवल्लभः प्रभुः जिनादि×पूणत्वमी ॥५
यद्भक्त्या प्राप्तमहिमाणिमर्द्धिरिस(?) ×××× ।
× × × × × × × × समासत्त्या × × × × ॥६
× × × × × प्रकाणि × × ×[जिन]वल्लभाः ।
सुधाकिरो गिरो जैनेश्वर्यो ज्योत्स्नाप्र××दाम् ॥७
**निर्वाणलीलावती** च कथेयं × × मातिगा ।
× × × सा मनाग् ज्ञातवर्णना नाल्पमेधसा ॥८
जिनेश्वरगुरोस्तस्य प्रसादास्पदमन्तिपम् (?) ।
जिनेश्वरगुरूपज्ञकथायां तन्ममादरः ॥९
श्रीनिर्वाणलीलावत्यास्तथाऽपूर्वरसाम्बुधेः ।
कथामात्रसुधापानं विबुधैः कैश्चिदिप्यते ॥१०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गदकुग्रहसिद्ध्यर्थं सिद्ध्यर्थं च परात्मनोः ।
**लीलावतीकथासारः** सादरं रच्यते मया ॥११
सारोद्धारः श्री**तिलकमञ्जर्या**दिर्बुधैः कृतः ।
तेन तत्रानुजानन्तु नावजानन्तु सत्तमाः ॥१२
वर्णनादि विनाऽप्येषा सहृदो रमयिष्यति ।
××नान्त×सौन्दर्यं यदुपाधिं विना स्फुरेत् ॥१३
महीयोऽदः कथावृत्तं लघीयस्यत्र गायति (?) ।
करी गिरीन्द्रकल्पोऽपि संक्रामेन्मु × (मंद?)रोदरे ॥१४
नानाभणितिभङ्गीभिः सारेयं सर्वथा कथा ।
नाम्नि त××××स्य सारो मूलं प्रकीर्त्यते ॥१५
पदैश्च सुप्रतिपदैः पान्थैर्वैदर्भवर्त्मनि ।
सुखात् कथासुधास्वादः सदस्यानां विधास्यते ॥१६
मात्रादातेव सभ्यानां सुश्रूषावृद्धिभैषजम् ।
लीलावत्याः पिण्डितोऽर्थः सितापिण्ड इवोच्यते ॥१७

*

कोशाम्ब्यां विजयादिसेननृपतिः काम्योत्तमाङ्ग किल
श्रेष्ठिश्रीसचिवौ पुरन्दरजयस्पृक्शासनौ दोर्लते ।
शूरश्चापि पुरोहितो हृदयभूः सौभाग्यभङ्ग्याऽद्भुता—
धःकायो धनदेवसार्थग इमे श्रीमत्सुधर्मप्रभोः ॥१८
पादाम्भोरुहि रामदेवचरिताद्याकर्ण्य दीक्षाजुषः
सौधर्मे त्रिदशा बभूवु ⏑ ⏑ — — — ⏑ — — ⏑ यः ।
ते श्रीसिंहनृपादितामुपगताः श्रीनेमितीर्थेऽसिधन्
संक्षिप्येति कथाङ्गनाङ्गभणितिर्विस्तार्यते श्रूयताम् ॥१९॥ युग्मम्

*

ओङ्कार इव मन्त्राणामक्षराणां त्वकारवत् ।
द्वीपानामादिमो द्वीपो जम्बूद्वीपोऽस्ति विश्रुतः ॥२०
तस्यानादेरपि सप्तवर्षस्याभाति भारतम् ।
वर्षं परिवृतं षड्भिः खण्डैर्वर्षमिवर्तुभिः ॥२१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्रापि मध्यमं सर्वोत्तमं खण्डं वसन्तवत् ।
पुण्य × × × × ×दिनररत्नविलासभूः ॥२२
श्रीमगधाजनपदः पदमद्भुतसम्पदाम् ।
तत्र सौधर्मकल्पस्य कल्पनामपि लुम्पति ॥२३
तत्र राजगृहं नाम पुरं देवकुलाकुलम् ।
श्रीसौधर्मावतंसस्य लीलां कर्षति लीलया ॥२४
तस्मिन् पृथ्वीसहस्राक्ष इक्ष्वाकुकुलभूषणम् ।
जयी श्रीजयधर्माख्यः प्राज्यं साम्राज्यमन्वगात् ॥२५
जैनधर्मं स यो×(?)यै दधौ जातु कराम्बुजे ।
हृत्पद्मतश्रुतं नित्यं नामुचत् परमात्मवत् ॥२६
शीलशालीन्यकौलीन्यभाग्यसौभाग्यसेवधिः ।
देवी पद्मावती तस्य शचीपदमशिश्रियत् ॥२७
जिनं तदर्चनार्थं नु पतिं च हृदि साऽवहत् ।
समीचीनं त×(?)त्सूत्र शीलकर्पूरसौरभम् ॥२८
तां च साम्राज्यलक्ष्मीं च भुञ्जानस्य यथोचिति ।
घना दिनास्तस्य राज्ञो ययुरेकनिमेषवत् ॥२९
अथान्यदा चन्द्रशालां भव्ययन्ती मुखेन्दुना ।
सा देवी सपरीवाराऽऽरोहद्द्रष्टुं पुरश्रियम् ॥३०
वीक्षमाणा सुधावृष्टिं दृशोः सा च पुरश्रियम् ।
क्वापि हर्म्यतले स्तन्यं धयन्तं स्वं स्तनन्धयम् ॥३१
ब्रुवाणां मन्मनालापैः खेलयन्तीमनेकधा ।
काञ्चित् कुलवधूं दृष्ट्वा मनस्येवमचिन्तयत् ॥३२॥ युग्मम्
'धन्याऽसौ कृतपुण्या च भाग्यसौभाग्यवत्यपि ।
यैवमङ्के निजं बालं मस×(?)मिव पश्यति ॥३३
जीवतात् पतिराचन्द्रं सौभाग्यं सर्वतोऽस्तु च ।
परं जीवन्मृतिकेव सुपुत्रेण विनाऽङ्गना ॥३४
रूपं मनाग् हरत्येष मातुर्दत्ते तु सर्वतः ।
आदत्ते रसमुष्णांशुर्दत्ते कोटिगुणं पुनः ॥३५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

या स्वं पतिं च गोत्रं च सनाथयति सूनुना ।
योषितः पुरतस्तस्याः कास्तु चिन्तामणिर्दृषत् (?) ॥३६
अहमेका त्वधन्यानां धुरीणा रीणभाग्यिका ।
इति याऽद्यापि सत्पुत्रोत्सवश्रीणां न भाजनम् ॥३७
इति चिन्ताचान्तचित्ताऽवरुह्य सहसा ततः ।
ततः पद्मावतीदेवी ममज्जारतिसागरे ॥३८
कुलवध्वा तयैवात्तमना इव न देव्यसौ ।
किञ्चिन्नियुङ्क्ते भुङ्क्ते वा वक्ति वा विविनक्ति वा ॥३९
तां तथाऽवेत्य नृपतिर्जयधर्मोऽतिवेगतः ।
तत्समीपमवापत् तत्प्रेमदाम्नेव कर्षणात् ॥४०
सोऽथ देव्या स्वयं दत्ते सिंहासने निषेदिवान् ।
तां पप्रच्छारतेर्बीजं प्रेमपिच्छिलया गिरा ॥४१
ततो मन्दाक्षमन्दाक्षी बाष्पाविलविलोचना ।
साऽब्रूत पत्ये स्वाकूतं यथाभूतं सुपूतवाक् ॥४२
राजा तद्दुःखसङ्क्रान्त्या तदैकात्म्यमिव ब्रुवन् ।
अप्राक्षीन् ज्ञानिनो देव्याः पुत्रायोपायमादरात् ॥४३
ततः कोऽपि किमप्यूचे सुबुद्धिर्मन्त्र्यथार्हतः ।
जिनशासनयक्षार्चामवादीत् सार्वकामिकीम् ॥४४
महाराजोऽथ राज्ञी च स्वयं सौधेऽर्हदर्चनम् ।
प्रारेभाते महद्धर्याऽर्हज्जितौ स्मररती इव ॥४५
तथा पुरस्थचैत्येषु श्रीशासनसुरेषु च ।
सपर्यां मन्त्रिणां वर्यैस्तावचीकरतां मुदा ॥४६
अथामेयभागधेयाकृष्टो न्वादिमकल्पतः ।
देवः कश्चिदवातारीत् श्रीदेव्या उदरान्तरे ॥४७
तद्वाहनमिव महासिंहमुत्पुच्छनोच्छ्रितम् ।
सौम्यं स्वास्ये प्रविशन्तं स्वप्ने प्रैक्षिष्ट देव्यसौ ॥४८
तं च सिंहं महास्वप्नं राजसिंहाय भूभुजे ।
देवी निवेदयामास शोभते तुल्यसङ्गमः ॥४९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवि सिंह इवाधृष्यः क्रमविक्रमवांस्तव ।
पुत्रो भावीति सुफलश्रिया तां सच्चकार सः ॥५०
उदञ्चदुच्चरोमाञ्चत्रुटत्कञ्चुकबन्धना ।
राज्ञी व्यज्ञापयद्राज्ञे स्तादेवं देववैभवात् ॥५१
ततो राज्ञाभ्यनुज्ञाता मुदिता सौधमागता ।
पद्मावती निधिमिव तं गर्भमवहन् मुदा ॥५२
यथा यथाऽवृधद्गर्भः पद्मावत्यास्तथा तथा ।
सौभाग्याद्यवृधत्तत्राप्यहो तस्य स्वपत्यता ॥५३
रवावुदेष्यति प्राची प्रभापूरमिवाद्भुतम् ।
तृतीये मासि बिभराञ्चक्रेऽसाविति दोहदम् ॥५४
सपर्यां जिनतीर्थानां गुरूणां प्रतिलाभनाम् ।
वात्सल्यं बान्धवानां च भीतानामभयप्रदाम् ॥५५
अमारिघोषणादानं शुद्धसिद्धान्तपूजनम् ।
चिकित्सनं रोगिणां च सर्वदर्शनगौरवम् ॥५६
दीनहीनान्धपङ्गूनां दयादानं च सर्वतः ।
मोक्षणं बन्दिबद्धानां सा कारयितुमैहत ॥५७॥ त्रिभिर्विशेषकम्
राज्ञो विज्ञप्तिमात्रेण तत्तथा समपद्यत ।
कल्पद्रुमे हि स्वाधीने दुःपूरं किं महात्मनाम् ॥५८
अथ प्रीत्येव पूर्णेषु मासेषु दिवसेषु च ।
ग्रहेष्वत्युच्चसंस्थेषु विमले च दिगम्बरे ॥५९
सिंहीव सिंहशिशुकं प्राची वा हिमरोचिषम् ।
सुखात् पद्मावती देवी शुभेऽह्नि सुषुवे सुतम् ॥६०॥ युग्मम्
ततः काचित् स्तनभरात् श्रोणीबिम्बभरात् परा ।
काचिन्मन्दगतितया परिष्कारभरात् परा ॥६१
हर्षबाष्पप्लुताक्षाऽन्या हर्षग्रहिलिता परा ।
हारस्खलत्पदाऽन्या नाशकद्वर्द्धयितुं नृपम् ॥६२॥ युग्मम्
प्रियंवदा तु लघ्वङ्गी मनःपवनवेगतः ।
श्रीमत्पद्मावतीपुत्रजन्मनाऽवर्धयत् प्रभुम् ॥६३

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

स्वर्णलक्षप्रदानेन नृपोऽप्येतामवर्धयत् ।
तादृग्हर्षभरारूढै राजभिर्नेति दुष्करम् ॥६४

अथ प्रगे नृपादेशान्नृपागारे पुरेऽभितः ।
नियुक्तैः कारयाञ्चक्रे पुत्रजन्ममहोत्सवः ॥६५

तथाहि—

नृत्यद्वृन्दनमालिकं प्रपठितानुत्तालवैतालिकं
व्यालोलत्सुममालिकं नरिनृतद्दोपाङ्गनाबालिकम् ।
गन्धाम्भःपरिषिक्तभूमहिलिकं नालोलच्छत्रकेलिकं
भास्वत्तोरणतापनीयतलिकं मङ्गल्यकुम्भालिकम् ॥६६

उद्यत्कौशलिकं प्रपूर्णरयिकं काश्मीरसिक्तालिकं
द्वारि द्वारि समुल्लसत्कदलिकं कस्तूरिकाचर्यालिकम् ।
नानाश्चर्यरसोर्म्यतीतजनताचेतःसरःपालिकं
चक्रे राजगृहं गृहं च नृपतेः स्वःकल्पमाकालिकम् ॥६७॥ युग्मम्

इत्युत्सवै राजगृहे मुन्मये द्वादशेऽहनि ।
नृपतिर्बान्धवान् पौरान् प्राश्य संवस्त्य चादरात् ॥६८
मात्रा स्वप्ने सिंहदृष्टया राट्सिंहोऽयं भविष्यति ।
इति तस्य कुमारस्य सिंह इत्यभिधां व्यधात् ॥६९॥ युग्मम्
ततः श्रीजयधर्मोर्वीभृतो मन्दिरकन्दरे ।
सुखात् पर्यवृधद्बालः स केसरिकिशोरवत् ॥७०
धात्रीभिः पञ्चभिः सम्यगेकान्तहितहेतुभिः ।
सोऽपाल्यतालाल्यतोच्चैर्धर्मः समितिभिर्यथा ॥७१
क्षणं मूर्ध्नि क्षणं स्कन्धे क्षणं कण्ठे क्षणं हृदि ।
क्षणं बाह्वोः क्षणं पाण्योः क्षणमङ्केऽथ जानुनोः ॥७२
मुहुः पद्मावतीदेवी तमधात् पुष्पदामवत् ।
सर्वभूषाधिकं मेने साऽमुं सर्वाङ्गभूषणम् ॥७३॥ युग्मम्
देव्योऽन्तर्न्यस्य तं बालं सतालं सममाह्वयन् ।
स यत्पार्श्वे ययौ शच्या अप्यग्रे स्वममंस्त सा ॥७४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मरीचिवीचिनिचिते स रिङ्खन् मणिकुट्टिमे ।
जलक्रीडामिवाभ्यस्यन् मृगाक्षीभिर्निरैक्ष्यत ॥७५
तं धूलीधूसरमहंपूर्विकातोऽङ्कमाप्य ताः ।
तद्रजोऽङ्गे लगच्चान्द्रोद्धूलनं किल मेनिरे ॥७६
महीन्द्रैर्दूकृतरङ्गैस्तं स्नाप्यमानं वहन् हृदि ।
सिंहासनस्थः क्ष्माशक्रः शक्रलीलामधत्त ताम् ॥७७
तमूर्ध्वीभूय हस्ताब्जे स्वर्णवर्णं वहन्नृपः ।
करस्थहेमकलशस्नात्रकारश्रियं दधौ ॥७८
नम्राभ्रकायो भ्रमयन्नङ्गुल्याऽमुं स कुट्टिमे ।
लोलल्लुम्बिभरानम्ररम्भास्तम्भरमामधात् ॥७९
धन्यंमन्यैः स निन्येऽङ्कमङ्कादवनिनायकैः ।
चक्रवाक इवोर्मीभिः कमलात् कमलान्तरम् ॥८०
बन्धूनां नामधेयानि शिक्ष्यमाणः स कीरवत् ।
ब्रुवाणो मन्मनं पित्रोः श्रुत्योः पीयूषमक्षिपत् ॥८१
प्रक्वणन्तौ विरेजाते तत्पदोर्दिव्यघर्घरौ ।
जगच्चिन्ताकृष्टिमन्त्रपाठकौ मान्त्रिकाविव ॥८२
चलतोऽस्य हृदि झलज्झलन्ती च ललन्तिका ।
चकाशे कौस्तुभमणिर्मुरारेरिव वक्षसि ॥८३
चलाचले नवमणी कुण्डले तस्य रेजतुः ।
कलादानार्थमायातौ सुरासुरगुरू इव ॥८४
स चूलारत्नचूलाभृद्दिव्यरूपमनोरमः ।
सञ्चकासांचकारोच्चैरेषोऽसुरकुमारवत् ॥८५
सलीलं प्राङ्गणभुवि क्रीडित्वा सिंहशाववत् ।
अध्यारुरोह धावित्वोत्सङ्गमेष महीभृतः ॥८६
सवयोभिः सरूपैः स कुमारो राट्कुमारकैः ।
चिक्रीड नन्दनाक्रीडे जयन्त इव निर्जरैः ॥८७
इत्थं विविधलीलाभिर्वर्धयन् जगतो मुदः ।
वर्धमानोऽनुक्रमेण स बभूवाष्टवार्षिकः ॥८८

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

कलाचार्याय नृपतिर्नाम्ना कुशलबुद्धये ।
महीयसोत्सवेनाध्यापयितुं तमथार्पयत् ॥८९
दृष्टमात्राणि शास्त्राणि सोऽध्यैष्ट सकलाः कलाः ।
सञ्जातजातस्मरण इव सन्निभदर्शनात् ॥९०

तथाहि—

सपञ्चाङ्गशब्दविद्यासाहित्यान्वीक्षिकीमुखान् ।
सरहस्यानपाद्ग्रन्थान्नदीपूरानिवार्णवः ॥९१
उपायशक्तिषाड्गुण्यादिकनानाध्वसङ्कुलाम् ।
सोऽलङ्घिष्ट सुदुर्लङ्घां राजनीतिमहाटवीम् ॥९२
अष्टोत्तरशतव्याधितमिस्रैकसहस्ररुक् ।
चक्रे तेन मनःस्थास्नुरायुर्वेदः स्वनामवत् ॥९३
चतुर्धाऽभिनयातोद्यवृत्तितूर्यत्रिकाद्भुतम् ।
गान्धर्ववेदमखिलं सोऽबुधद्भरताधिकम् ॥९४
यतयातमदावस्थादन्तघातादिदीपकम् ।
विदाञ्चकार स करिशास्त्रं तच्छास्त्रकारवत् ॥९५
नानाविधावर्त्तधाराचिकित्सोर्मिभिराकुलः ।
तेनाश्वलक्षणाम्भोधिः कुम्भोद्भववदापपे ॥९६
नियन्त्रितस्य(?) दशधा राधावेधादिभेदतः ।
सोऽस्त्रवेदमनिर्वेदं विवेद श्वेतसप्तिवत् ॥९७
इत्थं कलाभिः सर्वाभिः संपूर्णः पूर्णिमेन्दुवत् ।
भूषणैरिव च गुणैर्भूष्यते स्म स सर्वतः ॥९८
अथाखिलकलावल्लीविलासद्रुमवेक्ष्य तम् ।
उपाध्यायं नृपोऽभ्यर्चत् कल्पद्रुममहेपयन् ॥९९
ततो गुणग्रामकलाकलापकमलामयः ।
यशःशशी कुमारस्य समुदज्वलयज्जगत् ॥१००
पितृभक्तिर्दया दानं दर्शनार्चनमित्यदः ।
तत्त्वं सत्त्वमिवैतस्य सदाऽपि सहचार्यभूत् ॥१०१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विलासिनां कुलगुरोः स्वमित्रस्य मनोभुवः ।
निवस्तुमेष्यतो मन्ये पुरतः प्रत्युपेक्षितुम् ॥१०२
तं श्रेयोनिलयं राजतनयं भृशमुन्नतम् ।
प्राविशद्यौवनं लावण्यादिभिः सह साधुभिः ॥१०३॥ युग्मम्
ततः स्फुरत्केशपाशं तस्य वृत्तोन्नतं शिरः ।
यौवनस्य ययो (?)राजच्छत्र न्वाभात् सचामरम् ॥१०४
तन्मूर्धनालिकेरस्याभितो लम्बे श्रुतीलते ।
स्कन्धावनीस्पृशौ व्यानञ्जतुर्द्युम्ननिधिं ध्रुवम् ॥१०५
तथास्येन्दुः सुवृत्तोऽस्याभूद्यथेक्ष्य हरो ध्रुवम् ।
मुहुर्मूर्ध्न्यक्षिपत् पाणिं गतां जानन् शिरःकलाम् ॥१०६
प्रेक्ष्यतेऽस्योन्नतौ स्कन्धौ नूनं श्रीखण्डपाण्डुरौ ।
स्वेभकुम्भौ विदन् मुष्टौ ययौ दिव्याकुलो हरिः ॥१०७
शस्त्रोपनिषदाचार्यौ बाहू तस्यौपजानुकौ ।
जातौ रिपुस्त्रीवैधव्यदीक्षादाने भृशोद्यतौ ॥१०८
वक्ष्यतोऽस्याचिरात् पृथ्वीं पुर एवाभवद् भुजौ ।
दोषः पूरयितुं धात्रीवहनव्यसनं किल ॥१०९
द्विषत्पुर्यः कपाटेषु भग्नेषु तदुरःश्रया ।
मन्येऽपि वन्यसत्त्वानां सुखगम्याः सदाऽभवन् ॥११०
असौ कृतिर्वज्रसारस्येति व्यञ्जयितुं ध्रुवम् ।
तन्मध्यं वज्रमध्यस्य महिमानमदर्शयत् ॥१११
धीरोऽयं मां धराभाराच्चिरं विश्रमयिष्यति ।
इतीवोपादितौन्नत्यं तत्पदोरादिकच्छपः ॥११२
प्रतिष्ठितं यौवनेन कामदेवममुं नवम् ।
का कामिनी नोत्त्वराऽभून् न्यस्य हृन्निलयेऽर्चितुम् ॥११३
स्त्यानो विश्वस्य शृङ्गाररसो वीररसोऽथवा ।
जनैरमान्यसौ लीलावेश्मोद्भटवपुर्लतः ॥११४
अमुं सुभगसीमानमभ्युद्यद्रागसागराः ।
अताडयन् विलासिन्यो दृक्तरङ्गैः समन्ततः ॥११५



Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

अभिगन्तुममुं मन्ये क्लिश्यन्तीर्वीक्ष्य कामिनीः ।
गौर्यामर्धाङ्गसङ्गिन्यामपि न व्यश्वसीन् मृडः ॥११६

लोकोत्तरां रूपभङ्गीं प्रददावस्य यौवनम् ।
मातापित्रोः पुनरयं बत लोकोत्तरा मुदः ॥११७

इतश्च तत्रैव पुरे जयधर्मप्रभोः सुहृत् ।
सामन्तो न परं नाम्ना स्थाम्नाऽप्यास्तेऽरिमर्दनः ॥११८

तत्प्रिया कमलमती सतीरत्नशिरोमणिः ।
भूषणान्यपि भूष्यत्वं निन्यिरे यद्वपुःश्रिया ॥११९

तयोः किल परप्रेमहेमतेजःसमुच्चितिः ।
कलालीलावती लीलावती नाम्ना सुताऽभवत् ॥१२०

यत्पदोः श्रीमतोर्मन्ये सोदरं सरसीरुहम् ।
तेन जज्ञे तदप्युच्चैः कमलाललितास्पदम् ॥१२१

मृग्यो रम्भाश्च वनतो याचितुं पुरवासिताम् ।
चक्रुर्यदीयजंघोर्वोः स्वं भारमुपदां किल ॥१२२

यस्या नाभीपुष्करं नु त्रिवलीवेणिसङ्गमः ।
तत्तटे हृदि वक्षोजौ रतिस्मरसुरालयौ ॥१२३

स्मारे सरसि यद्वक्त्रे सुधाकूप्यौ दृशौ किल ।
नाशा स्वर्णाब्जमुकुलमोष्ठौ कोकनदे पुनः ॥१२४

यद्दोर्लते मनसिजकल्पद्रुमलते इव ।
पद्मरागमणीशोणौ पाणी तत्पल्लवाविव ॥१२५

नितम्बबिम्बे ललन्तीं वेणीं कज्जलकोमलाम् ।
चक्षुर्दोषहृते यस्यां विधिर्नीलपटीं न्वधात् ॥१२६

लोकातिक्रान्तसौभाग्यां भाग्यभङ्गीनिकेतनम् ।
वाङ्मयातीतलावण्यां सौन्दर्यस्य महाखनिम् ॥१२७

यां निष्पन्नां विधिर्वीक्ष्य विस्मयस्मेरमानसः ।
तत्कारणसामग्र्यं स्वहस्तौ चात्यवर्णयत् ॥१२८॥ युग्मम्

यस्या आस्यश्रियोऽयं विरजनवसनं पार्वणश्रीशशाङ्कः
संकासोत्तारणानां सरसि सरसिजश्रेणिरेषाऽक्षिलक्ष्म्याः ।

देहद्युद्दीप्रदीपाग्रत इदममलं काञ्चनं कज्जलाभं
द्राक्षाखर्जूरपुंड्रेक्षुरसमधुसुधाः पाद्यवारीव वाचाम् ॥१२९॥ दशभिः कुलकम्

तां मत्तवारणारूढां प्रौढां लीलावतीं कनीम् ।
कटाक्षपुष्पैरर्चन्तीं राजमार्गमितस्ततः ॥१३०
जगज्जेतुं पुनर्मन्ये नवीनावतरः स्मरः ।
श्रीमत्तवारणारूढो राजपाटीं प्रचेलिवान् ॥१३१
कुमारसिंहः श्रीसिंहकुमारः प्रैक्षताञ्जसा ।
सा च तं साञ्जसं यद्वा तारामैत्र्यभवत् तयोः ॥१३२॥ त्रिभिर्विशेषकम्

तां कन्यादेवतां ध्यायन् राजपाटीं विधाय सः ।
तत्रोन्मनाः समागच्छंस्तां तथैव निरैक्षत ॥१३३
कैषा दृष्टिसुधावृष्टिरित्युक्ते राजसूनुना ।
सुबुद्धिरवदद् देव कन्याऽसावारिमर्दनी ॥१३४
ततः कुमारस्तद्ध्यानधाराहारं हृदा वहन् ।
सौधमध्यास्त तां चैकां पुनर्द्रष्टुं समैहत ॥१३५
लीलावती तु दृष्ट्वा तं कुमारं मारजित्वरम् ।
तेनैव हृतसर्वस्वा किलास्थात् स्तम्भवच्चिरम् ॥१३६
ततो गवाक्षादुत्तार्य सा सखीभिः कथञ्चन ।
शून्यशून्याऽत्याकुलाभिः शयनीयमनीयत ॥१३७
तत्रापि सा तमेवैकं ध्यायन्ती परमात्मवत् ।
योगिनीव चिरं तस्थौ न पुनः प्राप निर्वृतिम् ॥१३८
सखीभिर्मुहुरुक्ताऽपि सा प्रत्यूचे न किञ्चन ।
ततो धात्र्युपसृत्योचे किं ते वत्सेऽद्य बाधते ॥१३९
ह्रियाऽतिवार्यमाणाऽपि कथञ्चिदवमत्य ताम् ।
राजपुत्री चतुष्कर्णं धात्र्यै स्वाशयमभ्यधात् ॥१४०
सिद्धमेतदिति धीरयित्वा तां नृपनन्दनाम् ।
तदैव धात्री तत्पित्रोस्तद्वृत्तान्तमचीकथत् ॥१४१
राज्ञ्या कमलमत्या च प्रेर्यमाणोऽरिमर्दनः ।
प्रमनाः प्राभृतैः कान्तैरुपतस्थे महीपतिम् ॥१४२

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

राजन् ! लीलावती नाम कन्या नः कुलजीवितम् ।
सा श्रीसिंहकुमाराय वराय मु(?) भृशायते ॥१४३

तदिमां कन्यकां शुद्धां श्रीकुमारशिरोमणिः ।
अलङ्करोतु भवतु योग्ययोगाद् विधिः सुधीः ॥१४४

किञ्च –
नैमित्तिकगिरा देव कुमारायेयमेधिता ।
स्वन्यासमिव तत्स्वामी स्वीकरोतु ममाङ्गजाम् ॥१४५

पद्मावत्यनुमत्याऽथ स्वीकृते तत्करग्रहे ।
दैवज्ञो प्रच्छे वीवाहसुलग्नमवनीभुजा ॥१४६

तेनोचे राधपञ्चम्यामास्ते गुरुः पुनर्वसौ ।
वीवाह्यं मिथुनं लग्नं मिथुनोदयलग्नकः ॥१४७

ततः श्रीजयधर्मोर्वीभृताऽभाण्यरिमर्दनः ।
इतोऽष्टमेऽह्नि वीवाहे प्रयतेथा यथाविधि ॥१४८

ततश्च–
नानाव्यञ्जनतेमनान्नरचनाश्लिष्यत्परीवारकं
प्राक्सौवर्णिकघट्यमानकनकं प्रक्रीतगन्धांशुकम् ।
आहूताखिलमित्रगोत्रिककुलं नित्योच्छलन्मङ्गलं
जज्ञे राजकुलं द्वयोरपि तयोः कार्यावलीव्याकुलम् ॥१४९

भूयोगौरवभोज्यमानजनता विस्तार्यमाणोत्सवा
धूलीभक्तविधौ प्रहीणकविधौ ताम्बूलदानोद्धुराः ।
मङ्गल्यस्त्र्युपक्लृप्ततद्वरवधूसद्वर्णकोद्वर्णकाः
श्रीवैवाहिकवासराः समभवन् कौतूहलोद्भास्वराः ॥१५०

स्नातालिप्तविभूषितामलपटप्रावारिकन्यावरः
श्रीमातापितृबन्धुयुक्तशिबिकारूढोत्सवायद्वरः ।
वेद्यंतर्वरवध्वनुष्ठितपरिज्योतिश्चतुर्मङ्गलः
कन्यातातवरप्रदत्तकनकाद्याश्चर्यितस्वर्द्रुमः ॥
श्रीमत्सिंहवरारिमर्दनभुवोर्भेजे विवाहोत्सवः ॥१५१

आनन्दैकमयः सुधारसमयः कर्पूरपारीमयः
सर्वस्वर्णमयः कुतूहलमयः कल्याणमालामयः ।

---

44.1. सुद्धां.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुण्योत्कर्षमयः सुमङ्गलमयः सलास्यलीलामयः
संपूर्णः सुनयः सुखाद्वयमयः पाणिग्रहः श्रीमयः ॥१५२

ततश्च –

पद्मावती कमलावत्यादिकेऽन्तःपुरीजने ।
परिभ्रम्य परिभ्रम्य नृत्यमानेऽतिनिर्भरम् ॥१५३
सुधवाभिस्तारतारं गीयमाने समन्ततः ।
सुधाधाराधरे श्रुत्योर्नानाधवलमङ्गले ॥१५४
भट्टथट्टे पठत्यग्रे स्फुरति प्रेक्षणीयके ।
शिबिकारत्नमारूढौ सुराविव वधूवरौ ॥१५५
विमानितविमानश्रि सत्प्रावेशिकमङ्गलम् ।
राज्ञः सौधं प्राविशतां हृत्सौधं तु मुदद्भुतौ ॥१५६॥ चतुर्भिः कलापकम्

वीक्ष्याऽरिमर्दनेनेत्थं तत्पुत्र्या सम्प्रदानितम् ।
नृपस्तेनैव तूर्येण युवराजश्रियाऽर्चयत् ॥१५७
ततः सिंहकुमाराय स्ववध्वै च पृथक् पृथक् ।
ससर्वर्द्धि परीवारं प्रासादमददान्नृपः ॥१५८
तत्र चित्रैः सद्विलासैर्विलासिजनवल्लभैः ।
लीलावत्या सह सिंहकुमारोऽरंस्त निर्भरम् ॥१५९

तथा हि –

कदाचित् कामशास्त्राणि नीतिशास्त्राणि कर्हिचित् ।
कदाचित् धर्मशास्त्राणि तावाकर्णयतां मुदा ॥१६०
प्रश्नोत्तरैश्च्यलद्बिन्दुव्यस्ताव्यस्तादिभेदिभिः ।
कदाचित् तौ मिथोऽदत्तां स्वस्वप्रातिभवैभवम् ॥१६१
समस्यापूरणैः काव्यकरणैः कोष्ठपूरणैः ।
तौ मिथश्चक्रतुर्जातु लाभनप्रतिलाभने ॥१६२
वापीसरःस्रवन्तीषु द्विधा कमलसद्मसु ।
व्यात्युक्ष्या जात्विमौ कामद्रुमं न्वसिचतां मिथः ॥१६३
धातुमातुकलापूर्णं विपञ्चीपञ्चमामृतम् ।
सुधाभुग्दुर्लभं जातु तौ मिथः पर्यपीप्यताम् ॥१६४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कदाचिन्मूर्छनाग्रामस्वरतानवितानितम् ।
तारां धृत्वा मिथो गीतं पर्यैक्षेतामिमौ मुदा ॥१६५
नानापुष्पैः स्वयं दृब्धा भूषा न्यस्य तनौ मिथः ।
स्वस्वदैवतपूजाभिस्तौ निर्वृतिमवापतुः ॥१६६
आश्लेषादि पणीकृत्य कृत्यविद् द्यतलीलया ।
गाढाश्लेषादि वैदुष्यमसावध्यापयद् वधूम् ॥१६७
शिशिक्षिषू इमौ मन्ये रूपान्तरविकुर्वणाम् ।
पत्रच्छेद्ये च चित्रे च मिथोरूपं प्रचक्रतुः ॥१६८
अन्यदा च –
स्वामिन् कीर्यैव कन्यान्तःपुरपञ्जरमग्नया ।
न मया प्रैक्षि पूःशोभा तां दिदृक्षे त्वया सह ॥१६९
लीलावत्येति विज्ञप्तश्चतुरङ्गचमूवृतः ।
औपवाह्यगजारूढः कुमारः प्रियया सह ॥१७०
प्रतिहट्टं प्रतिमठं प्रतिदेवकुलं पुरम् ।
प्रदर्शयन् स्वयं पत्न्यै तामसौ मुन्मयीं व्यधात् ॥१७१॥ त्रिभिर्विशेषकम्
अन्यदा बहिरुद्याने स तथैव प्रियासखः ।
समीक्ष्य रहसि लतामण्डपानकृतार्थयत् ॥१७२
किं बहुना –
सहयानं सहस्थानं सहपानं सहाशनम् ।
सहस्वापः सहबोधो यद्वैक्यमभवत् तयोः ॥१७३
इति लीलाशतैर्लीलावतीं सत्याभिधां सृजन् ।
पराक्रमात् सत्क्रमाच्च स्वं नाम च यथार्थयत् ॥१७४
दुष्टानां निग्रहाच्छिष्टानुग्रहाद् युवराजताम् ।
पञ्चधा विषयास्वादात् सम्पदं च कृतार्थयन् ॥१७५

नित्यं श्रीजयधर्मभूपतिलकश्रीशासनोत्तंसितः
पद्मावत्यनघांह्रिपद्मरजसा संश्लिष्टभालस्थलः ।
सम्यग्न्यायधुराधुरन्धरमणिः सालस्य संघाविधा
सिंहः सिंह इहा(?वा)त्यगात शरदः स्फायन्मुदः प्राज्यशः ॥१७६॥

–त्रिभिर्विशेषकम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथान्यदा जयधर्मभूपो यामेऽन्तिमे निशः ।
प्रतिबुद्धोऽन्तिमवयोऽवस्थोचितमचिन्तयत् ॥१७७
मया त्राता पैतृकी भूरर्जिता च ततोऽधिका ।
नीत्या द्विगुणिताः कोशाः प्रजावत् पालिताः प्रजाः ॥१७८
सुहृदः सम्पदं नीता मूर्ध्नि दत्तं पदं द्विषाम् ।
उद्धृता दीनहीनाद्या याचका दायकीकृताः ॥१७९
यशोभिः सुरभीचक्रे सागरावधि भूतलम् ।
भुक्तं निष्कण्टकं राज्यं दीर्घमायुर्निषेवितम् ॥१८०
तदेवमैहिकं कर्म मया चक्रे समन्ततः ।
पारत्रिकं न चेच्चक्रे न चक्रे तर्हि किञ्चन ॥१८१
तदत्र कवचहरे कुमारे सिंहनामनि ।
मुदा निधाय भूभारं शिक्षासारं प्रदाय च ॥१८२
परलोकहितं कर्तुं साम्प्रतं मम साम्प्रतम् ।
कुमारे राज्यधुर्येऽपि धिग् ये विषयतृष्णजः ॥१८३॥ युग्मम्
इत्थं विचिन्त्य प्रत्यूषेऽरिमर्दनपुरःसरैः ।
सामन्तैः सूक्ष्मबुद्ध्याद्यैः सहामात्यैर्विचार्य च ॥१८४
राज्ञा सिंहकुमारस्य कुमारस्य पराक्रमैः ।
राज्याभिषेको रचयाञ्चक्रे चक्रे भयं द्विषाम् ॥१८५॥ युग्मम्
बाह्यं प्रदाय सर्वस्वमन्तःसर्वस्वदित्सया ।
पिता श्रीसिंहराजायानुशास्तिमददादिति ॥१८६
सौन्नत्यनिर्मितिर्मेरोः सान्त्याम्भोधेर्वितानना ।
स्वादृत्क्ृ(?कृ)तिः सुधायाः सा यच्छिक्षा सुधियस्तव ॥१८७
तथापि कल्पमात्रेण मात्रया किञ्चिदुच्यते ।
कृतकृत्या अपि सन्तो न कल्पमतियन्ति यत् ॥१८८
न्यायाम्बुदेन विध्याप्यो भुव्यन्यायदवानलः ।
येनोल्लसन्ति परतस्त्वद्वंशे लक्ष्मिवल्लयः ॥१८९
अन्यथाऽयं राजकुलवातेन स्वैरचारतः ।
राज्यं प्रजाश्च देशं च भस्मसात् कुरुते क्षणात् ॥१९०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूक्ष्मबुद्धिसुबुद्ध्यादि निवेश्यं मन्त्रिमण्डलम् ।
येन तन्मन्त्रशक्त्या स्यान्निर्दोषं तव मण्डलम् ॥१९१

राज्ये पुरे च धर्मे च ये स्युः केचन कण्टकाः ।
त्याज्यास्ते दूरतो येन स्यात् तेषां सुखसेव्यता ॥१९२

षड्दर्शनी रक्षणीया निर्बाधा यदियं मिथः ।
स्वस्वपुण्योपार्जनातः षडंशं ते प्रयच्छति ॥१९३

अक्षाणां चान्तरारीणामपि षट्कं वशं नय ।
तज्जयैर्द्वादशात्माऽस्तु प्रतापस्तेऽति भास्वरः ॥१९४

इति राजपथे सम्यग् गच्छतस्ते महीपते ।
भविष्यत्यत्र चामुत्र शिवश्रीरुत्तरोत्तरा ॥१९५

नेत्रपात्रैः कर्णपुटैरिति शिक्षा सुधामसौ ।
पिबन्नुदञ्जलि पितुर्मुदद्वैतं बतातनोत् ॥१९६

पुत्रोपरोधेन राज्यपरिपन्थनया विना ।
दीक्षोन्मना अप्यथास्थाद् राड्गृहेऽहानि कत्यपि ॥१९७

अथोपचितसप्ताङ्गं प्रवहद्दाननिर्झरम् ।
राजसिंहः सिंहराजो बतावद् राज्यकुञ्जरम् ॥१९८

प्रशासति महीं तत्र स्वसेवक इवाम्बुदः ।
गर्जन् श्रुतिसुधासारं समयं नात्यवर्तत ॥१९९

परस्परस्पर्धयेव बिभ्रत्यः फलसम्पदम् ।
अहम्पूर्विकया सर्वौषध्यस्तमुपतस्थिरे ॥२००

अगण्यरत्नसन्ताना वृद्धिमन्तः पदं श्रियः ।
समुद्रास्तस्य मर्यादां नातिजग्मुर्जनाः क्वचित् ॥२०१

साधुबन्धूकृताशेषजगतोऽमुष्य सीमनि ।
दस्यवो नोभयेऽप्यासन् देशनोर्व्यामिवार्हतः ॥२०२

न तप्तं वातमपि हि सहते स्म स्वमण्डले ।
इतीहान्तकनासीरं दुर्भिक्षं जृम्भतां कथम् ॥२०३

विष्वग् निवारिताशेषमारिप्रभृतिपाप्मनः ।
तस्योर्व्यामानशे मारिर्नावकाशं मनागपि ॥२०४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मिन् विजयमाने श्रीदोषज्ञैकशिरोमणौ ।
सातङ्का इव चातङ्का निरैक्ष्यन्त न तद्भुवि ॥२०५

नीरुजः पूर्णभोगायुर्भोगिनश्चाकुतोभयाः ।
जनास्तद्भुवि युगलधर्मिरूपा इवाशुभन् ॥२०६

धर्मं स्वविद्विषं तस्य नित्यं पार्श्वैकवर्तिनम् ।
अधर्मो ध्रुवमाकर्ण्य प्राचरन्नास्य नीवृति ॥२०७

अवस्थितश्रियं स्फायच्छ्रीरमर्त्योपिभोगदाम् ।
मर्त्यामर्त्योपभोग्या च विजिग्ये दिवमस्य भूः ॥२०८

प्रतापेनैव नमति सर्वतो राजमण्डले ।
कुलवृद्धेव पूज्याऽस्य चतुरङ्गा चमूरभूत् ॥२०९

किं बहूक्तैस्तथा तत्र राज्ञि राज्यार्णवोऽवृधत् ।
यथाऽत्र जैवातृकाः श्रीश्रीधराः कोटिशो बभुः ॥२१०

अन्यदाकस्मिकातङ्काज्जयधर्ममहीपतेः ।
विधोर्विधुन्तुदग्रासादिवाभूदत्यपाटवम् ॥२११

ततोऽतिसम्भ्रमभरात्याकुलीभूतचेतसः ।
सहसा सिंहभूपाद्याः पितुरन्तिकमासदन् ॥२१२

सद्यः सिंहनृपाहूताः पितुरारोग्यहेतवे ।
वैद्या नैमित्तिकाः सर्वे धर्मं जीवातुमूचिरे ॥२१३

अश्रान्तबाष्पवृष्ट्याऽथ पङ्क्लिलीकृतभूतलः ।
सिंहभूपोऽवदद् देवतीर्थे पादोऽवधार्यताम् ॥२१४

ततः श्रीजयधर्मोचे धर्मतत्त्वविशारदः ।
विशांपते शृणु धर्मरहस्यं सद्गुरूदितम् ॥२१५

रागद्वेषविनिर्मुक्तो ब्रह्मचारी जितेन्द्रियः ।
सर्वसत्त्वहितोद्युक्तस्तीर्थमात्मैव देहिनः ॥२१६

मलमङ्गाश्रितं तोयैः शोधयन्ति कुबुद्धयः ।
तीर्थे जीवाश्रितं पापं ध्यानाम्भोभिर्निवर्तते ॥२१७

२०७.४. नीवृतिः



Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

तदत्रैव स्थितो वत्स ध्यानधाराभिरात्मनः ।
कल्मषं क्षपयिष्यामि कतकैर्जलपङ्कवत् ॥२१८

पद्मावतीं पद्ममुखीं सहयानैकमानसाम् ।
जयधर्मोऽवदत् साध्वि निशामय परं रहः ॥२१९

सत्त्वा विभिन्नकर्माणो विभिन्नगतिगामिनः ।
अज्ञानिनां ततः सौम्ये सहयानकथा वृथा ॥२२०

ज्ञानदानाभयदानतपोध्याननिषण्णया ।
अखिन्नया ततः स्थेयं यावदायुर्महासति ॥२२१

वत्स त्वयाऽप्यस्मदर्थमत्र राजगृहे पुरे ।
ज्ञानदानाभयदाने प्रवर्त्ये प्रतिवासरम् ॥२२२

इति पद्मावतीं पुत्रं चानुशिष्य स शस्यधीः ।
पुरान्तर्वर्तितीर्थानां महापूजां विधाय च ॥२२३

पद्मावतीं च पुत्रं च सामन्तान् सचिवान् जनान् ।
परिवारं च परितः क्षमयित्वा क्षमानिधिः ॥२२४

सद्यः पद्मासनासीनः परमेष्ठ्यैकमानसः ।
शुभध्यानाच्छुभगतिं प्रययौ नृपशेखरः ॥२२५॥ त्रिभिर्विशेषकम्

ततः शोकानलोत्तप्तं तद्धूमैः पूर्णदृक् किल ।
हाहाकारमुखं साश्रु जज्ञे राजगृहं पुरम् ॥२२६

अथ सम्बोध्य तत्सर्वं सद्यः सर्वंसहापतिः ।
विदधे पितृकार्याणि बाष्पानुपायितेक्षणः ॥२२७

ततोऽमात्यगिरा शोक महाशल्यविशल्यया ।
विशोकः सिंहनृपती रामवद्राज्यमन्वशात् ॥२२८

समृद्धविषयग्रामपुरसौन्दर्यशालिनीम् ।
पुष्पितानेकविपिनचित्रपट्टपटावृताम् ॥२२९

विकचाम्भोरुहवनविकस्वरविलोचनाम् ।
नानारूपपत्रवल्लीवितानशिखरिस्तनीम् ॥२३०

पतिप्रेमभराद्वैतपरिपूतमनोगुहाम् ।
परस्परहिताधानात् सापत्न्यपरिहारिणीम् ॥२३१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लीलावतीं च पृथ्वीं च मिथःसारूप्यधारिणीम् ।
यथावसरमेवासौ बुभुजे सिंहभूपतिः ॥२३२॥ चतुर्भिश्च कुलकम्
अथ पृथ्वी रत्नगर्भाऽसूत रत्नानि सर्वतः ।
लीलावत्यपि पुंरत्नगर्भा समुदपद्यत ॥२३३
ततः समुद्भूतपूतदोहदा पूर्णदोहदा ।
सुषुवे सा पौर्णमासी निशाकरमिवाङ्गजम् ॥२३४
तस्य मात्रा स्फुरत्पद्मकेसरस्वप्नदर्शनात् ।
पद्मकेसर इत्याख्यां शुभेऽह्नि विदधे पिता ॥२३५
स राजमन्दिरे कल्पद्रुमवन् मेरुकन्दरे ।
प्रवर्धमानः क्रमेण जग्राह सकलाः कलाः ॥२३६
ततः कलावन्तममुं पिता युक्तमयोजयत् ।
यौवराज्यश्रिया पद्मश्रिया च नृपकन्यया ॥२३७
सिंहक्षोणिपतेः परेद्यवि दिवि श्यामान्त्ययामे पुरः
प्रातर्मङ्गलपाठ्यनेहसि दृशां दृश्येतरः कश्चन ।
भद्राम्भोधरसोदरध्वनिभरव्याप्ताखिलाशाम्बरोऽ-
पाठीत् पाठकसत्तमः श्रुतिपुटीपेयूषयूषं वचः ॥२३८
देवाकर्णय कर्णतर्णकमनोधेनुस्तनाश्लेषतो
राज्यश्रीरिति कामकामसुरभी द्राघिष्ठमायुर्बलम् ।
आरोग्यं च निरन्तरं प्रतिपदं निर्व्यापदः सम्पदः
सर्वं प्राग्भवगूढरूढसुकृतस्वःशाखिनस्ताण्डवम् ॥२३९
येत्वेतेन विनाकृताः कृतमहापाप्मोदयान्नारका-
स्तिर्यञ्चो य इमे च ये च मनुजा ये चापरे निर्जराः ।
ते सर्वेऽपि हि दुःखदावदहनज्वालावलीविह्वला-
स्तच्छ्रीसिंहनृसिंह धर्मसुहृदा सौहार्दमुज्जृम्भय ॥२४०
येनैष राज्यसुखतोऽप्यमुतो वरिष्ठामानन्दचिल्लहरिभिः परितः परीताम् ।
निःश्रेयसाह्वयमहापुरराज्यलक्ष्मीं पाणौ निवेशयति ते वसुधासुधांशो ॥२४१
इत्यूर्जितं पठितवान् प्रतिनादभङ्ग्या दिग्देवताभिरभितोऽप्यनुमोद्यमानः ।
कश्चिद्द्विपश्चिदधिभूस्त्रिदशस्तिरोभूद्राण्मानसेऽद्भुतसुरः पुनराविरासीत् ॥२४२

२३८.४. पातक

अथ पाठपथप्रष्ठैः प्रातर्मङ्गलपाठकैः ।
भूप्रष्ठस्य पुरः पेठे प्रातर्मङ्गलमुज्ज्वलम् ॥२४३

ततस्ते भूभुजा पृष्टाः केनाद्य पठितं पुरः ।
ध्वानेनाश्रुतपूर्वेणानुध्वानितदिगम्बरम् ॥२४४

तेऽप्यूचुः श्रुतमस्माभिस्तद्दिव्यध्वनिडम्बरम् ।
निष्पुण्यकैरिव निधिस्तद्वक्ता नैक्षि कश्चन ॥२४५

ततो दध्यौ नृपो मन्ये केनचिद् धर्मबन्धुना ।
दिव्येन मत्प्रबोधाय पेठे धर्म्यमिदं वचः ॥२४६

परीक्ष्य तद्धर्मतत्त्वं सह धर्मविशारदैः ।
मयोपादेयमेवं स्याद् वच एतत्फलेग्रहि ॥२४७

सम्प्रधार्येति धात्रीशः प्रातरास्थानमण्डपे ।
धर्मस्वरूपं पप्रच्छ सर्वानाहूय तीर्थिकान् ॥२४८

ततः कश्चिद् धृष्टमतिः स्पष्टमाचष्ट भूभुजे ।
गुरूपदेशतो धर्मस्वरूपं ते निरूप्यते ॥२४९

देव वस्तुस्वभावोऽयं धर्मः स च शुभाशुभः ।
जीवाभावान्न कोऽप्यन्यो धर्मोऽन्यभवगामुकः ॥२५०

जीवो रूपाद्यभावान्नाध्यक्षः कस्यापि भूपते ।
नाप्यहंप्रत्ययग्राह्यो विकल्पोऽर्थं विना ह्ययम् ॥२५१

नाऽनुमेयोऽनुमानं हि प्रत्यक्षाविषये कथम् ।
तद्धि व्याप्तिबलात् सा च नित्यात् पक्षे कथं भवेत् ॥२५२

मानं न वाऽनुमानादि यतः प्रत्यक्षमेव तत् ।
तदग्राह्यश्च जीवो न तन्न कर्म शुभाशुभम् ॥२५३

यच्चोच्यते तदभावे कथं विश्वविचित्रता ।
निर्जीवेषु कुलालस्य भाण्डेषु ननु सा कथम् ॥२५४

नास्त्यात्मा न कर्मास्ति परलोको न विद्यते ।
धर्मो वस्तुस्वभावस्तत् तन्निमित्ता विचित्रता ॥२५५

नास्तिकोक्तमिति श्रुत्वा दूनः स्माह नृपः परान् ।
भोः सत्यमित्यसत्यं वा मृषा चेत् तन्निरस्यत ॥२५६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथाचख्यौ प्रवाक् कोऽपि स्वामिन् शृण्ववधानतः ।
निर्हेतुकं न कार्यं स्यात् सर्वत्रातिप्रसङ्गतः ॥२५७

कार्यं च देहस्तद्धेतोः पितृमात्रं न वाऽस्य सः ।
पितृपुत्रा नैकरूपास्तद् वैचित्र्यं तु कर्मतः ॥२५८

कुलालभाण्डवैचित्र्यं तद्भोगिप्राणिकर्मतः ।
जातिस्मृतिर्न नैरात्म्ये देवाः सप्रत्यया न च ॥२५९

दानाद्या निष्फलाः सर्वे सर्वेन्द्रियजयो वृथा ।
वृथा वृत्तं च पूर्वेषां भुक्तिमुक्तिपदप्रदम् ॥२६०

किञ्च —

ज्ञानादयः क्वचित्संस्था गुणत्वाद् रूपवत् प्रभो ।
न च देहादिसंस्थास्ते तद्भेदे प्रतिसन्धितः ॥२६१

क्षित्यादौ नास्तिता तेषां ततस्ते पारिशेष्यतः ।
आत्माश्रितास्ततः सिद्धो जीवः कर्म च नैकधा ॥२६२

ततश्च —

युक्तिप्रमाणादिविरुद्धमेतत् सर्वंकषस्यास्य खलस्य वाक्यम् ।
श्रोतुं न योग्यं नरनाथ किन्तु दूरात् सकर्णैरपकर्णनीयम् ॥२६३

जल्पाकेऽपि हि चार्वाके तूष्णीकामुपजग्मुषि ।
उत्तरवादिवादेन प्रमना नृपतिर्जगौ ॥२६४

मेधानिधान कस्त्वं भोः प्राञ्जलिः स व्यजिज्ञपत् ।
राजेन्द्र जिनदत्तोऽस्मि श्रावको जिनभक्तिभाक् ॥२६५

कर्मसत्त्वेऽपि नैरात्म्ये स्थापिते सौगतैरथ ।
साङ्ख्यैः प्रकृतिकर्तृत्वे पुंस्कौटस्थ्ये च कीर्त्तिते ॥२६६

नैयायिकैः सर्वकृत्त्वे स्थापिते च पिनाकिनः ।
भट्टे च वेदनित्यत्वसर्वज्ञाभाववादिनि ॥२६७

राज्ञा प्रसन्नतासारसृष्ट्या दृष्ट्याऽथ नोदितः ।
जिनदत्तो गुरुदत्तस्फुरत्प्रातिभवैभवः ॥२६८

---

२५७.२. निर्हेतुकं
२६२.४. जीवकर्म

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

सर्वप्रवादिवादेषु वहन् सर्वधुरीणताम् ।
कक्षीकृत्योत्तरं पक्षं क्षणात् सर्वानशैक्षयत् ॥२६९॥

— चतुर्भिः कलापकम्

अथ सिंहमहाराजो निर्व्याजगुणरागवान् ।
जिनदत्तं कुलगुरुमिव स्वयमवर्णयत् ॥२७०
अहो ते प्रतिभोत्कार्या बत ते वाग्मितादभुता ।
विरुद्धवादिनोऽप्येतान् वादिनो यदबूबुधः ॥२७१
जिनदत्तो भूधवं तं पुनर्वाचेत्यमोदयत् ।
गृहमेधी मन्दमेधा नास्मि वादविशारदः ॥२७२
परं यत्पादमहसा प्रकाश्योऽपि प्रकाशकः ।
आदर्शवद्भूवं ते जयन्ति गुरुभास्कराः ॥२७३
महीसिंहः सिंहराजोऽग्रहीद् वाचं सुधामुचम् ।
यौष्माकीणाः किंस्वरूपा गुरवस्ते महामते ॥२७४
गुरुस्वरूपस्मरणस्फुरद्रोमाञ्चकञ्चुकः ।
हर्षाश्रुगद्गदोऽवादीज्जिनदत्तः शृणु प्रभो ॥२७५
महाव्रतधराधीरा भैक्ष्यमात्रोपजीविनः ।
सामायिकस्था धर्मोपदेशका गुरवो मम ॥२७६
अहिंसासूनृतास्तेयब्रह्मचर्यापरिग्रहान् ।
महाव्रतान् पञ्च नित्यं प्राणवत् पालयन्ति ये ॥२७७
दुस्तरेऽपि हि कान्तारे रौरवेऽन्यविपत्सु च ।
राजंस्ते स्वाङ्गभङ्गेऽपि व्रतभङ्गं न कुर्वते ॥२७८
अकृताकारितं भैक्षमरसं विरसं तथा ।
कुक्षिमानेन गृह्णन्ति न संगृह्णन्ति किञ्चन ॥२७९
ईश्वरेऽनीश्वरे भक्ते द्विष्टे स्वान्यजनेऽपि च ।
सुखे दुःखे च ते साम्यामृतकाम्या महाशयाः ॥२८०
निरीहा निर्ममत्वाश्चाप्रतिबद्धाः समीरवत् ।
विहरन्तः शुद्धधर्मोपदेशं ददते च ते ॥२८१

---

२७५.४. प्रमोः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्र नोपद्रवो भावी भाविन्योऽभ्युदयश्रियः ।
तत्रैव देशे तैः पूज्यैः राजन् पादोऽवधार्यते ॥२८२

यत उक्तम् —

पद्मिन्यो राजहंसाश्च निर्ग्रन्थाश्च तपोधनाः ।
यं देशमनुगच्छन्ति तत्रागच्छन्ति सम्पदः ॥२८३
ते च श्वेताम्बराचार्याः परिचर्याः सुरैरपि ।
राजन् श्रीसमरसेनसूरयो गुरवो मम ॥२८४
इत्युक्ते जिनदत्तेन सिंहभूपः पुनर्जगौ ।
सखे मम द्रुतं भावि कथं त्वद्गुरुदर्शनम् ॥२८५
देवोद्यानपालकेभ्यो दिश्यतां मां य आदितः ।
गुर्वागमाद् वर्धयिताऽस्मै दास्ये पारितोषिकम् ॥२८६
एतच्छ्राद्धोक्तमाश्रुत्य पुनस्तं स्माह भूपतिः ।
अत्रागम्यं प्रतिप्रातर्मित्र मद्बोधसम्पदे ॥२८७
ततोऽन्वहं तयोर्धर्मक्षोदमोदं वितन्वतोः ।
अन्यदोद्यानपः प्रोचे देव वर्धाप्यसेऽधुना ॥२८८
पङ्कसंटङ्कनिर्मुक्तोऽस्खलच्चरणचञ्चुरः ।
शुद्धसम्यक्त्वशीतांशुर्भास्वरज्ञानभास्करः ॥२८९
विमलाम्बररोचिष्णुर्धनवैमल्यकारकः ।
भुवनं पावयन् विष्वगुच्छलत्कुमुदाकरः ॥२९०
प्रतिग्रामं प्रतिपुरं श्रेयःफलमुपानयन् ।
सद्व्रजान् मदयन्नुच्चैः स्फुरत्समयनिश्चयः ॥२९१
सत्तारकर्षिपटलो राजहंसनिषेवितः ।
जिनप्रबोधमधुरः शरत्काल इवाङ्गवान् ॥२९२
पुष्पकरण्डकोद्याने समाने नन्दनश्रियः ।
श्रीसमरसेनसूरिर्यतोऽद्य समवासरत् ॥२९३॥

— पञ्चभिः कुलकम्

---

२८३.१. राजहिंसाश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वर्णलक्षमदात् तस्मै च तत्तुष्टो नृपस्ततः ।
राज्ञे काञ्चनकोटीं वा मुदामुद्यानपो ददौ ॥२९४
ततः पटहनादेन हर्षनादेन चात्मनः ।
पुरं सबालवृद्धं राट् सूरीन् नंतुमतत्वरत् ॥२९५
लीलावत्यादिसर्वान्तःपुरेण परिवारिणा ।
अरिमर्दनमुख्यैश्च सामन्तैः सपरिच्छदैः ॥२९६
सूक्ष्मबुद्धिसुबुद्ध्यादिमन्त्रिभिः सपरिग्रहैः ।
पौरैर्जानपदैः स्वस्वकुटुम्बपरिमण्डितैः ॥२९७
सुखासनस्यन्दनेभशिबिकाश्वादिसंस्थितैः ।
दिव्याकल्पधरैर्दिव्यैरिव स्राक् परिवारितः ॥२९८
श्रीसिंहक्ष्मापतिः पद्मकेसरेण स्वसूनुना ।
जिनदत्तेन सख्या च सहारूढो जयद्विपम् ॥२९९
कुमुद्वतीमिव श्वेतैर्नीलैर्नीलाब्जिनीमिव ।
दिवं कुर्वन्नातपत्रैर्गुरून् नन्तुं नृपोऽचलत् ॥३००॥

— पञ्चभिः कुलकम्

क्षणात् प्राप तदुद्यानं जिनदत्तगिराऽमुचत् ।
पञ्चापि राजचिह्नानि गुरुकिङ्करमान्यसौ ॥३०१
गुरून् दृष्ट्वा नृपोऽध्यायद् विस्मयस्मेरलोचनः ।
एष एव स्मरजयी श्रीपतिश्चतुराननः ॥३०२
जिनदत्तोक्तविधिना भक्तिभङ्गितरङ्गितः ।
क्ष्मापोऽथ सपरीवारो गुरुराजमवन्दत ॥३०३
धर्मलाभाशिषा सर्वश्रेयःसंपत्पुषा गुरुः ।
आनन्दयन् महीराजं गर्ज्याऽब्द इव केकिनम् ॥३०४
यथास्थानमथासीनः श्रीसिंहः सपरिच्छदः ।
महुर्मुहुर्गुरुं वीक्ष्योच्छलद्विस्मयविह्वलः ॥३०५
धर्मोपदेशदानायोद्यतयोगत्रयं गुरुम् ।
प्राञ्जलिर्विनयानम्रो मुक्तिकम्रं व्यजिज्ञपत् ॥३०६॥ युग्मम्

---

३००.२. नीलाब्जिनी
३०४.१. पुरुषागुरुः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोकोत्तरं वयो रूपं तद्रम्याः सम्पदोऽद्भुताः ।
घोरव्रतोरीकृतिस्तत् प्रभूणां केन हेतुना ॥३०७

स्वस्वरूपामृतं वर्ष यदि योग्योऽस्मि सुप्रभो ।
प्रार्थनाभङ्गविमुखाः सन्तः पूज्या विशेषतः ॥३०८

तत ईषत्स्मितस्मेरमुखपद्मः प्रभुर्जगौ ।
स्वाचारभणनाचारो राजन् नैवोचितः सताम् ॥३०९

तथाऽपि क्ष्माशक्र क्रमनृपपथातिक्रमविधि
भवद्दाक्षिण्येन प्रगुणगुणलाभाय तनुमः ।
प्रदानस्वाचारातिगममपि कल्पक्षितिरुहः
सुधासेकादाने जगदुपकृते किं न कुरुते ॥३१०

ततः स्ववाञ्छापरिपूर्तिनृत्यन्मना मनाक् सिंहमहीमहेन्द्रः ।
महेन्द्रवच्छ्रीजिनदेशनायां तद्वाचि सूत्कः सपरिच्छदोऽभूत् ॥३११

इति श्रीवर्धमानसूरिशिष्यावतंसवसतिमार्गप्रकाशकप्रभुश्रीजिनेश्वरसूरिविरचित-प्राकृतश्रीनिर्वाणलीलावतीमहाकथेतिवृत्तोद्धारे **लीलावतीसारे** जिनाङ्के **श्रीसिंहमहाराजजन्म-राज्याभिषेक-धर्मपरीक्षा-श्रीसमरसेनसूरिसमागमन-व्यावर्णनो** नाम प्रथमः प्रस्तावनोत्साहः * ॥

---

३०९.२. भरणना°. * ग्रं. ३३९



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

## द्वितीय उत्साहः

अथ श्रीसमरसेनसूरिः सिंहमहीपतेः ।
स्ववैराग्यनिधेर्मूलाद् बीजकं समदीदृशत् ॥१
जम्बूद्वीपे भारतेऽस्ति श्रीवत्सो नाम मण्डलम् ।
आखण्डलं यत् कुरुते स्वदेशविनिर्मित्सुकम् ॥२
तत्र पूरस्ति कौशाम्बी कौशाम्बी यद्विनिर्गितिः ।
अत एव कदाऽप्येषा भङ्क्तुं शेके न कैश्चन ॥३
तां चारिनारीवैधव्यदीक्षादानैकसद्गुरुः ।
विजयवच्छ्रीविजयसेनः शास्ति महीपतिः ॥४
बन्द्यश्रुसिक्तस्तत्पत्रवल्लरीभिरलङ्कृतः ।
तत्स्मितैः पुष्पितो यस्य प्रतापपादपोऽशुभत् ॥५
दयादाक्षिण्यनैपुण्यवैचक्षण्यगुणाकरम् ।
रत्नाकरो जडमयो यं वीक्ष्याऽत्रपत ध्रुवम् ॥६
सा शची खलु सध्रीचीभावं यस्याः समैहत ।
सा तस्य राज्ञोऽतीन्द्रस्य प्रियाऽभूत् कमलावती ॥७
तया सह महादेव्या पुण्यकल्पद्रुसत्फलम् ।
राज्ञो विजयसेनस्य भुञ्जानस्य यदृच्छया ॥८
सर्वराज्यधुरासर्वधुरीणोऽक्षीणवैभवः ।
चतुर्धाधिषणाधीरो मंत्र्युदैज्जयशासनः ॥९॥ युग्मम्
यन्मन्त्रशक्त्या राज्यस्य राज्ञः स्वस्य जनस्य च ।
एधांबभूवानुदिनं विभूतिरधिकाधिकम् ॥१०
स सर्वशास्त्रोपनिषन्निषण्णाखिन्नमानसः ।
सौरभक्षिप्तकर्पूरः सूरः सौवस्तिकोऽभवत् ॥११॥ युग्मम्
लक्ष्म्यलङ्कृतसौवर्णपट्टोद्भास्यलिकस्थलः ।
सर्वपौरजनश्रेणियोगक्षेमपितामहः ॥१२

---

५.४. प्रतापः. ९.२. नंत्र्यु०.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परोपकारकारुण्यदानदाक्षिण्यमन्दिरम् ।
पुरन्दरः श्रिया तत्र जज्ञे श्रेष्ठी पुरन्दरः ॥१३॥ युग्मम्
यद्वणिज्यापुत्र इवोदीच्यां प्राप्तोऽतिलाभतः ।
तत्रैव नित्यवास्यस्थाद्धनदः सैष विश्रुतः ॥१४
क्रयाणकषष्टिशतत्रयभृद्भाण्डशालकः ।
स सर्वदिग्वहत्सार्थः सार्थपो धन इत्यभात् ॥१५॥ युग्मम्
ते चामात्यादयः सर्वे चत्वारः सुहृदो मिथः ।
राजप्रसादपात्रं च मेनिरे पितरं नृपम् ॥१६
सत्यसन्धः स राजाऽपि तैश्चतुर्भिः स्वमन्वितम् ।
युधिष्ठिरमिवामंस्त भीमाद्यैः परिवारितम् ॥१७
किं बहुना —
एकमत्यात् किलैकात्म्यभाजस्ते पञ्च मूर्तयः ।
जिनजन्मोत्सवारम्भे शक्रस्येव विरेजिरे ॥१८
अन्यदैषां राजसौधं सममेवाधितस्थुषाम् ।
उद्यानपालस्तत्कालोद्भूतचूताग्रमञ्जरीम् ॥१९
करे दधानोऽभिज्ञानदर्शनायातिवेगतः ।
आगत्य नृपमानत्य चक्रे विज्ञापनामिति ॥२०॥ युग्मम्
देवाद्य नन्दनोद्याने मरुद्भिर्दक्षिणैर्वृतः ।
चतुर्ज्ञान्या चतुष्पक्ष्या खण्डयन् जाड्यविड्वरम् ॥२१
दोषाणां लाघवं तन्वन् पुण्याहानां च गौरवम् ।
उदारसौरभोद्गारैर्विश्वमेव प्रमोदयन् ॥२२
राजहंससमुल्लासं सदारम्भोदयश्रियम् ।
सुमनःश्रेणिवीकाशं विदधानः पदे पदे ॥२३
गुरुराजश्रीसुधर्मा साधुभृङ्गैः परिष्कृतः ।
ऋतुराजो वसन्तश्च समं समवसस्तुः ॥२४॥
चतुर्भिः कलापकम्
स्वर्णलक्षं ददौ तस्मै क्ष्मापतिः पारितोषिकम् ।
कल्पद्रुमाश्च भूपाश्च प्रसन्नाः कुर्वते न किम् ॥२५

१५.१. षष्टः    २०.३. नृपनानत्य.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः श्रीविजयसेनः सेनया चतुरङ्गया ।
सान्तःपुरपरीवारोऽधिरूढजयकुञ्जरः ॥२६
मन्त्रिसौवस्तिकश्रेष्ठिसार्थपैस्तैः करेणुषु ।
समारूढैर्लोकपालैरिवेन्द्रः परिवारितः ॥२७
तं चतुर्ज्ञानिनं नन्तुं सुधर्मस्वामिनं गुरुम् ।
चचाल चलयन्मोहराजधान्या सहावनीम् ॥२८॥ त्रिभिर्विशेषकम्
ततश्चोपवने तत्रोदितं गुरुमरुत्तरम् ।
प्रदक्षिणय्य प्राणंसीद् भूपतिः सपरिच्छदः ॥२९
सर्वाशीःसारसम्भारसृष्टामिव जगत्प्रियाम् ।
धर्मलाभाशिषं श्रेयःपुषं तस्मै ददौ गुरुः ॥३०
यथौचिति निविष्टेषु तेषु क्षितिधवादिषु ।
श्रीसुधर्मास्यकुहरात् प्रासरद्देशनासरित् ॥३१
ज्ञानदर्शनचारित्रैः शुद्धैः संभूयकारिभिः ।
भव्या अव्याक्षेपतः श्रीमुक्तिराज्यमवाप्यते ॥३२
जीवादिदीपो दृग्ज्ञाने तपः प्राकृतशोधनम् ।
संयमो गुप्तिकृच्चैवं मोक्षो भवति निश्चितम् ॥३३
तेषां च प्रतिबद्धारोऽशुद्धिकारा विनाशकाः ।
पञ्चास्रवाः पञ्च मोहकषायाः पञ्च खानि च ॥३४
इन्द्रियैर्विजितो मोहकषायैर्जीयतेऽसुमान् ।
ततः प्राणातिपातादौ सक्तो ज्ञानादि हारयेत् ॥३५
हिंसा क्रोधकषायेण मानेन भणितिर्मृषा ।
चौरिका कैतवेनोच्चैर्मोहेनाब्रह्मसङ्गतिः ॥३६
परिग्रहश्रीर्लोभेन कुटुम्बीकृत्य वर्ण्यते ।
तदाचारः सदृष्टान्तः श्रीराजेन्द्र निशामय ॥३७
तत्परीवारभूतानामक्षाणां तदनन्तरम् ।
स्वरूपं सोदाहरणं क्षोणीन्द्रोदाहरिष्यते ॥३८
तथा हि —
क्रोधान्धश्चिन्तयेद्रौद्रं निष्ठुरं वक्ति सर्वतः ।
हिताहितं न हि वेत्ति हितादेशिभ्य ईर्ष्यति ॥३९

३३.१. प्राकृत०.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मातरं पितरं भार्यां भ्रातरं स्वोपकारिणम् ।
नाप्यपत्यं गणयति निरपेक्षो हिनस्ति च ॥४०
हिंसापरायणः सैष पापात्मा नरकं व्रजेत् ।
नानाकदर्थनास्तत्र सोढ्वाऽसङ्ख्यमनेहसम् ॥४१
तस्मात् कथञ्चिदुद्वृत्तः क्रूरतिर्यक्षु जायते ।
तत्र निष्कारणक्रुद्धो हत्वा हत्वा बहून् पशून् ॥४२
पुनः पतति नरके पुनः पुनरियं गतिः ।
दैवाज्जातु मनुष्येषु जातो बाल्येऽपि कोपनः ॥४३
पितृबन्धुषु विद्वेषी दुष्टाचाराद्बहिष्कृतः ।
बहुशस्तद्वधोपायान् कुरुते करुणोज्झितः ॥४४
राज्ञाऽपहृतसर्वस्वः स्वदेशाच्च पृथक्कृतः ।
हा भ्राम्यति विदेशेषु यथा राजन्नयं पुमान् ॥४५
सामान्योक्तो बुध्यतेऽत्र महत्यां नैष पर्षदि ।
किञ्चानेन पुरा चक्रे व्यक्तमाख्याहि तत् प्रभो ॥४६
इत्थं विजयसेनेन राज्ञा विज्ञापितोऽभ्यधात् ।
श्रीसुधर्माभिधः सूरिर्भाद्राम्भोदकिरा गिरा ॥४७
भवन्तमुत्तरेणास्ते यः प्रहारक्षताङ्गकः ।
स एष राजन्नाख्यातो दृष्टान्तः क्रोधहिंसयोः ॥४८
यथाऽनेन प्राग्भवेषु हिंसाक्रोधैकचेतसा ।
निबिडं दुष्कृतं चक्रे तदिदानीं निशम्यताम् ॥४९
भारते गीतगान्धारे बुधैर्गान्धारमण्डले ।
श्रियं काञ्चन बिभ्राणं श्रीकाञ्चनपुरं बभौ ॥५०
तत्र च प्राक्कर्मदोषाद् व्युच्छिन्नपितृबन्धुकः ।
आबाल्याद् भैक्षवृत्त्या च दुष्करोदरपूरणः ॥५१
परुषासभ्यभाषी च तद्भियेवोज्झितः श्रिया ।
अग्निशर्मा द्विजन्माऽभूदग्निवद्दाहकारकः ॥५२॥ युग्मम्
तत्पितृस्नेहतो दत्ताधारोऽसौ शिवशर्मणा ।
सोमाभिधानया पुत्र्या कथञ्चित् पर्यणाय्यत ॥५३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तया संवसतस्तस्य निर्भाग्यैकशिरोमणेः ।
पापद्रुमफलानीव डिम्भरूपाणि जज्ञिरे ॥५४

तैर्मुण्डशुकरैर्डिम्भैर्दारिद्र्येण च शल्यितः ।
श्रीमतां चाटुकारैश्च कथञ्चित् स्वोदरम्भरिः ॥५५

आत्मकुलप्रहरकं ददत्या सोमया पुनः ।
पितृप्रदत्तैर्धान्याद्यैः स नित्यं निरवाह्यत ॥५६॥ युग्मम्

भषणो भषणवच्च निर्हेतु प्रातिवेश्मिकैः ।
क्षुधाकरालित इति सोढदुर्भाषितश्च तैः ॥५७

श्वशुरस्य भोजनाद्या जीवन्नालस लज्जसे ।
तैरित्युक्तश्च स क्रोधात् श्वशुरं तांश्च निन्दति ॥५८॥ युग्मम्

तथा हि –

ऋणदासो मम पितुः शिवशर्मैषकः खलु ।
सर्वं पुरुषकारेणोद्धृतं युष्माभिरेव च ॥५९

ततः सोमामातुलेन विष्णुमित्रेण सोऽन्यदा ।
भाषितः शिवशर्माऽसौ सोम्याक्रोष्टुं न युज्यते ॥६०

यतस्तवायमाधारः श्वशुरोऽध्यापकस्तथा ।
निर्वाहकृद्विपत्त्राता तत् पूज्यश्च प्रभुश्च ते ॥६१

यत उक्तम् –

एकाक्षरप्रदातारं गुरुं यस्तु न मन्यते ।
स क्रूरे नरके चैव क्षिप्यते कृमिसञ्चये ॥६२

स्वामिघाती महापापो दक्षिण्येन प्रवेश्यते ।
नरके पच्यते तीव्रदुःखे चैष सहस्रशः ॥६३

तस्माद्वत्स प्रियं वाच्यं भवता विश्वकार्मणम् ।
निर्जीवान्यपि वाद्यानि माधुर्यात् प्रीणते जगत् ॥६४

कस्यापि नाप्रियं वाच्यं विशेषाच्छिवशर्मणः ।
वह्निदग्धाः प्ररोहन्ति वाग्दग्धास्तु यतो न हि ॥६५

विष्णुमित्रेणेत्थमुक्तोऽप्यग्निशर्माऽकुपद् भृशम् ।
सर्पिषा तर्पितोऽप्यग्निर्दहत्येव न संशयः ॥६६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं प्रत्यूचेऽग्निना तेन पाप्मिना सर्वलोपिना ।
रे जरद्गव शासन्मां मस्करान्मर्तुमिच्छसि ॥६७

विष्णुनोक्तं मया पुत्र तव पथ्यमुदाहृतम् ।
मुधा कुप्यसि नेष्टं चेन्न भणिष्यामि ते पुनः ॥६८

तदैव तत्रागतेन मातुलेनाग्निशर्मणः ।
चण्डसोमेनाग्निरूचे वृथा कुप्यसि विष्णवे ॥६९

समातुलं ज्वलन्नाख्यन्मत्तोऽप्यतिसुधीरसि ।
परं मत्पार्ष्णिप्रहारं त्वद्वक्त्रमभिलष्यति ॥७०

तत्र प्राप्तेन मलयानिलवन्मार्दवस्पृशा ।
सख्या गङ्गाधरेणाथ वणिजाऽग्निः स नोदितः ॥७१

किं मित्र पूज्येषु शिवशर्मादिष्वेवमुच्यते ।
इति तन्नोदनाक्रुद्धः सोऽग्निस्तमदुनोद्गिरा ॥७२

रे शूद्राधम स्तादेवं मामेवं शिक्षयिष्यसि ।
क्व गतः शोत्स्यसीदानीं ममापसर दृष्टितः ॥७३

ततो वणिग् जगौ शूद्राधमस्य कणमुष्टये ।
भूदेवासि करं धत्से दास्ये नातः परं कणम् ॥७४

वणिग्वाचाऽग्निशर्मा च क्रुद्धोऽहंस्तं चपेटया ।
ततः कलकलो जज्ञे सर्वे जग्मुर्यथागतम् ॥७५

अग्निशर्मा गतो गेहं सा वार्ताऽज्ञायि सोमया ।
ऊचे प्रियोऽक्षयनिधिस्त्वया गङ्गाधरो हतः ॥७६

तस्मिन् रुष्टे कथं भावी निर्वाहस्तव दुर्मते ।
ऊचेऽग्निस्त्वं च मां रण्डे शास्सि तद्यामि ते गृहात् ॥७७

स निर्गतस्ततो दध्यावस्यानर्थस्य कारणम् ।
विष्णुमित्रो येन सुप्ता बोधितैवं हि सर्पिणी ॥७८

ततः श्रीकरणे तेन पूच्चक्रेऽक्षत्रमस्ति भोः ।
विष्णुमित्रो परिस्पष्टं मरिष्यामि हतस्ववत् ॥७९

---

७३.२. सैत्स्य०.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्युक्त्वा सद्योऽग्निशर्मा न्यपतत् कण्टिकावृतौ ।
बलं विषोदराघाताद्येव यस्माद् द्विजन्मनाम् ॥८०

अथाहूतः कारणिकैर्विष्णुमित्रोऽग्निमूचिवान् ।
मया किमपराद्धं ते येन मूर्ख मुमूर्षसि ॥८१

क्रोधवह्निस्फुलिङ्गाक्षस्तज्ज्वालास्फुरदोष्ठकः ।
तद्धूमोपमनिश्वासः [सो]ऽग्निशर्मा तमभ्यधात् ॥८२

मूर्खस्तव पिता येन शिक्षा दाताऽसि निर्मितः ।
तदा मत्कीर्तिर्दुःशिक्षाधूल्या मलिनिता त्वया ॥८३

विष्णुरूचे पुनः शिक्षां न ते दास्यामि पुत्रक ।
तज्जीव यावदायुस्ते मैवमेव वृथा मृथाः ॥८४

शिक्षा काऽस्मै त्वयाऽदायीतिऽपृष्टेऽधिकृतैर्जगौ ।
तच्छिक्षां विष्णुरूचुस्ते किञ्चन्नात्रासमञ्जसम् ॥८५

रे रे दासीसुता यूयमेतत्पक्षं प्रशंसत ।
इत्यग्निस्तुन्दमाहन्तुं क्षणात् प्राकाशयत् क्षुरीम् ॥८६

ततः श्रीकरणादेशाद्धन्तुं बद्ध्वाऽत्र चालिते ।
विष्णुशर्माऽवदद्देव मारितोऽसौ स्वकर्मणा ॥८७

तन्मृतमारणाकीर्तिं किं गृह्णीथ बुधा इति ।
विमोच्य तेन नीतोऽग्निर्गृहेऽभोज्यत सोमया ॥८८

तामग्निवार्तां श्रुत्वाऽगाच्छिवशर्माऽथ तद्गृहे ।
चन्दनादपि शीतानि वचांस्यूचे च तं प्रति ॥८९

सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥९०

जिह्वया दर्भलवनं यज्जनाप्रियभाषणम् ।
तदसत्याप्रियं मुक्त्वा भव वत्स प्रियंवदः ॥९१

क्रोधयोधवियुद्धेन तद्ध्यानरुधिरैरिव ।
पाटलाङ्गो विलोप्याथ मर्यादां कुललोकयोः ॥९२

---

८१.१. कारि°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्वशुरं शिवशर्माणं वृद्धं नित्योपकारिणम् ।
मूर्धन्यहन् प्राणहितया स्वगत्या सह सोऽग्निकः ॥९३॥ युग्मम्
शिरः स्फोटाद्रक्तकुल्या वेगेन प्रावहद् द्रुता ।
करवीरस्य मालेव तस्य वध्यस्य हेतवे ॥९४
सोमाहाहारवाहूतैरिवारक्षैस्ततोऽग्निकः ।
पोतावेष्टं गले दत्वा नीतो राजकुले क्षणात् ॥९५
आरक्षैः क्ष्मापतेरग्रे तद्वृत्तान्तो निवेदितः ।
तद्यदादिशति स्वामी तदेतस्य विधीयते ॥९६
पूत्कुर्वती तदेवात्र सोमाऽगात् सह डिम्भकैः ।
दन्तैर्गृहीत्वाङ्गुलीश्च सा तु राज्ञे व्यजिज्ञपत् ॥९७
गोस्वामिन् निहतेऽत्रेयड्डिम्भा भाविन्यहं कथम् ।
तद्दयाब्धेऽमुना सार्धं प्राणान् देहि कुटुम्बके ॥९८
दीनदीनैस्तद्वचनैर्दयया तं नृपोऽमुचत् ।
धिक्कृतः पूर्जनैरग्निशर्माऽगात् सप्रियो गृहम् ॥९९
अथान्यदा निपत्यांह्र्योः सोमया विनयाधिकम् ।
मधुरं मधुनोऽप्युच्चैरग्निशर्मा न्यगद्यत ॥१००
प्रिय प्रियंवदगिराममित्रोऽपि हि मित्रति ।
प्रियाप्रियंवदगिरामपि मित्रममित्रति ॥१०१
तदप्रियं परित्यज्य प्रियमेव वद प्रिय ।
क्रोधोषर्बुधमामूलाद्विध्यापय शमाम्बुभिः ॥१०२
आत्मसन्तापकः क्रोधः क्रोध उद्वेगकारकः ।
वैरस्यजनकः क्रोधः क्रोधः सुगतिघातकः ॥१०३
आस्वादितं किमप्येतत् त्वयैव हि परेद्यवि ।
कोपकिम्पाकधरणीरुहस्य कटुकं फलम् ॥१०४
तत्क्रोधवैरिणं हित्वा प्रशमं मित्रमाश्रय ।
भवन्ति भवतो येन जनाः सर्वेऽपि सज्जनाः ॥१०५

९४.२. हतः १०१.४. मिमत्रति



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुरु मित्राणि मित्राणि बन्धून् बन्धून् गुरून् गुरून् ।
स्वधर्मदेवकुलिकाः पुत्रभाण्डानि वर्धय ॥१०६

प्रिय प्रसीद जीवेम वयमभ्युदयाश्रयाः ।
किं केनापि गुणेनोनं भूतले तावकं कुलम् ॥१०७

इति प्रियाप्रियालापामृतवृष्ट्याऽपि पाप्मनः ।
एधाञ्चकार परितस्तस्य क्रोधदवानलः ॥१०८

रण्डे तुण्डं च मुण्डं च तवाद्यापि न शिक्षितम् ।
मत्तोऽपि पण्डितंमन्या या शिक्षादायिका मम ॥१०९

इत्युक्त्वा तां गले धृत्वा नीत्वा च द्वारसीमनि ।
धवार्गलाप्रहारेण सोऽग्निशर्मा यमोऽवधीत् ॥११०

सा तेन वज्रघातेन प्राणैर्मुक्ताऽपतद् भुवि ।
हाहारवस्तु लोकानामुत्तस्थे मुखगह्वरात् ॥१११

हा ! धृष्ट दुष्ट पापिष्ठ ! निकृष्टानिष्टचेष्टित ! ।
स्त्रीहत्ययाऽतिचाण्डाल शीघ्रं निर्गच्छ पत्तनात् ॥११२

इति निर्भत्सितः पौरैः स तान् हन्तुमुपस्थितः ।
यष्टिमुष्टिपार्ष्णिघातैः कुट्टितो मूटकाधिकम् ॥११३॥ युग्मम्

ततः पुरात् स निर्गत्य पुरमत्सरभाक् कुधीः ।
प्रष्टुं पुरवधोपायमिवागाच्चण्डिकामठम् ॥११४

तदा च तस्य पापस्य पापं द्रष्टुमिवाक्षमः ।
द्वीपान्तरमगात् सूर्यः प्रासरत् पापवत् तमः ॥११५

याममात्रं स तत्रास्थाद् रौद्रध्यानी पुरोपरि ।
तद्ध्यानपाप्मनेवाथ शूच्यभेद्यं तमोऽभवत् ॥११६

पिहितासु प्रतोलीषु पुरे चाजनसञ्चरे ।
विध्यापितेषु दीपेषु जने सुप्तेऽतिनिर्भरम् ॥११७

आरक्षेषु प्रमत्तेषु स पापः पापजागरी ।
रथ्याकपाटछिद्रेण कोलवत् प्राविशत् पुरे ॥११८॥ युग्मम्

स्राक् कल्यपालचुल्लीतोऽग्निं गृहीत्वाऽग्निशर्मकः ।
द्वित्रेषु तृण्यास्थानेषु स्वगतावपि चिक्षिपे ॥११९

---

१०७.२. ° श्रया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः सद्यो हुतवहोऽभ्रंलिहज्वालमालितः ।
कुपितो राक्षस इव प्रासरत् परितः पुरे ॥१२०

अपि च —

उत्सर्पद्धूम्रधूम्याविकचकचशिखाचुम्बिताकाशदेशः
स्फायज्ज्वालाकलापप्रबलभुजलतालिङ्गिताशावकाशः ।
विष्वग्दंदह्यमानद्विपदगणचतुःपाद्गणारादिघोरः
क्रूरोदर्चिः पिशाचः कवलयितुमुदैत् तां पुरीं सर्वतोऽपि ॥१२१

कथञ्चिदुपशान्ते च तस्मिन्नाकस्मिकेऽनले ।
पौरा मिथोऽप्राक्षुरेष उत्पातः कथमुत्थितः ॥१२२

कोऽप्यूचे वेद्म्यहं वच्मि ब्रह्महत्याभयान्न तु ।
स एवारक्षकैर्बद्धो भीषितश्च ततोऽवदत् ॥१२३

अग्निशर्मद्विजेनैवं प्रदीपनमिदं कृतम् ।
स शोधितश्च लब्धश्च बद्धश्च नृपशासनात् ॥१२४

तादृक्पुरीदाहदूनै राजपुंभिः स पातकी ।
सिणेन संवेष्ट्य तैलैः सिक्त्वा गन्त्र्यां निवेश्य च ॥१२५

शिरःप्रदेशे प्रज्वाल्य भ्रमितः परितः पुरीम् ।
एवंकर्त्ता लप्स्यतेऽद इति घोषपुरःसरम् ॥१२६॥ युग्मम्

तया वेदनया रौद्रध्यानेनास्खलिताध्वना ।
नरके प्रथमे सोऽगात् क्रोधहिंसे प्रनर्त्तिते ॥१२७

सोत्राऽधिसेहे तद्दुःखं संख्यातीतमनेहसम् ।
यद्वर्णनेऽपि भीता न्वर्धपथाद्वलिता गिरः ॥१२८

नरकान्निर्गतः सोऽग्निशर्मजीवोऽत्र भारते ।
चम्पायां सोमदेवस्य दुर्गतस्य द्विजन्मनः ॥१२९

भार्यायां सोमडीनाम्न्यां रत्नडीति सुताऽभवत् ।
कुरूपा दुर्भगा मूर्खा मन्थरा रासभस्वरा ॥१३०॥ युग्मम्

उद्घाटिता दोषखान्यो गुणखान्यः पिधापिताः ।
विश्वसृष्टिकृता तेन मन्ये यस्या विनिर्मितौ ॥१३१

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

किञ्च —

दोषैः सर्वैः संप्रयुक्ता विप्रमुक्ताऽखिलैर्गुणैः ।
दरिद्रतेव तद्गेहे सा प्रत्यहमवर्धत ॥१३२

यद्वा —

तस्यां दरिद्रतायां च गुण एकोऽस्ति विश्रुतः ।
अचोरहरणीयत्वं गुणान्तरविजित्वरम् ॥१३३
तत्पुरीवासिना पुंसा दरिद्रेणापि केनचित् ।
दीयमानाऽपि न वृता तद्गुणग्रामवेदिना ॥१३४
सा च दुर्गतता चैव वर्धमानाधिकाऽधिकम् ।
अगृह्यमाणा केनापि बृहतीं वृद्धिमापतुः ॥१३५
सोमदेवस्ततो दध्यौ कोऽपि वैदेशिकः पुमान् ।
प्राप्यते बध्यते तस्य गलेऽसौ निःस्वतोऽपि च ॥१३६
तत्रान्यदा देशहिण्डी दुष्टभाषी कुदर्शनः ।
ब्राह्मणो दुर्गतश्चण्डादित्यनामा समागमत् ॥१३७
सोमदेवश्च तं वीक्ष्य वरं पुत्र्यनुरूपकम् ।
अभिवादकमित्यूचे त्वं ममाद्य गृहेऽतिथिः ॥१३८
सगौरवं भोजितश्च पुत्र्युद्वाहाय चार्थितः ।
चण्डोऽप्यचिन्तयदहो शेतां पयसि शर्करा ॥१३९
सोमेन सद्यः सा तेन स्वपुत्री पर्यणाय्यत ।
चण्डस्तया सहावात्सीत् कुटीरे श्वपचोचिते ॥१४०
पलालस्रस्तरे रत्वा शयित्वा श्लिष्टदोर्लतम् ।
प्रेमसंरम्भविश्रम्भात् प्रातः संलेपतुर्मिथः ॥१४१
चण्डादित्योऽभ्यधादादौ प्रिये मज्जीवितेश्वरि ।
स्वैरं याचस्व पुर्यात् ते मत्करस्वस्तरुर्मतम् ॥१४२
विजित्य रत्नडी व्रीडां स्माह पुंस्कीट कीकट ।
पूरय प्रथमं तावद्धृष्ट स्वस्य समीहितम् ॥१४३

चण्डादित्यः —

कान्ते मच्चिन्तया किं ते सामन्तामात्यभूपतीन् ।
अवलग्य श्रियं प्राप्य विधास्ये त्वाऽस्मि काञ्चनीम् ॥१४४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रन्नडी —

कुतो ममेदृग् भाग्यश्रीः कुतश्चेदृक्कला तव ।
यया सामन्तमुख्यांस्त्वमाराध्य श्रियमाप्स्यसि ॥१४५

चण्डादित्यः —

वीरविक्रान्तपादान्तेऽपूर्वा रेखाऽस्ति मेऽनया ।
राज्ञोऽमुकात् प्राप्य लक्षं दत्तं भुक्तं यदृच्छया ॥१४६

रन्नडी —

बके हंसकला चेत् स्याद्बंभ्रम्येत न पल्वले ।
वीरव्रतं चेत् ते भट्ट भट्टवत् किमटाट्यसे ॥१४७

चण्डादित्यः —

आ संघर्षविनष्टाऽसि निकृष्टा ब्रह्मघातिनी ।

रन्नडी —

किमाक्रोशसि निर्मान निराशाधम मामिति ॥१४८

चण्डादित्यः —

रे रण्डे रुष्टचामुण्डे ममापसर दृक्पथात् ।

रन्नडी —

आः पाप शापयोग्योऽसि संस्तराद्याहि दूरतः ॥१४९

इत्युक्त्वा सोमदेवस्य पुत्र्याऽसौ पार्ष्णिना हतः ।
चण्डेन चण्डकोपेन सा मूर्ध्न्यर्गलया हता ॥१५०
पलायिष्ट स्वयं चण्डादित्य आदित्यपूर्वतः ।
वैदेशिकानां धूर्तानां गतिरेषैव कश्मला ॥१५१
मन्येऽस्मि सोमा जीवोऽयं चण्डादित्यः कथञ्चन ।
तेन चक्रेऽग्निशर्मात्मरन्नडीवैरशोधनम् ॥१५२
तेनार्गलाप्रहारेण तत्करोटिरभज्यत ।
नानौषधैस्ततस्तस्याः स व्रणो रुह्यते स्म न ॥१५३
तद्वेदनाभराक्रान्तां रुदतीं रन्नडीं भृशम् ।
पितरौ तत्समीपस्थौ धीरयामासतुर्मुहुः ॥१५४

---

१४६.१. पादाते १५३.३. नानोषवै

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथान्येद्युस्तया साध्व्यो यान्त्यो गोचरचर्यया ।
दृष्ट्वाऽऽहूता वन्दिताश्च बहुमानपुरःसरम् ॥१५५

चिन्तितं चानया धन्या एताः पूज्या महात्मनाम् ।
अहं त्वधन्या पापा चेत्यथ ता भणितास्तया ॥१५६

यथेदृग्दुःखभाग् न स्यां परत्रास्मि तथाऽधुना ।
धर्मं शर्मकरं ब्रूत दयां कृत्वा ममोपरि ॥१५७

तस्यै जीवदयामूलं ता ऊचुर्धर्ममार्हतम् ।
रन्नडी स्माह दिशत पूज्या यन्मेऽधुनोचितम् ॥१५८

ततोऽर्हन्तः शरणं मे धर्मश्च तदुदीरितः ।
इति सामान्यतस्तस्यास्ताभिस्तत्त्वमदिश्यत ॥१५९

तद्ध्यानामृतपानेन मनुष्यायुर्निबध्य च ।
सुखेनैकाहसंन्यासात् परलोकमवाप सा ॥१६०

इतश्च भारतेऽत्रैव श्रीविनीतापुरी बभौ ।
यां श्रीयोऽकृत राज्याय श्रीयुगादिजगत्प्रभोः ॥१६१

यस्यां जनस्य वसतः प्रायः स्वर्गशिवश्रियौ ।
स्वयं स्वयंवरे यद्वत् पाणिपद्मे विलेसतुः ॥१६२

तत्रोदैत्पद्म ऐक्ष्वाकः पृथिवीपाकशासनः ।
यशोभिः शोभितं यस्य जगत् कर्पूरतामगात् ॥१६३

श्रीप्रियङ्गुलता तस्य पट्टराज्ञीपदं दधौ ।
यत्सौभाग्यश्रिया जज्ञे सा श्रीरश्रीसमानुमा ॥१६४

पतिप्रेमादिकं सर्वं मनोनयननन्दनम् ।
सा नन्दनं विना मेने निःसर्पिरिव भोजनम् ॥१६५

सुताय नानोपायेष्वनुपायेषु भवत्स्वथ ।
सा रामाकुलदेव्यग्रेऽस्थात् सप्ताहमनाशुषी ॥१६६

ततश्च ततसत्त्वेन तस्याः सद्यः प्रसेदुषी ।
अवदत् कुलदेव्येयं तव पुत्रो भविष्यति ॥१६७

तव प्रसादतो देवि भवतादेवमेव मे ।
देवीवाचं प्रतीष्येति देवीं देवी नमोऽकरोत् ॥१६८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः स रत्नडीजीवो मध्यस्थगुणयोगभाक् ।
मुक्ताहारस्तदुत्सङ्गे पुत्रत्वेन व्यजृम्भत ॥१६९

कालेन पुत्रो जज्ञेऽस्या जज्ञे वर्धापनं महत् ।
रामया दत्त इत्यस्य रामदेवोऽभिधाऽभवत् ॥१७०

क्रमेण वृद्धिमानेष कलाग्रहणहेतवे ।
कलाचार्यायोपनिन्ये राज्ञा सह कुमारकैः ॥१७१

अत्रान्तरे चिरात् प्राप्य तं कुमारं स्वमास्पदम् ।
क्रोधहिंसे प्रनृत्यन्त्यौ सममेवाधितस्थतुः ॥१७२

ततश्चाकारणात् क्रुद्धः कुमारोऽध्यैष्ट न स्वयम् ।
अन्यांश्चाधीयतोऽरौत्सीत् विकथाकलहादिभिः ॥१७३

स्वोदिताकारिणश्चैष सहाध्यायिकुमारकान् ।
चपेटया पट्टिकया यष्ट्या मुष्ट्याऽवधीत्तराम् ॥१७४

ततश्च तमुपालब्धोपाध्यायः सामसूक्तिभिः ।
कुमार न हि ते न त्वन्नाम्ना सदृशमीदृशम् ॥१७५

अरे द्विजन्मन् वृद्धोक्ष मत्तस्त्वं पण्डितः कियत् ।
इति दुर्भाष्य हा सैष तमप्याहंश्चपेटया ॥१७६

ईदृक्स्वभावः श्रीदेवीपुत्रः श्रीराजवल्लभः ।
नैष शिक्षापनायोग्य इति तूष्णीं व्यधाद्गुरुः ॥१७७

गुरुणोपेक्षितः सैष कुमारः स्वैरचार्यभूत् ।
तच्चान्यैः स्वस्वमातॄणां राज्ञश्चाभिन्यवेद्यत ॥१७८

सम्यग् निश्चित्य तद्राज्ञोपाध्यायो रामदेवयुक् ।
आहूयाप्रच्छि वत्सः किं कलापारगतोऽजनि ॥१७९

गुरुर्जगौ स्वयं वेत्ति देवो विष्वग्विलोचनः ।
ज्ञाताकूतस्ततो भूपः सत्कृत्यैनंविसृष्टवान् ॥१८०

रामदेवस्तु राट्पार्श्वे दीव्यति स्म दिवानिशम् ।
उपायम्यत समये राजसामन्तकन्यकाः ॥१८१

१७५.३. त्वनाम्ना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो विभिन्ने प्रासादे द्युसदां च दुरासदे ।
ताभिः सममरंस्तासौ करेणुभिरिवद्विपः ॥१८२

विध्वा धनुर्गोलिकाभिः पयस्कुम्भान् स दुर्मदी ।
पानीयहारिका निन्ये धाराधार्मिकविभ्रमम् ॥१८३

यं यं खल्वाटमद्राक्षीच्चरन्तं राजवर्त्मनि ।
तं तमाहन् स गोलाभिः करकाभिरिवाम्बुदः ॥१८४

राजपार्श्वे नित्यरुष्टः सोऽमात्यानप्युपाहसत् ।
सामन्तांश्च तिरोऽकार्षीत् परीवारममारयत् ॥१८५

राजपाट्यां व्रजन् सैष हस्तिनोपाद्रवत्पुरीम् ।
न कञ्चिद् वा सुखाचक्रे राड्भिया तु न कोऽप्यवक् ॥१८६

राज्ञाऽपि राज्ञीदाक्षिण्यात् स नाशिक्षि कुशिक्षितः ।
वन्येभवत् ततः सोऽभूत् सर्वथाऽपि निरङ्कुशः ॥१८७

किं बहुना —

सामन्तान् सचिवान् बन्धून् पौरान् जानपदानपि ।
एष ओषामास नित्यं प्रदीपनकवह्निवत् ॥१८८

राट्सौधेऽथ विशन्तं मन्त्रीन्द्रं बुद्धिसागरम् ।
गोलया काणयामास खरम्यां बा न काऽपि वा(?) ॥१८९

निवृत्य स गृहे गत्वा मन्त्रयामास मन्त्रिराट् ।
अनेन क्षेप्स्यते राज्यं तुरङ्गेणेवं शृङ्गिणा ॥१९०

तन्निग्राह्योऽवश्यमेष संप्रधार्यैति मन्त्रिणा ।
राजदायादसामन्तैर्विदधे सह संहतिः ॥१९१

ज्ञात्वा कथञ्चित् तन्मन्त्री सुबुद्धिः पद्मभूभुजे ।
एकान्ते सर्वमूचेऽत्रोपायं देव विचिन्तय ॥१९२

राजा —

सुबुद्धे नात्र सामर्थ्यं साम्प्रतं दानदण्डयोः ।
यतोऽनेन कुमारेण सर्वं राज्यं रिपूकृतम् ॥१९३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत् त्वमेव महाबुद्धे यत् कृत्यं मे निवेदय ।
राज्ञां कृच्छ्रार्णवेऽभ्यर्णे कर्णधारा हि मन्त्रिणः ॥१९४

सुबुद्धिः –

देवनीतिरियं धुर्यः कुमारः पञ्जरोदरे ।
राज्ञोपचर्यो राज्यार्थी कार्षीन् माऽकाण्डविड्वरम् ॥१९५
रामदेवकुमारेऽप्यनर्थागारे ततोऽस्तु तत् ।
स्वामिन्नेतत् प्रियो भूत्वा मैव सर्वं विनीनशत् ॥१९६

राजा –

श्रीप्रियङ्गुलतादेवी कुमारस्नेहविह्वला ।
एतत् प्राणप्रहाणेऽपि कथञ्चन न मंस्यते ॥१९७

सुबुद्धिः –

श्रीदेवीमवधीर्यापि कार्यमेतन्महीपते ! ।
येन देवाय राज्याय प्रजाभ्यः स्वस्ति जृम्भते ॥१९८
श्रूयतामत्र दृष्टान्तः कोऽप्यासीत् पृथिवीपतिः ।
वने सोऽश्वहृतोऽयासीदवरूढस्तुरङ्गमात् ॥१९९
सरस्तीरे वटतले यावद् विश्राम्यति क्षणम् ।
सरसो निर्गता तावत् काचित् पातालकन्यका ॥२००
राज्ञः पश्यत एवासौ सद्योऽजायत सर्पिणी ।
वटकोटरतः सर्पो गोनसश्च विनिर्ययौ ॥२०१
तौ च द्वावपि रेमाते राज्ञा क्रुद्धेन ताडितौ ।
कशया रे दुराचारौ कुरुथोऽकर्म मत्पुरः ॥२०२
वियुज्य गोनसो नष्टस्तत्रैव वटकोटरे ।
अन्या सरसि राज्ञश्च ह्यजायत कौतुकम् ॥२०३
राज्ञोऽश्वखुरमार्गेण सैन्येनाथ समेयुषा ।
सार्धं नृपः पुरं प्राप जज्ञे वर्धापनं महत् ॥२०४
विसृज्यामात्यसामन्तान् प्रदोषे वासवेश्मनि ।
विशश्राम महादेव्या सह सर्वंसहापतिः ॥२०५



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सा च पातालदिव्यस्त्री पराप्ता पत्युरन्तिके ।
आख्यद् देवाद्य सरसि मज्जितुं प्राप्तवत्यहम् ॥२०६

अमुना प्रार्थिता राज्ञाऽनिच्छन्ती कशया हता ।
स क्रुद्ध आययौ यावत् तावद् भूपः प्रबुध्य सः ॥२०७

राज्ञ्यै तडागवृत्तान्तमामूलान्तमचीकथत् ।
स च देवस्तदा काम्यं प्रससाद नृपोपरि ॥२०८॥ युग्मम्

ततः शरीरचिन्तार्थमुत्तस्थौ पृथिवीपतिः ।
प्रत्यक्षीभूय देवोऽवग् राज्ञो स्वागमकारणम् ॥२०९

त्वदुक्तिश्रवणाद् भूप ! तुभ्यं तुष्टो वरं वृणु ।
भूपोऽवदत् सर्वसत्त्वभाषाविज्ञं विधेहि माम् ॥२१०

एवमस्तु परमन्यस्याख्याने मृत्युरेव ते ।
एवं राज्ञे वरं दत्वा देवः स्वास्पदमासदत् ॥२११

पात्रभृत्यन्यदा देव्यां श्रीभूपे स्वं विलम्पति ।
आनयामुं मेऽङ्गरागं पतिमूचे गृहोलिका ॥२१२

सोऽवग् मार्येऽस्मि नानेष्ये मुहुस्ताविति जल्पतः ।
राजाऽहसद् देव्युवाच हसितं केन हेतुना ॥२१३

राजाख्यदेवमेवेति देव्युचेऽवश्यमादिश ।
राजोचेऽपाय आख्याने ब्रूहीत्येवाह सा कुधीः ॥२१४

बहिश्चितां कारयित्वा देव्या सह गजस्थितः ।
दानं ददानः सपरीवारो भूपः पुरान्निरैत् ॥२१५

तदा छाग्याऽयाचि भर्ताऽन्धकूपतटवल्लरीम् ।
सोऽवदल्लातुभीशे न सोचे तन्नास्मि ते प्रिया ॥२१६

छागोऽवदत् किमनेन सदृशोऽहं महीभुजा ।
योऽन्यराज्ञीसम्भवेऽपि म्रियतेऽस्याः कृते मुधा ॥२१७

पशुस्तदेष नाहं मे त्वां विनाऽन्या भविष्यति ।
राज्ञाऽचिन्ति यदेषोऽपि जानात्येतदहं न हि ॥२१८

---

२११.३. एव. २१२.१. °त्यनृदा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्यावृत्तस्ततो राजा जातः कल्याणभाजनम् ।
देवी ह्यन्यत्र गौरव्या न तु राज्यात्मसंशये ॥२१९
तद्देव देवीकुमारौ कुरु पञ्जरचारिणौ ।
भवत्कीर्तिप्रतापौ स्तां जगत्पञ्जरचारिणौ ॥२२०
प्रतिश्रुतं च तत् सर्वं श्रीपद्मेन महीभुजा ।
सुबुद्धीनां सुभक्तानां वचः को नानुमन्यते ॥२२१
इत्येकान्तवचः सर्वं द्वारदेशस्थितात्मना ।
आकर्णितमकर्णेन रामदेवेन पाप्मना ॥२२२
ततः समुच्छलत्क्रोधधूमध्वजकरालितः ।
संतप्तताम्रताम्राङ्गः स कृतान्तोऽभ्यधादिति ॥२२३
दुर्बुद्धे यदि दुर्बुद्धिविषं तेऽन्तरजायत ।
तत् किं दुरात्मंस्तेनामुं वृद्धं मूढममू मुहः ॥२२४
दुर्बुद्धिविषदानस्य फलमद्यैव भुंक्ष्व तत् ।
इत्युक्त्वासौ कुधीः क्षुर्या सुबुद्धिं प्राहरद् हृदि ॥२२५
आः पाप जगतीताप ग्रीष्मभीष्मदवानल ।
भक्तियुक्ते नित्यभृत्ये पापं किमिदमादधाः ॥२२६
इति ब्रुवन्तं स्वं तातमाजन्माऽप्युपकारिणम् ।
सर्वशत्रुः स कुपुत्रोऽसिपुत्र्याऽहन् यकृत्यलम् ॥२२७॥ युग्मम्
ततः कलकलो जज्ञे हा हा सांराविणोल्वणः ।
सा प्रियङ्गुलताऽऽगत्य सर्वं दृष्ट्वेदमभ्यधात् ॥२२८
हा धिग् धिक् कर्मचण्डाल भुवः काल करालदृक् ।
निकृष्ट धृष्ट पापिष्ठ पितरीदं किमाचरः ॥२२९
त्वं मे किमागमः कुक्षौ तत्रैव गलितो न किम् ।
न च्युतः किमनिष्पन्नो य एवं तातमावधीः ॥२३०
इति ब्रुवाणां जननीं जननीचः स पातकी ।
कृपाण्या कृपया मुक्तो जघान कुलपांसनः ॥२३१
ततस्तेभ्यः प्रहतेभ्यो रक्तकुल्या त्रिधाऽवहत् ।
रक्तनद्यो नरकेभ्य इव तं ह्वातुमैयरुः ॥२३२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मर्मघातात् ते त्रयोऽपि सहसैव विपेदिरे ।
अधितष्ठौ स्वयं राज्यमथासौ निन्द्यचेष्टितः ॥२३३

ततश्च स स्वयं राजा दायादैः पर्यरुध्यत ।
उपैक्ष्यत च सामन्तैर्बुद्धिसागरभेदितैः ॥२३४

दायादा दानसन्मानैः सामन्तान् स्ववशे व्यधुः ।
ततश्चाजय्यतां प्रापुस्ते प्रक्षरितसिंहवत् ॥२३५

गेहेनर्दी रामदेवोऽवदद्राज्ये स्थिरीकृते ।
एतान् दायादसामन्तान्निग्रहीष्ये पशूनिव ॥२३६

पुरीपरिसरे योद्धुं दायादा उपतस्थिरे ।
रामदेवोऽपि संनह्य सबलः सम्मुखोऽभवत् ॥२३७

ततो द्वयोरपि तयोः सैन्ययोः प्रजिगीषतोः ।
जज्ञे समरसम्मर्दो रामरावणयोरिव ॥२३८

तथा हि —

पत्तिः पत्तिमिभस्त्विभं हयवरोऽश्वं स्यन्दनः स्यन्दनं
सद्योऽभ्यैत्तन (?) उद्धता भुजभृतः स्वस्वेशराज्येच्छवः ।
प्रासाप्रासि धनुर्धनुष्यथ भुजाभुज्यस्यसि प्राहरन्
पत्त्यश्वेभरथप्रवाहसुभगा रक्तापगाश्चावहन् ॥२३९

भज्यमानं निजं सैन्यं वीक्ष्य दिक्षु क्षिपन् दृशौ ।
सर्वस्वेनापि रामः स स्वप्राणत्राणमैहत ॥२४०

ततः प्राणप्रियीभूय प्रहारभरजर्जरः ।
मुक्त्वा सर्वस्वमश्वेन सोऽनश्यत् कौरवेशवत् ॥२४१

विजित्य सर्वं दायादैस्तस्य राज्यमधिष्ठितम् ।
स च भ्रान्त्वा विदेशेषु रामदेवोऽयमैदिह ॥२४२

सोऽथेदं भववृत्तान्तसंवादेन भवान्तरम् ।
तथेति विमृशन्मूर्च्छाव्याजात् तत्र किलागमत् ॥२४३

शीतोपचारतो मूर्छाविरामेऽचिन्त्यवीर्यतः ।
दुष्कर्मक्षयतस्तस्य जातिस्मृतिरथाभवत् ॥२४४

२३३.४. निद्य°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोऽयं पद्मोद्भवो वह्नेर्दृषदः पल्लवोदयः ।
तस्यापि रामदेवस्य यज्जातिस्मृतिरभ्युदैत् ॥२४५
स्वप्रत्ययदृढीभूतगुरुवाक्प्रत्ययोऽथ सः ।
श्रीसुधर्मस्वामिपादान् प्रणम्येति व्यजिज्ञपत् ॥२४६
भगवन्नेवमेवैतन्नात्र संशीतिसम्भवः ।
चेद्योग्योऽस्मि भवाम्भोधेस्तन्निस्तारय सुप्रभो ! ॥२४७
गुरुः —
सौम्यानेकजनुर्जन्यकर्मशैलेषु वज्रति ।
प्रादुःषद्दुःखदावार्चिःप्रशमेऽम्भोदवृन्दति ॥२४८
संसारापाराकूपारनिस्तारे यानपात्रति ।
पञ्चमहाव्रतीरूपा जैनी दीक्षा न संशयः ॥२४९
रामः —
भगवन् वृत्तवृत्तान्त इव [मे] सांप्रतिक्यपि ।
चेतोवृत्तिः समक्षा वः प्रसीदत यथोचितम् ॥२५०
गुरुः —
राजामात्यजनपदाविरोधी दीक्षणोचितः ।
त्वं तु नेदृक् परमतिशयिनामुचितोऽस्यपि ॥२५१
यत्तेऽद्य मम वाङ्मन्त्रैः कुत्पिशाचः पलायत ।
हिंसापिशाच्यपि क्रूराऽन्ये च दुष्कर्मभूतकाः ॥२५२
जातिस्मरणशङ्खेन हृद्भित्तिस्तेऽमलीकृता ।
चारित्रचित्रावताराधिकारोऽस्ति तदत्र भोः ॥२५३
रामः —
अनुगृह्णन्तु मां पूज्याः कालक्षेपो न युज्यते ।
अत एव पूज्यकल्पपादपैर्मम सङ्गमः ॥२५४
गुरु :--
मधुवन् मधुमासोऽपि व्रते नार्वाग्दृशां मतः ।
कदाचनापि नाकालः प्रत्यक्षज्ञानिनां पुनः ॥२५५
चैत्रेऽप्यस्मै ततो दीक्षां दित्सून् ज्ञात्वा गुरून् नृपः ।
व्यज्ञापयत् प्रभोऽमुष्य दीक्षायै कुर्महे महः ॥२५६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ तूष्णीं स्थिते सूरावूचे श्रेष्ठीपुरन्दरः ।
राजन् द्रव्यस्तवाख्यानेऽप्याहुः पूज्या न कुर्विति ॥२५७
राजा विजयसेनोऽथ रामदेवमदोऽभ्यधात् ।
कञ्चित् कालं प्रतीक्षस्व यत् ते कुर्मो व्रतोत्सवम् ॥२५८
देवाविरत्या दुष्कर्म कारयन्त्या व्यगोपिषि ।
एकं ततो मेऽन्यद्युष्मत्प्रार्थनाभङ्गतो भयम् ॥२५९
तत् किं वच्मीति तेनोक्ते मन्त्र्यूचे जयशासनः ।
योगत्रये मनो धुर्यं तेन त्वविरतिर्न ते ॥२६०॥ युग्मम्
किञ्चैवं विहिते राज्ञोऽनुग्रहः पूरनुग्रहः ।
स च स्वानुग्रहस्तस्मान्मन्यतां मन्यते स्म सः ॥२६१
जयकुञ्जरमारोप्य रामदेवं ततो नृपः ।
ज्येष्ठं सहोदरमिव निनाय निजमन्दिरम् ॥२६२
अभ्यज्य राजस्नेहेन स्नेहेनेव वपुष्मता ।
उद्वर्त्य चन्द्रादिचूर्णैश्चूर्णैरिव शिवंकरैः ॥२६३
संस्नाप्य गन्धोदकैश्च शान्ताद्भुतरसैरिव ।
धर्मध्यानरसेनैवालिप्य गोशीर्षचन्दनैः ॥२६४
संवस्त्र्य दिव्यवासोभिर्यशोभिरिव निर्मलैः ।
तत्तेजःस्तबकाकारैः स्रजयित्वा च चम्पकैः ॥२६५
सर्वाङ्गीणैरलङ्कारैर्गुणैरिव विभूष्य च ।
ऐरावणाग्रजमिवाधिरोप्य जयकुञ्जरम् ॥२६६
विराजमानं छत्रेण मित्रेणेव शरद्विधोः ।
चामराभ्यां वीज्यमानं वीचिभ्यां नु नभोधुनेः ॥२६७
प्रतितीर्थं स्थाप्यमानं सङ्गीतैः स्तम्भनैरिव ।
भुवि धन्योयमेवेति स्तूयमानं च नागरैः ॥२६८
भट्टथट्टैः पठ्यमानं गीयमानं च गायकैः ।
पौरीभिः कीर्यमाणं च प्रसूनैरक्षतैरिव ॥२६९
श्रीरामदेवं विजयसेनराट् सपरिच्छदः ।
कौशाम्ब्यां भ्रमयामास भागधेयमिवाङ्गवत् ॥२७०॥

अष्टभिः कुलकम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं स्वसौधे ततो नीत्वा कृतश्रीदेवतार्चनः ।
तदीयपाणिपद्मेन प्रतिलाभ्य च सन्मुनीन् ॥२७१

विमानितविमानेऽथ राजभोजनमण्डपे ।
अगण्यपुण्यकूटे तु सिंहासने निवेश्य च ॥२७२

चर्व्यचूष्यलेह्यपेयाद्याहारममृतोपमम् ।
सगौरवं महाराजो भोजयत् साधर्मिकमात्मना ॥२७३॥

त्रिभिर्विशेषकम्

भोजनानन्तरं ताम्बूलाद्यैः सम्मान्य सादरम् ।
दानं प्रदेहि देहिभ्य इति राज्ञोक्त आह सः ॥२७४

श्रीराजेन्द्रमहादानमभीदानं प्रकीर्त्यते ।
तच्च दत्तं मया पूर्वमन्यच्चाचारमात्रकम् ॥२७५

सविस्मयं नृपो मन्त्रिमुख्यानां मुखमैक्षत ।
पुरोधाः शूर ऊचेऽथ निरीहाणामियं गतिः ॥२७६

धनः सार्थप आर्हेतं किञ्चित् स्वाभीष्टमादिश ।
विहस्य रामदेवोऽवक् श्रूयतां मन्मनीषितम् ॥२७७

सर्वचैत्यार्चनं बन्दिमोक्षो मारिनिवारणम् ।
राजोचेऽदः प्रगे कार्यं वीर रात्रिं तु जागृत ॥२७८

द्वितीयेऽह्नि स्वेष्टं सकलमपि निर्माप्य सहसा
जयेनारूढः श्रीनृपसुतधृतच्छत्रचमरः ।
स्फुरद्दिव्योल्लोचे प्रतिपदमणीतोरणघणे
जिनागारे रामश्चरणकमलां बोढुमगमत् ॥२७९

सुधर्मस्वामी च प्रपठितमहामङ्गलकल-
द्युसद्वर्गासेव्यः सपदि मुदितः सङ्घसहितः ।
जिनागारे तत्र त्रिदशपुरसिद्धालयकृता-
नुकारे प्राणंसीत् प्रभुऋषभदेवं प्रथमतः ॥२८०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीमत्सङ्घयुतः प्रवन्द्य विधिना देवान् शितौ चैत्रिके
पञ्चम्यां गुरुमैत्रभे च मिथुने लग्ने गुरौ लग्नगे ।
षष्ठे श्वेतरुचौ तृतीयइनभुव्येकादशे भास्करे
सूरिर्दीक्षयति स्म धूतवृजिनं तं रामदेवं मुदा ॥२८१

इति श्रीवर्धमानसूरिशिष्यावतंसवसतिमार्गप्रकाशकप्रभुश्रीजिनेश्वरसूरिविरचित-प्राकृतश्रीनिर्वाणलीलावतीमहाकथेतिवृत्तोद्धारे **लीलावतीसारे** जिनाङ्के **रामदेवराजकुमार-क्रोधहिंसा-कुटुम्बाचारविस्तार-व्यावर्णनो** नाम द्वितीय उत्साहः * ॥

---

* ग्रं. २९२ ॥ छ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## तृतीय उत्साहः

अथाऽपरेद्युरुद्याने सुधर्मस्वामिसद्गुरुम् ।
नमस्कृत्यामात्यमुख्यै राजन् राजा व्यजिज्ञपत् ॥१

प्रभो मानमृषाभाषाकुटुम्बस्य विजृम्भितम् ।
विजृम्भते मनः श्रोतुं सम्प्रति प्रतिपाद्यताम् ॥२

सूरिरूचे श्रीविजयसेन श्रीजयशासन ।
सूर पुरन्दर धनदेव सम्यग् निशम्यताम् ॥३

गर्वपर्वतमारूढो मृषादूषितचेतनः ।
उच्चैस्तरान् लघिष्ठोऽपि तृणायापि न मन्यते ॥४

तथा हि –

जात्यान् जातिविहीनोऽपि विमानयति मानभाक् ।
महाकुलान् न्यक्कुलोऽपि कलङ्कयति केलिना ॥५

कामरूपान् कुरूपोऽपि दर्पान्धः प्रजुगुप्सते ।
तृणवत् कणमन्दोऽपि विब्रूते बलशालिनः ॥६

निरक्षरोऽप्यभिमानी निह्नुते ज्ञानभास्करान् ।
विकृष्टतपसोऽम्भोधीन् धान्यकीटोऽपि निन्दति ॥७

नानालब्धिनिधानेभ्यो लब्धिवन्ध्योऽप्यसूयति ।
दारिद्र्यदुःखदग्धोऽपि हसत्यैश्वर्यशालिनः ॥८

यं यं गुणं गुणवतामहङ्कारी करोत्यधः ।
तेन तेन गुणेनैष हीयते बहुशो भवे ॥९

किं बहुना ? –

मातुः पितुः स्वसुर्भ्रातुः स्वजनस्य जनस्य च ।
गृह्णाति न गुणं क्वापि स्वाहङ्कारकदर्थितः ॥१०

यं दूषयत्यसौ तस्य पुत्रैर्मित्रैश्च बान्धवैः ।
निवार्यमाणः कलहायते प्रहरते च तान् ॥११



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्पुत्राद्या निवर्तन्ते चेत् तदा जितकाश्यसौ ।
लब्धप्रसर आक्रोशत्युत्तमानपि दुर्मदी ॥१२

ततस्तद्भृत्यमित्राद्यैः कुट्टयते बध्यते च सः ।
तथाऽपि दुर्मषन्नेष क्षिप्यते चारकोदरे ॥१३

तत्रापि च मदाध्मातो गुप्तिपानपि निन्दति ।
कदर्थितश्च तैर्याति नरकेऽहंयुतायुतः ॥१४

ततः कथञ्चनोन्मज्ज्य चेज्जन्म लभते नृषु ।
तथापि हीनजात्यादिपङ्किलः किल जायते ॥१५

प्राग्वदभ्याख्यानशूरोऽभिमानोद्धुरकन्धरः ।
पितृबन्धुसुहृत्स्वेष न स्निह्यति कथञ्चन ॥१६

सर्ववैरी पितृघाती सर्वस्वापहृतौ क्षितौ ।
बम्भ्रम्यते रङ्क इव यद्वदेष सुलक्षणः ॥१७

नैष प्रभु सभाम्भोधावस्माभिरुपलक्ष्यते ।
किं दुष्कृतं च चक्रेऽसौ स्पष्टमाख्याहि सुप्रभो ॥१८

इत्युक्ते भूभुजा सूरिरुचे यस्तव पृष्ठतः ।
मदाध्मातः सदोद्ग्रीवः स्वदोर्वीक्षाकुलेक्षणः ॥१९

नाम्ना सुलक्षणो निर्लक्षणः सैष विबुध्यताम् ।
यच्चासौ दुष्कृतं चक्रे तत् सम्प्रत्यभिधीयते ॥२०॥ युग्मम्

मरुतो दक्षिणा यत्र सुमनःश्रेणयोऽद्भुताः ।
राजाऽवदातरुचिभाग् विमलाश्चाम्बरश्रियः ॥२१

तदस्ति भारते क्षेत्रे सदापिकविराजितम् ।
वसन्तवज्जनानन्दि श्रीवसन्तपुरं पुरम् ॥२२॥ युग्मम्

तत्र सिद्धार्थनामाऽभूद्राजा यस्यात्मसम्भवः ।
वर्धमानो यशोराशिरगीयत जगत्त्रये ॥२३

सौभाग्यभाग्यकमलावती श्रीकमलावती ।
तस्याग्रमहिषी जज्ञे याज्ञसेनी भिदान्तरम् ॥२४

---

१२.२. जितकाम्यसौ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र सौजन्यजन्युर्वी दाक्ष्यदाक्षिण्यसागरः ।
श्रेष्ठी सागरदत्तोऽभूद् भूषणं पूर्मृगीदृशः ॥२५
विकस्वरसरोजन्ममनोज्ञकरपल्लवा ।
प्रियाऽभूत् कामजननी श्रीस्तस्य श्रीपतेरिव ॥२६
तयोश्च तनयो जज्ञे मनोरथशतार्थितः ।
कामानुरूपरूपश्रीश्चक्रे वर्धापनं महत् ॥२७
हूतस्तदैव दैवज्ञो ज्ञातपुत्रजनुःक्षणः ।
सम्प्रधार्य विषण्णात्मा धूनं धूनं शिरोऽभ्यधात् ॥२८
एष क्रूरग्रहैर्दृष्टे नक्षत्रे गर्भमागतः ।
जातस्तु भो कुजाश्लिष्टेऽर्कदग्धे राहुलत्तिते ॥२९
लग्ने तु शनिना सर्वदृष्ट्या दृष्टे ततोऽसकौ ।
आरतः पञ्चवर्ष्यास्ते कुलं निष्ठापयिष्यति ॥३०॥ युग्मम्
ततः श्रेष्ठ्याकुलोऽवादीदस्ति दैवज्ञ किञ्चन ।
शान्तिकाद्यत्र येनेदमरिष्टं प्रतिहन्यते ॥३१
सोऽवदत् शान्तिकर्मादि ध्रुवभाविन्यकर्मठम् ।
श्रेष्ठ्यूचे सुधियोऽवश्यभाव्यपि घ्नन्ति तद्यथा ॥३२
क्षितिप्रतिष्ठितपुरे जितशत्रुर्महीपतिः ।
श्रीबुद्धिसागरो मन्त्री सागरः प्रतिभाश्रियाम् ॥३३
सुबुद्धिस्तनयस्तस्यान्यदा सदसि भूभुजः ।
आगन्नैमित्तिकः कोऽपि तीताऽनागतवर्तिवित् ॥३४
जयदेवेत्यथाशिष्योपविष्टो भूभुजोदितः ।
ज्ञानं क्व तेऽवक् स देव भूते भवति भाविनि ॥३५
ततोऽन्तिकस्थे सचिवे स राज्ञोचेऽत्र संसदि ।
कस्य किं भावि पक्षान्तः शुभाशुभमुदीरय ॥३६
विमृश्य ज्ञान्यवग् देव प्रकाशं भण्यते भण ।
सचिवेशकुटुम्बेऽत्र पक्षान्तर्मारिरेष्यति ॥३७
सभयं भूधवोऽवादीत् कुतः सा सोऽवदत् प्रभोः ।
मंत्री नः पितृवन्मान्यो नापमान्यः कदापि भोः ॥३८

३५.१. दैव.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानिन् स्वज्ञानमादायोत्तिष्ठ तत्तिष्ठ मा क्षणम् ।
राज्ञेत्युक्तो निमित्तज्ञो विषण्णः सहसोत्थितः ॥३९

विषेदुर्मन्त्रिमित्राणि तदमित्राश्च पिप्रियुः ।
राजान्तःसौधमध्यास्त मन्त्री तु स्वगृहं ययौ ॥४०

मन्त्रिणा गुप्तमाहूय पृष्टोऽरिष्टस्य कारणम् ।
नैमित्तिकोऽवदन् मन्त्रिन् सुबुद्धिस्तव नन्दनः ॥४१

सत्कृत्य नान्यस्य कथ्यमिदमित्युपरुध्य च ।
ज्ञानिनं व्यसृजन्मन्त्री तं च नन्दनमाह्वयत् ॥४२

पिता —

वत्स ! नैमित्तिकेनोक्तस्त्वन्निमित्तः कुलक्षयः ।
तद् ब्रूहि केन विधिना विधिः प्रतिविधीयताम् ॥४३

पुत्रः —

त्यजेदेकं कुलस्यार्थे इति नीतेर्भवद्गिरा ।
नामशेषी भवाम्यस्तु कुलस्य परितः शिवम् ॥४४

पिता —

वत्साधत्से मद्वचश्चेन्न कस्याप्यशिवं तदा ।
तुर्यबुद्ध्या प्रतिबद्धो विधिष्टगमगेक्षताम् ॥४५

पुत्रः —

त्वद्वचस्तात नाधास्ये कस्याधास्ये तदा ननु ।
मत्प्राणैरथ धीबाणैर्दुर्विधिं रुंद्धि शाधि नः ॥४६

पिता —

साधु साधूदितं वत्स वत्सल स्वकुलश्रियाम् ।
एवमेवमुपायेन तीर्णोऽयमशिवार्णवः ॥४७

ततश्च —

कारयित्वोरुमञ्जूषां मरुतोप्यप्रवेशनाम् ।
मन्त्री तत्रासयत् पुत्रं सार्धं जलफलादिभिः ॥४८

लोहपट्टैर्दृढं बद्ध्वा तालयित्वाष्टतालकैः ।
पुंभिरुत्पाट्य राट्सौधे नीत्वा मन्त्री नृपं जगौ ॥४९॥ युग्मम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वस्वं मे त्वद्दृष्टग्रे पक्षं रक्ष्यं स्वयामिकैः ।
तावत् स्वावास एवावस्थास्ये नैष्यामि वोऽन्तिके ॥५०
इति राज्ञाङ्गीकृतेऽथ स्वौकोदाराणि बंधुभिः ।
नियन्त्र्य वेष्टयित्वा च प्रवीरैः स्वैकभक्तिभिः ॥५१
चैत्येष्वर्चां विधाप्योच्चैः सकुटुम्बोऽतिजागरी ।
धर्मध्यानेन मन्त्र्यस्थात् ततश्चाह्नि त्रयोदशे ॥५२
राट्सौधेऽभूत् कलकलोऽयं सुबुद्धिरमात्यसूः ।
रत्नावल्या राजपुत्र्या वेणीं छित्वा स्वधाम्न्यगात् ॥५३
रुदती सा छिन्नवेणिर्गत्वा राज्ञेऽभ्यधात् पितः ।
प्रार्थिताहमनिच्छन्त्या छिन्ना वेणिर्ममामुना ॥५४
क्रुद्धोऽथ यमवद्राजा विज्ञप्तो भ्रष्टमन्त्रिणा ।
मोहिलेन चिरं स्वामी जीवन्त्यायुर्बलात् (?) परम् ॥५५
यच्चक्रे मन्त्र्यसौ पापस्तदहं वेद्मि मूलतः ।
अथ राज्ञा स एवोक्तः पापोऽसौ स्राग् निगृह्यताम् ॥५६
ततः ससैन्यः सोऽधावन् मन्त्रिसैन्यं च सज्जयभूत् ।
सुबन्धुनाऽथ सुहृदा मन्त्री भूपं व्यजिज्ञपत् ॥५७
प्राग्भक्त्यैवैकवारं मे सुस्वामिन् ! देहि दर्शनम् ।
सर्वस्वं मे येन याति राट्कोशे याति नान्तरा ॥५८
राज्ञा रणे निषिद्धेऽथ स्वपुंभिर्गर्भितो गतः ।
राज्ञः समक्षं मन्त्री तां मञ्जूषामुदघाटयत् ॥५९
ततस्तदन्तः प्रैक्षन्त कृपाणीवेणिपाणिकम् ।
राजा मन्त्री यामिकाश्च सुबुद्धिं मन्त्रिनन्दनम् ॥६०
मन्त्र्यूचे यामिकक्षूणं तेऽप्यूचुर्न मनागपि ।
राट् विस्मितः स्माह मन्त्रिन्निन्द्रजालमिदं किमु ॥६१
मन्त्र्यूचे देव ! दैवेन देवेन दानवेन वा ।
प्रतिकूलमिदं चक्रेऽनुकूलं तु प्रभोर्दृशः ॥६२
तत्त्वं ब्रूहीति राज्ञोक्ते यथावद्धीसखोऽभ्यधात् ।
धीरङ्गुनं धृतं देव धाम्नाऽस्खलिहतिर्विधेः (?) ॥६३

५०.४. नेष्यामि.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धूनं धूनं शिरश्चित्राद्राज्ञा श्रीसचिवेश्वरः ।
ईश्वरत्वं परं निन्ये चन्द्रमौलिप्रदानतः ॥६४
तद्दैवज्ञ दैवमेवमुपायेनानुकूल्यते ।
सोऽवक् श्रेष्ठिस्तव गृहे श्रेयः शान्तिर्विजृम्भताम् ॥६५
द्वादशाहे व्यतिक्रान्ते कान्ते चन्द्रबले शिशोः ।
वसुन्धर इति नाम श्रेष्ठी श्रेष्ठमतिष्ठपत् ॥६६
कियत्यपि गते काले कालेनेव निरोपितः ।
किराजेवातिदुष्कालः प्रासरत् तत्र नीवृति ॥६७

तथा हि —

घना न ववृषुस्तावद् वृष्टौ बीजानि नोदगुः ।
उद्गतानीतिभिर्जग्धान्यजग्धान्यफलन् न हि ॥६८
क्षुधार्त्तदुःखार्त्तजनं निर्जलान्नफलांशुकम् ।
नरकावासदेश्यं तद्वसन्तपुरमप्यभूत् ॥६९

अपि च —

दातारोऽपि हि याचकत्वमगमन् द्रव्येश्वरा निःस्वतां
ब्रह्मस्कन्दमुकुन्दशम्भुविमुखा धान्यं प्रदध्युर्जनाः ।
हा व्यक्रीणत सूर्पकोणकगतेनान्नेन सौवाङ्गजान्
रङ्कैरङ्ककरङ्ककैरविरला जज्ञुः खिलाः श्रीपथाः ॥७०

रौरवे भैरवेऽप्येवं सागरदत्तवेश्मनि ।
अक्षयं धनधान्यादि रत्नाद्यमिव सागरे ॥७१
तथाऽपि दुर्दैववशात् कुलेऽस्य सकलेऽपि हि ।
शीतलिका महाव्याधिरुदभून्न्यगभूदपि ॥७२
तेनैव व्याधिना मृत्युकिंकरेणेव तत् कुलम् ।
सर्वं मृत्युपुरं निन्ये तं विनैकं वसुन्धरम् ॥७३
हा मातः पायय पयः पितर्वीजय म×काः ।
इत्यादि विलपन् सैष बभ्राम स्वगृहोदरे ॥७४
तद्दोषदूषितस्यास्य गृहस्य द्वारि कण्टकाः ।
तद्दोष × × नभिया दीयन्ते स्म जनैर्घनाः ॥७५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिघत्सया तच्छवानां प्रविशद्भिर्बलात् श्वभिः ।
चक्रे छिद्रं कण्टिकाधो निरस्तेन वसुन्धरः ॥७६

स निस्त्राणो भ्रमन् रङ्कवृत्त्या कुक्षिंभरिः पुरि ।
पञ्चहायनतां भेजे दुर्भिक्षे पञ्चतां पुनः ॥७७

ततः सुभिक्षे सञ्जाते वसन्तपुरतोऽवहन् ।
सार्थाः सार्थेन केनापि निर्ययौ स वसुन्धरः ॥७८

सार्थे भैक्षालाभतोऽभूत् पाखण्डी मुण्डमुण्डनात् ।
मौनी पवनरोधी च सोऽगात् क्षितिप्रतिष्ठिते ॥७९

जात्या कुलेन शीलेन तपसा ध्यानमुद्रया ।
मिथ्याभिमानी जज्ञेऽसौ गुणिनां गुणमत्सरी ॥८०

मिथ्याभिमानैकधनो मिथ्यावादवशंवदः ।
तादृग् मिथ्याजनैः सेव्यः स्व×कं मन्यतेऽसकौ ॥८१

निरालम्बा नभ इवाप्रतिबद्धाः समीरवत् ।
तेजस्विनो रविरिवानुपलेपाश्च पद्मवत् ॥८२

चन्द्रवन्नयनानन्दा निष्प्रकम्पाश्च मेरुवत् ।
सागरवच्च गम्भीरा दुर्धर्षाः पञ्चवक्त्रवत् ॥८३

श्रीमन्तः सुव्रताचार्याः परिवार्याः सुसाधुभिः ।
क्षितिप्रतिष्ठितपुरमलञ्चक्रुरथान्यदा ॥८४॥ त्रिभिर्विशेषकम्

तेषु तत्राभ्युदितेषु ज्ञानभास्वत्सु सूरिषु ।
स वसुन्धरपाखण्डी घूकवद् व्यमनायत ॥८५

न कोऽपि याति तत्पार्श्वे पूर्लोको गुरुवन्दकः ।
सति सत्यक्रयाणेऽट्टे कृत्रिमे याति कः सुधीः ॥८६

तच्छिद्रदृष्टिः फणिवन्न सोऽपश्यत् तदन्धवत् ।
उपाचरच्च चरिकाः साधुक्षोभणहेतवे ॥८७

ततोऽकाले समायान्त्यस्ता निषिद्धाः सुसाधुभिः ।
सायं द्वारान्निवृत्योचुर्वसत्यन्तर्वयं गताः ॥८८

तद् दुर्वाक्यानि पूर्लोकः सम्यग्दृष्टिर्न मन्यते ।
स चाहेतुरिपुः पापः प्रेरयामास ता मुहुः ॥८९

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

अथान्यदा सङ्घयुतान् यातश्चैत्ये गुरूनमून् ।
चरिकैका पुरोभूय स्पष्टं धृष्टमदोऽवदत् ॥९०

धर्मप्रपाः सत्यमेव विधिना विहिता वयम् ।
अष्टाङ्गानि परं यासां भुज्यन्तेऽन्यं त एव ताः (?) ॥९१

यूयं तु कम्रा मुधेति तद्वाचा रक्षकैर्धृताः ।
गुरवः सा च पापिष्ठा नीताः सर्वे नृपान्तिके ॥९२

राज्ञा च नयसारेण सूरयोऽभ्युत्थिता नताः ।
तत्समक्षं च तद्वार्तां रक्षै राज्ञे न्यवेदयत ॥९३

दान्तान् शान्तान् निर्विकारान् वीतरागाध्वजाङ्किकान् ।
गुरून् वीक्ष्यैव निर्दोषान् दिव्यचक्षुर्नृपोऽबुधत् ॥९४

पप्रच्छ च प्रभोऽयं वः कुतो व्यतिकरोऽनया ।
सूरिरुचे निर्निमित्तः प्राग्भवे नः कृतोऽथवा ॥९५

अत्रान्तरे दिवि दैवी वागभूद् भो ! निशम्यताम् ।
वसुन्धरकपाखण्डिपाशस्येदं विजृम्भितम् ॥९६

सा परिव्राजिका बद्धा कशाभिस्ताडिता ततः ।
वसुन्धरकपाखण्डिवृत्तान्तं मूलतोऽलपत् ॥९७

ततः श्रीनयसारेण भूभुजा दत्तहस्तिकाः ।
श्रीमन्तः सुव्रताचार्या गाम्भीर्यादतिसागराः ॥९८

जयतादर्हतां तीर्थं देवताभिः प्रभावितम् ।
इत्युच्चैः परितः पठ्यमाने मङ्गलपाठकैः ॥९९

वर्धापने स्फार्यमाणे श्रीसङ्घेन पदे पदे ।
सायं स्वोपाश्रयं जग्मुर्निर्जग्मुः द्विषतां मुदः ॥१००॥ त्रिभिर्विशेषकम्

निशि शासनदेव्याथ दिव्यस्त्रीरूपया रयात् ।
वसुन्धरोऽक्षोभि लुब्धः प्रार्थको भणितस्तया ॥१०१

वश्या वयमुदीचीव धनदस्य परस्य न ।
धनं जनान् प्रगेऽभ्यर्थ्य दास्ये मन्यस्व तत् प्रिये ॥१०२

इत्युक्त्वा संप्रयुक्तः स सरमासूतया तया ।
श्ववत् तया कीलितश्च तथाऽस्थान्न व्ययुज्यत ॥१०३॥ युग्मम्

---

१०३.२. सरमी॰.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रगे पौरैस्तथा दृष्टो विगुप्तोऽसौ पुरेऽखिले ।
तिरोऽभूद्देवता साऽथ स च दध्याविदं कुधीः ॥१०४

श्वेताम्बरैरिति कृतं कृते प्रतिकृतिं न चेत् ।
कर्त्ताऽस्मि तन्नास्मि पुमान्निष्फलं जीवितं च मे ॥१०५

साध्वालयं ततो दग्धुमग्निच्छगणिकाकरः ।
अर्धरात्रे प्राप पापः शय्यां नेत्रा च लक्षितः ॥१०६

बद्ध्वाऽऽरक्षैः स राज्ञोऽग्रे दर्शितो देव यः पुरा ।
साधूनुपाद्रवत् सूरीनभ्याचख्यौ. शुनीमगात् ॥१०७

साध्वालयं दहन् सोऽथ लब्धः पाषण्डपांसनः ।
क्रियतामस्य किं स्वामिन् भूभुजोक्तं निगृह्यताम् ॥१०८॥ युग्मम्

ततो मष्या विलिप्ताङ्गः स्वापकीर्त्येव मूर्तया ।
सूर्पखण्डच्छत्रकेण मिथ्यात्वेनेव संवृतः ॥१०९

करवीरस्रजा बिल्वमालया धातुपुण्ड्रकैः ।
रथ्याचीरैश्च कुगतेः कटाक्षैरिव भूषितः ॥११०

अकर्णो मलिनात्मैष इत्यकर्णे मलीमसे ।
रासभेऽशुभतत्कर्मराशिभे चाधिरोपितः ॥१११

अनेनेदं कृतं पापमिति पापो विगोप्यते ।
इत्युच्चैर्घोषणापूर्वं पुरोवादितडिण्डिमः ॥११२

तपस्विनोऽमुष्य महापापमत्रैव पक्त्रिमम् ।
बभूवेति सानुकम्पं दृष्टः शिष्टतमैर्मुहुः ॥११३

दुरात्मनोऽस्य पापस्य पापं स्याद्दर्शनेऽपि हि ।
इति पौरैर्निन्द्यमानो भ्रमयित्वाऽखिले पुरे ॥११४

प्रदोषः सैष पाखण्डी प्रदोषे राजपूरुषैः ।
निन्ये श्मशानमास्थानं दक्षिणाधिपतेरिव ॥११५॥

सप्तभिः कुलकम्

आरक्षकेभ्य आक्रोशन् विलपन्नभिमानवान् ।
शूलायां मृत्युतुलायां स्थापितश्चैष पातकी ॥११६



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

सोऽथाभूदाद्यनरके नारकोऽम्भोधिजीवितः ।
तत्रासातवेदनयाऽक्षिपद् दुष्कर्म पुष्कलम् ॥११७

ततः कथञ्चिन्निर्गत्य स वसुन्धरजीवकः ।
तत्तादृक्षकर्मशेषजंबालमलकश्मलः ॥११८

पापठ्यमानमगधागाधे मगधमण्डले ।
दुर्वारपामराकीर्णे ग्रामे गोर्वरनामनि ॥११९

षट्कर्मकर्मठस्य श्रीविद्यानां पारदृश्वनः ।
निष्ठिताशेषयज्ञस्य यज्ञदत्तद्विजन्मनः ॥१२०

राधासमभिधानायाः पत्न्या उदरकन्दरे ।
केशववामनगदाभृन्माधवसुतोपरि ॥१२१

यशोमतीनामधेयपुत्रीत्वेनोदपद्यत ।
साऽवर्धत क्रमात् सार्धं पितृभ्रातृमनोरथैः ॥१२२॥

पञ्चभिः कुलकम्

बालिकैवातिवाल्लभ्यात् तैर्महेन महीयसा ।
सा वामदेवतुक्सोमदेवेन परिणायिता ॥१२३

विवाहानन्तराहे च शूलातङ्केन भूयसा ।
सोमदेवः सोम इव निशाशेषेऽस्तमासदत् ॥१२४

ततः पितृभ्रातृमुखैरश्रुप्लावितदृग्मुखैः ।
चिरं प्ररुद्य रुदती सा कथञ्चन धीरिता ॥१२५

कुल्येन धनिना यूना वरेण सुभगेन च ।
पुत्र्युद्वाह्या पितृभ्यां तत् सर्वं वत्सेऽधिकं कृतम् ॥१२६

परं तदैव दैवेन सहसा शतखण्डितम् ।
दैवं च सुव्रताचार्याभ्याख्यानं बुध्यतां बुधाः ॥१२७

पुत्रि तद्दैवशान्त्यर्थं शीलं शीलय देहि च ।
तपस्य वश्यय स्वं चेत्युक्ते तैः सा तथाऽकरोत् ॥१२८

ततः प्रीत्या पितृभ्रातृभ्रातृजाया यशोमतीम् ।
सर्वेऽपि प्रीणयामासुः कुलदेवीमिवान्वहम् ॥१२९

सा च शीलाभिमानेन न्यक्करोति प्रजावतीः ।
श्वश्रूपतिभयात् त्वेता न तां प्रति वदन्त्यपि ॥१३०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ सा यौवनभरे मन्मथोन्मथ्यमानहृत् ।
स्वयं स्वाङ्गे कुचेष्टास्ताश्चक्रे या वेत्ति सैव हि ॥१३१

अन्येद्युः शीलशालिन्यो महासत्यस्तपोधनाः ।
भवाब्धिनिस्तारतर्यः साध्व्यस्तत्र समाययुः ॥१३२

अत्रान्तरे पुराभ्यासाज्जातिस्वाभाव्यतस्तथा ।
अभिमानमृषाभाषे भृशं तस्यां विलेसतुः ॥१३३

तत उद्दिश्य ताः साध्वीः सा पापाऽऽख्यत् सखीः प्रति ।
शीलमासां कुतोऽनिष्टभुजां ग्रामपुरान्तरे ॥१३४

कन्दमूलफलाहारा वनवासैकतत्पराः ।
खण्डयन्ति यदा शीलं तदासां का कथा ननु ॥१३५

आख्यन् सख्यस्तदेतासां कुक्षिर्विक्रियते न किम् ।
सोचेऽनेके सन्त्युपाया गर्भशातनपातनाः ॥१३६

नूनमेषा कुशीलेति स्वहृदा मेनिरेऽथ ताः ।
अन्यथैतत् कथंकारं बालरण्डाऽवबुध्यते ॥१३७

श्रीमत्सुव्रतसूरीन्द्राभ्याख्यानाऽशुभकर्मणि ।
अक्षीणेऽपि हि सा कर्मान्तरमेवमुपार्जयत् ॥१३८

दध्यौ शासनदेवी च पापैषा वक्तु निर्भयम् ।
अचिरादेतदेतस्या मस्तके पातयिष्यते ॥१३९

अन्यदा ग्रामकूटस्य मायाराजाभिधः सुतः ।
क्षेत्रात् ग्रामसरस्यागात् पयःपानादिहेतवे ॥१४०

तदा च रामदेवस्य ग्रामेशो घटदासिका ।
तत्रागाद् विजनं ज्ञात्वा तेन साऽप्रार्थ्यमंस्त च ॥१४१

सरःपाल्या देवकुले तया रंत्वा सरस्यसौ ।
आचचाम तस्य रेतोबिन्दवः सलिलेऽपतन् ॥१४२

गतौ च तौ यथास्थानमथ दुर्दैववैभवात् ।
देवताप्रतिकूल्याच्च ब्राह्मणी सा यशोमती ॥१४३

ऋतुस्नाता भ्रम्यमाणा समैत् तत्र सरोदिशि ।
यत्राध्वस्ता बिन्दवस्ते तरन्ति सलिलोपरि ॥१४४॥ युग्मम्

---

१४४.२. समैत्तत्र

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

साप्याचामत् तत्र ते च बिन्दवस्तद्भगेऽविशत् ।
साप्यानन्दाच्चमच्चक्रे निश्चिकाय न किञ्चन ॥१४५

कियत्स्वपि दिनेष्वेषा व्यतीतेषु व्यचिन्तयत् ।
जठरं जरठीभूतं तत् किमेतज्जलोदरम् ॥१४६

नैवं किञ्चित् स्फुरत्यन्तस्ततो गर्भस्य शातनम् ।
पातनं च चकारैषा नापतद् वज्रलेपवत् ॥१४७

अथ गर्भस्य लसुनस्येव चिह्नानि सर्वतः ।
अपह्नोतुमशक्यानि तस्या हन्तोज्जजृम्भिरे ॥१४८

मात्रा राधिकया सैषाऽप्रच्छि वत्से ! किमीदृशम् ।
साऽऽख्यन् मातर्नैव तावद् दुष्कर्मेदं ममैहिकम् ॥१४९

पारत्रिकं तु यत् किञ्चिद् दुष्कर्मैवं फलेग्रहि ।
तदंब नैव जानामि मन्दभाग्या करोमि किम् ॥१५०

माताऽवोचत वत्से दुष्कर्मैहभविकं विना ।
न पारभविकेनैव केवलेन भवत्यदः ॥१५१

तन्मूढे हा त्वयाऽत्युच्चैः पातितं स्वकुलद्वयम् ।
मलीमसरसावेशात् तटिन्येव तटद्वयम् ॥१५२

तयाऽथ भणिता माता चेज्जलोदरदम्भतः ।
दाप्यन्ते परितो दम्भास्तदा गर्भो गलत्ययम् ॥१५३

अहं तु गलिते गर्भे म्रिये जीवामि वा शुभम् ।
तन्मातः कारयेदं मे त्वत्तो नान्या गतिर्मम ॥१५४

प्रतिश्रुतं तया सर्वं स्वभर्तुश्च निवेदितम् ।
देवरक्षितवैद्यस्य सोऽपि पुत्रीमदर्शयत् ॥१५५

भट्टायोचे रहो वैद्यो गर्भोऽयं न जलोदरम् ।
भट्टः खिन्नोऽञ्जलिं बद्ध्वा तमूचेऽन्यस्य मा भणीः ॥१५६

भट्टिन्याश्च तदेकान्ते तेनोक्तं साऽप्यमन्यत ।
तत् किं कार्यमिति छन्नं मन्त्रयेते इमौ मिथः ॥१५७

मन्त्रछन्नस्तयोरासीन्न तस्या उदरं पुनः ।
लोकेऽथ सा कुशीलेति स्फुटितं पक्वगण्डवत् ॥१५८

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

ततः सा गर्ह्यते लोकैर्हस्यते च परिच्छदैः ।
हील्यते भ्रातृजायाभिर्निन्द्यतेऽपि सखीजनैः ॥१५९

निर्भर्त्स्यते भ्रातृभिश्चाक्रोश्यते पितृभी रहः ।
किं बहूक्तैः प्रतिकूलं तस्या जज्ञे जगत् तदा ॥१६०॥ युग्मम्

ततो दुःखभराक्रान्ता प्रदोषे निर्गता गृहात् ।
मार्गामार्गाविजानाना गृहीत्वैकां दिशं क्रमात् ॥१६१

वार्ध्रीणसवृकव्याघ्रद्विपद्वीपिमृगाधिप- ।
तरुक्षुऋक्षभुजगभीमां साऽगान्महाटवीम् ॥१६२॥ युग्मम्

तत्रैकिका निःशरणा त्राणं किञ्चिदविन्दती ।
पितरं मातरं भ्रातॄन् स्मारं स्मारं मुहुर्मुहुः ॥१६३

तथा विलापांश्चक्रेऽसौ यथा तद्दुःखदुःखिता ।
तत्प्रतिध्वनितैर्मन्ये सा व्यलापीदटव्यपि ॥१६४॥ युग्मम्

ततो महाशोकशल्यशल्यिता मर्तुमुद्यता ।
सा पर्यश्रु मुखी तारं सगद्गदमदोऽवदत् ॥१६५

भो भोः पूज्या वनदेव्यो लोकपाला हरादयः ।
शृण्वन्त्वतीन्द्रियज्ञाना नेदृक्कर्म कृतं मया ॥१६६

महासतीनां साध्वीनामभ्याख्यानेन केवलम् ।
अभिमानमृषाग्रस्ता दुर्दशां प्रापमीदृशीम् ॥१६७

तच्छोधयत मां सद्यः प्रसन्नेक्षितवीचिभिः ।
एषा वराकी रङ्कीव प्रत्यक्षं वो म्रियेऽधुना ॥१६८॥ त्रिभिर्विशेषकम्

इत्युक्त्वाऽशोकशाखायां बद्ध्वा संव्यानपल्लवम् ।
दत्त्वा स्वकण्ठे पाशं च मुमोच स्वं यशोमती ॥१६९

अत्रान्तरे साहसं मामेत्येवं भाषमाणया ।
निकुञ्जादेत्य तापस्योत्तरीयं पाटितं क्षणात् ॥१७०

यशोमती ततो मूर्छामीलिताक्ष्यपतद् भुवि ।
कमण्डलुजलाद्यैश्च तया सा प्रापि चेतनाम् ॥१७१

समुन्मील्य दृशौ साऽथाभिदध्रे वीक्ष्य तापसीम् ।
भगवत्यादधाः किं मे विघ्नं दुःखाब्धिलङ्घने ॥१७२

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

तापस्यूचे स्वात्महत्या युज्यते न विवेकिनाम् ।
इति कारुण्यतोऽच्छेदि मया ते कण्ठपाशकः ॥१७३

किञ्च जन्मजरामृत्युरोगशोकोर्मिसंकुलः ।
दुःखाब्धिरेष संसारः कदर्थयति देहिनः ॥१७४

ततस्तद्‌दुःखविच्छित्त्यै यतितव्यं विवेकिभिः ।
न च भद्रे प्राणमोक्षो दुःखक्षयनिबन्धनम् ॥१७५

यतो वपुर्न दुःखस्य मूलं किन्तु स्वदुष्कृतम् ।
तच्च जीवसहचरं नाङ्गे नष्टे निवर्तते ॥१७६

किं नाम ध्यानकारुण्यतपोभिस्तन्निवर्तते ।
एष एव पण्डितानां पर्यन्ताराधनाविधिः ॥१७७

यशोमतीति संबोध्य कमण्डलुजलादिना ।
मनाक् सुस्थीकृत्य निन्ये तापस्या तापसाश्रमम् ॥१७८

नमश्चक्रे यशोमत्या बृहती तत्र तापसी ।
तया निजजनन्येव धीरिता सा स्थिताऽऽश्रमे ॥१७९

अथ प्रसवसमये तस्या गर्भो विमूढवान् ।
कृच्छ्रात् कदर्थनाभिश्च मृतः पाप्मेव निर्ययौ ॥१८०

तापसीभिरुपचर्यमाणा भग्नीजनाधिकम् ।
साध्व्यभ्याख्यानानुतापान्मनुष्यायुर्निबध्नती ॥१८१

तेन सूतकरोगेण यमदूतानुकारिणा ।
पीडिता साऽमुचद् देहं तदवक्रयगेहवत् ॥१८२॥ युग्मम्

इतश्चात्रैव भरतक्षेत्रे कोशलमण्डले ।
भोगावत्यग्रजातेव श्रियाऽभूत् कोशलापुरी ॥१८३

तां च मूलात् तीर्थभूतां श्रीयुगादिजिनक्रमैः ।
अलञ्चक्रे यशःकेतुः क्ष्मापतिः श्वेतकेतुवत् ॥१८४

यस्य श्रीकीर्तिकौमुद्या विलसन्त्या दिवाऽनिशम् ।
आनन्दमेदुरं भेजे नित्यां कुवलयं श्रियम् ॥१८५

अनेकविषयग्रामरामणीयकधारिणी ।
धारिणी धरणीवास्य लेभेऽग्रमहिषीश्रियम् ॥१८६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्यां पुण्यश्रियो वाप्यां लावण्यामृतसद्मनि ।
अभूद्यशोमतीजीवः पुण्डरीकमिवाब्जजः ॥१८७

काले सुलक्षण इति तस्य नाम न्यधीयत ।
धात्रीभिः पञ्चभिस्तस्य धात्रीकर्म व्यधीयत ॥१८८

शैशवातिक्रमे तस्य कलाग्रहणकार्मणम् ।
लेखशालाकरणं चोपोपाध्यायमजायत ॥१८९

अत्रान्तरे मृषाभाषाजानिः प्राग्जन्ममानितः ।
मानः सुलक्षणस्यास्य सदा सहचरोऽभवत् ॥१९०

ततो हसत्युपाध्यायं विप्लावयति तत्प्रियाम् ।
भीषयते स तत्पुत्रं क्लिश्नाति सहपाठिनः ॥१९१

अनधीतं वक्त्यधीतं लिखितां मार्ष्टि पट्टिकाम् ।
कर्णाखेटान् ममायाति तत् किमारटितेन भोः ॥१९२

दूरे स्थित्वा गुणयति लुप्तवर्णं मृदुध्वनि ।
उच्छृंखलः खल इव ततो याति यतस्ततः ॥१९३

तथा हि –

सिद्धो वर्णसमाम्नायः । टे ठे वार्षं । ड ढ ण परस्तु णकारं । द्विवचनमनौ । एकारे ऐ एकारे च । लोकोपचाराद् ग्रहणसिद्धिः । इति सन्धौ सूत्रतः प्रथमोऽध्यायः समाप्तः ॥

निश्चित्य तमुपाध्यायो दुर्विनीतं कुशिक्षितम् ।
उपेक्षिष्ट ततः सोऽभून्निष्कलः स्वर्णकारवत् ॥१९४

धनुर्वेदं नाट्यवेदमायुर्वेदं ततश्च सः ।
गन्धर्ववेदं सामुद्रं राधावेधं च नाबुधत् ॥१९५

तथाप्युपहसत्यन्यान् कलाविज्ञान् कुमारकान् ।
जुगुप्सतेऽप्युपाध्यायं तद्गुणांश्च निगूहति ॥१९६

उपाध्यायः कुमारश्चान्यदाऽऽहूता महीभुजा ।
पप्रच्छे च कलाचार्यः कुमारैः स्वीकृताः कलाः ॥१९७

उपाध्यायोऽवदद्देव स्वयमेव निरूप्यताम् ।
सुलक्षणः क्षणं प्राप्य सासूयं भूभुजेऽभ्यधात् ॥१९८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सतीत्वमिव वेश्यातः सौजन्यं दुर्जनादिव ।
कृपणाद्धनवच्चास्मात् कलाकौशलमाप्यते ॥१९९

स्मित्वा राजा कलासूरेर्मुखाभिमुखमैक्षत ।
समुच्छलद् ब्रह्मतेजः पिञ्जरांङ्गोऽथ सोऽवदत् ॥२००

भिनत्ति द्रोणमेघोऽपि मुद्गशैलं किमन्तरा ।
दृक्पाटवं कौशिकस्य जगच्चक्षुः करोति किम् ॥२०१

वर्षास्वप्यूषरे किं स्यात् तृणोद्भेदः कदाचन ।
अहंयौ दुर्विनीते च कं करोतु गुरुर्गुणम् ॥२०२॥ युग्मम्

ततश्च मानोपादानक्रोधयोधात्यधिष्ठितः ।
मा मा पुत्रेति राजोक्तौ स शस्त्र्या गुरुमावधीत् ॥२०३

विपन्नमपि तं दग्धुं न दत्ते सोऽतिकोपनः ।
सान्त्वनैर्बहुभिः क्षिप्तः स शवो नगराद्बहिः ॥२०४

ततः शण्ड इवोन्मत्तो वराह इव दुःसहः ।
क्रूरात्मको व्याघ्र इव दावाग्निरिव दाहकः ॥२०५

पिशाचकीव विकलो भूतवन्न वशंवदः ।
भयङ्करो यम इव सर्वस्याभूत् सुलक्षणः ॥२०६॥ युग्मम्

स मन्त्रिसामन्तपौरान् लघयन्नपदेऽपि हि ।
पितरावपि निःशङ्कं स्वमेवामंस्त पूरुषम् ॥२०७

असन्ति दूषणान्याख्यन् निग्राह्योऽयं कुवादिवत् ।
इत्यमात्या गुप्तमैक्यं राड्दायादैः सहादधुः ॥२०८

तच्च श्रीसुमतिर्मन्त्री रहो राज्ञे व्यजिज्ञपत् ।
किमत्र न्याय्यमाधातुं त्वं वदेत्यवदन्नृपः ॥२०९

मन्त्र्याख्यद्देवास्य लघुर्वत्सराजोऽस्ति सोदरः ।
क्षमी कलावान् मतिमान् नीतिधाम प्रियंवदः ॥२१०

ततश्च —

यः कलाभिर्निर्मलाभिः कुमारो मां विजेष्यते ।
स्वयंवरे वरो मेऽसौ निष्कलेन सृतं मम ॥२११

२११.३. मेसो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति व्याजेन कस्यापि राज्ञः पुत्र्याः स्वयंवरे ।
वत्सराजस्तया राज्यश्रिया च परिणेष्यते ॥२१२॥ युग्मम्
सुलक्षणः स्वयमेवमप्रमाणीभविष्यति ।
इति राज्यस्य सर्वस्य श्रेयः स्वामिन् स्फुरिष्यति ॥२१३
इत्येवं मन्त्र्यमाणे चागत्य दौवारिकोऽभ्यधात् ।
देव श्रीमथुरेशस्य मन्त्री देवं दिदृक्षते ॥२१४
राजाज्ञया प्रविष्टोऽसौ यशःकेतुं महीपतिम् ।
नत्वाऽभ्यधाद्देव जितशत्रोः पुत्र्यस्ति विश्रुता ॥२१५
यां निर्माय कृतकृत्यंमन्यो मन्ये स पद्मभूः ।
अन्याः कन्याः कारयते किंकरैस्तेन नेदृशः ॥२१६
यत् सौभाग्यं समीक्ष्येव पत्यविश्वासवासिते ।
गौरीश्रियौ ते मुञ्चेते न तदर्धाङ्गवक्षसी ॥२१७
कमलावत्यङ्गजाता सा जयश्रीः स्वयंवरे ।
भवत्पुत्रं कलाजैत्रमस्त्युद्वोढुमुपस्थिता ॥२१८॥ त्रिभिर्विशेषकम्
सहर्षं मन्त्रिणा तेन सह सर्वंसहेश्वरः ।
अभियानगौरवेण कन्यां तां पुर्यवीविशत् ॥२१९
आवासस्नानभोज्यस्रक्ताम्बूलवसनादिभिः ।
सच्चक्रे भूभुजा तेन जयश्रीः सपरिच्छदा ॥२२०
आस्थानमण्डपे राजाऽऽह्वयत् सामन्तमन्त्रिणः ।
धारिणीं सह पुत्राभ्यां कुमारानपरानपि ॥२२१
ऊचे च भो भोः सामन्तामात्याः शृणुत सादरम् ।
भोः सुलक्षण वत्स त्वं सावधानो निशामय ॥२२२
एतां जयश्रियं गीतपत्रच्छेद्यादिकौशलैः ।
जित्वा विद्ध्वाऽथवा राधां वृणु राज्यश्रिया समम् ॥२२३
त्वां व्यतीतां वत्सराजस्तमप्यन्ये कुमारकाः ।
प्रतिज्ञायत इत्यस्याः पक्षोऽपक्षो न कोऽपि नः ॥२२४
ततोऽभिमानमातङ्गस्कन्धारूढः सुलक्षणः ।
जगाद पितरं मातः कोऽन्यो भुवि मयि स्थिते ॥२२५



Jain Education International For Private & Personal Use Only www.jainelibrary.org

चेदभ्यमित्र्या मे तात स्युस्ते हरिहरादयः ।
तथाऽपि विश्वं त्वत्कीर्त्या भूष्यतेऽस्यां तु का कथा ॥२२६

न साधितं मया यत् तु वत्सराजोऽत्र को ननु !
कुमारकाणामन्येषां वार्ताऽप्यतिदुनोति माम् ॥२२७

धारिण्यथावदद् वत्स ! त्वज्जिह्वया बलिः क्रिये ।
जानाम्यहं तव शक्तिं न जानाति परं पिता ॥२२८

अथ वा —

चूतमञ्जरीप्रियंगुहंसीरत्नावलीप्रियः ।
तत्पुत्राणामसाविच्छत्येतां नूनं वराङ्गनाम् ॥२२९

ततः स्मित्वाऽऽह राट् सत्यं चेत् त्वदुक्तं तदा प्रिये ।
किं नाहूतास्ताः किमेषादौ शिष्टा तव पुत्रयोः ॥२३०

जाने कलावांस्ते पुत्रः परिणेष्यति किं पुनः ।
वाचाऽप्यन्ये निषिध्यन्तां किञ्च सर्वेऽपि नः प्रियाः ॥२३१

किन्तु क्रमातिक्रमश्चेत् कुप्येः सुन्दरि ! माऽन्यथा ।
अथोचेऽमात्यैः कन्यैव कुमारकषपट्टिका ॥२३२

ततो मौहूर्तिकादिष्टे मुहूर्ते गुरुमण्डपम् ।
अदृष्टपूर्वमाश्चर्यं सर्वेषामपि भूस्पृशाम् ॥२३३
महीपतिर्यशःकेतुः केतुदन्तुरिताम्बरम् ।
शिल्पिभिः कल्पयामास विमानमिव नाकिनाम् ॥२३४॥ युग्मम्

तदन्तः स्तम्भमुन्नभ्रमिन्द्रस्तम्भविजित्वरम् ।
उत्तम्भयामासुरेते मानदण्डमिवाम्बरे ॥२३५
प्रादक्षिण्येन चत्वारि चत्वारि पुनरन्यथा ।
भ्रमन्ति चक्राणि चक्रुस्ते तन्मूर्ध्नीन्द्रजालिवत् ॥२३६

राधाऽभिधा च पाञ्चाली तैश्चक्रे चक्रमूर्धनि ।
राधावेधकलालोकाशयेवाधोमुखी स्थिरा ॥२३७
ततः शुभेऽह्नि कुमारराज्ञीमन्त्र्यादियुग् नृपः ।
जयश्रीरपि सपरीवारोपैत् तत्र मण्डपे ॥२३८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ भूपोऽभ्यधाद् वत्स सुलक्षण कलाद्भुतैः ।
जित्वा जयश्रियमिमां वृणु द्वेधा जयश्रियम् ॥२३९

ततो भूभुजि धारिण्यां निःशेषेऽन्तःपुरे परे ।
मन्त्रिसामन्तपौरेषु सावधानेषु सभ्यवत् ॥२४०

वीणावादनगीतगानविविधालेख्येषु पत्रच्छिदि-
च्छन्दोव्याकरणेतिहासगणितालङ्कारनाट्यादिषु ।
आदावेव जयश्रिया बत पराजिग्ये स निर्लक्षणः
साधीयस्तदिदं यतो गुरुजनप्रद्वेषिणां क्वोदयः ॥२४१॥ युग्मम्

मषीमुखी देव्यथाभून्न त्रेपे निस्त्रपः स तु ।
राजा पुनः स्माह विद्ध्वा राधां वृणु जयश्रियम् ॥२४२

अथाज्ञान्यप्यभिमानाद् वैयात्याद् विज्ञमान्यसौ ।
चापेषु ग्रहमन्दोऽपि राधावेधार्थमुत्थितः ॥२४३

स चापे संदधे बाणं प्राणं कृत्वोदचण्डयत् ।
स गत्वा दूरमाकाशे पतन् कन्यासखीमहन् ॥२४४

सहस्ततालं जहसे पर्षदा स कुलक्षणः ।
जातु दैवादभिज्ञोऽपि स्खलतीत्युन्मदी स तु ॥२४५

धारिणी व्यमनायिष्ट तुतोषान्तर्महीपतिः ।
देव्योऽन्या मन्त्रिसामन्ताः पौराश्च जहृषुस्तराम् ॥२४६

अथ राजाऽवदद् वत्स वत्सराज जयश्रियम् ।
कलालीलाभिरावर्ज्य वृणु राज्यश्रिया समम् ॥२४७

ततो भूभुजि धारिण्यां निःशेषेऽन्तःपुरे परे ।
मन्त्रिसामन्तपौरेषु सावधानेषु सभ्यवत् ॥२४८

वीणावादनगीतगानविविधालेख्येषु पत्रच्छिदि
छन्दोव्याकरणेतिहासगणितालङ्कारनाट्यादिषु ।
आदावेव जयश्रियं सुखसुखाच्छ्रीवत्सराजोऽजयत्
साधीयस्तदिदं यतो गुरुजनानाराध्यतां क्वाजयः ॥२४९॥ युग्मम्

---

२४८.१. निशेषे°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो राजा जहर्षोच्चैरनृत्यद्धारिणीमनः ।
सामन्तामात्यपौराश्च सर्वे मुमुदिरेतराम् ॥२५०
जयश्रियं च रोमाञ्चकुड्मलितवपुर्लताम् ।
वरस्रजं दृक्स्रजं च तत्कण्ठे क्षेप्तुमुद्यताम् ॥२५१
वत्सराजोऽभ्यधात् सौम्ये पश्य राधाव्यधोत्सवम् ।
ततो यथोचितं कुर्या वरणस्रग्महोत्सवम् ॥२५२॥ युग्मम्
ततस्तैलमहापात्रमुपस्तम्भं निवेश्य सः ।
स्वशरीरोद्धृतमिव बद्ध्वा परिकरं दृढम् ॥२५३
अनिवेश्य महीपीठेऽधिज्यीकृत्य शरासनम् ।
सन्धाय सायकं तच्च बलयीकृत्य लीलया ॥२५४
दृढां वामां धनुर्मुष्टिं मौलौ संस्थाप्य मौलिवत् ।
हृदि कौस्तुभवन्न्यस्य गुणमुष्टिं तु दक्षिणाम् ॥२५५
सव्यापसव्यपर्यञ्चच्चक्रचक्रविमध्यतः ।
राधावामदृशं द्रष्टुं तैलपात्रानुबिम्बिताम् ॥२५६
चित्रालेखितवल्लेपकृतवद् ग्रावक्लृप्तवत् ।
ऊर्ध्वमुष्टिरधोदृष्टिः स्थानेनास्थान्नरेन्द्रसूः ॥२५७॥ पञ्चभिः कुलकम्
तं द्रष्टुं सिंहासनस्थाः पादाग्रस्थितयोऽभवन् ।
उपविष्टाऊर्ध्वर्यभूवन्नूर्ध्वा नम्राग्रकायकाः ॥२५८
तत्र तत्रोद्भ्रुव इव चक्षुषैकेन्द्रिया इव ।
एकात्मान इवैकाग्र्यात् तदा सभ्या विरेजिरे ॥२५९
आत्मानं मनसा तच्च दृशा लक्ष्येण तामपि ।
निश्चलीकृत्य योगीव चिरं तस्थौ स राजसूः ॥२६०
लक्ष्यात्मानं निरीक्ष्याथ राधां मिथ्योपलब्धिवत् ।
शरेण साक्षात्कारेण विव्याध स नरेन्द्रसूः ॥२६१
जयश्रिया कटाक्षस्रग्भिरुक्तवरणस्रजा ।
श्रीवत्सराजो वव्रेऽथ जज्ञे जयजयध्वनिः ॥२६२
निःस्वानेष्ववलन् घाता नान्दीतूर्यमपूर्यत ।
हर्षसाराविणं चक्रुः सर्वतोऽपि सभासदः ॥२६३

२५९.१. उद्भुव.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वलाघवात् परोत्कर्षात् सहजाच्चाभिमानतः ।
कृत्याकृत्यविवेकान्धस्तदा सोऽभूत् कुलक्षणः ॥२६४

ततो लघोः सोदरस्य विनीतस्य कलाम्बुधेः ।
तेनामोचि क्षुरीघातो वत्सराजस्य मर्मणि ॥२६५

पुनश्छुरीघातमेषोऽमुचद् यं तज्जिघांसया ।
जयश्रियाऽन्तः पतन्त्या स सेहे दुःसहोऽपि हि ॥२६६

मा मा हा पाप पापेति वारिणौ पितरावपि ।
स क्षुर्या यमकिंकर्या निजघानातिनिर्घृणः ॥२६७

चत्वारोऽपि विपेदुस्ते ततः सामन्तमन्त्रिणः ।
तदौर्ध्वदेहिकं चक्रुर्बाष्पाविलविलोचनाः ॥२६८

ततः स्वयंवरध्वंसे कुलध्वंसे च निर्मिते ।
अधितस्थौ स्वयं राज्यं स राजकुलपांसनः ॥२६९

ततः सामन्तदायादैर्मन्त्रिमन्त्रवशंवदैः ।
युद्ध्वा निर्घाटितोऽसौ तद्राज्यं स्वयमधिष्ठितम् ॥२७०

राज्यभ्रष्टः क्लिष्टकर्मा विदेशेषु भ्रमं भ्रमम् ।
जनमात्रमिहायातो राजन् सोऽयं सुलक्षणः ॥२७१

अथो विजयसेनेन राजा व्यज्ञापि सद्गुरुः ।
मृषावादक्षणे प्राणातिपातः किमु दश्यते ॥२७२

जगौ गुरुरहिंसैव व्रतमेकं जिनोदितम् ।
तस्यैव रक्षार्थमन्ये माकन्दस्य यथा वृतिः ॥२७३

मृषावादेऽदत्तादाने मैथुनेऽथ परिग्रहे ।
पारम्पर्यात् प्राणिहिंसा सर्वत्रैव हि वर्तते ॥२७४

भगवन्नैवमेवैतदित्याह स महीपतिः ।
सुलक्षणस्तु स्वोदन्तश्रवणाल्लज्जितस्ततः ॥२७५

स इति गुरुगिरं निशम्य सम्यग् विघटितघोरतमाघसञ्चयोऽभूत् ।
अविरलगरलं जहाति किं नो सपदि हि वञ्जुलसङ्गमाद् भुजङ्गः ॥२७६

अथ शुभपरिणामजातजातिस्मृतिगृहरत्नविलोकितात्मरूपः ।
चरणतरणिदानतो भवाब्धेर्गुरुतम तारय मेति स न्यगादीत् ॥२७७

तदनु विजयसेनराजक्लृप्तव्रतमह एष च रामदेवरीत्या ।
जिनमतदिनकृत् सुधर्मपार्श्वे चरणमधत्त सुलक्षणः कुमारः ॥२७८

इति श्रीनिर्वाणलीलावतीमहाकथेतिवृत्तोद्धारे **लीलावतीसारे** जिनाङ्के **मानमृषावादद्वन्द्व-स्वरूप-व्यावर्णनो** नाम तृतीय उत्साहः * ॥

---

* ग्रं. २९० ॥ छ ॥

## चतुर्थ उत्साहः

अथ श्रीविजयसेनश्चतुर्भिः तैः परिष्कृतः ।
परिष्कृतं चतुर्ज्ञान्या गुरुं नन्तुमगात् पुनः ॥१
भगवंश्चौरिकादम्भमिथुनस्य स्वलक्षणम् ।
सुलक्षं कुरु येनात्र दद्मः प्रहरकं वयम् ॥२
क्षुब्धाद्रिक्षुब्धदुग्धाब्धिनिर्यत्पीयूषजिद्ध्वनिः ।
श्रीसुधर्मप्रभुः प्रोचे श्रीराजेन्द्र निशामय ॥३
प्राणिनां दम्भसंरम्भः स्यान्नित्यं चौरिकाप्रियः ।
किञ्चिन् मुमुषिषुर्यस्मान् मायी मायां समाचरेत् ॥४

ततश्च –

देवान् गुरून् पितृन् भ्रातृन् श्वशुरान् मातुलानपि ।
मित्राणि पुत्रपौत्रांश्च स्वजनान्यजनानपि ॥५
मायाप्रपञ्चचतुरो बकोटाकारधारकः ।
प्रतारयन् भवत्यत्र परत्रानर्थभाजनम् ॥६॥ युग्मम्

तथा हि –

पूजाव्याजाद् भावसारो देवस्याभरणादिकम् ।
देवस्य गोष्ठिको भूत्वा कोशं मुष्णाति पातकी ॥७
मायाश्राद्धमुनीभूय हा ! मुष्णाति गुरूनपि ।
पित्रादेर्विनयीभूय सर्वस्वं हरते शठः ॥८
कृत्वा न्यासापहारं च सख्ये द्रुह्यति मूढधीः ।
अनुक्त्वा स्वं क्रमायातं पुत्रादेर्म्रियते स्वयम् ॥९
स्वजनान् परजनांश्च विश्वासोत्पादनाद् दृढम् ।
मायी वञ्चयते नित्यं नानाकैतववैभवैः ॥१०

---

९.४. पुत्रादेम्रियते.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृत्रिमान् स्वर्णरूप्येन्दुकस्तूरीहिङ्गुकङ्कुमान् ।
ददाति वैदेशिकेभ्यः स मायानाट्यनाट्यकृत् ॥११
विवादे शपते कोशान् पिबत्यत्ति च तन्दुलान् ।
स्पृशत्यंह्रीर्देवगुर्वोर्दत्ते सुकृतमात्मनः ॥१२
अलभ्यानपि हि द्रम्मान् कर्षत्युग्रसुराग्रतः ।
ततो देवचक्रपाते कुष्ठी स्यात् म्रियतेऽथवा ॥१३
अविश्वासात् त्यज्यतेऽपि बन्धुभिः स भुजङ्गवत् ।
ज्ञातस्तथा बध्यते चोद्बध्यते च नियोगिभिः ॥१४
बन्धुभिर्मोचितो जातु निर्लज्जश्चौर्यमाचरेत् ।
ततः कालाक्षरीकृत्य मुच्यते सर्वबन्धुभिः ॥१५
चौर्यप्रसादादारोप्य रासभे भ्रमितः पुरे ।
वृक्षोद्बद्धो रौद्रमना नरके याति पातकी ॥१६
अनेहसमसङ्ख्येयं तत्राशर्मातिदारुणम् ।
सोढ्वा कथञ्चिदुद्वृत्तस्ततो जायेत चेन्नरः ॥१७
तत्रापि प्राग्भवाभ्यासान्मायावी स्तैन्यतत्परः ।
चैत्यादिमोषं विश्रब्धघातनं कुरुते बहु ॥१८॥ युग्मम्
ततो नानानर्थपातैः पश्चात्तापात् कथञ्चन ।
बद्ध्वा नरायुर्जायेत मनुष्यः कर्मलाघवात् ॥१९
तत्राप्यनार्यकार्याणि कृत्वा भूत्वाऽयशःपदम् ।
क्षुधातृषार्तो भ्रमति यथा राजन्नयं पुमान् ॥२०
राजाऽऽख्यद् भगवन्नाहमस्मिन् पर्षत्सरस्वति ।
जाने सामान्याभिधाने तत् स्पष्टं ब्रूहि तं प्रभो ॥२१
ततः प्रभुर्जगौ योऽयं मरुकूपगभीरदृक् ।
अजापतिसदृक्कूर्चः क्रमेलकशिरोधरः ॥२२
निर्मांसदीर्घजङ्घाकः शीर्णवक्त्रासमक्रमः ।
त्वद्दक्षिणे त्रिपुरुषान्तरितः सैष बुध्यताम् ॥२३॥ युग्मम्
व्यजिज्ञपत् पुनर्भूपः किमत्रामुत्र दुष्कृतम् ।
कृतमेतेन भगवानूचे राजन् निशम्यताम् ॥२४

---

१३.३. चक्रपाते.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महामोदपरित्रस्तककुम्भास्तिकहास्तिकम् ।
इहास्ति हास्तिनपुरं कुरुमण्डलमण्डनम् ॥२५
कोटीध्वजध्वजक्षिप्तनभोध्वजकरव्रजे ।
पुरे तत्रोद्ययौ श्रीमान्नयसारो महीपतिः ॥२६
यन्न्यायघण्टाटङ्कारस्त्रिलोकस्योदरंभरिः ।
अन्यायभूतानुद्भूतान् कांदिशीकानजीजनत् ॥२७
अनेकनैगममहाश्रेणिधुर्यतमासमः ।
महाधनो धनो नाम्ना श्रेष्ठी तत्राभवत् पुरे ॥२८
पितामहपितृमुख्यार्जितं दूरेऽस्तु वैभवम् ।
यदर्जति प्रत्यहं स संख्या तस्यापि नाप्यते ॥२९

तथा हि –

जलस्थलाकरहट्टकलान्तरवणिज्यया ।
द्विचतुष्पादशकटयानपात्रादिभाटकैः ॥३०
नानायोनिपोषकृषीष्टकाङ्गारादिकारणैः ।
कृत्रिमस्वर्णरुप्येन्दुकस्तूरीहिङ्गुकुङ्कुमैः ॥३१
कर्पासान्नघृततैलतुवरीलवणैधसां ।
नीलीलाक्षासीसकायःशस्त्रादीनां च सङ्ग्रहैः ॥३२
लोष्टिकस्यापि यत्रायस्तैरारम्भपरिग्रहैः ।
अर्जत्यर्थमसौ नैव संतुष्यत्यौर्ववह्निवत् ॥३३॥

चतुर्भिः कलापकम्

व्ययं च लोष्टिकस्यापि प्रतीकच्छेदतोऽधिकम् ।
मन्यते सहते दुःखमर्थार्थैष दिवानिशम् ॥३४
प्रतिरूपक्रियाकूटतुलामानादिभिस्तथा ।
जनं वञ्चयते नित्यमिन्द्रजालिकलीलया ॥३५
तथाख्यातः पुरे सोऽथ ध्रियते ग्राह्यकैर्घनैः ।
हील्यते बन्धुभिर्मित्रैर्मुच्यते खाद्यते खलैः ॥३६
ततश्चारक्षमन्त्र्यादीन् लञ्चयोपचरत्यसौ ।
एवं शाठ्यस्तैन्यसखश्चिरमेष व्यवाहरत् ॥३७



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथान्येद्युस्तलवरस्तस्य श्रेष्ठिन आपणे ।
महास्थाल्कृते रूप्यखोट्टिकाद्वयमग्रहीत् ॥३८

धनापणात् स निर्गच्छन् मोहिलेन धनद्विषा ।
किमग्रहीरिति पृष्टस्तस्य रूप्यमदीदृशत् ॥३९

मायया तेन चाघ्रायोचे रूप्यं त्रपुगर्भितम् ।
स्वर्णकृद्भिस्तलवरश्छेदयित्वा तथैक्षत ॥४०

तेन तद्दर्शितं राज्ञो राज्ञोक्तं त्वं स्थिरीभव ।
भूपेनान्येद्युराकार्य धनः श्रेष्ठी न्यगद्यत ॥४१

दशभारान् रजतस्य समानय स आनयत् ।
तन्मार्गितं रूप्यमूल्यं नृपः कोशाददापयत् ॥४२

स्वर्णकारैर्धनाग्रे राट् छेदयामास खोट्टिकाः ।
त्रपुणा गर्भिता वीक्ष्य राजा श्रेष्ठिनमभ्यधात् ॥४३

रे किराटक खादित्वा पुरीं सर्वं न तृप्तवान् ।
चिखादिषसि येनैवं मत्कोशमपि निर्भयः ॥४४

ततस्तदैव सोऽक्षेपि कारायां तद्गृहाट्टयोः ।
राज्ञा मुद्रा दाप्य ते स्म स्थापिताः पुंश्चतुष्किकाः ॥४५

भीतभीतास्ततः पौराः परचक्रागमादिव ।
पूर्मन्त्रिणा धनान्यायवार्तया बहु धीरिताः ॥४६

यतो धर्मो नरेन्द्राणां यद्दुष्टानां विधीयते ।
निग्रहोऽस्त्युग्रदण्डेन शिष्टानां परिपालना ॥४७

यदि दण्डं नृपो नैव कुर्यादन्यायकारिणाम् ।
तदा चौर्यादितो दुष्टा निवर्तेरन् कथं ननु ॥४८

ये तु न्यायपथाध्वन्याः पराञ्चश्चानयाध्वनः ।
तेषां पितेव मातेव नयसारो महीपतिः ॥४९

इत्यादिधीरिताः पौराः पित्रेव पुरमन्त्रिणा ।
यथास्पदं ययुः सर्वे सायं पक्षिगणा इव ॥५०

द्वितीयेऽह्नि समाहूता राज्ञा पुरमहत्तराः ।
भो भो एवं धनान्यायो ब्रूत तत् किं विधीयताम् ॥५१

---

४९.१. पथां.

अथोक्तं श्रेष्ठिना साधुरक्षितेन कृताञ्जलि ।
स्वामिन् श्रीदेवपादानां प्रजाः सर्वाः प्रजा ध्रुवम् ॥५२

तदपत्यं पितुः क्रोडे मूत्रोच्चारौ करोति चेत् ।
तत् किं तद्दण्डनीयं स्यात् स्वयं देवावधारय ॥५३

राजाऽऽख्यद् बालकस्यैषा स्थितिर्यूनस्तु निग्रहः ।
धनः श्रेष्ठीत्यनाचारो राज्यमप्यत्तुमिच्छति ॥५४

तदस्य यद् विधातव्यं ब्रूत पौरास्त ऊचिरे ।
आहूयतां तर्हि देव सर्वोऽपि हि महाजनः ॥५५

राजादिष्टैः प्रतीहारैर्हूतः सर्वो महाजनः ।
प्रभूतोऽपि हि सम्भूतः सद्योऽप्येकालयस्थवत् ॥५६

तथा हि —

देवचन्द्रकुलचन्द्रश्रीचन्द्रगुणचन्द्रकाः ।
रामचन्द्रयशश्चन्द्रजगच्चन्द्राम्रचन्द्रकाः ॥५७

देवणागपासणागजिणनागासणागकाः ।
वीरणागवरणागजिसणागानणागकाः ॥५८

देवपालहरिपालजिणपालासपालकाः ।
वीरपालगुणपालनरपालास्वपालकाः ॥५९

देवदत्तजिणदत्तवीरदत्तास्वदत्तकाः ।
ब्रह्मदत्तपासदत्तार्हद्दत्तवरदत्तकाः ॥६०

वीरदेवजिणदेवपासदेवास्वदेवकाः ।
गुणदेवजिसदेवहरदेवासदेवकाः ॥६१

धरणीधरगङ्गाधरमहिधरजिसधरमहाधरासधराः ।
श्रीधरगुणधरकुलधरहरिधरदेवधरहेमधराः ॥६२

पाल्हणमाल्हणकाल्हणजाल्हणगोविन्ददेवडासडक्काः ।
वसुमित्रदेवरक्षितमाहिलइत्यादिरेकमनाः ॥६३

महाजनः समस्तोऽपि नानोपायनपाणिकः ।
महीपालं नमस्कृत्य यथास्थानं निषेदिवान् ॥६४॥

अष्टभिः कुलकम्

---

६१.३. °देवां. ६४.२. °नोपायिन°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः श्रीनयसारोर्वीमण्डलाखण्डलोऽवदत् ।
हंहो महाजनाश्रावि धनव्यवहृतिस्थितिः ॥६५
देहडोऽथ व्यजिज्ञपयद्योजिताञ्जलिकुड्मलः ।
किमपूर्वमिदं देव शैलीयं वणिजां यतः ॥६६
यथागृहीतं ददतो वर्तन्ते वणिजः कथम् ।
कथं वा राजकुटुम्बधर्मकार्याणि कुर्वते ॥६७
तुलया कलया किञ्चिन् मानदानाच्च किञ्चन ।
प्रमुष्णन्तोऽत एवोक्ता वणिजोऽध्यक्षतस्कराः ॥६८
यतोऽतिलोभनाः कूटतुलाद्यपि वितन्वते ।
अतस्तत् सर्वथा धीरैर्निषिद्धं जिनशासने ॥६९
तद् देव वणिजामेषा वणिज्यावृत्तिरीदृशा ।
नेदं नवतरं किञ्चिदवधारयतु प्रभुः ॥७०
राजाऽऽख्यत् श्रूयतां तावदेकमाख्यानकं जनाः ।
महाजनोऽवदद् देव प्रसादः स्तात्तरामयम् ॥७१
श्रीवसन्तपुरारामेऽभूद् वसन्त इव श्रिया ।
जितशत्रुमहीपालो महीपालनलालसः ॥७२
वसन्तश्रीस्तस्य देवी सौभाग्यैकनिकेतनम् ।
तयोर्दुर्लभिका पुत्री कल्पवल्लीव दुर्लभा ॥७३
तस्याश्च धायिनी नाम्नी तन्तुवायसुता सखी ।
तयोश्चाशैशवाज्जज्ञे प्रेमहेममकृत्रिमम् ॥७४
सख्यन्तःपुररुद्धाऽस्मि तत् ते रुच्योऽस्तु मे प्रियः ।
यन्नो भारुण्डवद्योगः स्यात् तामित्याह राट्सुता ॥७५
कौविन्दी साऽथ वण्ठेन प्रसक्ताऽभाणि तेन च ।
नैव ज्ञायावहे यावत् तावद्यावः पुरान्तरम् ॥७६
तयोक्तं मेऽस्ति राट्पुत्री सख्येव दृढसंश्रवा ।
वण्ठो जगाद साऽप्येतु राट्पुत्रीमथ साऽऽह्वयत् ॥७७
त्रयोऽपि तेऽथ संभूय प्रदोषे निर्ययुर्गृहात् ।
अत्रान्तरे मठे कश्चिदगायद् गीतिकामिमाम् ॥७८

---

७२.३. जिशशत्रु°. ७६.१. कोविंदी.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जइ फुल्ला कणियारया चूयय अहिमासयम्मि घुट्टम्मि ।
तुह न खमं फुल्लेउं जइ पच्चंता करिंति डमरयाइं ॥७९

तां श्रुत्वा चिन्तयामास राजपुत्री पवित्रधीः ।
हीना हीनेन यात्वेषा न मे युक्तमिदं पुनः ॥८०

सखि भूषाकरण्डी मे विस्मृतेति मिषादथ ।
दुर्लभा स्वगृहं प्राप पापौ तौ निर्गतौ गतौ ॥८१

राजपुत्री तु सा पित्रा राट्पुत्रेण वरीयसा ।
उद्वाहितेहितेनाऽभूद् भाजनं राज्यसम्पदाम् ॥८२

तदहो जना यदि कुविन्दसुतावदनीतिमादधति निर्धनकाः ।
तदयं धनोऽपि धनवाननयं कुरुतामुतावनिपसूरिव मा ॥८३

ततो विज्ञापयाञ्चक्रे दुर्गादित्येन धीमता ।
आख्याम्याख्यानकं किञ्चिद् देवाख्याहीत्यवग् नृपः ॥८४

अस्त्यदृष्टादिपर्यन्तं पुरं श्रीभुवनोदरम् ।
पुरान्तराणि यस्यान्तर्गृहाणीव चकासति ॥८५

तच्छास्तिकर्ता पुरुषो राजा त्रिभुवनेश्वरः ।
शल्यहस्ता इव यस्य त्रैलोक्येऽप्यधिपाः परे ॥८६

देवी कर्मपरिणतिस्तस्य सौभाग्यभाजनम् ।
रम्भागौरीशचीमुख्या यस्याः पादाब्जधाविकाः ॥८७

पञ्चप्रकारान् विषयाननिशं भुञ्जतोस्तयोः ।
जज्ञेऽनाचारसन्मार्गदारिद्याख्यसुतत्रयम् ॥८८

पुत्र्यश्च तिस्रो वाग्देवीलक्ष्मीदुःशीलताभिधाः ।
यद्विलासलवै रम्यैर्विलसन्ति कुमारकाः ॥८९॥ युग्मम्

राजा व्यज्ञपि पुत्रीभिरेकदा मदनोत्सवे ।
पितस्तव गिरा स्वैरं पुरे दूरं रमामहे ॥९०

राजाऽऽख्यद् योषितां रन्तुमेकिकानां न युज्यते ।
मिलिता एव तद्वत्साः स्वेच्छातः क्रीडताभितः ॥९१

बभाषे भारती तात न दुःशीलतया समम् ।
पदमेकमहं यामि वाञ्छाम्यद्यापि जीवितुम् ॥९२

---

७९.१. भूयय. ८९.२. रम्ये.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किमित्युक्ते भूभुजा वागूचेऽनावेद्य देव वः ।
एकदाऽस्म्येतया सार्धमाक्रीडे क्रीडितुं गता ॥९३

प्रसादाद्वोऽस्मि जीवन्ती कथञ्चिद् गृहमागमम् ।
अथाट्टहासात् सकरतालं दुःशीलताऽवदत् ॥९४

सत्यं ताताहमनया सहागां रन्तुमेकदा ।
न मेऽवकाशं दत्तेऽसौ क्वापि रुष्टा ततोऽस्म्यपि ॥९५

स्वां योगशक्तिमसृजं ततस्तात सरस्वती ।
हा हा वराकी रङ्कीव शुष्ककण्ठा क्षुधातुरा ॥९६

विलक्षा क्षीणपक्षा च नावकाशमगात् क्वचित् ।
तत् सत्यं प्रतिपद्दत्तं द्वितीयस्यां हि लभ्यते ॥९७॥ युग्मम्

धिक्कारपात्रं नष्टाऽसावपश्यन्ती स्वपृष्ठतः ।
वेगेन गृहमायाता श्वासमप्यग्रहीत् पितः ॥९८

स्मित्वा राजाऽऽह तत् पुत्रि व्रज लक्ष्म्याऽनया सह ।
गीर्जगौ न यतोऽमुष्याश्छुटिताऽर्धमृतैकदा ॥९९

ततः पिताऽऽह हे लक्ष्मि किमेतदभिधीयते ।
साऽप्यूचे साधु यदहमियं चागाव खेलितुम् ॥१००

मया गौरविता ख्यातिं प्रापिताऽपि समन्ततः ।
कदाऽपि मम कार्याणि शीलयत्यसकौ न हि ॥१०१

किन्तु छन्दो भज्यतेऽत्र नालङ्कारोऽयमुत्तमः ।
घटते न पदार्थोऽयमपशब्दोऽयमीरितः ॥१०२

इत्यादिकं काचपिच्यं कुरुते मां च निन्दति ।
ततो मया योगशक्तिः स्फोरिता तात सर्वतः ॥१०३॥ युग्मम्

ततो रुद्धा सरस्वत्या दृष्टिर्लुप्ता तथा श्रुतिः ।
नष्टा स्मृतिर्गतिर्भग्ना वपुश्चाभूद् विशृङ्खलम् ॥१०४

विगुप्ता सा पलाय्याथ गुप्तमेवागता गृहम् ।
तत्पृष्ठतो हसमानाहमपीह समागमम् ॥१०५

राज्ञाऽभाणि पुनर्लक्ष्म्या सह दुःशीलते व्रज ।
लक्ष्मीर्जगाद नो यामि पदमप्यनया समम् ॥१०६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतोऽहमेकदा याताऽनया सह सजीविता ।
पुण्येनागां गृहं ताताधुना जाने न भावि किम् ॥१०७

ततो विहस्य दुःशीलतयोचेऽहमियं तथा ।
रन्तु गते परमियं प्रधानास्मीति माद्यति ॥१०८

द्वितीयस्थानिकाऽसीत्यवहेलयति मां सदा ।
तच्छिक्षायै ततो योगशक्तिः प्रयुयुजे मया ॥१०९

कृष्टाऽथ लक्ष्मीर्दुर्वण्ठैर्नीता राजकुले हठात् ।
सद्यो विलब्धा डुम्बेभ्यो लक्ष्मीर्माद्यतु माद्यतु ॥११०

रात्रौ नंष्ट्वाऽथ जीवन्ती सद्मोपैत् पुण्यवत्यसौ ।
तात तत्कार्यतामस्याः पुनर्जन्ममहोत्सवः ॥१११

तिसृणामपि पुत्रीणामप्रीत्या विमना मनाक् ।
पिताब्रतान्यतरेण भ्रात्रा ब्राह्मि सह व्रज ॥११२

ब्राह्म्यूचे दुःशीलताया अनाचारोऽधिकः पितः ।
कदर्थिताऽस्म्यनेनापि तदयं दूरतोऽस्तु मे ॥११३

भ्राता द्वितीयः सन्मार्गी युक्तोऽसौ किन्तु मे पितः ।
ज्येष्ठतां न ददात्येव प्रधानंमन्य एष यत् ॥११४

यतमास्स्व यतं शेष्व यतं तिष्ठ यतं चर ।
यतं भुंक्ष्व यतं जल्प येन दुष्कर्म नार्ज्यते ॥११५

सद्वादमिति कुर्वाणः स्वैरं मे राति नेरितुम् ।
तदसौ तिष्ठतु गृहे यस्तृतीयस्तु सोदरः ॥११६

दारिद्र्यनामा तं तात विसर्जय मया सह ।
यत् तेन सह याताया गुणो मेऽतीव तद्यथा ॥११७॥ त्रिभिर्विशेषकम्

चिन्तयिष्याम्यहोरात्रं छन्दोऽलङ्कारलक्षणम् ।
सन्तोष्यनाधिदारिद्र्यभ्रातृसान्निध्यतः पितः ॥११८

ततस्तेन समं पित्रा प्रैषि रन्तुं सरस्वती ।
श्रीस्तेन जगदे वत्सेऽनाचारेण समं वज ॥११९

सा स्माह न गमिष्यामि यन्न वेत्त्येष मन्दधीः ।
श्रियोऽनुगोऽस्मीति किन्तु स्वात्मानं धुरि मन्यते ॥१२०

---

११०.१. लक्ष्मी दुर्व्रण्ठै°.　　११५.१. यतमास्व.

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

किं च दुःशीलतयेव दूनास्म्येतेन वैरिवत् ।
ततः पित्रा साऽभिदधे सन्मार्गेण समं व्रज ॥१२१

श्रियाऽभाण्येष मनुते स्वं गरिष्ठं समन्ततः ।
न जानाति श्रिया हीनो लघुरस्मि तृणादपि ॥१२२

किञ्चैष सदसद्वादं कुर्वन् विश्वस्य दुर्भगः ।
तदनेन समं वार्तामपि कुर्वे न हि क्षणम् ॥१२३

किन्तु निःशूकताधात्र्या सहैमि प्रत्ययो न चेत् ।
मामपि प्रतिजागर्त्वनाचारोऽशीलतामिव ॥१२४

आश्रुतं जनकेनाथ श्रीर्निःशूकतया समम् ।
प्राप्ता पृष्ठे त्वनाचारस्तस्यायाति पदे पदे ॥१२५

यदा कर्त्रा पुंसा स्थितिरिति रमायाः प्रविदधे
तदा दोषः स्वामिन् क इव हि धनस्यापि धनिनः ।
यदाऽरण्यक्षोणीं दहति दहनो दाहकतया
तदाऽजापालस्य क्षितितिलक दोषोऽस्तु कतमः ॥१२६

नृपोऽथ श्रीनयसारोऽभाणीद् भो भोः पुरीवराः ।
भो महाजन वक्त्येष युष्मन्मतमुतान्यथा ॥१२७

तत्पक्षपाती कोऽप्याह स्वामिन्नेवं हि वीक्ष्यते ।
राजोवाच रुषाऽऽरक्षान् रुन्ध सर्वान् किराटकान् ॥१२८

धनस्याच्छिन्त सर्वस्वं कुटुम्बं चारकेऽस्यत ।
सुगुप्तमपि येनास्य द्रविणं गृह्यते मुखात् ॥१२९

तत् तथा विहितं तैश्चातिक्रान्तमिति तद्दिनम् ।
प्रागवग् माहिलो दुर्गं वक्ष्यस्याख्यानकं पुनः ॥१३०

ततः श्रेष्ठिभिरप्यूचेऽसौ पुरक्षयकारकः ।
अथ सत्यहरिः प्रोचे किमित्यारट्यते मुधा ॥१३१

केनापि राजमान्येन राजा विज्ञाप्यतां बहु ।
भूम्या स्खलितपादानां शरणं भूमिरेव हि ॥१३२

अथ बुद्धिसमुद्रेण मन्त्रिणा तैर्महीपतिः ।
बहु विज्ञापयाञ्चक्रे स च क्रुद्धोऽभ्यधादिति ॥१३३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लक्ष्म्याः प्रकारमीदृक्षमेतैरेवास्मि शिक्षितः ।
मन्त्र्याह देवागमोऽस्य दण्डः शिक्षा विधीयताम् ॥१३४
राजाऽऽख्यन् मन्त्रिन् यद्येवं पृच्छयन्तां ते किराटकाः ।
युष्मत्सर्वस्वविंशांशं मुक्त्वाऽन्यल्लाति भूपतिः ॥१३५
निःशूकतानाचारौ हि युष्मदुक्त्या श्रियोऽनुगौ ।
तदा स्यातां चेद् वधो वः सर्वस्वापहृतौ भवेत् ॥१३६
ततो बुद्धिसमुद्रेण गत्वा पृष्टो महाजनः ।
भणितं तेन यद्देवो मुञ्चेत् कोटिसमं हि तत् ॥१३७
गत्वा ततो मन्त्रिणोक्ते तदुक्ते नयसारराट् ।
आकार्य गाढं निर्भर्त्स्यामुचत् सर्वान् प्रसादतः ॥१३८
धनो निर्विषयश्चक्रे पुत्राणां जीविका ददे ।
प्रतारयन् जनान् विष्वक् श्रीश्रावस्तीं धनस्त्वगात् ॥१३९
तत्राप्यसौ स्तैन्यशाठ्यानुगतो भीमभूभुजम् ।
ददर्श तेन पृष्टश्च कस्त्वं भोः का च ते कला ॥१४०
सोऽवग् वैज्ञानिको दिव्यपटं राज्ञो वयाम्यहम् ।
पटस्वरूपं कीदृग् भोः स्वामिना किं न हि श्रुतम् ॥१४१
अमुकस्यामुकस्यापि राज्ञो व्यूतः पटो मया ।
का सामग्री तदुत्पत्तौ स्वाधीना सा मम प्रभो ॥१४२
किन्तु स्वं स्वामिनापूर्यं लक्षदीनारमानकम् ।
क्रमाद्देयं तच्च तथा गृहं तत्कर्मकर्मठम् ॥१४३
भूपस्तस्याथ दीनारसहस्रं वेश्म चार्पयत् ।
स जरत्कम्बलं द्वारि बध्वान्तर्विलसत्यलम् ॥१४४
क्रमक्रमेण लक्षार्धं जगृहे तेन मायिना ।
राज्ञाऽन्यदाऽसौ पप्रच्छे निरपादि कियान् पटः ॥१४५
अर्धं देव मनाग् न्यूनं निष्पन्नमिति सोऽभ्यधात् ।
प्रेष्यतां कोऽपि हि सुधीर्यो दृष्ट्वा स्वामिने वदेत् ॥१४६
अथ विग्रहराजाख्यः सामन्तः षि भूभुजा ।
गतौ च तौ गृहद्वारे धनेनाथ न्यगादि सः ॥१४७



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्मत्पटस्य महिमा श्रूयतां देव ! साम्प्रतम् ।
अस्योपलभते रूपस्पर्शौ कोऽपि न जारजः ॥१४८

यन्मातृशीलस्वर्णस्य पटोऽयं कषपट्टकः ।
अत एव यशोराजराजेनापूज्यत प्रभुः ॥१४९

अथ प्रविश्य गेहान्तस्तस्मै पटमदर्शयत् ।
मायया चालयन् हस्तौ हयोऽयं हस्त्यसाविति ॥१५०

दध्यौ विग्रहराजोऽथ किञ्चित् पश्याम्यहं न हि ।
तत् किं माता मे न शुद्धाऽथवा शुद्धाः क्व योषितः ॥१५१

एकासक्ते किञ्च पत्यौ प्राप्नुवत्यो न वारकम् ।
ऋतुस्नाताः किं न कुर्युर्महेलाः कामहेलया ॥१५२

अथावहित्थामास्थाय सोऽभ्यधत्त धनं प्रति ।
नेक्षाञ्चक्रे शुश्रुवे न पटरत्नमितीदृशम् ॥१५३

राज्ञोऽग्रेऽपि तथाऽऽख्यत् स ततो राजा प्रहर्षुलः ।
अन्यान्यान् प्रत्यहं पुंसः प्राहिणोत् प्रेक्षितुं पटम् ॥१५४

धूर्तो धनः पटशक्तिस्वरूपाख्यानपूर्वकम् ।
तान् मोहयामास सर्वानहो मायाविजृम्भितम् ॥१५५

अये विग्रहराजेन दृष्टं नेक्षामहे पटम् ।
तन्नो मातुर्दोष इति ध्यात्वा तेऽप्यस्तुवन् पटम् ॥१५६

इति सर्वं राजकुलं क्रमेणैष व्यमोहयत् ।
अहो मातृदोषापत्तिविद्यायाः स्फूर्जितं महत् ॥१५७

शीघ्रं ददानो दीनारांस्तस्य लक्षमदान्नृपः ।
तेनापि तद्विलसता पुरे न्यष्ठाप्यताखिलम् ॥१५८

राज्ञोचे किं पटः पूर्णः स्वामिन् संपूर्ण एव हि ।
मुहूर्तं शोध्यतां देवाद्यैव मौहूर्त्तिकोऽवदत् ॥१५९

ततो राजा स्नातलिप्तः परिधित्सुश्च तं पटम् ।
तेन धूर्तेन कर्णान्ते स्थित्वा गुप्तमभण्यत ॥१६०

जारजो नोपलभतेऽस्य रूपस्पर्शवैभवम् ।
राजा व्यचिन्तयद् वस्तुस्वरूपं बहुधा भवेत् ॥१६१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्क्षिप्य बाहुं सोऽप्यागाद्धनं धूनं शिरः पटम् ।
सामन्तास्तुष्टुवुर्भूपो दध्यौ वीक्षेऽस्मि किं न हि ॥१६२

मन्ये प्रसूर्न मे शुद्धा तूष्णीकोऽस्थात् ततो नृपः ।
धूर्तोऽवग् मुञ्च वासांसि मैतैः शोभाऽस्य नश्यतु ॥१६३

राजाऽमुचत् ततस्तानि पर्यधाप्यत तं पटम् ।
इतस्ततः करौ कृत्वा मायया तेन मायिना ॥१६४

राजा स्पष्टं यथाजातमात्मानमभिवीक्षते ।
सामन्तास्तू चुरुत्कृष्टा पटश्रीर्वीक्ष्यते प्रभो ॥१६५

धूर्तो व्यज्ञपयद् देव पादचारिकया पुरे ।
पादोऽवधार्यतां सर्वै येनेक्षन्ते पटश्रियम् ॥१६६

राजाऽथ छत्ररोचिष्णुः सामन्तामात्यभूषितः ।
पादचारी पुरेऽभ्राम्यद् धृताशाम्बरदीक्षवत् ॥१६७

स तु धूर्तः काकनाशं ननाश त्वरितं तथा ।
यथा न कैश्चिद्वीक्ष्येत सिद्धान्तर्धानसिद्धिवत् ॥१६८

तद्धूर्तविद्यया मातृदोषापत्त्याङ्किता न ये ।
ते पौराः प्रोचुरुच्चैः भोः किं स्वाम्येष दिगम्बरः ॥१६९

ततः सर्वेऽप्यूचुरेवं सामन्तामात्यपूर्वगाः ।
पर्यधान् नृपतिर्वस्त्रे कुहकं मायिनोऽस्फुटत् ॥१७०

राट्पूरुषैर्वायुवेगैः कृतदीपैरिवाभितः ।
निरीक्ष्यते स्म स शठो न पुनः क्वापि वीक्षितः ॥१७१

ततः प्रतिदिशं राज्ञः सैन्यानि प्रदधाविरे ।
न लेभे स तु धूर्तस्तैर्माययेव तिरोहितः ॥१७२

दिवा निलीय संस्थास्नुर्निशायामुत्पथे व्रजन् ।
मार्गान्मार्गीव जानानः स धनोऽगान्महाटवीम् ॥१७३

यस्यां घ्नन्ति नगान् विषाणवलयोल्लासैरिभाः सैरिभा
यस्यां च प्रसभं भ्रमन्ति परितो दावानला वानलाः ।
यस्यां सिंहनिनादमादधति ते कण्ठीरवा भैरवा
यस्यां चातिभयंकरा न गणनां प्रापन्नगाः पन्नगाः ॥१७४

---

१६३.१. शुद्धास्तू° १७३.३. मार्गामार्गीव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपि च —

उष्णांशूष्णकरोत्करव्यतिकरप्रोज्ज्वालसूर्योपल-
ज्वालाजालविचुम्बनादिव दवज्वालन्ति यत्रानिलाः ।
संशुष्णन्ति जलाशया ग्रहपतेर्बाढं करापाततः
पान्थानां यमकिङ्करः स्फुरति स ग्रीष्मोऽतिभीष्मस्तदा ॥१७५

ततो धनोऽध्वखेदेन तापेनाथ तृषा क्षुधा ।
विश्रब्धघातपापस्य किङ्करैरिव पीडितः ॥१७६
पदमात्रमशक्तोऽपि गन्तुं पृष्ठभिया व्रजन् ।
तृषार्त्या मूर्छितो न्यग्रोधस्यैकस्य तलेऽपतत् ॥१७७॥ युग्मम्
शिशिरानिलतो लब्धचैतन्यो जललिप्सया ।
दिशः पश्यन् धनोऽपश्यद् वनं घनमिवोन्नतम् ॥१७८
तत्राम्बुसम्भावनया स धनः प्रमना मनाक् ।
शीघ्रमेव ततोऽचालीत् सरःपालीमथैक्षत ॥१७९

तं वीक्ष्येव नृपापकारिणमुपागच्छन्तमात्मान्तिके
व्यासेद्धुं किल तुङ्गभङ्गमिषतो हस्तानुदस्यत्तमम् ।
स्मेराम्भोजवनद्विरेफनिनदैः पक्ष्योघकोलाहलैः
पूत्कुर्वन्तमिवाब्धिविभ्रममथ प्रैक्षिष्ट पद्माकरम् ॥१८०

ततोऽसौ जीवितं मन्ये विधायाज्ञावहेलिकाम् ।
पयः पपौ कणेहत्याभुङ्क्त रम्भाफलादि च ॥१८१
पालीतालीतले यावत् क्षणमास्ते स सौस्थ्यभाक् ।
तावत् करेणुकलभभ्राजितं तत्सरोऽतिथिम् ॥१८२

विन्ध्याद्रेर्युवराजवत् सुरपतिस्तम्बेरमभ्रातृवद्
दिग्दन्तावलकुल्यवन्मदनदीप्रोल्लासलीलाद्रिवत् ।
नानोद्यानसरःसरिद्गिरितटीश्रीणां महाकम्रवद्
व्योमोत्पित्सुतया किलोच्छ्रितकरं व्यालोकयत् कुञ्जरम् ॥१८३॥ युग्मम्
ततोऽसौ भयकम्प्राङ्गः प्रत्यासन्नमहावटे ।
आरुरोह दुरारोहे तेन वन्येभमृत्युना ॥१८४

१७५.२. दवज्ज्वालंति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रान्तरे रविरस्ताचलचूलामशिश्रियत् ।
तमसा त्रासित इव समयाद्धि बलाबले ॥१८५

तत्राप्यशक्नुवन् स्थातुं समु रविराविशत् ।
ततश्च तमसो राज्यमेकच्छत्रमजायत ॥१८६

अथोत्तीर्याग्रशाखायास्तरोस्तस्यैव कोटरे ।
सुखं सुष्वाप स धनः स्वबन्धोरिव मन्दिरे ॥१८७

क्षणान्तरेऽथ कस्यापि संलापं तद्धटोपरि ।
श्रुत्वा विबुद्धोऽवधानं दत्तवान् शकुनज्ञवत् ॥१८८

तत एकेन लपितं — अये तं कत्थ गतोसि । भनितमनेन ।

तितसपतिविनतपतयुगसिलिलिसभजिननमिजिननतिनिमित्तम् ।
अट्ठापतपव्वतवलभलतेसलतित्थमगममहम् ॥१८९

अन्नेन भनितमथ किं तत्थ तए किमपि तिट्ठमच्छरितं ।
भनितं तेनापि मया सावत्थिपुले इतं तिट्ठं ॥१९०

भीमो लाया केनवि लायपटमहं वुनामि भनितून ।
उपजीवितून लक्खं दीनाले नलपती भनितो ॥१९१

एतं पटं हि पिच्छति न जालजातो ततो स लाजानं ।
नग्गं कातून पुले सयले हिंडावितून च किलालो ॥१९२

नट्ठो मुनितं त लानएन मुक्कं च साधनं पिट्ठं ।
तस्स य गवेसनत्थं तं च नियत्तं तवेन हतं ॥१९३

सो पुन वानियको घोलअलविमज्झे कहिंचि पलिभमदि ।
तत्तो सहत्थतालं हसितं सव्वप्पिसाएहिं ॥१९४

पिशाचवाचमेतां चाकर्ण्य कर्णसुधाच्छटाम् ।
स्वजीवातुं धनो मेने राट्सैन्यं यन्न्यवर्तत ॥१९५

ततः सुप्तः प्रगे बुद्धो वटस्थो दिश ऐक्षत ।
निर्विघ्नं विजनं मत्वा जगाम सरसीमसौ ॥१९६

---

१८७.२. °स्तरा°　　१९०.१. °मच्छरिदं.

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

शौचमाचर्य तत्तीरे निविष्टः पुरुषद्वयम् ।
आयातमेव वीक्ष्याग्रे बिभयामास सोऽधिकम् ॥१९७

ताभ्यां चोचे महाभाग कस्त्वं कुत इहागमः ।
तदीयपेशलालापैर्धनो विस्रम्भभागभूत् ॥१९८

अवोचच्च नरेन्द्रोऽहं मूलिकार्थमिहागमम् ।
धनपृष्टावाख्यतां तौ चावां धातूपलार्थिनौ ॥१९९

शठोऽभ्यधात् प्रस्तरैः किं मूलिकाः कामदाः खलु ।
तावाख्यातां मूलिका नौ प्रसादय शठोऽब्रवीत् ॥२००

कुर्वे कुबेरश्रियौ वां मूलधातूपलैर्विना ।
मयि प्रसन्ने भवतोः प्रसन्नं दैवमेव हि ॥२०१

महाप्रसादः किन्त्वेष ग्राम आसन्न आवयोः ।
पादोऽवधार्यतां तत्रेत्याख्यातां तौ स आशृणोत् ॥२०२

तत्र प्राप्तस्य तस्यैतौ गौरवं भोजनादिभिः ।
धनायन्तौ तथाऽधत्तां यथैच्छत् स्वगृहं न सः ॥२०३

निधिदर्शनहेमादिसिद्धयुदन्तैर्विमोह्य तौ ।
विश्रभ्य रात्रौ मुषित्वा तद्गृहं स पलायत ॥२०४

निशान्ते च निशान्तेशौ व्यबुध्येतां चिरेण तौ ।
व्यबुध्येतां च सर्वस्वं हृत्वा स गतवानिति ॥२०५

ताभ्यां च पूत्कृते ग्रामग्रामणीः सपरिच्छदः ।
पदिकोक्ताध्वनाऽधावत् तं पराप च पापिनम् ॥२०६

अरे चौर क यासीति हक्कितः पत्तिभिर्धनः ।
विब्रुवन् पुरवः शल्यैर्यमकुल्यैरशल्यत ॥२०७

आच्छिन्नलोप्त्रधनको रौद्रध्यानधनो धनः ।
एकाब्ध्यायुः प्रथमेऽथ नरके नारकोऽभवत् ॥२०८

क्षेत्रस्वभावात् परमाधार्मिकेभ्यः परस्परात् ।
स जाताभिर्यातनाभिर्दुष्कर्मात्राक्षिपद्बहु ॥२०९

अथास्ति भरते काशिदेशे वाराणसीपुरी ।
लङ्काऽलके यदाहूते मन्ये दुर्गमधिश्रिते ॥२१०

---

२०४.४. पलायतः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यामभ्रंलिहदेवौकःशृङ्गदन्तुरिताम्बराम् ।
प्रतिष्ठते रविरथो दक्षिणेनोत्तरेण वा ॥२११

सुपार्श्वजिनजन्मादिकल्याणकमहोत्सवैः ।
या शिवहेतुरित्येव ख्यातिं शिवपुरीत्यगात् ॥२१२

तस्यां प्रचण्डदोर्दण्डखण्डितारातिकर्पर: ।
स्थाम्नाऽपि न परं नाम्ना राजाऽभूदरिकेसरी ॥२१३

प्रतापसिंहनादेन यस्यारातिमृगीदृशाम् ।
गर्भा निपेतुरुत्पेतुर्दिवि तेन हता द्विषः ॥२१४

तस्य निःशेषललनाशिरस्तिलकमञ्जरी ।
कामद्रोर्मञ्जरी जज्ञे देवी तिलकमञ्जरी ॥२१५

तत्प्रतिपन्नबन्धुः श्रीराट्प्रसादैकभाजनम् ।
धनाधिदैवतं तत्र धनदेवो वणिग् बभौ ॥२१६

शीलोन्मीलद्यशोभद्रा यशोभद्राऽस्य वल्लभा ।
वल्लभाऽहर्निशं यस्या वयस्या सत्कृपात्रपाः ॥२१७

नानोपयाचितशतैस्तस्यामुदरगह्वरे ।
स धनो नरकोद्वृत्तः पुत्रत्वेनोदपद्यत ॥२१८

क्रमाज्जाते तत्र पुत्रे राजा राज्ञी पुरं च तत् ।
स्वस्वश्रीगृहतां निन्युर्माङ्गलिक्येन तद्गृहम् ॥२१९

दशाहे च व्यतिक्रान्ते जन्माधिकमहोत्सवैः ।
देवदिन्न इति नाम पितरौ तस्य चक्रतुः ॥२२०

कलाग्रहौचितीं प्राप्तो ग्राहितस्ताः कुलोचिताः ।
स इभ्यपुत्र्याऽथ पित्रा समये पर्यणाय्यत ॥२२१

अत्रान्तरे धनभवोपात्तदुष्कर्मशेषतः ।
देवदिन्नस्य पितरौ दयिता च विपेदिरे ॥२२२

क्रमागतं धनमपि तस्यानश्यत् तरङ्गवत् ।
ततः स देवदिन्नोऽभूद्दैन्यभाग् रोरपुत्रवत् ॥२२३

देव्या तिलकमञ्जर्या तत्पितृस्नेहसिक्तया ।
यथेप्सितं वणिज्यायै मात्रेवास्य धनं ददे ॥२२४

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

पणायता तेन तच्चाभाग्यतो निरगम्यत ।
तत्सत्यं पुण्यहीनस्य सुवर्णं मृत्तिकायते ॥२२५

पुनर्वारद्वयं देव्या दत्तं वित्तं गतं च तत् ।
ततोऽसौ कुलदेव्येव तया त्यक्तो विपुण्यकः ॥२२६

अत्रान्तरे परिक्षीणं वीक्ष्येव प्राग्भवप्रभुम् ।
तं मायाचौर्यनामानौ सेवकौ परिचेरतुः ॥२२७

ततः कपटचौर्याभ्यां स्वजनान् विप्रतारयन् ।
मुमुचे स समस्तैस्तैः कदाचारमलीमसः ॥२२८

कपटश्रावकीभूय तत्सामाचार्यमाचरन् ।
श्राद्धान् गुरूंश्च देवांश्च सोऽमुष्णात् परिमोषिवत् ॥२२९

पर्यटन्नथ देशेषु चम्पापुर्यां जगाम सः ।
परिपाट्याऽथ चैत्यानि भावसारमिवानमत् ॥२३०

कुर्वन्तं तं तथा वीक्ष्य श्रावको जिनरक्षितः ।
जगाद कुत आयातश्छद्मसद्म स ऊचिवान् ॥२३१

सम्मेतशैलशिखरे देवान् वन्दाप्यसेऽनघ ।
जिनजन्मादिभूमीश्च सद्गुरुंश्च पदे पदे ॥२३२

भोक्तुं न्यमन्त्रि स जिनरक्षितेनाथ गौरवात् ।
शठोऽसौ कृच्छ्रतो मेने तेनाभोज्यत भक्तितः ॥२३३

अत्र यावदवस्थानं भोक्तव्यमिति चोच्यत ।
निषिद्धय बहुशोऽमंस्त तच्छ्राद्धप्रार्थनावचः ॥२३४

स्थितः स्वगृहवत् तत्र स मायानाट्यरङ्गभूः ।
श्राद्धेन श्रद्धयाऽभाणि सायमावश्यके कृते ॥२३५

देवदिन्न महाश्राद्ध जिनधर्मविशारद ।
कथानकेन केनापि प्रथयामृतपारणाम् ॥२३६

स्मित्वा स स्माह वृद्धायाः पयःपानार्थिना ह्यसौ ।
तर्हि श्रोत्रमनोमैत्रीं दृढयित्वा निशम्यताम् ॥२३७

अस्ति देशस्त्रिभुवनोदरनामाऽतिविश्रुतः ।
चतस्रो गतयो यत्र खण्डदेशाश्चकासति ॥२३८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्यक्त्वं तत्र राजैको मिथ्यात्वमपरः पुनः ।
अविभक्ता देशभुक्तिः सङ्करेण द्वयोरपि ॥२३९

पुरं सम्यक्त्वराजस्य जिनशासननामकम् ।
मिथ्यात्वभूपस्य पुनः कुदर्शनसमाह्वयम् ॥२४०

आदेस्तत्त्वरुचिर्देवी तयोः पुत्रस्तु संवरः ।
सावद्ययोगविरतिः संवरस्य प्रियाऽऽदिमा ॥२४१

तपश्रीरपराऽऽद्याया जज्ञे कर्मक्षयोऽङ्गजः ।
तपःश्रियः पुनः पुत्री निर्जरा नाम विश्रुता ॥२४२

मन्त्री सम्यक्त्वराजस्य सर्ववेदी जिनागमः ।
इति सम्यक्त्वराजस्य परिवारप्ररूपणा ॥२४३

मिथ्यात्वनृपतेस्तत्त्वजुगुप्सा प्राणवल्लभा ।
कुलप्रदीपस्तनयोऽनयोः शुभदिनर्क्षभूः ॥२४४

दैवज्ञेन च नक्षत्रबलेनोक्तमयं सुतः ।
भोक्ष्यते प्रतिपक्षस्य राज्यभुक्ति न संशयः ॥२४५

पित्रा कृतास्रवनामा युवाऽसौ पर्यणाय्यत ।
विषयाभिलाषराजसुवाऽविरतिकन्यया ॥२४६

तयोश्चास्रवाविरत्योः कर्मबन्धस्तनूरुहः ।
मन्त्री कदागमो मिथ्यात्वस्यापीति प्ररूपणा ॥२४७

इति राजद्वयनयाध्वना गच्छत्यनेहसि ।
श्रीसंवरकुमारस्य विरतिप्रेयसीजुषः ॥२४८

तत्सख्या प्रेमशालिन्या न्यायखन्यानुकम्पया ।
विज्ञप्तमन्यदा देव राट्कुलेऽद्य महोत्सवः ॥२४९॥ युग्मम्

व्याजहार कुमारस्तु सुभगे केन हेतुना ।
अनुकम्पा स्माह देव मिथ्यात्वनृपतेः सुतः ॥२५०

अविरत्या समं पत्न्या कर्मबन्धसुतेन च ।
कुमार आस्रवाभिख्यः पुरीपरिसरे समैत् ॥२५१

तद्गौरवाय सबलः श्रीसम्यक्त्वमहीपतिः ।
अभिगम्य मुदा तं प्रादेशयत् तन्महोत्सवः ॥२५२॥ त्रिभिर्विशेषकम्



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वस्वामिविहितं वैरिगौरवं निशमय्य सः ।
श्रीसंवरकुमारोऽपि क्रोधवह्निकणेक्षणः ॥२५३
तज्ज्वालाभिरिवाताम्रसंतप्ताखिलविग्रहः ।
ग्रहाविष्ट इवान्यादृग् भूत्वा सभ्यान् क्रुधाऽभ्यधात् ॥२५४॥ युग्मम्
हिंसापिशाचीसन्मन्त्र वयस्याद्यमहाव्रत ।
अलीकारिप्रत्यनीक हे द्वितीयमहाव्रत ॥२५५
स्तैन्यसैन्यदैन्यकारिन् भोस्तृतीयमहाव्रत ।
अब्रह्मजिह्मगे तार्क्ष्य ब्रह्मचर्यमहाव्रत ॥२५६
मूर्च्छामूर्च्छासुधाम्भोद भोः पञ्चममहाव्रत ।
प्रभोस्तस्यापि चरितं सामन्ताः श्रूयतामिदम् ॥२५७॥ त्रिभिर्विशेषकम्
क्षणेऽत्र विजयसेनराजो व्यज्ञपयद् गुरुम् ।
महाव्रताश्चतुर्धाऽद्य पञ्चधा किं प्ररूपिताः ॥२५८
भगवानाह राजेन्द्र परिग्रहभिदोऽपि हि ।
अब्रह्मणो गुरुतरदोषाख्यायै पृथक्कृतिः ॥२५९
एवं सर्वत्र नृपते विज्ञातव्यं मनीषिभिः ।
राजाऽभ्यधाद् भगवन्तः प्रकृतं व्याहरन्तु नः ॥२६०
एवमामन्त्र्य प्रधानसामन्तान् वक्ति संवरः ।
भोः सप्तदशधा ख्याताः श्रीसंयममहाभटाः ॥२६१
दशधा विश्रुता धर्मवीरा उपशमादयः ।
अष्टादश शीलाङ्गानि सहस्रा मूलवर्गिकाः ॥२६२
ईर्यासमितिमुख्याश्चाष्टावपि प्रभुमन्त्रिणः ।
प्रभोश्चरित्रं श्रुत्वैतद् ब्रूत किं कार्यमात्मनः ॥२६३॥ त्रिभिर्विशेषकम्
ततो विचार्य तैः सर्वैः कुमारस्य न्यवेद्यत ।
सुधीः कोऽपि स्वाम्युदन्तं सम्यग् ज्ञातुं निदिश्यते ॥२६४
तन्मुखात् स्वामिवृत्तान्तं सम्यक् श्रुत्वा विचार्य च ।
यत् कर्तव्यं तच्च देवास्माभिर्विज्ञपयिष्यते ॥२६५
ततश्च मतिविभवः कुमारेणान्तरः पुमान् ।
स्वामिपार्श्वे प्रैषि तत्र चिरं स्थित्वा स चाययौ ॥२६६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सपर्षदे कुमाराय स समस्तं व्यजिज्ञपत् ।
देवादेशात् स्वामिपादान् नत्वोपाविक्षमग्रतः ॥२६७
देवक्षेमोदन्तपूर्वं स्वामिन् आगमकारणम् ।
पृष्टोऽवोचं कुमारो मां प्रैषीद् वः क्षेमवित्तये ॥२६८
ततोऽपश्यं वैरिपुत्रं सकुटुम्बं पुरः प्रभोः ।
प्रतिक्षणं नवनवगुरुगौरवभाजनम् ॥२६९
स चावादीद् देवपादसेवायामुत्सुकोऽप्यहम् ।
पितृकार्यानुरोधेनागच्छमस्मि चिरात् प्रभोः ॥२७०
स्मेराक्षिपद्मः स्वाम्युक्त्वा तं प्रति स्वागतं तव ।
स्वर्द्धिं दर्शयितुं तस्य सम्यग् दृकपाटकं ययौ ॥२७१
सोऽस्तौत् तं पाटकं तत्र तस्यावासमदात् प्रभुः ।
सुश्राद्धपाटकं प्रीतोऽथ पादाब्जैरभूषयत् ॥२७२
स च तं भृशमस्तावीत् तत्राप्यावासमाप सः ।
यथा यथास्तवः स्तौति हृष्यतीशस्तथा तथा ॥२७३
मया क्षणेऽत्र विज्ञप्तं कुमारोऽद्यागतः श्रमी ।
तदत्र स्थीयतां स्वामिन् दिग्दृष्टया सर्वमीक्षितम् ॥२७४
प्रमत्तपाटकं तावत् पश्याम इति राड् जगौ ।
मयाऽथाभाण्यविरतिरबलात्रैव तिष्ठतु ॥२७५
तत्पुत्रकर्मबन्धाख्ययुतास्त्रवकुमारयुक् ।
प्रमत्ते प्राविशद्देवस्तं स चात्यस्तवीच्छठः ॥२७६
विलेभे तस्य तत्रापि स्वामिना वास उत्तमः ।
यद्वा श्रीसम्यक्त्वराजोऽद्यास्त्रवं मन्यते बहु ॥२७७
श्रीसंवरकुमारोऽथ सखेदमिदमभ्यधात् ।
भो भोः शृणुत सामन्ता मत्तातस्य विचेष्टितम् ॥२७८
विलब्धं मम यत् पूर्वं तद्दत्तमधुना द्विषः ।
तस्यापि स्थानकेनाहं गणितस्तेन सम्प्रति ॥२७९
यदि वा वार्धके पुंसां प्रक्षीणनयसम्पदाम् ।
प्रायो मतिर्विपर्येति दशकन्धरवद् भुवि ॥२८०

---

२८०.३. मतिविपर्येति.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत् पित्रा परिभूतस्य कुतोऽपि विधिवैशसात् ।
विदेशगमनं तावत् केवलं लाघवाय मे ॥२८१

यतः —

कुलीनस्याकलङ्कस्य दोष्मतो मतिशालिनः ।
स्वपित्रा परिभूतस्य विदेशान्मरणं वरम् ॥२८२

श्रीमहाव्रतसामन्तैरूचे देवस्य या गतिः ।
सा सर्वेषामपि हि नः पूर्णं तदरिवाञ्छितम् ॥२८३

किञ्च राज्ञामियं नीतिरुपकृत्य द्विषत्कुलम् ।
समूलकाषं कषति यस्तस्योर्वी वशंवदा ॥२८४

तच्चेत् स्वाम्यपि सम्मान्यास्रवं छेत्स्यति तद्वरम् ।
संवरोऽवग् नैवमेवं पुष्टे दुष्टे कथं क्षयः ॥२८५

अये किं काचपिच्येनेत्यथोचुस्तलवर्गिकाः ।
स रिपुः स्वामिविश्रब्धो गत्वा छन्नं निगृह्यताम् ॥२८६

संवरः स्माह तत्रैवं निगृहीते प्रभुः स चेत् ।
प्राणप्रहाणमिच्छेत् सर्वथा हानिरेव नः ॥२८७

वीरा उपशमाद्यास्तेऽवोचन् देव निशम्यताम् ।
जिनागममहामात्याद् यत्कृत्यमवधार्यताम् ॥२८८

ततो मतिविभवेनाकारितः श्रीजिनागमः ।
कुमारेणाप्रच्छि मन्त्रिन् किमेवं पोष्यते रिपुः ॥२८९

मन्त्री —

देव नीतिपरा भूपाः परान् सत्कृत्य कुर्वते ।
तैरेव तत्कुलोत्पाटं कण्टकस्येव कण्टकैः ॥२९०

कुमारः —

युज्येत सर्वमेवेदं मन्त्रिन् यद्येष सर्वथा ।
त्यक्त्वा स्वपक्षमायास्यद् विभीषणकुमारवत् ॥२९१

अयं तु स्वपितुः कार्यं कर्तुं स्मायाति वोऽन्तिके ।
न ज्ञायतेऽसौ तत् तातपादानां किं करिष्यति ॥२९२

मन्त्री —

कुमार माऽधृतिं कार्षीर्यतः स्वाम्यप्रमद्वरः ।
देहच्छायेव चास्येष नित्यं तत्पारिपार्श्विकः ॥२९३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्चास्रवोऽपि देवायं स्वामिभक्तो निरीक्ष्यते ।
कुमारोऽत्र वीक्षस्व दुष्टस्यास्य विचेष्टितम् ॥२९४
यदभव्याः सर्व एव श्रीमिथ्यात्वानुरागिणः ।
भव्येष्वप्यनन्ततमो भागस्तातं निषेवते ॥२९५
किल सर्वेऽप्याभवन्ति भव्यास्तातस्य सैष तु ।
तेषां राड्दर्शनं रुन्द्धेऽनुरक्तो भवतोच्यते ॥२९६
राड्भुक्तौ योऽप्यनन्तांशस्तन्मध्यादप्यनन्तशः ।
विमोह्यानेन मिथ्यात्वभुक्तौ सचिव निन्यिरे ॥२९७
न वै तन्न तवाध्यक्षं जाग्रत् स्वपिषि किं ततः ।
कुमार तर्हि विस्पष्टं यथास्थमभिधीयते ॥२९८
देवोऽधुनाऽऽस्रवपुत्रकर्मबन्धस्य दित्सति ।
विपाकनिर्जरां कर्मस्थितिभार्योद्भवां सुताम् ॥२९९

कुमारः —
मन्त्रिन् साधूदितं सेयं कलङ्कोपरि चूलिका ।
सन्तापकारिणी गण्डस्योपरि स्फोटिकाऽथवा ॥३००
मन्त्री —
प्रियपुत्रस्य ते भुक्तिः श्रावकाश्च विलेभिरे ।
बन्धाविरत्याश्रवाणां त्रयाणामेकहेलया ॥३०१
प्रमत्ताद्यष्टकेऽपीषत् पदमाश्रवबन्धयोः ।
स्वाम्यदान् मतिविभवविज्ञप्त्याऽविरतेर्ननु ॥३०२

कुमारः —
अकृत्ये पित्रवज्ञानेऽत्यसह्ये त्वरिवैभवे ।
यत्कार्यकरणौचित्यं जिनागम ममोद्दिश ॥३०३
मन्त्री —
अशुभस्याभ्युदीतस्य विधेया कलयापना ।
विध्यायत्यग्निवत् तद्धि स्वयं कालविलम्बतः ॥३०४
किञ्च —
न सहसा विदधीत सुधीः क्रियां यदविविच्यकृतः पदमापदाम् ।
भुवि विमृश्यकरं तु गुणाकरं स्वयमहो वृणते शुभसम्पदः ॥३०५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रान्तरेऽवदच्छ्राद्धो धीमन् खिन्नस्त्वमध्वना ।
अस्म्यापणपणायाभिस्ततः सम्प्रति शय्यते ॥३०६
ततो भावनया श्राद्धो मायावी मायया पुनः ।
देवान् नत्वा भणित्वा च मन्त्रं त्रिः परमेष्ठिनाम् ॥३०७
प्रत्याख्याय च साकारं क्षमयित्वाऽखिलाञ्जिनः ।
विधिना शयितौ ब्रा` मुहूर्ते विधिनोत्थितौ ॥३०८॥ युग्मम्
सूर्योदये वपुर्वस्त्रमनःशौचपुरःसरम् ।
श्राद्धः स च शठो वेश्मजिनपूजां वितेनतुः ॥३०९
श्रीचैत्यवन्दनां कृत्वा प्रत्याख्याय यथारुचि ।
भवाब्धिपोतमेतां तौ चैत्यं पद्मप्रभप्रभोः ॥३१०
तत्र पुष्पैश्च गन्धैश्च नैवेद्यैश्च मनोरमैः ।
आनर्चतुः सरोमाञ्चौ श्रीपद्मप्रभतीर्थपम् ॥३११
विधाय विधिना चैत्यवन्दनां दशभिस्त्रिकैः ।
हर्षास्रातूपिताक्षोऽसौ देवदिन्नोऽस्तवीत् प्रभुम् ॥३१२
जय पद्मप्रभस्वामिन् पद्मलाञ्छन पद्मदृक् ।
पद्मैकसद्मपात्पद्म पद्मरागमणिद्युते ॥३१३
श्रीमद्धरधराधीश महावंशैकमौक्तिक ।
सुसीमाहृदयानन्द नन्द पद्मप्रभप्रभो ॥३१४
रागद्वेषमहामोहभूतैर्नित्यमधिष्ठिते ।
भवागारे निवसतां त्वदाज्ञा नाथ रक्षिका ॥३१५
कषायविषवल्लीभिर्मूर्छिताशेषजन्तुके ।
संसरतां भवारण्ये क्षेमस्त्वन्नाममन्त्रतः ॥३१६
विषयाशीविषैर्भीष्मे पतितानां भवावटे ।
निष्कर्षिका जगन्नाथ वाग्वरत्रात्र तावकी ॥३१७
मिथ्यादर्शनचरटैरखिलोऽपि खिलीकृतः ।
सिद्धयध्वाध्वानघण्टाभिस्त्वया घण्टापथः कृतः ॥३१८
अहर्निशं विनटितं कषायविषयास्रवैः ।
विश्वरक्षाबद्धकक्ष रक्ष मां सुप्रभप्रभो ॥३१९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिन्तामणिस्त्वमेवैकस्त्वमेव सुरभूरुहः ।
त्वमेव कामसुरभी कामकुम्भस्त्वमेव च ॥३२०

ततस्त्वामेव भगवन् प्रार्थये प्रार्थितप्रदम् ।
भक्त्यद्वैतं त्वयि स्वामिन्नाभवं भवतान्मम ॥३२१

क्षणेऽत्र विमलकीर्त्तिसूरयः सपरिच्छदाः ।
देवान् वन्दितुमाजग्मुर्व्याख्यां सङ्गाय चादधुः ॥३२२

तथा हि –

चतुर्गत्यम्भोधिव्यतिगमचतुःपोतललितान्
जिनेन्द्रा दानादीन् जगदुरिह दानं च बहुधा ।
द्विधा शीलं सर्वेतरतनु तपो द्वादशविधं
तथैव श्रीभावो भजत तदिमान् प्राप्नुत शिवम् ॥३२३

देवदिन्नोऽथ नटवद्धर्षास्रादि मुहुः सृजन् ।
जिनरक्षितेन जज्ञे संविग्नात्मैष धार्मिकः ॥३२४

तस्य तु स्तैन्यमायाभ्यां पर्याकुलितचेतसः ।
न किञ्चिद् भगवदुक्तं पर्यणंसीदभव्यवत् ॥३२५

ततः शरीरचिन्तायै तौ युतौ बहिरीयतुः ।
जिनरक्षितपुत्रार्हद्दत्तहट्टे तस्थतुः क्षणम् ॥३२६

भुजिक्षणेऽवदच्छाद्धस्तं भोक्तुं धाम्नि गम्यते ।
सोऽवक् कल्ये स्निग्धभुज्या जागराच्च न मे क्षुधा ॥३२७

अर्हद्दत्तोऽथ विपणौ तालकं दातुमैहत ।
पितोचे देवदिन्नोऽस्ति वत्स मा देहि तालकम् ॥३२८

अनिच्छन्नपि तनयः पितृवाक्यान्न तद्ददौ ।
पिता पुत्रौ ततो भोक्तुं शीघ्रं स्वगृहमीयतुः ॥३२९

स तु पापः करग्राह्य रत्नाद्यादाय नष्टवान् ।
अर्धभुक्तः सुतस्तूर्णं विपणावाजगाम च ॥३३०

हट्टं मुष्टं वीक्ष्य तं च नष्टं पृष्ठे दधाव सः ।
चौरोऽनश्यत् स पृच्छक्रे राट्पुंभिर्जगृहे शठः ॥३३१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोप्त्रं गृहीत्वा बद्धोऽसौ नीयते स्म पुरान्तरे ।
तच्छ्रुत्वा पूर्वरान् श्राद्धस्त्वमुं मोचयतेत्यवक् ॥३३२

तैरूचे क्षमते क्ष्मापो न पुत्रमपि तस्करम् ।
विज्ञप्यतेऽपि नात्रार्थे जितशत्रुर्नृपस्ततः ॥३३३

आरक्षैर्दर्शितो राज्ञे राजा तं वध्यमादिशत् ।
श्रावकः प्राभृतकरो धराधीशं व्यजिज्ञपत् ॥३३४

देवैष नो बन्धुरतः स्तैन्यदोषोऽस्य न क्वचित् ।
राजा पुत्रास्यमद्राक्षीत् सोऽवादीन्नैष नः स्वकः ॥३३५

ऊचुः पिता ततोऽनेन राजन् धूर्तेन वञ्चितः ।
भूपोऽथ श्रावकं स्माहास्थाने किं खिद्यसे सुधी ॥३३६

धीमन् मयाऽपि साधूनां शुद्धसिद्धान्तदेशिनाम् ।
पीयूषपायं निपपे वचनं पाप्ममोचनम् ॥३३७

तम्हा सइ सामत्थे आणाभट्ठम्मि नो खलु उवेहा ।
अणुकूलेहियरेहि य अणुसट्ठी होइ दायव्वा ॥३३८

आज्ञाभ्रष्टश्चैष एवमनाचारं करोति यः ।
मुञ्चे यद्येनमेवं तत् करोत्यन्योऽपि वञ्चकः ॥३३९

विग्रहराजः सामन्तः स्मित्वा भूपमथाभ्यधात् ।
यन्मे ग्रामेऽनेन चक्रे चित्रं स्यात् तच्छ्रुतेः प्रभोः ॥३४०

देवास्ति देवप्रसादप्रदत्ते मम मण्डले ।
अतिप्रत्यासन्ननद्या नदीमातृकतां दधत् ॥३४१

वंशपृष्ठाभिधो ग्रामोऽभिरामो नगरादपि ।
स्वामिप्रसादतो राज्यं तत्राहं विदधे सुखात् ॥३४२॥ युग्मम्

तत्रायमागतोऽन्येद्युः शून्यं भ्राम्यन्नितस्ततः ।
ईक्षाञ्चक्रे मया नैवाज्ञायि कोऽयमिति प्रभो ॥३४३

नदीतटेऽन्यदा सायं वृषस्थोपस्करं नरम् ।
आयान्तमेष वीक्ष्योचे भोः कुतस्त्वमिहागमः ॥३४४

वसन्तपुरादित्युक्ते पितरौ कौ तवेति सः ।
पुनः पृष्टः प्राह विप्रो जसादित्यश्च माहिनी ॥३४५

---

३३६.४. सुधीः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कण्ठे विलग्य तस्यैषोऽरोदीत् सोऽवगिदं किमु ।
ततोऽयमवदत् त्वं मेऽनुजो यत्ते जनैः पुरः ॥३४६
गृहान्निर्गत्य देशेष्वभ्राम्यमस्मि कुतूहली ।
चिरं प्ररुद्यष कृच्छाच्छठः प्राक्षालयन् मुखम् ॥३४७॥ युग्मम्
शरीरचिन्तां कुर्वेत्रेत्युक्तो मुग्धः स चाशृणोत् ।
वृषस्तु ग्रामाभिमुखं व्रजतीत्येष तं जगौ ॥३४८
वृषं रक्षाम्यहं त्वं त्वागच्छेर्वेश्मन्युदङ्मुखे ।
प्रवेशे वामतः शीघ्रं मम राहिलसंज्ञिनः ॥३४९
इत्युक्त्वा वृषमादाय ग्रामप्रान्ते विदिश्यसौ ।
कुविन्दगेहे गां बध्वा शिश्ये मलविकोपरि ॥३५०
देहचिन्तां चिरात् कृत्वाऽधावद् वैदेशिकः स तु ।
उक्तदेशे राहिलौकः पृष्ट्वा पृष्ट्वा विलक्ष्यभूत् ॥३५१
लोकोऽवक् पाटके नात्र राहिलद्विजमन्दिरम् ।
तद् भोः पान्थ वृथैवात्र माऽरण्यरुदितं कृथाः ॥३५२
ततः स गतसर्वस्वोऽतीत्य कृच्छ्रेण तां निशाम् ।
प्रातः स्वामिन् मम द्वारे प्रोच्चैः पूच्चक्रिवानिति ॥३५३
वैदेशिकोऽह देवास्मि मुष्टो धूर्तेन केनचित् ।
तच्चौरं वा निगृहाण मम प्राणान् गृहाण वा ॥३५४
स ततोऽपृच्छ्यत मया क्व मुष्टोऽस्याह सोऽखिलम् ।
ततो मया मीलयित्वा ग्रामः सर्वोऽप्यभण्यत ॥३५५
एवमेवमयं मुष्टः केनापि हि दुरात्मना ।
तद्वक्तु यस्य गेहे सोऽन्यथा दण्ड्यो गृहाधिपः ॥३५६
कुविन्दोऽवग् वृषः कीदृक पान्थोऽवक् कर्बुरो जरन् ।
ईदृग्वृषः कोऽपि नरो मद्गेहेऽस्तीति सोऽवदत् ॥३५७
स्वपूरुषैरथानायि मया सैष गवा सह ।
पान्थश्चाभाण्ययं गौः स्यात् तव सोऽवददोमिति ॥३५८
अङ्गुष्ठं नर्त्तयन्नेषोऽवग् रेऽहमपि तावकः ।
न द्रष्टुमपि ते दास्ये वृषभस्यास्य सम्मुखम् ॥३५९



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ठकानामीदृशां वाचि प्रत्ययोऽत्रेति को नयः ।
रे धूर्तामुकवत् किं मामपि मोषितुमिच्छसि ॥३६०
मया चैषोऽभाणि ततो मल्व्यां तेऽस्ति किं वद ।
एषोऽवक् पृच्छया वः किं देयं न ह्यस्ति मेल्यकम् (?) ॥३६१
पान्थस्तु पृष्टोऽवगेतदेतदस्त्यत्र वस्तु मे ।
पुनरेषोऽवदद् भृत्यो ममायं वेत्त्यसौ ततः ॥३६२
मयाभाण्येष सप्ताष्टास्तवात्रैतस्य वासराः ।
अद्याकस्माद् वृषः सोपस्करो भृत्यश्च ते कुतः ॥३६३
तूष्णीकेऽस्मिन् मयाऽवादि रे रेऽमुं हत तस्करम् ।
रदात्ताङ्गुलिरूचेऽसौ रक्ष मां शरणेऽस्मि ते ॥३६४
ततः सोपस्करोऽनड्वान् पथिकाय प्रदापितः ।
मया निर्भर्त्स्यं देवायं स्वदेशान्निरवास्यत ॥३६५
राज्ञेऽथ सिंहराजश्च वज्रसिंहश्च दुर्नयम् ।
देवदिन्नस्योचतुः स ज्ञेयो मूलकथानकात् ॥३६६
स्मित्वाथ जितशत्रू राट् जगाद जगदाधिहृत् ।
ईषदागो पुनर्वृत्त्या क्षम्यतां क्षमिभिर्ननु ॥३६७
यस्त्वेवं चौर्यमायाभ्यां चतुर्धा रूढदुर्नयः ।
स वध्य एव पापीयान् मा ताम्य जिनरक्षित ॥३६८
ततो वसुन्धर इव रासभारोपितः पुरे ।
भ्रमितो देवदिन्नः स वराकः पापपिण्डवत् ॥३६९
स्वदुष्कृतफलं जानन्न संक्लिष्टोऽनुतापतः ।
स मध्यमगुणः शूलारूढो नृत्वमुपार्जयत् ॥३७०
तस्यामेवाथ चम्पायां वणिजो देवडस्य सः ।
पत्न्याः कुक्षौ सर्वदेव्या नन्दनत्वमशिश्रियत् ॥३७१
पूर्णेष्वहस्सु जातस्य तस्याथ द्वादशेऽहनि ।
वसुदेव इति नाम पितृभ्यां महसा दधे ॥३७२
कुलोचितकलादाने वग्गडाख्यवणिक्सुता ।
मङ्गला मङ्गलैस्तेन चतुर्भिः पर्यणीयत ॥३७३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोःसहायः पितुर्जज्ञे कालेन पितरौ हृतौ ।
गृहस्वामी स एवास्तन् मङ्गलाप्राणवल्लभः ॥३७४
सा स्वभावाद्यौवनाच्च मङ्गला सुभगा भृशम् ।
वसुदेवस्तुनिष्पुण्यतया लक्ष्म्याः सुदुर्भगः ॥३७५
दारिद्र्येण किलाकृष्टे प्राङ्मित्रे चौर्यकैतवे ।
अत्रान्तरे वसुदेवे सममेवावतेरतुः ॥३७६
हट्टेऽस्याथ वरदत्तः श्रेष्ठिसागरदत्तसूः ।
आगात् तद्गौरवादेष वसुदेवस्य मित्र्यभूत् ॥३७७
किन्त्वस्याकृत्रिमं प्रेम वसुदेवस्य कृत्रिमम् ।
इन्दुमण्डलवद् व्योमतलस्य च जलस्य च ॥३७८
अन्यदा भणिता तेन वसुदेवेन मङ्गला ।
मामवीक्ष्यापणे गेहे वरदत्तः समेष्यति ॥३७९
स्थास्याम्यहं तु प्रच्छन्नः स वक्ष्यति सुहृत् क्व मे ।
भाण्यं त्वयाऽपवरकेऽपटुर्वेक्ष्यति तत्र सः ॥३८०
ततः कण्ठे विलग्यास्य मुखं चुम्ब्यं विशङ्कितम् ।
स्राक् ततोऽस्मि क्षुरीपाणिस्तं ग्रहीष्यामि भीषणः ॥३८१
भीतस्ततोऽसौ मेऽभीष्टं भूरि भूरि प्रदास्यति ।
आजीवितं प्रिये तेन जीविका नौ भविष्यति ॥३८२
प्रतिश्रुतं प्रतिवचस्तया लोभाभिभूतया ।
अथाह्नाऽऽहट्टे स्वमित्रं श्रेष्ठिसूस्तन्निकेतमैत् ॥३८३
तेनोक्ता मङ्गला मित्रं क्व मे सोचेऽन्तरातुरः ।
विवेश गृहमध्येऽसौ सा च भर्त्रुक्तमाचरत् ॥३८४
मृतो मृतोऽसि रे दुष्टेत्याख्यात् पापः क्षुरीकरः ।
धावित्वा तं करे धृत्वा मारयामीति सोऽवदत् ॥३८५
श्रेष्ठिसूर्भीतभीतोऽवग् मा मारय धनं ददे ।
दत्वा यथेष्टं तस्यासौ स्वं मेने यममुक्तवत् ॥३८६
तेनापि भृष्टं शवं स्वं मन्वानः श्रेष्ठिनन्दनः ।
नित्यं नवनवोत्कोचैर्मानयामास स्वं पतिम् ॥३८७

३७५.३. निःपुण्य°

ततो राज्ञा वरदत्तोऽभाणि किं ते प्रयोजनम् ।
सोऽवोचद् वसुदेवेन देवैवं वञ्चितोऽस्म्यहम् ॥३८८

कृतप्रतिकृतं तस्य चिकीर्षे त्वत्प्रसादतः ।
तदमु दोषं प्रापय्य निगृह्यानुगृहाण माम् ॥३८९

तत् प्रतिश्रुत्य नृपतिर्वरदत्तस्य पश्यतः ।
मुद्रारत्नं स्वं समर्प्य पुरुषौ शिष्टवानिति ॥३९०

एकेन वसुदेवाट्टे पश्यतोऽस्या वितर्कितम् ।
पात्यमेतत् तथाऽदृश्यं द्वितीयेन विदूरतः ॥३९१

तस्मिंस्तेन गृहीते चापक्रामेत ततो युवाम् ।
ततो राजादिष्टमाभ्यां कृतं राज्ञे न्यवेद्यत ॥३९२

राज्ञाऽथ पटहोऽदापि चम्पायां घोषितं त्विदम् ।
पतितामादितां मूल्येनात्तां वा राजमुद्रिकाम् ॥३९३

यो लम्भयेत् तस्य दत्ते श्रीभूपः पारितोषिकम् ।
यस्तु जानन्न कथयेद् दण्डस्तस्याङ्गिकः स्फुटम् ॥३९४॥ युग्मम्

घोषितेऽपि तथा मुद्रारत्नं केनापि नार्प्यत ।
ततो भूपः समाहूय पूःश्रेष्ठानित्यवोचत ॥३९५

पृष्ट्वा पुरीजनान् मुद्रारत्नमानयतामुना ।
न दोषोऽतः परं तु स्यान्निग्रहो दुरनुग्रहः ॥३९६

पूर्नायकैस्ततः सर्वे प्रत्येकं प्रश्निता जनाः ।
तद्वार्तामपि नाचख्युस्तद्राज्ञस्तैर्न्यवेद्यत ॥३९७

तान् पुनः स्माह भूनेता मुद्रामानयत द्रुतम् ।
भविता वोऽभितो मुद्रा मुद्राशुद्धावतः परम् ॥३९८

राट्पुंभ्यां पूर्वराध्यक्षं राज्ञो न्यज्ञप्यत प्रभो ।
आत्तं तद्वसुदेवेन शोध्यतामापणोऽस्य तत् ॥३९९

शोधिते चापणे तस्य चिरनष्टेष्ट बन्धुवत् ।
मुद्रारत्नं प्रापि राज्ञा वधस्तस्य न्यवेद्यत ॥४००

महाजनातिविज्ञप्त्या चक्रे निर्विषयस्तु सः ।
देशान्तराणि भ्रान्त्वाऽत्रैद् वसुदेवः स एष भोः ॥४०१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वैहिकोदन्तसंवादात् परत्रेहादि कुर्वतः ।
अचिन्त्यात्मबलोल्लासाज्जातिस्मृतिमुपैदसौ ॥४०२

जातिस्मृत्या परत्राऽपि संवादादनुतप्तहृत् ।
सुधर्मस्वामिपादाब्जं घर्मार्त्त इव सोऽश्रयत् ॥४०३

व्यजिज्ञपच्च धनादिभवेषु छद्मचौर्यतः ।
योऽहोराशिर्मया चक्रे तदंशः प्रभुभिर्जगे ॥४०४

प्रभो प्रसीद येनैतं पापराशिमशेषतः ।
निरस्याखिलदुःखानां प्रददेऽस्मि जलाञ्जलिम् ॥४०५

गुरुः –

दुष्कर्मदलनी दुःखशमनी शर्मदायिनी ।
सर्वसावद्यविरतिरूपा दीक्षा किलार्हती ॥४०६

वसुदेवः –

यदि योग्योऽस्मि भगवंस्तत् तयालङ्कुरुष्व माम् ।
येन दुर्गतयो नैव कदापि परिजानते ॥४०७

गुरुः –

अनतिशयिनां योग्यः सौम्य त्वमत्र न वीक्षितुं
समयविधिना स्तेनादीनां न हि व्रतसन्निधिः ।
अतिशययुजः साक्षाच्चेतःस्थितिं किल जानते
ददति तदमी दीक्षां गाढप्रहारमुनेरिव ॥४०८

ततश्च –

विजयसेनरसेन विनिर्मितव्रतमहत्रिदिवीकृतभूतलः ।
प्रभुसुधर्मपदाम्बुरुहेऽग्रहीद् व्रतमधुं वसुदेवमधुव्रतः ॥४०९

मायेन्द्रजालबलमोहितविश्वविश्वोऽन्यस्वापतेयरसिकोऽजनि योऽतिनिन्द्यः ।
त्रैलोक्यवन्द्यजिनशासनवैभवेन वन्द्यः स एव वसुदेवमुनिर्बभूव ॥४१०

इति श्रीनिर्वाणलीलावतीमहाकथेतिवृत्तोद्धारे **लीलावतीसारे** जिनाङ्के **दम्भ-चौरिका-युग्म-व्यावर्णनो** नाम चतुर्थ उत्साहः * ॥

---

* ग्रं. ४२६ अ० २० ॥ छ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# पञ्चम उत्साहः

अथ सिंहमहाराजं जिनदत्तः कृताञ्जलिः ।
विज्ञो विज्ञापयामास यथाकालप्रवेदकः ॥१
देवाश्रान्तं भगवतां धर्मदेश[न]याऽनया ।
निरोधो मा स्म सम्पादि तदादेशं विमार्गय ॥२
राजाऽवदद् यदस्माभिः प्रभोर्व्येज्ञपि कौतुकात् ।
तदद्यापि तथैवास्ते ततो गुरुरवोचत ॥३
राजंस्तदेव व्याख्यातु वयमेताः स्म आदरात् ।
आदितस्तुभ्यमायुष्मँस्तदेव च निवेद्यते ॥४
महाप्रसादो भगवन्नित्युक्त्वा सिंहभूपतिः ।
साधून्निमन्त्रयामास भक्तपानार्थमादरात् ॥५
इच्छया वर्तमानेन योगेनेति गुरूदिते ।
तान् प्रणम्य यथास्थानं ययुः सर्वे नृपादयः ॥६
देवाधिदेवान् संस्नाप्य कुङ्कुमाद्यैर्विलिप्य च ।
समभ्यर्च्य च विधिना सर्वोत्तमसुमादिभिः ॥७
संविभागप्रदानेन सुसाधून् प्रतिलाभ्य च ।
बुभुजे सपरीवारः श्रीमान् सिंहमहीपतिः ॥८॥ युग्मम्
बत वाणी सुधावाणी कान्तिर्भ्रान्तिकरी रवेः ।
रूपं जितद्युसद्रूपं सौम्यता सौम्यतातजित् ॥९
इत्थं गुरुगुणग्रामं वर्णयन्तः प्रमोदतः ।
राजसंसदि मध्याह्ने तस्थुः सामन्तमन्त्रिणः ॥१०॥ युग्मम्
अतिप्रगे समेतव्यमित्युदित्वा महीपतिः ।
कुमारामात्यसामन्तजिनदत्तान् व्यसर्जयत् ॥११
ततश्चाति प्रातरेव सह तैः सिंहभूपतिः ।
गत्वा श्रीसमरसेनसूरिं नत्वाऽब्रवीदिति ॥१२

---

९.२. क्रांतिभ्रांति°

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रबन्धमनुसंधेहि प्रभो प्रस्तुतमग्रतः ।
भगवानाह राजेन्द्र सावधाने निशामय ॥१३

पुनरन्यदिने नत्वा श्रीसुधर्मं व्यजिज्ञपत् ।
श्रीविजयसेनभूपोऽमात्यादिपरिवारयुक् ॥१४

चतुर्थमास्रवद्वारमिदानीं शाधि नः प्रभो ।
व्याजहार घनोदारगिरा सूरिर्निशम्यताम् ॥१५

पुनरूचे नृपः स्वामिन्नास्रवद्वारपञ्चकम् ।
चत्वारस्तु कषायास्तदत्रोपष्टम्भकोऽस्तु कः ॥१६

प्रभुराख्यन् मोहभेदो नोकषायाः कषायवत् ।
ततो वेदात्ममोहोपष्टब्धोऽयं तुर्य आस्रवः १७

अब्रह्मसेवाप्राणेशो मोहवीरेश एष भोः ।
तिर्यङ्नृनारकसुरैः किङ्करैरिव खेलति ॥१८

तथा हि —

हरहरिब्रह्मचन्द्रसुरेन्द्रादिविजित्वरः ।
स्मरवीरः प्रहरते विश्ववैरी जगत्त्रयम् ॥१९

तरुणीभ्रधनुर्निर्यत्कटाक्षोत्तीक्ष्णसायकैः ।
विध्यत्येष स्मरव्याधो जगज्जन्तुकुरङ्गकान् ॥२०

पुष्पेषुविद्धमनसो जीवा निश्चेतना इव ।
सुप्तोन्मत्तबधिरान्धमत्तसंमूर्छिता इव ॥२१

न वीक्षन्ते लोकगर्हां कुलनिन्दां कुलक्षयम् ।
सर्वस्वनाशं वृषणकर्णनाशादिकर्त्तनम् ॥२२॥ युग्मम्

भ्रातृजायां वधूं भग्नीं भाग्नेयीं पुत्रिकामपि ।
मातुलानीं मातरं च गणयन्ति न कामिनः ॥२३

राजसामन्तसचिवपुरोधःश्रेष्ठिनामपि ।
पत्नीं पुत्रीं स्नुषां भग्नीं भाग्नेयीं वारयोषितम् ॥२४

पश्यतीच्छति भुङ्क्ते च कामध्यामलमानसः ।
ततो राजादिभिः सैष नारकीव निगृह्यते ॥२५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वध्यते चोद्बध्यते च शूलायामधिरोप्यते ।
नरके नारकोऽथ स्यात् पल्यसागरजीवितः ॥२६॥ त्रिभिर्विशेषकम्
कृच्छ्रतस्तत उद्वृत्तः कामकामलविह्वलः ।
तदेवाब्रह्म भजते भजते नरकं ततः ॥२७
ततस्तिर्यक् कामलुब्धः पुनर्नरकमाविशेत् ।
अनड्वान् चाक्रिकस्येव परिभ्राम्यत्यनन्तशः ॥२८
कथञ्चिन्नृत्वमासाद्याब्रह्मग्रहिलितः पुनः ।
क्रमागतां श्रियं हन्ति वैरिसिंहो यथैषकः ॥२९
प्रपञ्चितज्ञा सभेयं सूचितज्ञा न हि प्रभो ।
प्रपञ्च्यास्य स्वरूपं तदाख्याहीति नृपोऽभ्यधात् ॥३०
चतुर्ज्ञानी रत्नदीपदीप्रः प्रभुरभाषत ।
मनो निवेश्योपकर्णमाकर्णय महीपते ॥३१
अस्ति स्वस्तिकवत् स्वस्तिहेतुर्वर्षेऽत्र भारते ।
शूरसेनाजनपदः पदमाश्चर्यसम्पदाम् ॥३२
भरतक्षेत्रराजस्य क्षेत्रान्तरजये किल ।
शूरा सेनेत्यसौ ख्यातः शूरसेनाभिधानतः ॥३३
दिद्युते मथुरा तत्र पुरी सुरपुरीसखी ।
यस्याः परिसरक्षोणीं प्रक्षालयति सूर्यजा ॥३४
तत्राद्भुतमहाशब्दानुशब्दितककुम्मुखः ।
मङ्गल्यो विमलात्माऽभूच्छङ्खो नाम नरेश्वरः ॥३५
यस्य प्रतापस्तपनोऽहर्निशं वत निर्ममौ ।
कालरात्रिममित्राणां मित्राणां कुवलोदयम् ॥३६
सीमन्तिनीनां सीमन्तरत्नं रत्नं सतीषु च ।
तस्य जिष्णोः कमलेव प्रियाऽभूत् कमलावती ॥३७
तयोर्विषयपीयूषयूषं प्रजुषमाणयोः ।
आनन्दपिण्डो नु मूर्त्तः पुत्रः पद्मरथोऽभवत् ॥३८
सोऽभात् पूर्णकलः प्राप्तयौवनः कान्तकान्तिकः ।
सौन्दर्याब्धिर्गीतसुधावर्षुकः कौमुदीन्दुवत् ॥३९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतश्च तत्रैव पुरे महेभ्योऽश्यानदानवान् ।
प्रवाद्यत्कीर्त्तिघण्टोऽभूद् धनः श्रेष्ठी महेभवत् ॥४०
हास्येऽप्यलक्ष्यरदना सलीलगतिगामिनी ।
भार्या तस्याभवद् भव्या हस्तिनीवालसेक्षणा ॥४१
प्राग्जन्मरूढपुण्यद्रुकामप्रसवसत्फलम् ।
तयोर्हृन्नन्दनो जज्ञे नन्दनो नन्दनाभिधः ॥४२
कुलोचिताः कलाः सर्वा ग्राहितः सैष लीलया ।
सुलक्षणायाश्च करं श्रेष्ठिसागरजन्मनः ॥४३
मातापितृप्रसादात् तौ रेमाते दम्पती तथा ।
यथा स्मररती द्रष्टुं तल्लीलामभिलेषतुः ॥४४
पुरेऽन्यदाऽथ तत्रोपैन्नटो नाट्यैकजन्मभूः ।
हराक्षिहुतभुक्पातादग्धमूर्त्तिरिव स्मरः ॥४५
महानटो यद्दिदृक्षुर्भरतो यत्र शिक्षकः ।
गौरी यत्र वरं दित्सुस्तन्नाट्यं स नटो व्यधात् ॥४६
[यथा-]शक्ति ददुः सर्वेऽस्मै पौराः पारितोषिकम् ।
नन्दनस्तु स्वर्णलक्षं प्रमोदान्नाट्यमर्मवित् ॥४७
अहो महादानमि[ति नाट्य-]व्यसनिनोऽस्तुवन् ।
कश्चित् परगुणेर्ष्यालुरनिन्दन्नन्दनं पुनः ॥४८
श्लाघ्यतैतस्य दानं भोश्चेद्दद्यात् स्वभुजार्जितम् ।
[पि]तृवित्तं ददानस्तु सैष पुंष्टिट्टिभः स्फुटम् ॥४९
तच्छ्रुत्वा नन्दनो दध्यौ यथास्थितमसौ जगौ ।
समुद्रमवगाह्य× वर्षत्वब्दोऽम्बुसङ्गतम् ॥५०
तदस्म्यपि समुद्यम्य समुपार्ज्य श्रियं पराम् ।
पूरयित्वाऽर्थिनामाशाः पिपर्म्याशा यशोभरैः ॥५१
इत्थं मनसिकृत्यैष जगाद पितरं धनम् ।
व्यवसायाब्धिमाक्रम्य तात कुर्वे श्रियं स्वसात् ॥५२

४१.३. The last two letters are blurred. Such places are indicated by the sign × in what follows.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततोऽभ्यधत्त जनकः कलयित्वा शुभाशयम् ।
दानभोगादि ते किं न पूर्यतेऽदो यदुच्यते ॥५३
पुत्रोऽवक् मातृवत् पित्र्या श्री संवासोचिता शिशोः ।
यूनस्तु त × × × सः सर्वलोकहसास्पदम् ॥५४
क्रमागताऽप्युज्झति श्रीर्निरुत्साहं पयोधिवत् ।
कृतोद्योगं तु भजते दानवप्र × × × × त् ॥५५
कर्मवादमुरीकृत्य पुरुषः पौरुषोज्झितः ।
त्यज्यते दुर्भग इवापि क्रमागतया श्रिया ॥५६
[पुरुषः श्ला]घ्यते तावद् यावत् पौरुषभूषितः ।
तद्विना मेरुकल्पोऽपि तृणादपि लघुर्भवेत् ॥५७
अपि क्रमाद × × × ता लक्ष्मीरुत्साहिनं नरम् ।
स्वयंवरेव वृणुते पितस्ते किं बहूच्यते ॥५८
तात त्वयाऽभ्यनुज्ञातः स्वपु[स्त्व]कषपट्टकम् ।
कीर्त्तिलक्ष्म्योः कार्मणं च कर्म निर्मातुमुत्सहे ॥५९
तं प्रत्यूचे पिता वत्स स्वामनुज्ञाप्यमान × ।
पाणौ कुरुष्व कमलां व्यवसायाब्धिवासिनीम् ॥६०
ततोऽसौ जननीपादमूले गत्वाऽऽह मातरम् ।
तवाशिषां वान्यदे[शाच्छ्रियं] हर्तुमुपक्रमे ॥६१
ततो माताऽवदद् बाष्पवीचीप्लुतदृगम्बुजा ।
पुनर्वत्सेति मा वादीर्जीवितं चेन् ममेच्छसि ॥६२
पितृश्रिया च किं वत्सासंपूर्णं तव विद्यते ।
को वा ते ददतः स्वैरं प्रत्यूहं कुरुते वद ॥६३
पुत्रोऽवादीदम्ब हर्षस्थानके मा स्म खिद्यथाः ।
कस्याः पुत्रः श्रियं दूरादाकर्षति कनीमिव ॥६४
जनन्यूचे निर्धनायाः पुत्रस्यैतत् प्रशस्यते ।
ममातिधनदायास्तु पुत्रस्योपक्रमोऽफलः ॥६५
अत्रान्तरे धनस्तत्रागमद् भद्रा ततभ्यधात् ।
नन्दनस्य त्वयोक्तं किं × × × पृच्छ मातरम् ॥६६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हाऽनार्य वक्रहृदय किमेनमनुमन्यसे ।
प्रोषिते नन्दने प्राणाः प्रोषिता एव मे तदा ॥६७

प्रिये वदेति मा किं तु नैनं वारयितुं क्षमः ।
ततो मया नन्दनस्य त्वं निषेद्धुमदर्श्यत ॥६८
धनो धनं × तं पिन्ह (?) किं त्वं वत्स विवित्ससे ।
यदेषु वेलाकूलेषु सर्वेषु वणिजस्तव ॥६९

अत्रैव भाण्डशालाश्च भां × × × समन्ततः ।
वडवाद्याश्च पोष्यन्ते धनं वृद्ध्या प्रयुज्यते ॥७०
उद्घाट्यन्ते भूरयोऽट्टाः सिच्यन्ते चेक्षुवाटकाः ।
तदन्यं कं धनोपायं वत्स त्वं प्रचिकीर्षसि ॥७१

नन्दनोऽथावदत् तात रूतकर्पासमुल्यकम् ।
गर्जनेऽतिमहार्घं तत् पणायिष्यामि तत्र तत् ॥७२
आचचक्षे पिता वत्स म्लेच्छदेशे महद्भयम् ।
प्रस्थिते तत्र भवति कथं भवति नो धृतिः ॥७३
न च श्रीःप्राणसंदेहेऽर्जिताऽपि श्लाघ्यते यतः ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥७४

पुत्रोऽवादीदुत्सहिष्णोः श्रीः स्यान् मृत्युश्च दैवतः ।
इहासीनस्य नैव श्रीर्मृत्युस्तु विगताङ्कुशः ॥७५
तत् तात बहु मन्तव्यः प्रसह्यायं ममोद्यमः ।
पूज्यानुम × × का हि सिद्ध्यै स्यादादिमङ्गलम् ॥७६
ततः पिता विनिश्चित्य नन्दनोत्साहसाहसम् ।
निजगादोद्यच्छ वत्स [पन्था]नः सन्तु ते शिवाः ॥७७

धनोदिताऽथ भद्राऽपि बहवमंस्त सुतोद्यमम् ।
ध्वनिं प्रतिध्वनिरिव पतिं सत्यनुवर्तते ॥७८
सुलक्षणां स्वपत्नीं स तमुदन्तमजिज्ञपत् ।
साऽऽख्यदस्मि सहैष्यामि विदेशा न सुखाः प्रिये ॥७९
पुनः सा × × चिरं (?) मे त्वद्वियोगे विदेशभूः ।
त्वया सह विदेशोऽपि मन्दिरादधिकः प्रिय ॥८०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राणेश तत् त्वया सार्धं प्रस्थास्येऽहमपि ध्रुवम् ।
देहच्छायेव यन्नाथ शोभेऽभ्यासे तवैव हि ॥८१
पितरौ नन्दनेनोक्तौ वधूर्वोऽन्वेति मामियम् ।
ताभ्यामूचे वत्स साधु साध्वीनामुचितं ह्यदः ॥८२
कर्पासरूतप्रमुखं स्राक् संगृह्य क्रयाणकम् ।
दक्षानुरक्तशुचिकं संप्रधार्य परिच्छदम् ॥८३
सुलक्षणायाः कृते च निरूप्य सुखवाहनम् ।
क्रमेलकान् वेगसरान् वृषभांश्चातिभूरिशः ॥८४
शुभेऽह्नि मातृपितृभ्यां दत्ताशीः कृतमङ्गलः ।
प्रवर्धितोद्यमः प्रास्थानिकैः शकुनमङ्गलैः ॥८५
सार्धं वध्वा नन्दनोऽथ सुहृदा × × ननन्दनः ।
प्रतस्थे स्थेमहेमाद्रिर्गर्जन् गर्जनकं प्रति ॥८६॥ चतुर्भिश्च कुलकम्
प्रतिग्रामं प्रतिपुरं प्रत्य× ×तिकाननम् ।
नवीनं नगरमिव स्वसार्थेनावतारयन् ॥८७
क्रमेलकप्रियं बन्धुं दुर्लङ्घं वार्धिनाऽपि हि ।
वा[लुका]याः किलाम्भोधिं सैष प्राप मरुस्थलम् ॥८८॥ युग्मम्

ज्योतिश्चक्रदुराक्रमाः प्रतिपदं यत्र स्थलश्रेणयो
यत्राजानुपदद्वयं निविशते तल्लङ्घने भीर्विव ।
पातालान्तरकांक्षि यत्र च जलं तद्भीतितो न्वाकुलं
छायाजन्मभुवो न यत्र तरवस्तप्तोषजग्धा इव ॥८९

नृक्षेत्रस्य बहिर्यथा किल नरः प्रायो न यत्रेक्ष्यते
चेद्वीक्ष्येत बकोऽपि दुष्टपशुवत् सोऽप्युच्चकैर्भीतिकृत् ।
प्रत्यध्वं यमनागपाशसदृशा भ्राम्यन्ति कुम्भीनसा
भूताश्च भ्रमयन्ति मुग्धपथिकान्नानाभयोद्भावनैः ॥९०

नेत्रानन्दि न यत्र किञ्चन मनाग् न श्रोत्रगोत्रोत्सवो
घ्राणप्रीणनकार्मणं न च न च त्वक्सौख्यलीलाङ्गणम् ।
जिह्वाविह्वलतावहं न च न च स्वान्तामृतं किं घनै-
र्यन्नामापि हि दुःश्रवं श्रवणयोः प्रेताधिनेतुर्यथा ॥९१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मरुस्थलममूदृक्षमतीत्य पुरलीलया ।
क्षेमाद्र्जनकपुरमाससाद स नन्दनः ॥९२
प्रभूतैः प्राभृतैस्तत्र प्रासाद्य तेन भूपतिः ।
शुल्कायितं तस्य भाण्डं भूभुजा त्वर्धदानतः ॥९३
ग्राहकेषु समेतेषु भाण्डमूल्यं न सञ्जतम् ।
ततोऽसौ भाण्डशालासु सर्वं भाण्डमचिक्षिपत् ॥९४
तद्देशवारिणा मन्दा भर्त्राऽभाणि सुलक्षणा ।
भाण्डं मुक्त्वा गच्छतो मेऽर्थनाशायशसी प्रिये ॥९५
दिने दिनेऽत्र मन्दाऽसि पानीयं सहते न ते ।
सुखादुष्ट्रादिभिः सार्धं स्वपुरं गच्छ तत् प्रिये ॥९६
प्राप्तायास्तत्र चारोग्यं द्रुतं संपत्स्यते तव ।
भाण्डं विक्रीयाहमपि द्रुतमेष्यामि सुन्दरि ! ॥९७
ततः सुखासनेनैष प्रैषीत् तां करभैः सह ।
क्षेमात् तत्र परापत् सा शीघ्रमारोग्यमाप च ॥९८
धनोऽथ चिन्तयामास तरुणी प्रोषिते धवे ।
दूरक्षा श्वासुरे तेन सुयुक्तासौ पितुर्गृहे ॥९९
ततो धनो वधूतातं सागरदत्तमाह्वयत् ।
स्वाभिप्रायं तस्य बन्धोरिव सर्वं न्यवेदयत् ॥१००
स्माह सागरदत्तोऽथात्यासंघर्षेण(?) मद्गृहे ।
शिक्ष्यमाणाऽप्यसौ रुष्येत् स्वच्छन्दा स्यादशिक्षणे ॥१०१
त्वद्गृहे तु स्थिता श्वश्रूभयेन तव शङ्कया ।
एषा तिष्ठेत् समर्यादा तत्ते वेश्मनि तिष्ठतु ॥१०२
ततो धनस्य सदनोपरि दास्यादिभिर्धृता ।
धनेन धनदेनेव पूर्यमाणमनीषिता ॥१०३
चतुराभिर्वयस्याभिः सह नानाविनोदनैः ।
सुलक्षणा सुखात् तस्थौ प्रोषितेऽपि हि भर्तरि ॥१०४॥ युग्मम्
अथान्येद्युरञ्जनाद्रिशृङ्गचङ्गघनाकरः ।
जीवलोकस्य जीवातुराजगाम घनागमः ॥१०५

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

भीष्मग्रीष्मदवानलोत्थदवथुप्रोन्माथविद्यागुरु-
वापीकूपमहासरोवरसरिद्रूपप्रपादापकः ।
उद्यत्पुष्पफलादिभिः प्रतिपदं सत्रालयस्थापकः
क्षोणौ सौस्थ्यपितामहो वहति यः प्रोच्चैः सुराज्ञः कलाम् ॥१०६

यत्राभान्ति घना घनाः स्मरमहीशस्येव सेनाधिपा
विद्युद्दृग्भिरभीक्ष्णवीक्षणचणा मानस्थवामभ्रुवाम् ।
गर्जाभिः किल तद्विभायनकृते हक्कासमुल्लासकाः
पुष्णन्तो जलवृष्टिभिर्विरहिणीसन्तापवज्रानलम् ॥१०७

अवतीर्णमिति क्षोणौ पश्यन्ती जलदागमम् ।
अपश्यन्ती धनवधूः स्वपार्श्वे नन्दनागमम् ॥१०८
चक्रवाकीव विरहदहनालीढमानसा ।
सस्मार सा स्मरोदारं स्वभर्तारं प्रतिक्षणम् ॥१०९॥ युग्मम्

आत्ता रणरणकेन पिशाचेनेव पाप्मना ।
पारापतादिललितं सा सोत्कण्ठं व्यलोकत ॥११०
निद्रानाप्त्या वेल्लमाना शयनीये ततो निशि ।
पतिवत् कामचेष्टाभिः स्वयं स्वाङ्गे व्यचेष्टत ॥१११
अन्यदा सा कुरङ्गाक्षी गवाक्षाक्षिकनीनिका ।
आदर्शबिम्बात्मबिम्बदर्शनाक्षिप्तलोचना ॥११२
तदासन्नराजमार्गागतेन नृपसूनुना ।
सौन्दर्यसद्मना पद्मरथेनालं व्यलोक्यत ॥११३॥ युग्मम्
विश्रब्धछद्मना स्थित्वा मित्रचक्षुश्च रक्षता ।
चिरं सा दृक्सुधा तेन पपे दिष्ट्या तया च सः ॥११४
हृन्मे तवैवेति किल व्यङ्क्तुं मोट्टायिताद्वरा (?) ।
तयाऽदर्शि ततोऽवादीत् कुमारोऽन्यापदेशतः ॥११५
कानने रमते कोकी मेदुरामोदनिर्भरा ।
मिताक्षरं ब्रूवे विद्धि ते वर्णा ये पदादितः ॥११६
तदुक्तमवबुध्याथ पश्यन्त्यादर्शमण्डलम् ।
स्मरावतारं कुमारं तं प्रत्यूचे सुलक्षणा ॥११७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोको विरहदूनाङ्गो नेदिष्टां चक्रवाकिकाम् ।
छद्मनाश्लिष्यति भृशं तिर्यङ्सैष किमुच्यते ॥११८

तत् प्रतीच्छां हृदि न्यस्य जगाम नृपनन्दनः ।
सुलक्षणा तु तच्चेता आकाशोक्त्याऽब्रवीदिति ॥११९

किमेतावन्ति भाग्यानि त्वया मे दैव चक्रिरे ।
सम्पनीपद्यते यैः स्राग् ममायं प्रियमेलकः ॥१२०

विधे विधेहि किञ्चिन्मे सुलक्षणमदःप्रदम् ।
पितृभ्यामादितोऽप्यस्मि चक्रे यद्वा सुलक्षणा ॥१२१

हे नु मार तवैतावद् भाग्यं सम्भाव्यते मया ।
यदतीन्द्रपदे राज्ये सुभग त्वमजायथाः ॥१२२

यद्वा येनैव दैवेन पूर्वरङ्गोऽयमादधे ।
स एव संपूर्णमिदं नाटकं घटयिष्यति ॥१२३

द्रुतमेह्येहि सुभग मम पूरय वाञ्छितम् ।
सायं यावदिमे प्राणाः स्थिरा यास्यन्त्यतः परम् ॥१२४

इति शून्यामुक्तिमस्याः शृण्वती मन्थरागमात् ।
आनाकर्णितकं नाटयन्ती चान्यावलोकनात् ॥१२५

नामधेयात् सुधविका तस्या भोजनहारिका ।
दास्यागादभ्यधाच्चैतां किं स्वामिन्येकिकाऽब्रवीः ॥१२६॥ युग्मम्

सावहित्थमथाख्यत् साऽब्रुवमित्यस्मि भग्निके ।
धिग् धिक् पुंसो येऽबलानां भवन्त्यहह किङ्कराः ॥१२७

त्वङ्मात्रचङ्गैर्नार्यङ्गैरन्तर्दुर्धातुपूरितैः ।
स्वर्णाक्तताम्रभूषाभैर्ये मूढाः ते न सद्धियः ॥१२८

जितः स्त्रियाऽपि यस्त्वेव (?) नालङ्कापुरुषेश्वरः ।
यस्तु न स्त्रीपङ्कमग्नः स एव हि पुमान् पुमान् ॥१२९

धन्याः साध्व्यो महासत्यो यच्छीलमजरामरम् ।
इत्यादिचिन्तयन्त्यस्थां रहस्येकाकिनी सखि ॥१३०

स्मित्वा साऽऽख्यदहं जाने स्वामिनी प्रव्रजिष्यति ।
सुलक्षणोचे मां मुञ्चेच्चेत् प्रियो दर्शयेऽस्मि तत् ॥१३१

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

अथ दासी भोजयित्वा तां जगाम यथागतम् ।
सुलक्षणा पुनः सायं पल्यङ्कं प्रगुणं व्यधात् ॥१३२

दीपं प्रबोध्य वलभीगृहद्वारं पिधाय च ।
गवाक्षमुद्घाट्य तस्थौ कुमारागमकाङ्क्षिणी ॥१३३

यामेऽतियाते यामिन्या विजने पथि सोऽसिभृत् ।
विद्युदुत्क्षिप्तकरणात् तं गवाक्षमगात् सुखात् ॥१३४

ददर्श तां तु पर्यंकस्येषामालिङ्गय तस्थुषीम् ।
शनैर्गत्वा कराब्जाभ्यां पिदधे तद्दृशावसौ ॥१३५

रोमाञ्चपुष्पितां दृष्ट्वा तां कदम्बलतामिव ।
कुमारः स्माह सुभगेऽपनिद्रः स्वाप एष ते ॥१३६

रङ्गात् ततस्तौ रेमाते जज्ञे यामद्वयं निशः ।
कुमारोऽथावदद्यामि मा स्म शीयावहि क्वचित् ॥१३७

ततः सुलक्षणा चख्यौ धिक् ते पुरुष पौरुषम् ।
बिभेति साहसं कृत्वा यः पामरजनादपि ॥१३८

जनज्ञाते तु यत् कार्यं तत् कुर्याः क्षत्रियोऽसि यत् ।
कार्यं च निष्काश्यमानां मां संरक्षेरिति प्रिय ॥१३९

कुमारोऽवक् कियदेतत् साऽऽख्यत् तत्तिष्ठ निर्भयः ।
ततो रन्त्वा तुर्ययामे कुमारोऽगात् स्वमन्दिरम् ॥१४०

वार्धानीदन्तपवनताम्बूलादिकरा प्रगे ।
सा दास्यागाद् वधूपार्श्वेऽन्यथा तां वीक्ष्य चावलत् ॥१४१

धनस्याथ वधूवृत्तं सा चतुःकर्णमभ्यधात् ।
तात सम्यग् न जानेऽस्मि यथादृष्टश्रुतं ब्रुवे ॥१४२

सुलक्षणायां अद्याङ्गं नखदन्तव्रणोल्बणम् ।
निद्रालसं परिम्लानकुसुमस्तबकोपमम् ॥१४३

कल्ये पुनः पद्मरथकुमारं प्रति सत्वरम् ।
आकाशोक्त्या प्रलापाश्च भृशं शुश्रुविरे मया ॥१४४

न कथ्यमेतत् कस्यापि शपथेन निवार्य ताम् ।
धनः सागरदत्तस्यैकान्ते तत् सर्वमभ्यधात् ॥१४५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्भाव्यते पद्मरथकुमारस्येति चेष्टितम् ।
न राजवर्चसमृते कोऽपि चेष्टुमिहेश्वरः ॥१४६

स च प्रतिविधातुं न कथञ्चिच्छक्यते मया ।
किञ्च युद्धाद्दूरं बुद्धमित्याभाणक उत्तमः ॥१४७

ततः स्वपुत्रीं स्वगृहमाहूय नय रक्ष च ।
कुलेन्दौ निष्कलङ्के नः कलङ्कोऽयं भवेन्न यत् ॥१४८

इति मन्त्रं विनिश्चित्य धनः स्वसदनं ययौ ।
आगात् सागरदत्तश्च पुत्रीं ह्वातुं धनौकसि ॥१४९

सुलक्षणा समक्षं च धनमाचष्ट सागरः ।
पुत्रीं प्रेषय मद्गेहे मोदते येन नः कुलम् ॥१५०

धनोऽथ कथयामास कथ्यं नैतत् कथञ्चन ।
नन्दनालोकनानन्दो यन्मे स्याद्दृष्टयाऽनया ॥१५१

प्रहिण्वहानि कतिचित् पुनरेष्यति सत्वरम् ।
धनोऽनुमेने कथामन्यथाऽवोचत् सुलक्षणा ॥१५२

तातार्यपुत्रो मे क्षूणं मन्ताऽसौ स्वैरमैदिति ।
आर्यपुत्रागमं यावत् तदहं यामि न क्वचित् ॥१५३

धनोऽवदन्नैव पुत्रि क्षूणं मद्वचनाद्भमे ।
तन्मा भैषीर्गच्छ वत्से ज्योत्स्नेव धिनु सागरम् ॥१५४

वधूः –

यद्येवं तातगेहेऽह्नि स्थित्वा स्वप्स्यामि चात्र तु ।

पिता –

केयमर्धोपचारिस्ते स्वप्यास्तत्रैव चानघे ॥१५५

पुत्री –

तताद्य पटु मे नाङ्गमेष्याम्यस्मि ततः प्रगे ।
सा दध्यौ येन सङ्केतं तस्य तत्रादधे निशि ॥१५६



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पिता —

आहूयसेऽत एवासि यस्त्वां प्रतिचरेत् प्रसूः ।

पुत्री —

आयातमात्रा मन्दाऽभूदिति नैम्यपवादतः ॥१५७

पिता —

तन्निवाते शयीथास्त्वं येन स्यात्ते वपुः पटु ।

पुत्री —

अद्य ताताङ्गदाहो मे निवातं तन्न रोचते ॥१५८

पिता —

तत् प्रवाते त्वं शयीथाः स्वप्स्यत्यम्बा तवान्तिके ।

पुत्री —

गृहान्तरागमे मातुरभक्तिः स्यान्मया कृता ॥१५९

धनः —

यद्येवं तर्हि भद्रैवाद्य स्वप्स्यति तवान्तिके ।

वधूः (स्वगतम्) —

पित्रोरयेऽतिनिर्बन्धा दृश्यहेतुतः कुतः (?) ॥१६०

(प्रकाशम्) विकाले ज्ञास्यते तातौ (?) स्वरूपं वपुषो मम ।

ततः सागरदत्तोऽगाद् विमना मन्दिरं निजम् ॥१६१

वलभीमधितस्थुष्या श्रेष्ठिवध्वाऽतिशङ्कया ।

भुजिक्षणागताऽभाणि सा दासी भोज्यहारिका ॥१६२

हला जानास्यद्य पितुः किं मदाकारणे ग्रहः ।

दास्यूचे युक्तमाह्वातुं पुत्रीं तातस्य गौरवम् ॥१६३

तयोचे मा मुधा जल्प त्वयेदं किंचिदादधे ।

दास्यूचे किमिदं स्वामिन्यथावोचत् सुलक्षणा ॥१६४

मां निरीक्ष्य यदा प्रातर्व्याघुटस्त्वं तदन्विमौ ।

अत्रायातौ मुधा तच्च श्वोभाव्यद्यैव भावि यत् ॥१६५

ततस्तद्वाक्यमाकर्ण्यावहित्थामारचय्य च ।

तां भोजयित्वा तत् सर्वं दास्याऽभाणि धनाग्रतः ॥१६६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कस्याप्येतन्नैव वाच्यं निवार्य शपथेन ताम् ।
सद्यः सागरदत्तेन सममालोचयद् धनः ॥१६७

सम्भाव्यमानं पुरुषं शासितुं नेश्वरः वरः ।
विज्ञप्यते ततो राजा योगक्षेमकरः स हि ॥१६८

तदैव सुप्राभतैस्तौ शङ्खराजमपश्यताम् ।
राजा च तावभाषिष्ट कार्यं विज्ञप्यतामिति ॥१६९

धनोऽव्यज्ञपयत् स्वामिन्नेकान्तेन प्रसीद मे ।
राजाज्ञया ततो वेत्री तां सभामुदतिष्ठपत् ॥१७०

तदा कुमारसचिवः श्रीबुद्धिविभवाह्वयः ।
उत्तिष्ठन् क्षितिपादेशादतिष्ठत् क्षितिपान्तिके ॥१७१

धनोऽथ विजने विज्ञापयास नरेश्वरम् ।
देव ये विरतात्मानो वनवासैकलालसाः ॥१७२

ध्यानैकताना मुनयः कन्दमूलदलाशिनः ।
कैवर्त्यादिषु योज्यन्ते तेऽपि कामेन पाप्मना ॥१७३॥ युग्मम्

ये पुनर्भोगिनः स्वेच्छाचारिणो यौवनोन्मदाः ।
तेषां वार्त्तापि राजेन्द्र न वक्तुमपि पार्यते ॥१७४

स्वार्थं विज्ञपयेत्युक्तो राज्ञा व्यज्ञापयद् धनः ।
व्यवहर्तुं मम पुत्रो देव गर्जनकेऽगमत् ॥१७५

तत्पत्नी सविधे कोऽपि समेति निशि कामुकः ।
निवार्यतां देव सैष दोषो मे स्याद्यथा न हि ॥१७६

राजा सकोपमाचष्ट स पाप्मा दण्डपाशिभिः ।
सम्यक् विज्ञाय नियतमचिरान्निग्रहीष्यते ॥१७७

क्षणेऽत्र बुद्धिविभवो राज्ञः कर्णेऽजपद्विभो ।
सैष पद्मरथोऽयं हि तथैवं ह्यः किलामिलत् ॥१७८

श्रेष्ठं करिष्यते श्रेष्ठिन् गच्छेति व्यसृजद् धनम् ।
राजा कुमारं चाहूय सद्योऽप्यादिष्टवानिति ॥१७९

वत्स पल्लपतिः सिंहो वनदुर्गेण दुर्ग्रहः ।
उपद्रवनिदेशं नस्तदेनमभिषेणय ॥१८०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मद्भृत्यसाध्ये तातास्मिन् किं युक्तं मेऽभिषेणनम् ।
तत्परन्यः सन्ति रूपाढ्या न ते × स्ते भवन्त्विवति ॥१८१

किमास्माककुले ग्राह्या मेदिन्यस्तात कर्हिचित् ।
शृणु वत्स श्रुतिं ग्राह्यं स्त्रीरत्नं दुष्कुलादपि ॥१८२

किं तात मेदिनीजाता राज्यार्हाः स्युः कुमारकाः ।
त्वत्तोऽन्यदारजाताः किं तथा स्युः कुलपांसन ॥१८३

ततः कुमारो मौन्यस्थात् पित्रा स्तम्भितगीरिव ।
भ्रूभङ्गभीषणः शङ्खकीर्तिः शङ्खनृपोऽभ्यधात् ॥१८४

द्रुहन् प्रजाभ्यो रे पाप राज्यानर्होऽसि सर्वथा ।
भव निर्विषयो येन श्रुतिभ्यां श्रूयसे न हि ॥१८५

ततः पद्मरथो नीचैर्दिवेन्दुरिव निष्प्रभः ।
गत्वा स्वमातुस्तत्सर्वं कथयामास दुर्मनाः ॥१८६

पद्मावत्यवदज्जाने हुं प्रियंगुलताप्रियः ।
न्यसिता त्वत्पिता राज्ये तत्पुत्रं पद्मकेसरम् ॥१८७

तन्मत्पितुः गृहं याहि राज्यं मेऽम्ब व्रजेदिति ।
तद् व्यापाद्य नृपं राज्यमादास्येऽस्मीत्यवक् सुतः ॥१८८

माताऽऽख्यदिति मा कार्षीर्वत्सैवं तेऽपि संशयः ।
विषात् त्वदिष्टमाधास्ये दास्ये राज्यं तव ध्रुवम् ॥१८९

इति कञ्चुकिना श्रुत्वा सर्वं राज्ञे न्यवेद्यत ।
राजाऽपि सद्यः सुभटान् भ्रकुटीभीषणोऽभणत् ॥१९०

रे रे कृत्वोद्धृताक्षं तं तां च कृत्तौष्ठनासिकाम् ।
पञ्जरे क्षिपत क्षिप्रं पापं पततु पापयोः ॥१९१

दास्या तच्च तयोरूचे निशि तौ च द्रुतौ द्रुतम् ।
दैवस्येव नृदेवस्याराला भ्रूः केन सह्यते ॥१९२

इतश्च स धनश्रेष्ठिनन्दनो नन्दनस्ततः ।
उपार्जितासङ्ख्यधनो धनोदवसितं समैत् ॥१९३

जज्ञे च वर्धापनकं धनसागरगेहयोः ।
सुलक्षणा सर्वतोऽपि सा बभूव सुलक्षणा ॥१९४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स च पद्मरथः प्राप्तो विदेशं जनकं प्रति ।
गाढामर्षविषावेगो दुर्दाम्यो कृष्णसर्पवत् ॥१९५
ततः स मान्त्रिकान् धूर्तान् योगिनश्चाप्यसेवत ।
अदृश्यीकरणं केनाप्यस्योपादेशि तद्यथा ॥१९६
अंकुल्लतैलमृणालसूत्रवर्त्तिप्रदीपतः ।
अञ्जनाक्तदृशोऽदृश्या बम्भ्रम्यन्ते यदृच्छया ॥१९७
तच्च तेन कृतं सिद्धमदृश्यीकरणं ततः ।
अन्तर्धिवर्मितोऽमर्षातिरेकतुरगं श्रितः ॥१९८
मोहकोशप्रवेशाढ्याब्रह्मवाञ्छाच्छुरीकरः ।
स्वनिकारव्यतिहारकृते स स्वपुरं ययौ ॥१९९॥ युग्मम्
राट्सौधे जनसम्मर्दात् स प्रवेष्टुमपारयत् ।
पापः प्रविश्य शुद्धान्ते ध्वंसते स्माबला बलात् ॥२००
वारकेऽप्यकामुकास्ता ज्ञात्वा पुंवेशशङ्कया ।
राजाप्राक्षीत् कञ्चुकिनं सोऽवग् दृश्यो न कश्चन ॥२०१
ततोऽत्र समिताचूर्णं क्षिप्तं चक्रेऽनलध्वजः ।
कज्जले गलिते प्रेक्षांचक्रे पद्मरथो धृतः ॥२०२
ततः प्राहरिकैर्बद्धो दृष्टः सर्वैः सविस्मयम् ।
राज्ञो निवेदितस्तेन वध्य आदिश्यते स्म सः ॥२०३
ततो वसुन्धर इव विगोप्य निखिले पुरे ।
शूलायां कीलयाञ्चक्रे स रौद्रध्यानतोऽमृत ॥२०४
जज्ञे प्रथमनरके सागरायुः स नारकः ।
अहो मोहाब्रह्मतरोः फलं किमपि दारुणम् ॥२०५
ततः कथञ्चिदुद्वृत्तस्ताम्रलिप्त्यां महापुरे ।
वेश्यायाश्चन्द्रलेखायाः पुत्रिका भवति स्म सः ॥२०६
सा चूतमञ्जरी नाम्ना विदधे चन्द्रलेखया ।
यौवनेन वसन्तेन पुनः सौभाग्यमञ्जरी ॥२०७
तथा हि —
मांसलौ कोमलौ कम्रौ तत्पदावरुणौ तले ।
सीमन्तिनीनां सीमन्ते धृतेः सिन्दूरिताविव ॥२०८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुन्दोत्तीर्णे इव वृत्ते तस्या जङ्घे क्रमात् पृथू ।
ऊरू करिकराकारौ न्वाधारौ स्मरवेश्मनः ॥२०९

नाभीबिलं स्मरबिलेशयस्येव निवासभूः ।
मुष्टिग्राह्यं च तन्मध्यं पुष्पेषोः सारमुष्टिवत् ॥२१०

कामेभकुम्भपीठं नु वक्षो वक्षोजमण्डितम् ।
जगज्जयाय तत्कण्ठः कम्बुः किं शङ्खभृद्भुवः ॥२११

लोलमाने उभयतो बाहू तत्पूजनस्रजौ ।
वृत्तं सौम्यं मुखं चन्द्रोऽधरो न्वमृतनिर्भरः ॥२१२

नाशावंशोऽलिकं छत्रं दृक्श्रियोर्भ्रपटीभृतोः ।
ताडङ्कताडितौ कर्णौ श्रीरतेर्वलयाविव ॥२१३

स्निग्धदीर्घतनीयस्तत्केशपाशपराजितः ।
शिखी सिषेवे तं शक्तिधरं नु वहनस्थलात् ॥२१४

प्रतिप्रतीकं निःशेषां तस्या लावण्यवर्णनाम् ।
कर्तुं कृतमुखः सोऽपि मन्ये नैव चतुर्मुखः ॥२१५

कलानामेकनिलयो वैदग्ध्या एकसेवधिः ।
वक्रोक्तिरचनाचञ्चुरुच्चकैः सेव सा भुवि ॥२१६

मोहाब्रह्मविलासाभ्यां मित्राभ्यां प्राच्यजन्मनः ।
विलेसे भृशमेतस्यां भूविशेषबलादिव ॥२१७

इतश्च —

तत्रैवाभूद् वसुपतिर्वसुर्वसुमतीप्रियः ।
वसुदत्तश्च तत्पुत्रः कलासौभाग्यमन्दिरम् ॥२१८

तत्रैव बहुलेभ्यस्य पुत्री गौरीखनीमणिः ।
श्रीमती वसुदत्तेन परिणिन्ये प्रमोदतः ॥२१९

तयोर्भुञ्जानयोः पञ्चप्रकारान् विषयांश्चिरात् ।
विपन्नौ पितरौ यद्वा सुरा अप्याख्ययाऽमराः ॥२२०

ततोऽप्रजाद्यभावात् श्रीयौवनाभ्यां निरङ्कुशः ।
वसुदत्तशुकश्चतमञ्जर्यामासजद् दृढम् ॥२२१

२१६.३. -चुंचु-.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न कुलं न सदाचारं नाकीर्त्तिं न धनक्षयम् ।
सोऽजीगणद् व्यसनाब्धिनिमग्नो द्युतकारवत् ॥२२२

अथैष स्वजनैरूचे तित्यक्षसि न चेदमुम् ।
गृहिणीं कुरु तद्गृहे मा सर्वस्वं विनाशय ॥२२३

वसुदत्तोऽथ तामूचे मद्गृहे स्वामिनी भव ।
तयाऽम्बा चन्द्रलेखोचे पुत्रीं सा चाभ्यधादिति ॥२२४

यौवनर्द्धिं यावदेष किंकरिष्यति ते ध्रुवम् ।
तदभावे पुनरेष भवत्या किं करिष्यति ॥२२५

न च दा(?)ता गृहसारं त्वत्सूनोर्मेति तत् कृथाः ।
आस्तां दूरे सुवर्णं तद् यत् कर्णौ त्रोटयेदिह ॥२२६

तत् साऽऽख्याद् वसुदत्ताय सोऽभ्यधादित्यसम्भवि ।
भवेच्चेत् स्वर्णलक्षं ते दास्येऽमी साक्षिणस्तव ॥२२७

ततोऽतिसग्रहं कृत्वा तद्धामैच्चूतमञ्जरी ।
वसुदत्तेन सा चक्रे गृहस्योपरि मञ्जरी ॥२२८

अथ सा श्रीमती जज्ञे तृणादपि लघीयसी ।
ततः कस्यापि पार्श्वेऽसौ कुष्ठयोगमशिक्षत ॥२२९

ददौ च चूतमञ्जर्याः स्नाने पानेऽशने च तम् ।
सद्यस्ततोऽभवच्चूतमञ्जरी कुष्ठमञ्जरी ॥२३०

तथा हि –

प्राक् तदङ्गे कुङ्कुमादितिलकानि यथाऽभवन् ।
तथाऽस्रवन् पूतिकानि मण्डलानि हहाऽभितः ॥२३१

गलितेक्षणनासौष्ठकर्णक्रमकराङ्गुलौ ।
आविर्भूततिरोभाव इव तस्यां तदाऽभवत् ॥२३२

प्रवहत्पूतिप्रवहा क्रामत्क्रिमिकुलाकुला ।
अक्षाममक्षिकाकाम्या हा जज्ञे चूतमञ्जरी ॥२३३

ततश्च चूतमञ्जर्या वसुदत्तोऽर्थितो ददौ ।
स्वर्णलक्षं विलक्षा तु सा जगाम निजालयम् ॥२३४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हृता वैद्याश्चिकित्सायै तामसाध्यां जगुस्ततः ।
सा कार्पटिकपङ्ग्वन्धदीनादीनामदाद् बहु ॥२३५
मध्यमेन गुणनेत्थं मनुष्यायुर्निबध्य सा ।
तेन रोगातिरेकेण कृच्छ्रकृच्छ्राद् व्यपद्यत ॥२३६
क्षितिप्रतिष्ठितपुरे जितशत्रोर्महीभुजः ।
कुक्षौ श्रीधारणीदेव्याः पुत्रोऽजायत सा ततः ॥२३७
वज्रसिंहाभिधः सोऽभूत् पारदृश्वा कलाम्बुधेः ।
प्राग्जन्मदानतोऽतीवसुभगो वसुदेववत् ॥२३८
प्राग्भवे मोहाब्रह्मभ्यां तथायं वासितो यथा ।
तद्दर्शनेऽपि तद्वासः पुरस्त्रैणे व्यजृम्भत ॥२३९
तथा हि बाल्यक्रीडाभिः क्रीडन्तं पुरबालिकाः ।
निरीक्ष्य तं निर्निमेषाः पञ्चाल्य इव जज्ञिरे ॥२४०
यौवनश्रीरभूद् यावत् तं वुवूर्षुमना मनाक् ।
अमनागभवँस्तावत् तं तरुण्यो वुवूर्षवः ॥२४१
तेनोपयम्यमानासु राजकन्यासु लीलया ।
ऊढा अनूढा वृद्धाश्च तेनोपयममौषिषुः ॥२४२
पथा सञ्चरते येन राजपाट्यां स राजसूः ।
स्वं स्वं सौधं विहायेयुर्योषास्तत्र कुटीरकम् ॥२४३
शीतं वातं घनं घर्मं श्वसुरौ पितरौ पतिम् ।
रुदन्तं बालकं नापि तद्दृष्ट्यै मेनिरे स्त्रियः ॥२४४
कायेन मनसा वाचा तत्रैवोक्ताः कुलाङ्गनाः ।
स्वं स्वं गृहं न त्यजन्ति केवलं कुललज्जया ॥२४५
तथा विज्ञाय नगरस्त्रैणं स्वार्थपराङ्मुखम् ।
प्राभृतेन पुरीप्रष्ठा राजानमुपतस्थिरे ॥२४६
राजाऽऽख्यदुच्यतां कार्यं तेऽवोचन्त कृताञ्जलि ।
विज्ञापयामः किं स्वामिन् सापराधाः स्वयं वयम् ॥२४७
भूपोऽभ्यधत्त निःशङ्कमभिधत्त पुरीवराः ।
प्रजाप्रमोदप्रतिभूः प्रजापतिरहं यतः ॥२४८

२४३.३: विहायेषु(?).

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रसन्नस्वामिवचसाभयेन लसन्मनाः ।
ततश्च विमलमतिः श्रेष्ठी श्रेष्ठमतिर्जगौ ॥२४९
प्रसादाद् देवपादानां सर्वाः प्रमुदिताः प्रजाः ।
विशेषतः श्रीकुमारदर्शनामृतपानतः ॥२५०
परं तदेव देवास्मद्वधूनामबलात्मनाम् ।
अस्मद्भाग्यविपर्यासात् कथञ्चन न जीर्यति ॥२५१
तासामजीर्णाच्च दोषाः प्रादुःषन्ति प्रतिक्षणम् ।
तदजीर्णं यथा न स्यात् तथा देव प्रसीद नः ॥२५२
अथ पृथ्वीश ऊचे तान् सुखयिष्यामि वो द्रुतम् ।
कुमार हंसोऽन्तःसौधसर एव हि रंस्यते ॥२५३
महाप्रसाद इत्युक्त्वा ते यथास्थानमैयरुः ।
दास्या च वज्रसिंहस्याभिदध्ये सर्वमप्यदः ॥२५४
अथ प्रतीहारहृतः कुमारोऽगान् नृपान्तिके ।
नृपोऽलपद् वत्स वर्तेऽस्मि त्वज्जीवितजीवितः ॥२५५
तत् त्वया सावधानेन स्थातव्यं सर्वतोऽपि हि ।
राज्यधुराधुरीणस्य सम्भवन्त्य × × × वः ॥२५६
राजपाट्यां न गन्तव्यं यतस्तत्र समन्ततः ।
अलक्षितविपक्षेभ्यः स्युरपायाः अनेकशः ॥२५७
कुमारः —
सन्नद्ध एव यास्यामि पुंस्पंजरविमध्यगः ।
महाबलस्याप्यगम्यः का वार्तालपबलद्विषः ॥२५८
राजा —
तथाप्यश्वादितः पातेऽपायस्तदल(?)मेतया ।
तद्वत्स सौधमध्यस्थो विलस स्वैरलीलया ॥२५९
कुमारः —
अकस्माद्देवपादानां केयं शङ्कापिशाच्यभूत् ।
किं वोपेक्ष्यः पुराऽभूवमहमेतर्हि तु प्रियः ॥२६०

२५८.२. पुस्यं°. २५९. A few letters are blurred in the MS.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद्वा न तद्देवकुलं न कुलं न च राट्कुलम् ।
न खेलन्ति खलाऽज्ञा यत्राकारणवैरिणः ॥२६१

राजा –

कुमार सद्गुणागार कः खलोऽस्ति तवोपरि ।
अभीष्टस्त्वं हि सर्वेषां सर्वदा × × नात्मवत् ॥२६२

कुमारः –

तदलीकं व्यलीकं मेऽमीभिः कूटकिराटकैः ।
पुरतस्तातपादानां किं प्राकाशि रिपोरिव ॥२६३

राजा –

वत्स त्वं हि प्रजापालस्तदागस्यपि मा कुपः ।
न चोक्तं तैर्व्यलीकं ते किन्तु स्वक्षीणतैव हि ॥२६४

कुमारः –

निवर्त्स्यति क्षीणतेयं नैषामत्र स्थिते मयि ।
ततस्त्यजाम्यहं देशं मयि तातः प्रसीदतु ॥२६५

राजा –

कुमारेदृशंवादी( ? दिन्) रोचते यत् तदाचर ।
एकच्छत्रां च वसुधां भुञ्जीथाः सागरावधि ॥२६६

असदभ्याख्यानमेतन् मय्यूचे यैः किराटकैः ।
दास्ये तत्फलमेषामित्युक्त्वा स्वौकः कुमार ऐत् ॥२६७

ततः कुमारो विमलबुद्धिं सक्रोधमभ्यधात् ।
मन्त्रिस्तातेन गणितो न समोऽस्मि किराटकैः ॥२६८

यदेतदर्थं कुरुते छलवादं मया सह ।
तद्भोः किमिह कर्तव्यं मया वद विशारद ॥२६९

मन्त्री –

अविश्वासः श्रियां मूलं नारीषु तु विशेषतः ।
देवेषु पितृगुरुषु विश्वासोऽपि प्रशस्यते ॥२७०

---

२६२.४. A few letters are blurred in the MS.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत् कुमार गुणार्थं ते सौधस्थितिमवग् नृपः ।
वणिक्कीटेषु किं च क्रुद्धत्र्रसिंहस्य नोचिता ॥२७१

कुमारः --

कोपाटोपो न मे तादृग् वणिक्ष्वेषु प्रसर्पति ।
यादृक् तातावमतस्य स्वस्योपरि सुदुःसहः ॥२७२

मन्त्री --

कुमार वणिजेष्वेषु कुरु तद्यत् चिकीर्षसि ।
देवपादाः पुनर्मन्तुं न ते सम्भावयन्त्यपि ॥२७३

कुमारः --

तातस्नेहकषं द्रष्टुं हठेन वणिजां वधूः ।
क्षिपाम्यन्तःपुरे पश्चाद् द्रक्ष्यते यद् भविष्यति ॥२७४

मन्त्री --

पश्येदनावृतान् यस्तु परदारान् नराधमः ।
गायत्र्यष्टशतं जप्त्वा सचेलः स जलं विशेत् ॥२७५
दृष्ट्वा योऽभिलषेत्पापः स गच्छेन्नरकं ध्रुवम् ।
योऽभिगच्छेत् पुनः सैष नरकेऽप्यप्रवेशकः ॥२७६
इत्यार्षं वचनं तेन कुमार वचनात् तव ।
मनो मे दूयतेऽत्यर्थमनुमन्ये कथं ततः ॥२७७
इत्यनादृत्य तद्वाक्यं बलादन्तःपुरेऽक्षिपत् ।
श्रेष्ठिनो विमलमतेः सैष भार्यां स्नुषां सुताम् ॥२७८
ततश्च मिलिताः पौराः राजानमुपतस्थिरे ।
राजाऽऽख्यदाख्यात कार्यं ततो व्यज्ञपि नागरैः ॥२७९
देवास्य श्रेष्ठिनो भार्यां स्नुषां पुत्रीं च विह्वलाम् ।
कुमारोऽन्तःपुरेऽक्षैप्सीत् तत् त्रायस्व प्रजापते ॥२८०
सकष्टमथ राजोचे हाऽमुना लाञ्छितं कुलम् ।
तदमात्या द्रुतं ब्रूत कर्तव्यमथ तेऽभ्यधुः ॥२८१

२७४.३. अंतपुरे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रेष्यतां धारणीदेवी तत्पार्श्वे यदि लज्जया ।
मुञ्चेत् ता भद्रमेवं स्यान्न चेत् कार्यं ततोऽन्यथा ॥२८२

देवी हूता ततो राज्ञा तद्वृत्तान्तो न्यगद्यत ।
तद् गच्छ तं शाधि सम्यक् चेन् मुञ्चेत्तात् तदा शुभम् ॥२८३

न चेत् तदाभिदध्यास्तमपसर्प नृपावनेः ।
विनंक्ष्यस्यन्यथाऽवश्यं देव्यथागात् तदन्तिकम् ॥२८४

दत्तासना ज्योकृता च पुत्रेणागमकारणम् ।
पृष्टाऽऽचष्ट प्रसूर्वत्स राज्यं प्रेलय मांहिणा ॥२८५

नीतिमन्तं भजेल्लक्ष्मीर्नीतिमुक्तं तु मुञ्चति ।
प्रजादारापहाराच्च दुर्नीतिः पुत्र नापरा ॥२८६

त्वया च विमलमतिश्रेष्ठिनोऽपहृताः स्त्रियः ।
तदनीतेर्विरक्तास्त्वां त्यक्ष्यन्ति सचिवादयः ॥२८७

ततश्च --

स्वपुत्रराज्याभिषेकमन्या द्रक्ष्यन्ति धन्यिकाः ।
वत्सराज्याभिषेकं तु नाहं द्रक्ष्याम्यधन्यिका ॥२८८

सेत्युक्त्वा बाष्पवाप्यक्षी क्षीणेन्दुवदनाऽभवत् ।
जगाद वज्रहृदयो वज्रसिंहोऽथ तां प्रति ॥२८९

दारानपहरिष्यामि नापरस्यां च जातुचित् ।
विमलस्तु मम वैरी राज्ञे मद्दोषभाषणात् ॥२९०

धर्मश्चायं नरेन्द्राणां यद्दुष्टानां विधीयते ।
निग्रहोऽत्युग्रदण्डेन शिष्टानां परिपालना ॥२९१

किञ्च मातस्तावदाह तातः किमिति साऽवदत् ।
वत्स तेनैव ते पार्श्वे प्रेषिताहमिहागमम् ॥२९२

तेनादिष्टं मन्मुखेन वत्स त्वां प्रति सम्प्रति ।
परदारान् विमुञ्चाशु मुञ्च वा मम मेदिनीम् ॥२९३

ततः पुत्रोऽवदन्मातरेत्येकाक्यत्र चेत् पिता ।
तदा तदाज्ञया मुञ्चे तानहं धारयामि वा ॥२९४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राजपार्श्वमथायाता देव्युवाच सुतोदितम् ।
मन्त्र्यास्यमैक्षत क्ष्मेशस्ते तु तूष्णीं प्रपेदिरे ॥२९५
राजाऽवदत् तर्हि यामोऽथामात्यो बुद्धिसागरः ।
सहसाऽक्षौन्नसि न्यस्य लीलाकमलपल्लवम् ॥२९६
ततः सुबुद्धिर्मन्त्र्यूचे न देव शकुनं शुभम् ।
अमात्योऽप्यभ्यधाद्याति शकटं न गवान्तिके ॥२९७
तदेकाकी स एवात्राकार्यतां तस्य चागमे ।
उत्थास्यामो वयं सद्यस्तच्च देव्यै नृपोऽलपत् ॥२९८
देव्याख्यन्नेत्यसौ को वा दोषोऽस्य रलिकाकृतौ ।
पादोऽवधार्यतां देव शकुनं किमियत्यपि ॥२९९
मन्त्र्यूचे व्यालकीर्णेऽप्यरण्ये सुशकुनैर्व्रजेत् ।
दुःशकुनैः पुनर्देव स्वगृहाभ्यन्तरेऽपि न ॥३००
किञ्च गम्यं देवपादैर्नाधुना तत्र सर्वथा ।
नान्यायिनां हि विश्वस्याद् विशेषादिति वादिनाम् ॥३०१
यद्वोच्यतां वेत्रिणाऽसौ स्वगृहं विजनीकुरु ।
चेत् कुर्यान्न तदा दोषो न कुर्याच्चेत् तदाऽन्यथा ॥३०२
बहुमत्येति नृपतिर्वेत्रिणा तं तदभ्यधात् ।
स बहिर्विजनं चक्रे गृहान्तस्तस्य नैक्षयत् ॥३०३
मोहेनाब्रह्मणा चात्रान्तरे कवचितोऽधिकम् ।
स ऊचे चास्मि नायत्तः पत्युर्दिविषदामपि ॥३०४
राजाऽऽगच्छतु वा मा वा न मुञ्चे विमलस्त्रियः ।
यच्छिक्षितं तत् करोतु कारयत्वविशङ्कितम् ॥३०५
वेत्री तदाचष्ट राज्ञोऽमात्याः प्रोचुः किमद्भुतम् ।
सर्वसस्यान्युर्वरायां तत्र सर्वे गुणाः खलु ॥३०६
किमत्रोचितमित्युक्ते राज्ञा व्यज्ञापयन्नमी ।
राज्येऽभिषिच्यामुं देवे व्रतस्थेऽपि न सुख्यसौ ॥३०७
यतः --
सोऽन्यायकृद्राज्यधुरां न वोढुं गलिवत् क्षमः ।
क्रियेत चेन्निर्विषयश्चरटत्वं भजेत् तदा ॥३०८

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

रुषा देव्यवदत् तत् स मार्यतां मन्त्रिणो जगुः ।
न देवि देववंशेऽदः कृतपूर्वं हि केनचित् ॥३०९
तद्युक्तं भणतेत्युक्ते राज्ञा ते तु व्यजिज्ञपन् ।
स काष्ठपञ्जरे रक्ष्यो देव्यस्तु प्रतिचारिका ॥३१०
इत्याकर्ण्य हता देव्या धृष्टेऽवष्टम्भसे किमु ।
दासी कुमारदूत्येऽस्मि शिष्टेति चतुराऽबुधत् ॥३११
ततोऽतिवेगतो गत्वा रुदती सर्वमप्यदः ।
सा जगौ वज्रसिंहस्य सिंहस्य क्रूरकर्मणः ॥३१२
सद्यः कुमारः सामर्षः परिवारपरिष्कृतः ।
अतत्त्ववेदिना यन्त्राऽसज्जयज्जयकुञ्जरम् ॥३१३
अन्यस्यां हस्तिमण्डल्यां श्रीगृहेऽन्तःपुरे पुरे ।
न्यवेशयत् स्वपुरुषान् सत्यंकारानिवेषकः ॥३१४
अथोदभूत् कलकलो विश्वविश्वोदरंभरिः ।
जितशत्रुनृपस्वान्तविश्रान्तोत्साहबोधकृत् ॥३१५
चरैर्ज्ञात्वाऽथ तन्मूलं सामन्तानीकपान्नृपः ।
सत्वरं त्वरयामास तेन योद्धुं दुरात्मना ॥३१६
पुरीपरिसरेऽथाभूदुभयोरपि सैन्ययोः ।
विन्ध्याटव्यामिव करियूथयोर्दारुणो रणः ॥३१७

तथा हि --

समुच्छलद्रजोभरावतीर्णमेघडम्बरम् ।
प्रमुक्तबाणधोरणीप्रवृष्टिनष्टकातरम् ॥३१८
विदूरतोमरक्षतास्रबिन्दुकेन्द्रगोपकम् ।
शितास्रकान्तिसंहतिप्रनर्तिताचिरप्रभम् ॥३१९
प्रवादितातिभीषणाहवीयतूर्यगर्जितम् ।
मतङ्गगण्डमण्डलीगलन्मदाम्बुपङ्किलम् ॥३२०
रथारिभिर्मती(?)कृताश्वपत्तिसङ्कटावनि- ।
विकीर्णकेतुसन्ततिद्विजिह्वविह्वलाङ्गणम् ॥३२१

३१८.१. °वतीर्णे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सितातपत्रमालिकाबलाहिकाऽतिमालितम् ।
महेभकुम्भपाटनप्रसक्तरक्तनिम्नगम् ॥३२२
कबन्धनीलकण्ठकप्रबन्धबद्धताण्डवम् ।
घनाघनागमोपमं बभूव युद्धमुद्धतम् ॥३२३॥

षड्भिः कुलकम्

अकालप्रावृषमिव समरं वीक्ष्य दुस्तरम् ।
कांदिशीकमनाः सोऽभूत् कुमारो मारकिङ्करः ॥३२४
ततोऽवरुह्य स गजाज्जयादिव वपुष्मतः ।
आरुह्य तुरगं वायुवेगं वेगादपैत् श्ववत् ॥३२५
स चात्यासन्नसीमानमरिकेसरिणं नृपम् ।
संश्रित्योचे पितृराज्यमर्धार्धेन विभज्यते ॥३२६
चेन्मे सान्निध्यमाधत्से तेन च प्रतिशुश्रुवे ।
देशभङ्गादिनारम्भि विग्रहो जितशत्रुणा ॥३२७॥ युग्मम्
ततश्च नीतिकुशलो दूतः प्रेष्यत भूभुजा ।
स चारिकेसरिपुरः ससौष्ठवमदोऽवदत् ॥३२८
राजन्नद्यैव नः स्वामी किं कुमारगिरा श्रुतः ।
राज्यार्धे एव नः किं वा न संपूर्णे तव स्पृहा(?) ॥३२९

किञ्च --

विग्रहे क्षीयते कोशश्चतुरङ्गा चमूरपि ।
जयलक्ष्मीर्जीवितं च संशीतिमधिरोहति ॥३३०
तच्चेज्जीर्यति ते जग्धं चेन्मन्त्री वाऽस्ति नीतिवित् ।
तत् कुमारममुं मुञ्च सिञ्च सौहार्दपादपम् ॥३३१
नाद्यापि किञ्चिद् विनष्टमथ ते विग्रहे ग्रहः ।
तन्मुक्त्वा भिल्लकर्मेदं ढौकेथाः संयते द्रुतम् ॥३३२
प्रत्युवाचाथ तन्मन्त्री न वयं विग्रहेच्छवः ।
युष्मत्कुमार एवायं विजिघृक्षुस्तरुक्षुवत् ॥३३३
दूतोऽब्रूत पुनर्मन्त्रिन् न किञ्चिदिदमुत्तरम् ।
भीमाद्या वोऽपि दायादास्तान् प्रभुः स्वीकरिष्यते ॥३३४

Jain Education International      For Private & Personal Use Only      www.jainelibrary.org

मन्त्र्यवोचत् तदस्माभिर्दृष्टयमेतस्य नास्पदम् ।
युष्माभिरपि तेषां न व्यवस्थेयं सुनिश्चिता ॥३३५

अरिकेसरिणाऽथैष विसृष्टः क्लिष्टचेष्टितः ।
राज्यान्तरेऽपि न प्राप स्थितिं शृङ्गितुरङ्गवत् ॥३३६

परीवारविनिर्मुक्तोऽसिवन्निर्नष्टवैभवः ।
एकाकी वज्रसिंहोऽयमत्रागच्छन्महीपते ॥३३७

इति गुरुगिरमुच्चैः सम्यगालोच्य मूर्छाकपटत इव किञ्चिद् ध्यानधाराधिरोहात् ।
सपदि समुपजातोदात्तजातिस्मृतिश्रीरवितथमिति सर्वं सूरिराजो निवेद्य ॥३३८

वृजिनजलधितोऽस्मादुद्धर स्राक् प्रभो मा-
मिति भणितितरङ्गांस्तुङ्गयन् वजसिंहः ।
अधृत चरणभारं रामदेव क्रमेण
व्रतितिलकसुधर्मस्वामिनः पादमूले ॥३३९॥ युग्मम्

इति श्रीनिर्वाणलीलावतीमहाकथेतिवृत्तोद्धारे **लीलावतीसारे** जिनाङ्के **मोहाब्रह्मसेवाद्वन्द्व-विपाक-व्यावर्णनो** नाम पञ्चम उत्साहः* ॥

---

* छ ग्रं० ३५३ ॥ छ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## षष्ठ उत्साहः

अथापरस्मिन्नहनि श्रीसुधर्मपदाम्बुजम् ।
नमस्कर्तुं तन्निवासिश्रियमादित्सवः किल ॥१
श्रीविजयसेनभूपप्रमुखाः पुरुषोत्तमाः ।
पञ्चापि जग्मुरुद्यानं निधानं सौरभश्रियः ॥२॥ युग्मम्
नमस्कृत्य यथास्थानं निषद्य च गुरोः पुरः ।
राजा कोशीकृतकरो धर्तुं श्रेयोनिधिं किल ॥३
व्यज्ञापयत् प्रभो ज्ञाननिधान ज्ञापयाधुना ।
लोभस्य परिग्रहश्रीपत्नीकस्य स्वलक्षणम् ॥४॥ युग्मम्
भगवानुक्तवान् राजन् सावधानं निशामय ।
लोभोऽभिलाषः काङ्क्षा च मूर्च्छेच्छेति समार्थिकाः ॥५
सर्वे कषाया भवौकःस्तम्भा एष विशेषतः ।
लोभमूलाः परे प्रायो नालुब्धस्य क्रुधादयः ॥६
कदाचिदेव कस्यापि गीर्मनोवत् क्रुधादयः ।
अयं तु कायवद् राजन् सर्वेषामपि सर्वदा ॥७
पितैष सर्वदोषाणां गुणद्रूणां दवानलः ।
विपल्लतानां वसन्तो लोभः सर्वैनसां खनिः ॥८
प्रीतेर्विनाशकः क्रोधो मानो विनयनाशकः ।
मित्राणां नाशिका माया लोभः सर्वविनाशकः ॥९
स्वयम्भूरमणस्यापि पारं प्राप्येत केनचित् ।
लोभाम्भोधेः पुनर्नैव गीर्वाणप्रभुणाऽपि हि ॥१०
यथा यथा भवेल्लाभः स्फायतेऽसौ तथा तथा ।
सहोदरत्वं तन्मन्ये वडवानललोभयोः ॥११
न चक्रिणो न शक्रस्य लुब्धस्य सुखसम्भवः ।
तदेतयोः सहस्थानं न च्छायातपयोरिव ॥१२



Jain Education International For Private & Personal Use Only www.jainelibrary.org

आरम्भः कोऽप्यसौ नास्ति न लोभान्धः करोति यम् ।
परिग्रहोऽप्यसौ नास्त्यारम्भात् संपद्यति न यः ॥१३

लोभादारम्भ आरम्भात् स्यात् परिग्रहसङ्ग्रहः ।
संसारसन्निपातश्च त्रिदोष्याऽवश्यमेतया ॥१४

अपि च —

एकेन्द्रिया अपि निधिं जुषन्ते लोभसंज्ञया ।
अपि मूषकसर्पाद्या अधितिष्ठन्ति शेवधिम् ॥१५

नृत्वेऽपि वणिजो निःस्वा लोभात् कूटानि कुर्वते ।
भ्रातरं पितरं बन्धुं वञ्चयन्तेऽपि मातरम् ॥१६

ईश्वरा व्यवहारेषु वणिज्यापुत्रका अपि ।
लोभग्रस्ता वञ्चयन्ते कूटलेख्यादिना मिथः ॥१७

नियोगिनोऽ(?)करान्यायदण्डैर्मुष्णन्ति मेदिनीम् ।
उत्पद्यन्ते स्वभूषादौ देवा मूर्छातिविह्वलाः ॥१८

लोभाभिभूता भूपाश्च दण्डयन्ति निजाः प्रजाः ।
तथाऽभिषेणयन्त्यन्यांस्तद्राज्यादिजिघृक्षवः ॥१९

तदशक्तः पुनः स्वामि मन्त्रिहस्तिहयादिषु ।
प्रयुङ्क्तेऽभिमरक्ष्वेडान् दहेत् तद्देशमग्निना ॥२०

लोभात् परिग्रहाच्चैवं प्ररूढस्याद्यशाखिनः ।
फलं कटुकमश्नन्ति नरके बालिशा नराः ॥२१

तत उद्धृत्य तिर्यक्षु नरकेषु तथैव ते ।
लोभात् परिग्रहग्रस्ता नरके यान्ति भूरिशः ॥२२

अकामतः कथमपि निर्जीर्णे क्लिष्टकर्मणि ।
कश्चिन् नृत्वे राज्यलक्ष्म्या वृतः पुण्यात् कुतश्चन ॥२३

लोभाद् राज्यान्तराकाङ्क्षी राज्यं हा हारयेत् कुधीः ।
यथैष कनकरथः श्रीपद्मरथनन्दनः ॥२४

निषेदिवान् दक्षिणेन जयशा[सन]मन्त्रिणम् ।
उत्तरेण पुनः सूरं पुरोधसमिलापते ॥२५॥ त्रिभिर्विशेषकम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यजिज्ञपत् पुनर्भूपः प्रभो किं कृतवानसौ ।
फलं किमासेदिवांश्च मूलतः प्रतिपादय ॥२६

सुधर्मस्वाम्यथावादीद् देवदुन्दुभिनिस्वनः ।
संसूत्र्य श्रोत्रमनसोर्मैत्रीं धात्रीपते शृणु ॥२७

अत्रैव भरते लाटललाटतिलकं बभौ ।
भृगुकच्छपुरं यस्य नर्मदा नर्मदा नदी ॥२८

तच्चान्वशिषदुर्वीशो विक्रमो यस्य विक्रमः ।
त्रिविक्रम इवारातिदैत्यकान्तातितापनः ॥२९

श्रीप्रियङ्गुलता तस्य देवी यत् सौरभश्रिये ।
सा प्रियङ्गुलता मन्ये शीतोत्पातेऽपि पुष्यति ॥३०

श्रेष्ठी श्रेष्ठः पुरेऽत्रासीद्यत्र आदित्यनामतः ।
आदित्य इव शेषेभ्योऽभ्यधिको वसुसम्पदा ॥३१

सुमङ्गला प्रियाऽस्याभूदुद्भूतकुलमङ्गला ।
मङ्गलं मण्डनं चाद्यं या मेने शीलमेव हि ॥३२

मनोरथशतप्राप्तस्तत्पुत्रोऽभूद्यशोरविः ।
नाम्ना येनात्मैव पुत्र इति सत्यापिता श्रुतिः ॥३३

उपयेमे स च ब्रह्मदत्तपुत्रीं जयश्रियम् ।
जगज्जयश्रियं पाणौ कृतां मेने स्मरो यया ॥३४

गुरुं विना × × द्येति व्यलोपीत् स यशोरविः ।
विना गुरूपदेशं यत् स कार्पण्यकलामधात् ॥३५

ततश्च —

शटितं क्वथितं जीर्णमक्रय्यं तुच्छमन्नकम् ।
गृहे व्यापारयत्येष घृतं धान्यं मलीमसम् ॥३६

द्व्यहातीततक्रमहात्यम्लकुकुसमात्रकम् ।
भृत्यादीन् भोजयत्येषोऽतिकटूवा तैलधारया ॥३७

भाण्डस्विन्नं मुधालभ्यं दण्डितं जीर्णमंशुकम् ।
परिधत्ते स्वयमयं शेषवार्तां तु वेत्ति सः ॥३८

३७.२. मत्रकं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गन्धताम्बूलमाल्यादिनाम कश्चन तद्गृहे ।
नालिकेरद्वीप इव हुतभुग्नाम वेत्ति न ॥३९

अर्थार्जनैकरसिको दानभोगपराङ्मुखः ।
विदधे विधिना मन्ये भूः परिग्रहलोभयोः ॥४०

देशान्तरायातजनसमवायस्य मण्डपे ।
स यशोरविरन्येद्युः प्राप्तः शुश्राव तत्कथाः ॥४१

देशिनां नायकेनोक्तं भो भोः कः कुत आगतः ।
किञ्च कयाणकं केनानिन्ये लाभः कियानभूत् ॥४२

एकेनोक्तं गर्जनकान्मञ्जिष्ठाहिङ्गुवाजिनः ।
मयाऽऽनीता व्ययशुद्धो लाभो मेऽष्टगुणोऽजनि ॥४३

अन्येनोचे पुण्ड्रदेशाद् वैडूर्यादिकमानयम् ।
उपक्षयविशुद्धो मे लाभो जज्ञे चतुर्गुणः ॥४४

अपरोऽवगहं वज्राकराद् वज्राद्युपानयम् ।
गच्छतोऽष्टगुणो लाभो विंशतिगुण आयतः ॥४५

इतरः स्माहास्मि रत्नद्वीपाद् रत्नाद्यपानयम् ।
लाभोऽसङ्ख्यगुणो मेऽभूत् परमब्धिः सुदुर्गमः ॥४६

मया दध्ये च चेत् क्षेमादुत्तीर्णो नैमि तत् पुनः ।
पदे पदे यतोऽपाया आगान् तु गृहभाग्यतः (?) ॥४७

यथाश्रुतं तत्र तत्र यियासन् स यशोरविः ।
बबन्ध निश्चयग्रन्थिं रत्नद्वीपगमं प्रति ॥४८

गृहे गत्वा पितुर्मातुः पत्न्याश्चायमचीकथत् ।
नानाऽद्येति वणिग्वार्ता अश्रौषं देशिमण्डपे ॥४९

तन्मां तातानुजानीहि रत्नद्वीपगमं प्रति ।
येनासङ्ख्यगुणाल्लाभात् तातपादौ महाम्यहम् ॥५०

ततश्च यशआदित्यः पुत्रवात्सल्यपिच्छिलः ।
स्मित्वा स्माहातीवधनव्यये नो×चितो भवान् ॥५१

त्वयेदृगारम्भि गृहव्यवहारोऽस्त्यनुत्तरः ।
मदीयवारके यादृग् वीक्षाञ्चक्रे न केनचित् ॥५२

मद्वारके ह्याज्यगुडप्राज्यं भोज्यमभूद्गृहे ।
त्वद्वारके तु क्वथितधान्यं दुर्गन्धि तैलयुक् ॥५३

स्त्रीणां दिव्यानि वासांसि भूयांश्च मदनेहसि ।
त्वं तु धत्से स्वयमपि दण्डिखण्डितमंशुकम् ॥५४

ततो गृहव्ययमियन्मात्रं पूरयसे कथम् ।
रत्नद्वीपं चेन्न यासि वत्स तुच्छेतराशय ॥५५

पुत्रः —

तातैष ते यशस्कारी गुणोऽस्मि यदनुल्वणः ।
मां च वक्ति जनो लक्ष्मीजयिनं न तया जितम् ॥५६

न चैवमपि नास्ति श्रीरिति मे शङ्क्यते जनैः ।
दिव्याकल्पा अपि नाढ्याः सम्भाव्यन्ते नटादय ॥५७

पिता —

तत् किमस्त्यर्धनिष्पन्नं दैवौकःकूपवापिकम् ।
येनैवं प्राणसन्देहकर्मठे कर्मणि स्पृहा ॥५८

किं वा मया नार्पितं ते किं वा तेन न पूर्यते ।
किञ्च त्वत्कव्यवहृतं या शोभा साऽपि ते नहि(?) ॥५९

न च भोगं च कीर्तिं च विना पुत्र श्रियः फलम् ।
कीर्तिश्च नादात्रभोक्त्रोस्तदारम्भेण किं तव ॥६०

किञ्च यद्यत् श्रोष्यसि त्वं तत्तच्चेत् कर्तुमिच्छसि ।
तदा सर्वेण लोकेन वातूल इति वक्ष्यसे ॥६१

अपि च —

रत्नद्वीपागामिनोऽप्येतावती श्रीर्न कस्यचित् ।
मयाऽर्पिता यावती ते तत्सुखी पितरौ पृणु ॥६२

पुत्रः —

सत्यं तातास्ति मे लक्ष्मीर्भवद्दत्ताऽतिपुष्कला ।
अर्जामि चेत् तदधिकां त्वत्सूनुः साधु किं न तत् ॥६३

---

५७.३. दिव्याः कल्पा ( Visarga added in the MS. as a correction ).

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न प्रत्यगामहं तात यद्धीश्चलति वार्द्धके ।
प्रत्यायितोऽद्य भवता न लोकख्यातिरन्यथा ॥६४
यथारुचि ततो भुक्त्वा यूयं स्वपित निर्भरम् ।
गृहकर्मसु निश्चिन्ताः सर्वथाऽपि ह्यतः परम् ॥६५
तत् तात मातर्भवद्भ्यां भवद्वध्वा च सर्वथा ।
रत्नद्वीपं यियासोर्मे प्रोत्साहः पोष्यतां परम् ॥६६
अथाभ्यधुस्ते सिद्धिः स्ताच्छकुनाः स्युः शुभावहाः ।
गतागते क्षेमतः स्तां सन्तु शेवधयो वशाः ॥६७
ततश्च जसरविणा प्रोक्ताः सांयात्रिका मुदा ।
रत्नद्वीपप्राप्तिमित्रं यानपात्रं प्रगुण्यताम् ॥६८
प्रत्यूचुस्ते यानपात्रं देव प्रगुणमेव हि ।
भाण्डान्यथ सहायाश्च तेनागृह्यन्त भूरिशः ॥६९
मध्येऽम्भोधे नाङ्गरितं यानपात्रं शुभे दिने ।
नदीपूरैरिवाम्भोधिर्भाण्डपूरैश्च पूरितम् ॥७०
सह सांयात्रिकैश्चक्रे व्यवस्था गमनागमे ।
समुद्रदेवमुद्दिश्य विधिनाऽकारि चाष्टमम् ॥७१
ततः पितृभ्यां स्वजनैः पूर्लोकैश्च परिष्कृतः ।
कल्पद्रुवद् ददद्दानं तीरं प्राप स वारिधेः ॥७२
अस्ताघाम्बुधिलङ्घनैकरसिकं किञ्चिन्नु भूतान्तरं
तत् तावज्जनतास्थितिक्षममथास्थास्न्वन्तरीपान्तरम् ।
भाण्डागारमथ स्वपुण्यकमलालीलाविलासश्रियां
प्रेक्षामास यशोरविः प्रवहणं तद्वार्धिमध्यासितम् ॥७३
पूर्यमाणेषु तूर्येषु जनन्या कृतमङ्गलः ।
पित्रोः प्रणेमिवान् पादौ तद्दत्ताशीः प्रहर्षुलः ॥७४
सम्भाष्य पत्नीं बन्धूंश्च पौरानपि यथोचिति ।
यानपात्रं मित्रमिवाध्यासामास यशोरविः ॥७५॥ युग्मम्
तत् तादृक तन्मनोराज्यवेगाग्रेसरवेगतः ।
गन्तुं प्रववृते पोतः सागरे तस्य पोतवत् ॥७६

६७.३. क्षेमत.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उन्मज्जन्मज्जदुच्चैस्तरशिखरिसुहल्लोलकल्लोलमाला-
प्रव्यक्तास्थावरोर्वीधरगृहजलधीतिप्रवादानुवादम् ।
पारावारं स्वलीलासर इव रभसावेशतोऽतीत्य रत्न-
द्वीपालङ्कारसारं विजयपुरमसौ क्षेमलक्ष्म्या सहागात् ॥७७

ततः सांयात्रिकेणोक्तस्तूर्णमेव यशोरविः ।
पोतं शुल्कापयामास प्रमोदोन्मेदुरोदरः ॥७८
वसुमित्रस्य च गृहं गृहीत्वा भाटकेन सः ।
तत्र भाण्डं समुत्तार्य सोऽस्थात् स्वगृहलीलया ॥७९
अथ सांयात्रिकोऽवादीदमुं विसृज मामिति ।
सोऽवक् सहैव यास्यामस्तूर्णं चेद् भाण्डविक्रयः ॥८०
महीयसाथ लाभेनाभूत् क्रयाणकविक्रयः ।
ताम्बूलाशनवस्त्राद्यैर्वसुमित्रश्च मित्र्यभूत् ॥८१
दृष्ट्वा रत्नान्यमूल्यानि वसुमित्रनिकेतने ।
[आ]दित्सुर्लोभतः सोऽभूल्लेभे तु न कथञ्चन ॥८२
जग्राह च जसरविस्ततो रत्नादि भूरिशः ।
वसुमित्रमवादीच्च त्वमप्येहि मया सह ॥८३
भृगुकच्छे महांल्लाभो रत्नेभ्यो भवति ध्रुवम् ।
रत्नपूर्णं यानपात्रं साध्यं भवतु चावयोः ॥८४
सोऽवक् पृच्छामि पितरौ तमूचेऽथ यशोरविः ।
पित्रोरस्मि बलादागां लाभश्चाभूदियान् मम ॥८५
वसुमित्रोऽबदत् पित्रोर्भृगुकच्छे व्रजाम्यहम् ।
सहामुना तत्र लाभो रत्नेभ्योऽतिमहान् यतः ॥८६
वसुः पितृभ्यामूचे ते वत्स किं नात्र पूर्यते ।
विषमोऽब्धिरल्पलाभो बहुच्छेदश्च वर्ज्यताम् ॥८७
ततोऽब्रूत जसरविरल्पलाभोऽम्बुधिः कथम् ।
वसोः पितृभ्यामूचेऽब्धिः प्राणसन्देहकृद्यतः ॥८८
स्मित्वाऽथाह जसरविस्तुल्या सर्वत्र वृद्धगीः ।
यतोऽहमपि पितृभ्यामेवमेव निवारितः ॥८९

---

८४.१. महाल्लाभो.

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

अनुजानीहि तत् तातामुं गन्तुं भृगुपत्तनम् ।
कथञ्चित् तदनुज्ञातो रविणोत्साहितो वसुः ॥९०

उक्तश्च सांयात्रिकाणां स्वभाण्डं मित्र माऽभिधाः ।
पृष्टेन तु त्वया वाच्यं मैत्र्याऽऽगां रविणा सह ॥९१

अन्यथा तद्गिरा ज्ञात्वा त्वां वैदेशिक इत्यसौ ।
भृगुकच्छाधिभूस्त्वत्कं भाण्डं मा स्म ग्रहीदिति ॥९२

ब्रुवाणस्येति पापस्य रवेस्तस्यायमाशयः ।
हत्वैनं निर्मूल्यरत्नान्यस्यादास्येऽस्मि निश्चितम् ॥९३

यदि त्वस्याप्यत्र भाण्डमस्तीति ज्ञास्यतेऽपरैः ।
तदा निःस्वामिकं भाण्डमस्य स्याद्राजसादिति ॥९४

सखे स्वभृत्यं मा कार्षीर्ये मे भृत्यास्तवैव ते ।
रवेर्वचः पितुरिव स्वच्छात्मा त्वग्रहीद्वसुः ॥९५

शुभेऽह्न्यथाभ्यां बोहित्थं स्थापितं सागरान्तरे ।
भाण्डं शुल्कापयाञ्चक्रे चक्रे बोहित्थपूरणम् ॥९६

कुलदेवी नमश्चक्रे चक्रे सर्वजनौचिती ।
समुद्रः पूजयाञ्चक्रे चक्रे गुरुनमस्कृतिः ॥९७॥ युग्मम्

आदाय दिव्यरत्नानि प्रस्थितेनर्जुचेतसा ।
विरहानलसंतप्तपितृबन्धुसुहृद्युजः ॥९८

वसुमित्रेण मित्रेण सहितोऽथ यशोरविः ।
ददानो दानमर्थिभ्यः प्रतीरं प्राप नीरधेः ॥९९॥ युग्मम्

प्रणम्य मातापितरौ तद्दत्ताशीः प्रहर्षुलौ ।
आरुक्षतां यानपात्रं वसुमित्रयशोरवी ॥१००

भृगुकच्छानुकूलेन दक्षिणेन नभस्वता ।
प्रेर्यमाणं यानपात्रं क्षणाद् दृक्पथमत्यगात् ॥१०१

पञ्चषाणि दिनान्येवं वहमानेऽत्र वाहने ।
लोभेनाजन्मसध्रीचा पापेनाकुलितो रविः ॥१०२

व्यचिन्तयद् दीव्यरत्नकीलकोऽयं कथञ्चन ।
उत्खन्यते जन्यते च स्वाधीनो रत्नशेवधिः ॥१०३॥ युग्मम्

९४.३. निस्वानिकं. १००.२. तद्दता०.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो विलोप्य स्वकुलमपकीर्तिं विहस्त्य च ।
अंहःसंहतिमाक्रम्यानीक्षित्वा दुर्गदुर्गतिम् ॥१०४
विश्वस्तस्य प्रशस्तस्य वसुमित्रस्य पाप्मना ।
रविणा वैरिणा दत्ते ताम्बूले विषमं विषम् ॥१०५॥ युग्मम्
प्रति प्रतीकं तस्याशु प्रासरन् विषवीचयः ।
हृषीकप्रसरो रुद्धः किञ्च भग्ने विलोचने ॥१०६
लुलिता कन्धरा स्कन्धे सद्यः प्राणैः पलायितम् ।
लोभः कुमित्रमैत्री च सत्यं सर्वापदां खनिः ॥१०७
तद् दृष्ट्वा निन्द्यचेष्टोऽसौ नटवन् मूर्छयाऽपतत् ।
स्वदुष्कर्म तिरोधातुं व्यलापीच्चाप्तचेतनः ॥१०८
देवानांप्रिय रे देव मैव तेऽभूज्जनिः क्वचित् ।
दत्त्वाऽपहरसे यस्त्वं मित्ररत्नममूदृशम् ॥१०९
गतिर्मतिः श्रुतिदृष्टिस्तुष्टिः पुष्टिर्मनो धनम् ।
हरताऽमुं हृतं सर्वं दुर्दैव सहसैव मे ॥११०
वसुमित्र सुमित्र त्वं क्व गतोऽसीति मे वद ।
येनाहमपि तत्रैमि त्वां विना स्थातुमक्षमः ॥१११
त्वया सहैव दुर्दैवः किं वा मां नैव नीतवान् ।
यद्वायं नात्र नामुत्रानुकूलो मम वैरिवत् ॥११२
इत्यादि विलपन्नेष रविरौच्यत तज्जनैः ।
विचार्यतां कार्यमार्य न विलापैर्वलत्ययम् ॥११३
रविः सास्रं जगौ क्वास्य संस्कारः स्यात् त ऊचिरे ।
जलधावेतमाप्लाव्य क्रियतामौर्ध्वदेहिकम् ॥११४
इतश्च वसुमित्रोऽसौ भवितव्यतया तया ।
कुतश्चिच्छुभभावाच्चाग्निकुमारत्वमानशे ॥११५
जातमात्रो वीक्ष्य दिव्यां तामदृष्टचरीं श्रियम् ।
स दध्यौ किं मया चक्रे येनेयं श्रीरुपस्थिता ॥११६

११५.४. °मानसे.



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

विभङ्गज्ञानचारेण गत्वा प्राक्स्थानके क्षणात् ।
आगत्य कथयाञ्चक्रे तस्य प्राच्यभवस्थितिः ॥११७
सोऽथ क्रूरात्मनि रवौ तदाऽकारणवैरिणि ।
तथोपद्रवकारे च सैंहिकेय इवाकुपत् ॥११८
पोतस्थं स्वं वपुर्वीक्ष्य सशम्यो(?)त्थायमागमत् ।
पोतस्योपरि चारेभे विकर्तुं घनमण्डलम् ॥११९
ततो निर्यामकः प्रोचे भोः भोः सांयात्रिका द्रुतम् ।
संवर्त्यतां सितपटः पोतो नाङ्गर्यतामयम् ॥१२०
विधीयन्तां शान्तिका[नि] स्मर्यन्तां कुलदेवताः ।
यदुत्पातप्रदेशोऽयं सूर्पमानोऽब्द उत्थितः ॥१२१
तेऽथ पोतं दृढीकृत्य स्नाताः सार्द्रपटावृताः ।
कुलदेवीस्मृतस्तस्थुर्धूपोद्ग्राहणपाणयः ॥१२२
तावत् तेनाब्दखण्डेन व्यानशे व्योममण्डलम् ।
पापीयसो रवेस्तस्य पाप्मनेव वपुष्मता ॥१२३
जगर्जुरूर्जितं मेघास्तदकीर्त्यानका इव ।
विलेसुर्विद्युतो घोराकारास्तच्चित्तवृत्तिवत् ॥१२४
निपेतुः करकाश्मानस्तमिव प्रजिघांसवः ।
धाराश्च मुसलाकाराः पेतुस्तमिव खण्डितुम् ॥१२५
उच्चिक्षेप निचिक्षेप भ्रमयामास चाभितः ।
पात्रवद् यानपात्रं स नर्तयामास किं बहु ॥१२६
उत्पाततस्ततो भीतभीताः सांयात्रिकादयः ।
प्राञ्जलि प्राञ्जलहृदः प्रोच्चकैः प्रोचुरुन्मुखाः ॥१२७
यः कोऽपि जलदेवो वा यक्षो वा राक्षसोऽथवा ।
विरोद्धोऽस्माभिरज्ञानैः स प्रसद्य ब्रवीतु नः ॥१२८
क्षमयामो मानयामो येन तं लुठनैः पदोः ।
प्रणामावधिरेव स्यात् कोपाटोपो महात्मनाम् ॥१२९
स्वापराधं न च वयं जानीमः शून्यमानसाः ।
तदादिश प्रभोऽध्यक्षं यदादिष्टकृतो वयम् ॥१३०

---

११८.२. तवा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तमालश्यामलाङ्गोऽथातिभयङ्करदर्शनः ।
आचचक्षे सोऽन्तरिक्षे प्रत्यक्षो राक्षसाकृतिः ॥१३१
रे रे पापा न जानीथ वसुमित्रं निरागसम् ।
युष्माभिरेव प्रहतं सोऽहं जज्ञे सुरोत्तमः ॥१३२
युष्मासु यदहं कुर्वे तत्सर्वमतियुक्तिमत् ।
कृते प्रतिकृतं कुर्यात् पटहो ह्येष सर्वतः ॥१३३
ऊचुस्ते शाधि तं देवादश्चक्रे येन केनचित् ।
नह्यन्यनिर्मितान्यायान्निग्राह्योऽन्यतरः क्वचित् ॥१३४
येन चक्रे विपत्तिस्ते देव वेत्सि त्वमेव तम् ।
तत् तं विना नाथ शेषान् रक्ष रक्ष निरागसः ॥१३५
ततस्तद्वचनैर्दीनदीनैर्देवः प्रसेदिवान् ।
अन्येषामभयं दत्वाऽग्रहीत् तं स्वरिपुं रविम् ॥१३६
सप्ततालं तमुत्क्षिप्य निराधारं मुमोच सः ।
नरकान् सप्तानाधारो यात्वसाविति तु ब्रुवन् ॥१३७
समग्रमपि तं पोतं क्षणान्नीत्वाऽर्पयत् पितुः ।
तस्मै स्ववृत्तं चाख्याय स देवोऽगात् स्वमास्पदम् ॥१३८
कृत्वा तदङ्गसंस्कारं बाष्पव्याप्तेक्षणः पिता ।
पोतश्रिया पुत्रहेतोर्धर्मस्थानान्यचीकरत् ॥१३९
दत्वा यथोचितं तेन प्रेषिताः पोतवाणिजाः ।
जसादित्याय जगदुः साश्रु सर्वां कथां रवेः ॥१४०
तदौर्ध्वदेहिकं चक्रे सोऽपि सास्रविलोचनः ।
धिग् लोभाद् रविणा चक्रे पुत्रशोको द्वयोरपि ॥१४१
स च पापो रविस्तेन क्षिप्तो दुस्तरसागरे ।
दोर्भ्यां तरन् दैवगत्याऽग्राहि भारुण्डपक्षिणा ॥१४२
समुद्रतीरस्थवृक्षस्थनीडं तं नयन्नयम् ।
भारुण्डपक्षिणाऽन्येनादर्शि क्षुत्क्षामकुक्षिणा ॥१४३
तद् भक्ष्यहेतवे युद्धं चञ्चूचञ्चवि कुर्वतोः ।
तयोः पपात स रविर्दृषत्कठिनभूतले ॥१४४

---

१३२.३. प्रहतं. १४०.४. साश्रु.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दूरपातखरक्षोणिघाताभ्यां मूर्छितोऽधिकम् ।
आयुःप्राबल्यतः प्राणैर्मुमुचे स परं न हि ॥१४५

सूर्यतापगलत्स्वेदशीतवाताप्तचेतनः ।
किञ्चिदुन्मील्य नयने स वराको यशोरविः ॥१४६

शून्यशून्या दिशः सर्वा यमस्यापि भयंकराः ।
स्वमङ्गं च जलचरदंष्ट्राव्रणशतोल्वणम् ॥१४७

विलोक्य संस्मरन् प्राच्यां प्रमोदविवशां दशाम् ।
प्रादुःषद्दुःखसंभारविह्वलो व्यलपीदिति ॥१४८॥ त्रिभिर्विशेषकम्

हा तात हा मातरेतद् युवाभ्यां वीक्ष्य वारितः ।
कियन्नाहं परं नास्थां पापे पापं ततोऽपतत् ॥१४९

तदिदानीं कथं तात निस्त्राणः शरणोज्झितः ।
आकाशात् पतितो भूम्याः प्रतीष्टो भविताऽस्म्यहम् ॥१५०

यदितो येन केनापि दैवाद् वार्धेः खगात् ततः ।
रक्षितोऽहं कथमपि रक्षिष्यति स एव माम् ॥१५१

इति किञ्चिदवष्टभ्य धैर्यं तृष्णाक्षुधातुरः ।
त्वरितं जलमन्वैषीदद्राक्षीच्च सरोवरम् ॥१५२

तत्र प्रक्षाल्य गात्रं स निपीय मधुरं पयः ।
रम्भादाडिमनारङ्गफलान्यास्वाद्य निर्भरम् ॥१५३

पूगीफलैलाकर्पूरनागवल्लीदलानि च ।
सम्मान्य कोटरोत्सङ्गे विशश्राम श्रमच्छिदे ॥१५४॥ युग्मम्

रत्नकर्पूरकक्कोललवङ्गैला: सचन्दनाः ।
कथं नये दोःसखोऽहमिति लोभाद् विचिन्तयन् ॥१५५

यावत् तस्थौ तावदेतां कुतोऽप्यत्र नरावुभौ ।
भाषितौ रविणा भो भोः कौ युवां किमिहागतौ ॥१५६॥ युग्मम्

तावूचतुर्मूलिकार्थमेताभिः किं करिष्यथः ।
रसायनं विधास्यावो येन स्यावाजरामरौ ॥१५७

कुरुतं मामपि रसायनेनैवाजरामरम् ।
इत्युक्ते रविणा धूर्तौ दध्यतुस्तावयं पशुः ॥१५८

---

१५१.१. यदिता. १५१.२. देवाद्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वश्यो नस्तदनेनेष्टाऽऽसुरीं विद्या प्रसाध्यते ।
तौ विचिन्त्येति देव्यग्रे प्रारेभाते महाजपम् ॥१५९
आकाराद्यै रविर्जज्ञौ मामेतौ मारयिष्यतः ।
विद्यासिद्धयै देवता ततः सोऽपासरत् ततः ॥१६०
निलिल्ये क्वापि कुञ्जेऽसौ यथा केनापि नेक्ष्यते ।
जापपूर्तौ च धूर्ताभ्यामन्विष्टोऽसौ न चेक्षितः ॥१६१
ततो रविरपक्रम्य स्वदेशाभिमुखं व्रजन् ।
पर्यटन्तं नरमेकं दृष्ट्वाऽऽचष्टासि कः सखे ॥१६२
क्व चैषि सोऽवग् योग्यस्मि गच्छामि रसकूपिकाम् ।
पश्यैष मम कक्षायां विद्यते कल्पपुस्तकम् ॥१६३
कूपिकायाः पराप्तेन रसेन शतवेधिना ।
सहस्रभारशः शुल्वं करिष्याम्यस्मि काञ्चनम् ॥१६४
लोभेन प्रेरितः सख्याऽथ तं रविरवोचत ।
त्वया सहैम्यहमपि यदि भागं ददासि मे ॥१६५
योग्यवादीद् भवत्वर्धार्धेन काञ्चनमावयोः ।
तदेव वैभवं मे स्ताद् येन त्वामुद्धराम्यहम् ॥१६६
ततश्च —
तैलातिसिक्तमहिषपुच्छदीपकरो रविः ।
अग्रे पृष्ठे कल्पपाणिर्योगी च विवरं गतौ ॥१६७
तत्रेभसिंहमहिषोत्पातान् कल्पोदितादबलेः ।
प्रशमय्य विना विघ्नं तौ प्राप्तौ रसकूपिकाम् ॥१६८
रविं ततोऽवदद्योगी रज्जुमेतां मया धृताम् ।
दृढमालम्ब्य हस्ताभ्यां सखे कूप्यां द्रुतं विश ॥१६९
रसपूर्णं रज्जुबद्धं तुम्बं प्रेष्यं त्वयाऽऽदितः ।
पश्चात् त्वामस्मि कर्ष्यामि स्वर्णसिद्धिस्ततो ध्रुवम् ॥१७०
ततोऽविशद् रविस्तत्र रसेनाभारि तुम्बकम् ।
तटस्थेनैव तेनाथ दृष्टाऽग्रे च नरो जगे ॥१७१

---
१६३.४. °पुस्तकः

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

कस्त्वं भो केन कार्येण रसमध्येऽत्र तिष्ठसि ।
सोऽवक् क्षिप्तोऽस्मि धूर्तेनात्र कूप्यां रसहेतवे ॥१७२

आदौ तुम्बं रसपूर्णं तस्य दत्तं मयाऽऽर्जवात् ।
निरालम्बीकृत्य मुक्तः पापेनास्म्यपतं रसे ॥१७३

रसेन मेऽधरकायश्चक्रे निर्मांसलोहितः ।
क्षुत्तृष्णावर्जितो जीवाम्यस्येवावार्यवीर्यतः ॥१७४

तदादितो रसतुम्बं मा दद्या वत्स योगिनः ।
अन्यथाहमिव त्वं चामुना प्रक्षेप्स्यसे रसे ॥१७५

अत्रान्तरे योगिनोर्ध्वभूचे प्रेषय तुम्बकम् ।
रविराहास्मि तुम्बं च समेष्यावः सहैव हि ॥१७६

योग्याख्यत् सममाक्रष्टुं त्वां तुम्बं च न हि क्षमे ।
तन्मुग्ध तुम्बं यच्छादौ तत आकक्ष्यते भवान् ॥१७७

रविर्जगौ मामाकृष्य गृह्णीथा रसतुम्बकम् ।
न विश्वसिमि येनाहं तवैवं वादिनः सखे ॥१७८

रज्जुं क्षिप्त्वा रुषा कूप्यां स पापो विवरान्निरैत् ।
रविस्तु रसतीरस्थः पुंसोचे रसवासिना ॥१७९

मा विषीदात्रैव तिष्ठ रसपानार्थमेष्यति ।
गोधा तत्पुच्छमालम्ब्य निर्गच्छेर्वत्स सत्वरम् ॥१८०

तेनोपायेन विवरगर्भान्निर्गत्य कृच्छ्रतः ।
पुनर्जातंमन्य एष स्वदेशायाचलत् पुनः ॥१८१

गच्छन् पलाशस्य पोतं भूप्रविष्टं विलोक्य सः ।
रविर्विचिन्तयामास ध्रुवमत्रास्ति शेवधिः ॥१८२

अक्षीरिणो हि वृक्षस्य भूप्रवेशिनि पोतके ।
रक्ते रसे स्यू रत्नानि पीते पीतं सिते सितम् ॥१८३

यावन्मात्रे पोत ऊर्ध्वं तावन्मात्रे रसातले ।
अल्पो बहुर्वा निधिः स्याद् ध्रुवं बिल्वपलाशयोः ॥१८४

किञ्चैष पोतोऽतिस्थूलो मूले तत् प्राप्तवान् निधिम् ।
रविर्विचिन्तयंस्येभाग्यखनिः खनितुमुद्यतः ॥१८५

---

१८२.१. पलासस्य; १८२.४. सेवधिः. १८४.४. °पलास.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहो अकार्यं मा कार्षीरिति शब्दो नभस्युदैत् ।
अथाक्षिभ्रुवमुत्क्षिप्य समन्ताद् रविरैक्षत ॥१८६
न च कञ्चन सोऽद्राक्षीदये मे वादिते श्रुती ।
पुनः खनितुमारेभे पुनर्ध्वनिरभूद्दिवि ॥१८७
अरे किञ्चिन्न तेऽत्रेति तमसाऽवगणय्य सः ।
प्रचखान पुनर्जानन्ननिर्वेदं श्रियः पदम् ॥१८८
अथ गाढतमं वाक्यमुच्छशाल नभस्तले ।
रे मूर्खशेखर नराधम मा मा वृथा मृथाः ॥१८९
अदृश्यविग्रहः को मां कुतो हेतोर्निषेधति ।
इत्युन्मुखीभूय रविः शिरःप्राञ्जलिरभ्यधात् ॥१९०
यक्षोऽध्यक्षोऽथाचचक्षेऽधिष्ठाताऽस्य निधेरहम् ।
रे वराक न योग्योऽसि तेन त्वं प्रतिषिध्यसे ॥१९१
तथाऽप्युच्चैः खनन् मूढः क्रुद्धेन व्यन्तरेण सः ।
स्वस्थानाद्दशयोजन्यां मरुतोत्क्षिप्य चिक्षिपे ॥१९२
विलक्षस्तत्र स भ्राम्यन् वटे प्रैक्षिष्ट यक्षिणीम् ।
सत्योपयाचितां मत्वा तामाराद्धुं प्रचक्रमे ॥१९३
सप्तमेऽह्नि च साध्यक्षा वरं वृण्विति तं जगौ ।
लुब्धः स मुग्धकोऽवादीत् भुङ्क्ष्व भोगान् मया सह ॥१९४
साऽवोचदन्यद्याचस्व सोऽवादीदिदमेव हि ।
पुनः पुनःस्तथालापे कोपादाचष्ट यक्षिणी ॥१९५
आः पाप मा कृथा जापं गृहं व्रज मृतोऽन्यथा ।
कथयिष्यसि नैवोक्तमथ स्मित्वा रविर्जगौ ॥१९६
यस्ते वशे त्वदाज्ञां स कुर्यान्नैवास्मि ते वशे ।
चेदस्ति मन्त्रसामर्थ्यं तन्मया सह रंस्यसे ॥१९७
इति ब्रुवन् पुंब्रुवोऽसौ देव्याऽघाति चपेटया ।
दन्तसम्पुटकं बध्वा पपात च महीतले ॥१९८
पुंस्कीटे मेऽत्र कः कोप इत्युद्यदयया तया ।
न मारितः किं तु मुक्तो ग्रहिलीकृत्य हेलया ॥१९९

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

ततोऽसौ नृत्यति ब्रूते याति तिष्ठति धावति ।
हसति क्रुध्यति स्तौति गायति क्षौति रोदिति ॥२००
वस्ते रथ्याचीरिकाश्च नग्नो भ्राम्यति सर्वतः ।
कथञ्चित् प्राप्तो गोष्ठादौ भिक्षते च गृहे गृहे ॥२०१
हन्यते डिम्भकैर्ष्टिलेष्टुकशादिभिः ।
हा तात हा मातस्त्रायस्वेत्यादि दीनं च जल्पति ॥२०२
कथञ्चिद्दैवयोगेन भृगुकच्छपुरं ययौ ।
गृहे गृहे भिक्षमाणः प्राप्तश्च स्वगृहाग्रतः ॥२०३
न जानीते स्वपितरं मातरं न च वल्लभाम् ।
तत् सत्यं यद् बुधैरुक्तं लोभः सर्वविपत्खनिः ॥२०४
ततः कथञ्चित् पितृभ्यां परिज्ञाय प्ररुद्य च ।
गृहमध्ये बलान्निन्ये विकलः स यशोरविः ॥२०५
ततश्च मान्त्रिकमुख्यान् सर्वानाचष्ट तत्पिता ।
रविं यः प्रगुणीकुर्यात् तस्मै स्वर्णमियद्ददे ॥२०६
प्रारभ्यत ततस्तत्र तैर्यथास्वमुपक्रमः ।
उपकारः खल इवाखिलो जज्ञे तु निष्फलः ॥२०७
पात्रावतीर्णाऽथाख्यत् सा यक्षिणी मेति ताम्यथ ।
अप्रार्थितप्रार्थकोऽसौ मयैवं हि व्यधीयत ॥२०८
युष्मासु कृपया मुञ्चे चेद् ब्रूथाथाभ्यधुः समे ।
महाप्रसादस्तद्देवि सद्योऽभूत् प्रगुणो रविः ॥२०९
ततो वर्धापनं जज्ञे जसादित्यस्य मन्दिरे ।
माङ्गलिक्यानि चाजग्मुः प्रतिबान्धवमन्दिरात् ॥२१०
पृष्टो रविः स्ववृत्तान्तमाततानान्यथान्यथा ।
तल्लोभ इव तत्कूटमप्यपारं हि वार्धितः ॥२११
ठकितो लोभधूर्तेन स रविर्मन्दकुट्टितः ।
परिग्रहग्रहाविष्टः प्राचष्ट पितरं पुनः ॥२१२
तात प्रसादादादाय कर्पासाद्यतिभूरिशः ।
गत्वा गर्जनकं भूरिलाभात् क्रीत्वा हयोत्तमान् ॥२१३

२०४.२. न न. २०९.१. मुचे.

अत्र चानीय विक्रीय गरीयस्तरलाभतः ।
जले नष्टां स्थलाल्लब्ध्वा लक्ष्मीं स्यामनृणः पितुः ॥२१४॥ युग्मम्
स्मित्वा स्माह जसादित्यो दृष्टं हि कपिचापलम् ।
मन्यामहे तव पुनर्वत्सातिकपिचापलम् ॥२१५
आप्तैर्निषिद्धोऽपि गत्वा विदेशं सर्वनाशतः ।
प्राप्तोऽपि प्राणसन्देहं पुनस्तं यद् यियाससि ॥२१६
तदत्रैव सुखं तिष्ठ पितृशुश्रूषणोद्यतः ।
स्वं चात्मानं च लोभेन विदेशे मा विनाशय ॥२१७
इत्थं हितोपदेशेनाप्यन्तः कलुषितो रविः ।
व्यचिन्तयज्जरन्नेष सर्वप्रत्यूह एव मे ॥२१८
तच्चेत् कथञ्चिन्नायं स्यात् तद्‌व्यवहारनन्दनैः ।
धनैरनिधनैः कुर्वं धनदं विमर्दं क्षणात् ॥२१९
जरया कवलितोऽपि विलयं यात्यसौ न हि ।
साहायकं तज्जराया मम कर्तुं खलूचितम् ॥२२०
अथान्यदा सहभुजः पितुस्ताम्बूलमादरात् ।
सविषं स ददौ पाप्मा लोभः सर्वंकषः खलु ॥२२१
तन्मूर्छितं मदनित (?) इत्यसौ तमसूषुपत् ।
दीर्घनिद्रां प्राप्तमेतं निश्चिकाय चिराय सः ॥२२२
शोककोलाहलं चक्रेऽमूच्र्छद् भुव्यपतच्छठः ।
तत् सत्यं दीपयेद्‌ग्रामं पापो व्याहरतेऽपि च ॥२२३
बन्धुभिर्बोधितः कृच्छ्रात् पितृकृत्यं चकार सः ।
चिरात् कथञ्चिन् मुमुचे स पापः शोकनाटकम् ॥२२४
मात्रा पत्न्या बन्धुभिश्च वार्यमाणोऽप्यनेकशः ।
पित्रा वियुक्तो नाऽस्म्यत्र क्षमः स्थातुमिति ब्रुवन् ॥२२५
कर्पासरूतसूत्रादि क्रीत्वा भारसहस्रशः ।
महिषोष्ट्रवृषादींश्च गृहीत्वा सोऽतिभूरिशः २२६
गरीयसाऽथ सार्थेन प्रतस्थे गर्जनं प्रति ।
क्रमक्रमेण क्षेमेण प्रापज्जाङ्गलमण्डलम् ॥२२७॥ त्रिभिर्विशेषकम्



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

आवासितः सोऽथ तस्थौ कूपे पातालवर्त्मनि ।
दृढीकृत्य पटकुटीर्विश्रमाय दिनत्रयम् ॥२२८

पातालस्येव वज्राग्निरौर्वर्वर्द्धनवारिधेः ।
तदाऽकस्मात् समुत्तस्थौ सार्थाद्दूरे दवानलः ॥२२९

तेन प्लुष्टास्तरव उरवः शुष्कपत्रौघगत्या
पक्वास्तेनाघिबिलमुरगौत्वाखुगोधाशशाद्याः ।
भीतास्तस्माद्धरिणहरिणारातिशार्दूलमुख्या
वेगान्नेशुः सहजरिपवोऽप्येकसार्थेन दूरम् ॥२३०

मन्ये लोभदवानलं नवनवेच्छाज्वालमालाकुलं
प्रस्फायत्तममन्वहं पितृसुहृद्भृत्यादिसर्वंकषम् ।
श्रुत्वा तस्य दवानलः खरमरुद्यानं किलाध्यासितः
स्पर्धाबन्धसमुद्धतोऽधिरजनि स्मायाति सार्थान्तिकम् ॥२३१

तत् तादृक् पितृहत्यया यदतुलं तेनार्जितं दुष्कृतं
तेनेवाथ दवानलेन कटकावेष्टेन संवेष्टितः ।
आक्रन्दद् द्विचतुः पदातुररवव्यापूर्णरोदोन्तरः
सार्थः सैष रवेः पवेरिव हतेर्जज्ञेऽतिमूढान्तरः ॥२३२

वातोत्पाटितदह्यमानतृणतापात्तेन सार्थान्तरे
संलग्ने दहने महापटकुटी भाण्डेषु सर्वेष्वपि ।
आः पापाः पय आनयध्वमभितो विध्याप्यतां वह्निरि-
त्याक्रोशन् भृतकान् भृशं रविरभूद् रौद्राभिसन्धिस्तदा ॥२३३

दग्धे द्वारवतीनयेन सकले सार्थे वराको रवी
रौद्रान्धोऽजनि सागरायुरहहाद्ये नारके नारकः ।
तावद् गोमहिषोष्ट्रमानुषकुलान्यादह्य तेनांहसा
सद्यः सोऽपि दवानलः किल बलाद् भस्मावशेषोऽजनि ॥२३४

तत्रानन्तगुणं तस्माद् दवादपि हि दुःसहम् ।
सहमानो रविर्दुःखमेकं सागरमत्यगात् ॥२३५

२३३.१. °तापातेन.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतश्च भारते क्षेत्रे भ्राजते मिथिलापुरी ।
शिथिला जनता यत्रोषिता स्वर्गस्य साधने ॥२३६

तस्यां दृढरथो राजा रामवद् राज्यमन्वशात् ।
प्रचक्रं बत यस्यैकं द्विट्चक्राण्याक्रमीत् क्रमात् ॥२३७

वसुमित्रोऽभवत् तत्र श्रेष्ठी श्रेष्ठतमः श्रिया ।
धिया येन जितो मन्ये ययौ सुरगुरुर्दिवम् ॥२३८

सुधवा तस्य गृहिणी गृहनीतिविशारदा ।
शारदेन्दुं पराजिग्ये यच्छीलमतिनिर्मलम् ॥२३९

तस्याः कुक्षिमलञ्चक्रे जीवस्तस्य यशोरवेः ।
सम्पूर्णे समये जज्ञे तनयो नयनोत्सवः ॥२४०

उत्सवेन वसुनन्द इति तस्याभिधाऽभवत् ।
कलाश्च कलयामास कलाभृदिव निर्मलाः ॥२४१

सागरदत्ततनयामभिरामां मनोरमाम् ।
परिणिन्ये वसुनन्दः सानन्दोऽजनि सृष्टिकृत् ॥२४२

वसुनन्दस्य तु मनोऽरमयन् न मनोरमा ।
परिग्रहश्रियां तद्धि सक्तमस्तोभलोभतः ॥२४३

ततश्च —

धातुवादं खन्यवादं विगन्धिमृदमभ्रकम् ।
मूलीः पारदबन्धं च वसुनन्दोऽत्यशिक्षत ॥२४४

यद् यदारभते सैष लोभक्षोभितमानसः ।
तत् तत् स्याद् भस्मसात् सर्वं कृषिकर्मवदूषरे ॥२४५

वसुमित्रस्ततः पुत्रमूचे वत्सेति मा कृथाः ।
धातुवादिकं ह्येतत् सर्वं कापुरुषोचितम् ॥२४६

यतः —

व्यवसायान्तरच्छेद आत्मक्लेशो धनक्षयः ।
भोगेभ्यो वञ्चनं लोकगर्हा चेदं वितन्वताम् ॥२४७

२४५.१. आभरते.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च –

धातुवादे रसे द्यूते विवरे च रसायने ।
योगिन्यामञ्जने बुद्धिं कुद्धं दैवं प्रयच्छति ॥२४८

धातुवादादिदेष्टारष्ठका धूर्ता नराधमाः ।
न च तत्सङ्गतिः श्रेष्ठा श्रेष्ठा तूत्तमसङ्गतिः ॥२४९

अधमोत्तमसङ्गत्योर्विपाकश्रीप्रदर्शकम् ।
निशम्यतां सौम्यसम्यगेकमेव कथानकम् ॥२५०

श्रीकोशलापुरे श्रेष्ठी धनोऽतिधनदः श्रिया ।
धनश्रीः प्रेयसी तस्य तयोः पुत्रो धनावहः ॥२५१

पितृभ्यां कौतुकात् सैष तथा द्वासप्ततिं कलाः ।
अध्यापितो यथा जज्ञे तासु सर्वासु तत्त्ववित् ॥२५२

समये विमलमतिं विमलश्रेष्ठिनन्दनीम् ।
विमलातुलसौन्दर्यां पिता तेनोदवाहयत् ॥२५३

दक्षो विनीतो विक्रान्तस्त्यागी सौजन्यमन्दिरम् ।
धनावहस्ततः सोऽभूद् विश्वस्यापि सुखावहः ॥२५४

पर्यन्तसमये पित्रा विशेषादेष औच्यत ।
अधमैः सह सौहार्दं न कार्यं कार्यमुत्तमैः ॥२५५

यशःशेषे च पितरि कृत्वा तस्यौर्ध्वदेहिकम् ।
कालस्वभाववित् कालाद् विशोकोऽभूद्धनावहः ॥२५६

अन्यदाऽचिन्तयच्चैष परीक्ष्य तद्वचः पितुः ।
किं तत् सहेतुकं किं वा कल्पशिल्पिप्रकल्पितम् ॥२५७

ततोऽलभ्यानि जग्राह ददौ नोद्धारकं क्वचित् ।
व्यक्रीणीत सङ्गृहीतं भाण्डं जग्राह नापरम् ॥२५८

सर्वं स्वजननीजायादीनां ज्ञातं विधाय च ।
तीर्थयात्रादिच्छलेन विदेशेऽगाद् धनावहः ॥२५९

सन्निवेशे क्वचित् शून्यप्राये प्रक्षीणऋद्धिकम् ।
ज्योत्कृत्य ठक्कुरं तस्य सेवामेष प्रपन्नवान् ॥२६०

२५०.१. अधत्तमो .

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्पार्श्वे किञ्चित् कदन्नभुक् सदादेशकृच्च सः ।
तद्गोमयोज्झिकां भगिनीं चक्रे मित्रं च भाग्भिकम् ॥२६१
अथापरेद्युस्तदीयठक्कुरेशस्य भूभुजः ।
सीमाभूमीभुजा सार्धं दुर्धरोऽजनि विग्रहः ॥२६२
सोऽगात् स्वामिप्रतिग्राहे ठक्कुरः स धनावहः ।
लग्नमायोधनं भग्नं सैन्यं तट्ठक्कुरप्रभोः ॥२६३
अत्रान्तरे धीरयित्वा तत्सैन्यं स धनावहः ।
सवैंाघेणायान्तमरिराजं मर्मण्यहन् शरैः ॥२६४
मम्रेऽसौ तत्प्रहारेण नष्टं तत्सैन्यमप्रभु ।
जितं ठक्कुरराजेन धनावहभुजौजसा ॥२६५
तुष्टेन राज्ञाऽऽहूतोऽथ स प्रवीरशिरोमणिः ।
राट्पार्श्वे प्राप्त ऊचेऽसौ निरोपं देहि मे प्रभो ॥२६६
राजाऽब्रूतादत्स्व राज्यं ग्रामवाजिसहस्रयुक् ।
विनष्टं मम कार्यं यत् त्वया वीर समारवि ॥२६७
धनभूः स्माह यत्कोऽस्मि तस्मै राज्यं प्रसाद्यताम् ।
तस्मै प्रसादिते राज्ये यन्ममैव प्रसादितम् ॥२६८
न योग्योऽसौ सौम्य राज्यभारस्यैरण्डदण्डवत् ।
रणतूर्यभरेणाऽपि यो भग्न इति राड् जगौ ॥२६९
सोऽथावादीन् मदीयोऽस्मै प्रसादो देव दीयताम् ।
राज्ञा तट्ठक्कुरो हूत्वा व्याजहे व्याजवर्जितम् ॥२७०
प्रसन्नोऽस्म्यस्य किं त्वेष प्रसादं दापयेत् तव ।
तद् गृहाणोत्तमं राज्यं ग्रामवाजिसहस्रयुक् ॥२७१
ठक्कुरोऽवोचत महाप्रसादोऽथ नृपोऽभ्यधात् ।
न मदीयप्रसादोऽयं किन्त्वेतस्येति बुध्यताम् ॥२७२
मौनिने ठक्कुरायाथ सैष राज्यमदापयत् ।
ततः सोऽजनि सामन्तः समन्ताद् भूतिभाजनम् ॥२७३
कदन्नभुक् स च प्राग्वत् तत्सेवाकृद् व्यचिन्तयत् ।
अये नायमुपकारग्राह्यस्तावत् कथञ्चन ॥२७४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परं स्वल्पेऽप्यपकारे कुप्येदेष न वेत्यपि ।
परीक्ष्यमिति सञ्चिन्त्य तन्मयूरमगोपयत् ॥२७५
ऊचे च तां प्रतिपन्नभग्नीं छगणहारिकाम् ।
किञ्चिदाख्यामि ते भगिन चेदाख्यासि न कस्यचित् ॥२७६
साऽऽख्यदन्धा कुष्ठिनी वा क्रियेय रविणा क्षणात् ।
चामुण्डया वा खाद्येय चेदाख्याम्यस्मि कस्यचित् ॥२७७
तन्निःशङ्कं वद भ्रातः स ऊचे श्रूयतां स्वसः ।
क्षुधितेन मया रात्रौ भक्षितो भूपतेः शिखी ॥२७८
इति श्रुत्वाऽऽह सा भ्रातर्यामि राजकुलेऽधुना ।
जलमानेतुमित्युक्त्वा सा जगाम नृपौकसि ॥२७९
प्रविशन्ती वदत्येषा शृणुयाट्ठक्कुरो यथा ।
हा बर्हिन् क्वाद्य वीक्ष्यो यो जग्धः कर्पटिनाऽमुना ॥२८०
ठक्कुरेणाभाणि कथं वेत्सीदं साऽवदत् प्रभो ।
तस्याकथ्यं न मे किञ्चिदित्युक्तमिति तेन मे ॥२८१
ततो रोषारुणाक्षेण तेनादिष्टः स भाम्भिकः ।
रे तमेतं दुराचारं सत्वरं व्यपरोपय ॥२८२
तेन रज्ज्वा गले बद्ध्वा बहिर्निन्ये धनाङ्गजः ।
स च तस्य कषं प्रष्टुं शक्तोऽप्यसहताखिलम् ॥२८३
ऊचे च भाम्भिकं त्वं मे ननु प्राणाधिकः सुहृत् ।
तन्मां विमुञ्च जीवन्तं विदेशं याम्यतः परम् ॥२८४
भाम्भिकोऽब्रूत राजाज्ञां नात्येमि जनकेऽप्यहम् ।
मार्ये केनागसा मित्र सोऽवदत् शिखिमारणात् ॥२८५
जीवन् शिखी दर्श्यते चेत् तन्मां मुञ्चासि वा न वा ।
तेन राज्ञोऽज्ञापि सोऽवग् विदेशोऽस्तु तदर्पणे ॥२८६
दत्तो जीवन् शिखी तेन प्रोक्तो निर्विषयो भव ।
नीचमैत्रीफलं दृष्टमिति दध्यौ धनोद्वहः ॥२८७
उत्तमसङ्गमफलं द्रष्टुमुज्जयिनीमथ ।
प्राप्तः सैष व्यज्ञपयन् नृपं श्रीजयशासनम् ॥२८८

देव क्ष्मेश शिरोरत्न नित्यदीपोत्सवक्रम ।
क्रमविक्रमकाकुत्स्थ युष्मत्सेवाऽस्तु मेऽन्वहम् ॥२८९

प्रतिपेदे च तद्राजा ततः सोऽस्थात् तदन्तिके ।
तत्प्रसादश्रियः पात्रं तन्मूर्त्यन्तरलीलया ॥२९०

षट्त्रिंशदायुधयुधा तूर्यत्रिकविकासनैः ।
नराश्वेभचिकित्साभिस्तेषामेव च लक्षणैः ॥२९१
पत्रच्छेद्यलेप्यचित्रकर्मनिर्माणकौशलैः ।
व्याकरणागमछन्दश्छन्दोभेदप्रवेदनैः ॥२९२
षाड्गुण्यादिराजनीतिप्रयोगौचित्यचातुरैः ।
दाक्ष्यदाक्षिण्यसौजन्यदयादानादिसद्गुणैः ॥२९३
धनावहेन सुधिया यथावसरदर्शितैः ।
राजाऽत्यावर्जितस्तस्मै स्वं सर्वस्वमदित्सत ॥२९४॥
चतुर्भिः कलापकम्

ददाने देशराज्यं च जयशासनभूभुजि ।
सुधारसमुचा वाचा सोऽभ्यधाद् धननन्दनः ॥२९५
देव देवपाददेवतरुमूले ममाश्रतः ।
स्वामिहस्तितुरङ्गादिवाहनं चाधिरोहतः ॥२९६
प्रभुस्वहस्तदत्ताशुवस्त्रभूषाः प्रबिभ्रतः ।
संविभागवतः पत्या ताम्बूलालेपनादिभिः ॥२९७
स्वामिप्रसादाद्वैतश्रीमुख्यसम्भावनाभृतः ।
एतत्सर्वहृता देशान्तरे राज्येन किं प्रभो ॥२९८॥ त्रिभिर्विशेषकम्

ततो राजातिप्रसन्नो भाण्डागारिकमादिशत् ।
अये यथेष्टमेतस्य पूर्यतां सर्वमन्वहम् ॥२९९

राजप्रसादपात्रस्येत्यस्य सौभाग्यभाजनम् ।
निष्कृत्रिमप्रेमहेमभूषाभूषितविग्रहा ॥३००
रतिकेलिसुधावापी नवा पीनपयोधरा ।
राज्ञो वारवधूर्देवदत्ताख्या सुखपात्र्यभूत् ॥३०१॥ युग्मम्

२८९.३. काकुस्थ.

औदार्यधैर्यगाम्भीर्यस्थैर्यश्रीकमलाकरः ।
लक्ष्मीरत्नाकरः सत्यसन्धासन्धानशेवधिः ॥३०२

पुरीसर्वधुराधुर्योदर्यः सुकृतसम्पदा ।
श्रेष्ठी यशोवर्धनोऽस्य मैत्रीपात्रमजायत ॥३०३॥ युग्मम्

अपरस्मिन्नहि राजा राजपाट्यामवाहयत् ।
समं धनावहेनाश्वान् धाराभिः पञ्चभिर्भृशम् ॥३०४

अत्रान्तरेऽश्वौ वणिजोपनीतौ नीरदद्युती ।
उत्क्षिप्तहस्ताप्यपृष्ठौ प्रष्ठौ वेगान्नभस्वतः ॥३०५

तत्रैकत्र नृपोऽन्यत्राधिरुह्य स धनावहः ।
संक्षिप्तमण्डलीभिस्तौ वाहयामासतुश्चिरम् ॥३०६

ततः पद्भ्यां कशया चाहत्य मुक्तौ हयौ रयात् ।
मुक्त्वा सैन्यं नृपं हृत्वा समित्रमटवीं गतौ ॥३०७

ततश्च तृट्शुष्यदास्यः क्ष्मापोऽब्रूत धनावहम् ।
तृषा वयस्य बाध्ये तज्जलं पायय पायय ॥३०८

वेगगच्छद्हयेनापि दाक्ष्यादामलकीद्रुमात् ।
धनावहेन जगृहे स्राक् क्षीरामलकत्रिकम् ॥३०९

एकमामलकं राज्ञो दत्तमाश्वासितश्च सः ।
पुनस्तृषि द्वितीयं च तृतीयं च पुनस्तृषि ॥३१०

अथ प्राप्तौ तरुषण्डमण्डितां तौ सरोभुवम् ।
बलक्षयाद् वाजिनौ तौ स्थितौ तत्राश्मनाविव ॥३११

ताभ्यामुत्तीर्य तौ यातौ सरस्तत्र जलादिना ।
धनावहेनोपचेरे नृपः सैन्यं तदन्वगात् ॥३१२

राट् पुरेऽगात् पुनर्जातमन्योऽचीकरदुत्सवम् ।
एवं श्रेष्ठिभुवस्तत्र सुखं जग्मुर्घना दिनाः ॥३१३

दध्यौ चैष उपकारग्राह्यो राजेति निश्चितम् ।
किन्तु मन्तोरुपकारं लुम्पेन्नो वेति मृश्यते ॥३१४

तस्य राज्ञोऽनेकदेव्युपयाचितशतोदितः ।
कुलाधारस्तम्भ एकवर्षपुत्रो युगन्धरः ॥३१५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धात्र्यङ्के विजने क्वापि तेनैक्षि धनसूनुना ।
धात्री तेनोदिताऽत्रैहि तद्विश्रम्भाच्च साऽप्यगात् ॥३१६॥ युग्मम्
गृहे रहः स बालां तां गोपयित्वाऽमुना ददे ।
पेयं खाद्यं च भोज्यं च कुमारक्रीडनानि च ॥३१७
प्रोक्ता च साऽस्ति मे कार्यं न गम्यं तत् त्वया बहिः ।
तया प्रपन्ने सर्वस्मिंस्तन्मन्दिरमसौऽप्यधात् ॥३१८
विवर्णास्यः कांदिशीकः पटप्रच्छन्नविग्रहः ।
सदनं देवदत्ताया जगामाथ धनाङ्गजः ॥३१९
अभ्युत्थायासनं दत्वा गौरवाद् देवदत्तया ।
विषादकारणं पृष्टो व्याजह्रे धननन्दनः ॥३२०
कान्ते निशम्यतामद्याकस्माद् दुर्दैवयोगतः ।
मम हस्ताद् विपेदे श्रीराजसूनुर्युगन्धरः ॥३२१
क्रियतां तत् किमत्रेति साऽऽख्यन्नैव तवोपरि ।
राज्ञो लोकस्य वा कस्याप्येवं सम्भावना प्रिय ॥३२२
तत् किं दृष्टोऽसि केनापि स ऊचे केनचिन्न हि ।
किन्तु ज्ञायेय मा जातु(?) च्छन्नं स्यात् कर्म नेदृशम् ॥३२३
साऽब्रवीत् सुमते मा भूः श्यामास्यश्छन्नचार्यपि ।
मा च देशान्तरे यासीः सागस्त्वव्यञ्जकं ह्यदः ॥३२४
किन्तु प्रहृष्टवदनस्तिष्ठेर्जानेऽस्म्यतः परम् ।
एवमस्त्विति स प्रोच्यागात् तद्वच्छ्रेष्ठिवेश्मनि ॥३२५
दत्तासनो निविष्टोऽवग् मित्रकान्ते निविश्यताम् ।
तथाकृते धनसुतः सभयं श्रेष्ठिनेऽभ्यधात् ॥३२६
मम हस्ताद् विपेदे श्रीराजसूनुर्युगन्धरः ।
युक्तं किमत्र श्रेष्ठ्यूचे मित्र दृष्टोऽसि केनचित् ॥३२७
नेत्युक्तेऽनेन सोऽभाणीन् मा भैषीस्तिष्ठ निर्वृतः ।
प्राग्वन्नृपकुलादौ च परिभ्रम यथारुचि ॥३२८

---

३२२.३. लोकस्या.　　३२४.२. °छन्न°.



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

इतश्च –

कुलाधारं स्वं कुमारं तमपश्यन्नितस्ततः ।
व्याकुलः प्रेक्षयामास सर्वतः स्वनरैर्नृपः ॥३२९
तदैव देवदत्ता सा स्वपरीवारभारिता ।
राजद्वारमुपैद् द्वाःस्थस्तां च राज्ञे न्यवेदयत् ॥३३०
कल्पः प्रजापालकानामेष इत्याकुलोऽप्यसौ ।
सद्यः प्रावेशयदिमां सा च व्यज्ञापयत् प्रभुम् ॥३३१
प्रभो मनोरथो मेऽभूत् पुत्रपौत्रादिवृद्धिभिः ।
स्वामी न्यग्रोधशाखीव व्याप्स्यत्याशा दशापि हि ॥३३२
निर्भाग्यचूलिकायास्तु सदने मे मदोन्मदः ।
कामुको दत्तवान् भाटीं धाटीमिव मनोभुवः ॥३३३
कृतं च तत्कृते भक्त भोजनावसरे पुनः ।
धात्र्यङ्कस्थकुमारोऽगाद् दुर्दैवान् मम मन्दिरे ॥३३४
मत्तेन तेन च क्षिप्तो गृहे प्रविशते शुने ।
लेष्टुर्लग्नः कुमारस्य स च हा कीर्तिशेष्यभूत् ॥३३५
महागस्कारिणी धात्री नष्टा क्वापि वराकिका ।
तदागसा तेन पापां मां कल्पय तिलं तिलम् ॥३३६
तदाकर्ण्य नृपः सद्यः प्रादुःषद्दुःखशल्यितः ।
मुहुः कर्षन् श्मश्रु चिन्तास्रजं यावत् सृजत्यलम् ॥३३७
तावद् यशोवर्धनोऽपि नृपदर्शनलोलुपः ।
प्रधानेन प्राभृतेनोपतस्थे तं स्थिरापतिम् ॥३३८
प्रणम्य भूपतिमसावासामास यथोचिति ।
उदीर्यतां कार्यमिति राज्ञोक्ते श्रेष्ठ्यवोचत ॥३३९
दुर्दैवभग्नभाग्योऽस्मि प्रभो विज्ञपयामि किम् ।
तथाप्यनन्यगतिकः स्वामिनः स्वं निवेदये ॥३४०
देव स्वगेहे गवाक्षे लीलयाऽद्य निषेदुषा ।
मया दृष्टो गृहद्वारि प्रविशन् मुण्डशूकरः ॥३४१
तद्वारणाय मुमुचे लीलायष्टिः प्रभो मया ।
सा च लग्ना तत्र दैवाद् धात्र्यङ्कस्थकुमारके ॥३४२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मम्रे कुमारस्तद्घातात् तेन पापेन पातकी ।
साधयाम्यग्निमधुनाऽनुजानीहि सुनाथ माम् ॥३४३
तयोर्मिथोविरुद्धोक्त्या राज्ञः श्वासः स्थिरोऽभवत् ।
कुमारसम्भावनया मनाक् साधारितः किल ॥३४४
तत ऊचे नृपः श्रेष्ठिस्त्वत्तोऽस्याश्च न सर्वथा ।
वत्सस्यामङ्गलं ब्रूहि तत्सत्यमभयं तव ॥३४५
श्रेष्ठी यशोवर्धनोऽथ कथं कथमपि प्रभोः ।
धनावहात् कुमारस्य विनाशं प्रत्यपादयत् ॥३४६
दैवेनैतेनागसा तस्य मृतिस्तन्मृतिरावयोः ।
तदस्मज्जीवितेनैष जीव्यादित्येवमौच्यत ॥३४७
राजोचे न विनष्टं मे किञ्चिद् येनाद्य शोधितम् ।
एकमामलकं तस्य द्वयमद्यापि धारये ॥३४८
तदवश्यं वयस्यं मेऽत्रानयस्वाकुतोऽभयम् ।
तद्दर्शनसुधावृष्ट्या मच्छरीरेऽस्तु निर्वृतिः ॥३४९
श्रेष्ठी गत्वाऽथ वेश्यायाः स्वस्य राज्ञश्च भाषितम् ।
सर्वं निवेद्य धनजमाह्वयन्नृपमन्दिरे ॥३५०
तदा च धनसूर्दध्यौ क्व वेश्या क्वेदृशी स्थितिः ।
फेटाग्नि मयं (?) कीदृक्कीदृगामलकान्नृपः ॥३५१
यद्वा —
सज्जनश्चन्दनचन्द्रश्चन्द्रिका हिमवालुका ।
सर्वलोकहितायैव विहिताः पद्मसद्मना ॥३५२
अणुनाऽप्युपकारेणोपकारं गिरिसोदरम् ।
ये लीलयाऽपि दधते तेभ्यः सद्भ्यो नमो नमः ॥३५३
अणुनाऽप्यपकारेणोपकारं मेरुसोदरम् ।
कृतघ्ना ये विनिघ्नन्ति तेभ्योऽसद्भ्योऽपि वै नमः ॥३५४
तदवश्यं पितृवचः परीणाममनोरमम् ।
तादृशामुदितं कल्पद्रुमाणामिव नाफलम् ॥३५५
मुहुर्मुहुर्मृशन्नेवं विस्मयस्मेरमानसः ।
ततो धात्रीं कुमारं चादाय तत्रायायावसौ ॥३५६

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

न्यवेश्यत नृपोत्सङ्गे कुमारस्तेन गौरवात् ।
साक्षात्कृत्य तमात्मानं मुमुदे योगिवन्नृपः ॥३५७

जगाद मुदितो राजा किमेतन् मित्र नाटकम् ।
धनसूरवदद् देवावधानादवधार्यताम् ॥३५८
पितृवाक्यपरीक्षायै गृहनिर्गमनादिकम् ।
श्रीकुमारापहारान्तं स्ववृत्तान्तं जगाद सः ॥३५९

अथ पृथ्वीन्दुराचष्टात्रानयस्व स्वबान्धवान् ।
जगादैष दवीयस्त्वादेतु दैवात्र नेशते ॥३६०
धनसूरतिनिर्बन्धादापृच्छ्य नृपतिं ततः ।
तद्दत्तवैभवः प्राप गृहं वर्धापनं कृतम् ॥३६१
इति कथानकसिन्धुधवान्तरं समवगाह्य सदा वसुनन्द भोः ।
अधमसङ्गविषं त्यज दूरतः सततमुत्तमसङ्गसुधां पिब ॥३६२

तदेतद् व्यसनं हित्वा भुंक्ष्व भोगानुपस्थितान् ।
पुत्रेन्दौ दीव्यति स्फायेत् पित्रोरानन्दसागरः ॥३६३

पितुपर्यायतः प्राप्ता या लक्ष्मीस्तेऽस्ति तन्मितिम् ।
प्रवेद वेदगर्भोऽसौ यः प्रादान्नः प्रसेदिवान् ॥३६४
स्मित्वाऽथाह वसुनन्दस्तात कोऽप्रत्ययस्तव ।
महर्षिग्रन्थकथिते धातुवादादिकर्मणि ॥३६५
किञ्च प्रवृत्तिः सत्पुंसां न स्वभोगाप्तिहेतवे ।
सूर्येन्दू भ्राम्यत इमौ किमु स्वार्थस्य सिद्धये ॥३६६
गण्या लक्ष्म्यर्जने क्लेशभोगभ्रंशादयो न च ।
भूसाधने प्रवर्तेरन्न हि चक्र्यादयोऽन्यथा ॥३६७
तत् तात किमिदं वृद्धभावाविर्भावकं वचः ।
रुषा हुंकृत्य पित्रोक्तं यत् ते रुच्यं तदाचर ॥३६८
इत्युक्त्वोर्ध्वं रहश्चित्रशालिकायां पिताऽगमत् ।
भुजिक्षणे सुधवयाऽप्रच्छि पुत्रः क्व ते पिता ॥३६९
पुत्र ऊचे नाम्ब जाने ततोऽधः सर्वतो गृहे ।
अन्विष्योपरि दृष्टोऽसौ तयान्तश्चित्रशालिकम् ॥३७०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साऽऽख्यत् तमुत्तराधस्ताद्देवान् पूजय भुंक्ष्व च ।
सोऽभाणीन्नोत्तरिष्यामि तयोक्तं केन हेतुना ॥३७१
श्रेष्ठ्यूचे धातुवादादिव्यसनात् स्वैरचारिणा ।
विगुप्तोऽनेन पुत्रेण स्वास्यं नेक्षयितु क्षमे ॥३७२
सोऽथ तत्र स्थितोऽभुङ्क्त वर्चो वर्चोगृहे व्यधात् ।
न निर्यातिर्बहिर्जातु ययुरेवं घना दिनाः ॥३७३
ततस्तद्बन्धुमित्राद्युपेयरुस्तन्निकेतनम् ।
ऊचुश्च वसुमित्रः किं निशीवाह्न्यपि नेक्ष्यते ॥३७४
सुधवा व्याहरच्छ्रेष्ठी रहस्युपरि तिष्ठति ।
ततस्तया दश्यमानमार्गास्तेऽगुस्तदन्तिकम् ॥३७५
कदाचिन्नेक्ष्यसे श्रेष्ठिन् किमङ्गं तेऽङ्ग बाधते ।
सुधवाऽब्रूत नास्याङ्गं बाधते बाधते सुतः ॥३७६
यतोऽसौ धातुवादादिव्यसनी स्वैरचार्यपि ।
तल्लज्जातो बहिर्नैति महापुरुष एष भोः ॥३७७
वक्ति चेति जनः पृच्छेच्चेत् त्वत्पुत्रः करोति किम् ।
प्रतिवच्मि तदा किं तद् गृहान्तर्मे स्थितिर्वरम् ॥३७८
वसुनन्दोऽथ तैस्तत्र बहुवाहूतः समागतः ।
मातुलेनाभाणि वत्स पित्रनिष्ठं करोषि किम् ॥३७९
भागिनेयः स्माह किञ्चित् करोम्यस्म्युचितेतरत् ।
व्याजहारेतरः किं ते धातुवादादिना वद ॥३८०
अर्थापाये प्रवृत्तिः किं न कार्येत्याह यामिसूः ।
भाण्डक्रयादिः किं नार्थापाय इत्याह मातुलः ॥३८१
स्वस्रीयः सस्मितं स्माह क्व मेरुः क्व च सर्षपः ।
जजल्प मातुलो लक्ष्मीः किं न धात्वाद्यकुर्वताम् ॥३८२
जामेयोऽवग् न तादृक्षा यादृक्षा रसांसेद्धितः ।
इतरः स्माह किं न श्री राज्ञां धात्वाद्यजानताम् ॥३८३
कुतपोऽब्रूत केयं श्रीर्धातुसिद्धिरसाग्रतः ।
वागडम्बरैः किं वा रसं नर्ते महर्द्धयः ॥३८४

३८०.२. °तेतरन्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्मित्वाऽथ मातुलोऽजल्पद् रससिद्धिं प्रवेत्सि किम् ।
अभाणीद् भागिनेयोऽपि दृष्टस्तत्पुस्तको मया ॥३८५
मातुलोऽवग् रसो ज्योतिर्विद्या मन्त्रो जपस्तपः ।
न हि पुस्तकशिष्यस्य वत्स सिध्यन्ति कस्यचित् ॥३८६
तदमुं मतिकीर्त्यर्थधर्मभ्रंशनिबन्धनम् ।
रससिद्धिभ्रमं मुञ्च सिञ्च स्वाचारभूरुहम् ॥३८७
इत्थं निवारितोऽप्येष यावदुज्झति नाग्रहम् ।
तावत् तदंशं दत्वा तैर्वसुमित्रात् पृथक्कृतः ॥३८८
तैस्तैर्धूर्तैर्यायजूकैस्तत्तद्व्यसनपावके ।
वसुनन्दो मन्दमतिः स्राक्चक्रे भस्मसाद् धनम् ॥३८९
केनापि योगिना सार्धं लोभिना लोभनस्ततः ।
निधिलाभाय पर्याटीदसौ गिरिवणादिषु ॥३९०
पलाशपोतकं क्वापि तौ च वीक्ष्य परीक्ष्य च ।
स्वाधीनशेवधिमन्यौ व्यधत्तामखिलं विधिम् ॥३९१
अधिज्यधन्वात्तवाऽऽणोऽभूद् योग्युत्तरसाधकः ।
वसुनन्दस्तु खनकोऽभूच्चाध्यक्षः क्षणान्निधिः ॥३९२
विश्वस्तघाती योगी तं गाढमाहत्य मर्मणि ।
निधिं पापनिधिं चोग्रं समादाय पलायत ॥३९३
वसुनन्दो मन्दभाग्यः पश्चात्तापप्रतप्तहृत् ।
रक्तासक्तकीटिकाभिश्चिलातीपुत्रवत् क्षतः ॥३९४
अशक्तः पदमुत्थातुं स्वनिन्दाल्पकषायवान् ।
विमध्यमगुणैर्बद्ध्वा मनुजायुर्व्यपद्यत ॥३९५॥ युग्मम्
भारतेऽत्रैव पञ्चालेष्वस्ति काम्पील्यपत्तनम् ।
दिवौकसां पत्तनस्याप्रतिबिम्बं नु बिम्बकम् ॥३९६
तत्र पद्मरथो राजा सुरराजाग्रजः किल ।
तस्य पौलोम्यग्रजेव देवी पद्मावती बभौ ॥३९७
तस्याः कुक्षौ वसुनन्दजीवः पीवरभाग्यभाक् ।
सञ्चक्राम क्रमाज्जातस्तातस्य प्रतिबिम्बवत् ॥३९८

३८९.१. °धूर्तै°. ३९५.२. °निंदाकल्प°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नानावर्धापनैरेकाहवदेकादशाहके ।
व्यतीयुषि द्वादशेऽह्नि महैरतिमहीयसि ॥३९९
श्रीकनकरथ इति नाम दैवतमद्भुतम् ।
राजा संस्थापयाञ्चक्रे तत्र पुत्रे शुभौकसि ॥४००॥ युग्मम्
क्रमात् प्रवर्धमानोऽसौ कलाग्रहणकर्मठः ।
विद्यानदीनदीशायोपाध्यायाय समार्प्यत ॥४०१
सोऽनुक्रमात् तदभ्यासेऽभ्यस्यमानः कलाकलाः ।
बाल्याम्भोधेः कलाम्भोधेः पारदृश्वाऽभवत् समम् ॥४०२
ततो गुरुः सकुमारो गत्वा भूपं व्यजिज्ञपत् ।
कलासर्वस्वमेतस्य सरहस्यं मयाऽर्प्यत ॥४०३
सुवर्णवस्त्रताम्बूलप्रभृत्यस्मै प्रभूतशः ।
नृपः कृतज्ञो दत्वाऽप्यनृणंमन्यो बभूव न ॥४०४
गुरुणोद्ग्राहितं वीक्ष्य तं कुमारं कलाः किल ।
कलापात्राणि राट्कन्या भूपस्तेनोदवाहयत् ॥४०५
परिणीतः कुमारोऽद्य राजपाटीं विधास्यति ।
उद्यद्द्युलोभा पूःशोभा सर्वतः कार्यतामिति ॥४०६
राजादिष्टप्रतीहारनरवाक्येन नागरैः ।
सद्यः स्वस्वगृहाट्टादौ शोभाऽदृष्टचरीकृता ॥४०७॥ युग्मम्
शृङ्गारप्रस्फारितश्रीरत्यैरावणवारणः ।
विलेभे श्रीकुमाराय करीन्द्रो जयमङ्गलः ॥४०८
कुमारः सपरीवारः प्रस्फुरच्छत्रचामरः ।
तमध्यासामास रसाज्जयन्त इव नूतनः ॥४०९
शचीसच्चिवशक्रश्रीर्नृपः पद्मावतीसखः ।
जयकुञ्जरमारूढः कुमारस्यानुगोऽभवत् ॥४१०
सामन्तामात्यसेनानीप्रतीहारादयस्ततः ।
हस्त्यश्वस्यन्दनासीना राजानमनुवव्रजुः ॥४११
पुरतः पार्श्वतः पृष्ठे सर्वेषां सर्वतोऽपि हि ।
पदातयोऽभवन्नानाशस्त्रभीषणपाणयः ॥४१२

४०४.४. बभूव नः. ४१०.१. सची°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिहट्टं प्रतिगृहं प्रतिरथ्यं प्रतिप्रपम् ।
पश्यन् कुमारो विपणिवीथीं प्राप्तः प्रमोदतः ॥४१३
पुरं पुरन्दरपुरसुषमापश्यतोहरम् ।
पश्यन् कुमारो विपणिवीथीं प्राप्तः प्रमोदतः ॥४१४॥ युग्मम्

तत्र च –
रत्नपुञ्जैः रत्नगिरेः खानीवद् रत्नहट्टिकां ।
स्वर्णेष्टकाभिः स्वर्णाट्टान् सोऽपश्यत् मेरुबन्धुवत् ॥४१५
मेने भाराग्रशो रूप्यै रूप्याट्टान् रूप्यशैलवत् ।
चन्दनैश्चन्दनोर्व्याः स सखीं चन्दनहट्टिकाम् ॥४१६
दन्तव्रातैर्विन्ध्यबन्धूनिव दन्तापणानसौ ।
तैस्तैर्दूष्यैर्दौष्यिकाट्टांस्तत्तत्खानीरमन्यत ॥४१७
टङ्कशालामिवामंस्त सैष नाणकहट्टिकाम् ।
प्रवालादिमणीहट्टान् रत्नाकरगृहानिव ॥४१८
गन्धधूल्याद्यापणैश्च धूलीशेषांस्तदाकरान् ।
गन्धिकाट्टैश्च सोऽज्ञासीद्धिमालयमनौषधिम् ॥४१९
घृतोदावतरं सैष घृतहट्टिकयाऽबुधत् ।
धान्यापणैश्च दुर्भिक्षं दुर्भिक्षं क्षोणिमण्डले ॥४२०
नालिकेरपूगपूगैः कौंकणर्द्धिं तदापणे ।
ताम्बूलिकविपण्यां स मेने तद्वाटिकागमम् ॥४२१
इत्येव विपणिश्रेण्याः श्रियं विक्ष्य नरेन्द्रसूः ।
सामन्तामात्यवेश्मानि राजवेश्मवदैक्षत ॥४२२
कोटीध्वज-ध्वजकोटया वितानितवितानकम् ।
स पुरं परितः पश्यन् दिवं तृणमजीगणत् ॥४२३
तदापणश्रीसामन्तावासकोटिध्वजेक्षणात् ।
लोभादित्से कुमारस्य हृदि प्राग्वदुदीयतुः ॥४२४
इत्थं भ्रान्त्वा पुरीं सर्वां स कुमारो नरेश्वरः ।
वैजयन्तं वै जयन्तं स्वं प्रासादं समासदत् ॥४२५

४१९.४. °सीद्हिमा°.    ४२५.४. प्रसादं.

क्षणेऽत्र क्षोणितिलको व्यज्ञप्यत पुरोधसा ।
मज्ज्यतां सज्ज्यतां देव देवार्चनमनुत्तरम् ॥४२६

ततस्तथाकृते राज्ञा सद्यः सूदो न्यवेदयत् ।
देव भोजनवेलेति ततोऽसौ भुजिमण्डपे ॥४२७

कुमारामात्यसामन्तैः सह भुक्त्वा यथोचितम् ।
विलेपनाद्यैः सम्मान्य सामन्तादीन् विसृष्टवान् ॥४२८॥ युग्मम्

निर्जने चित्रशालायामथ पद्मरथो नृपः ।
शय्यामध्यास्त पद्मावत्यपि तत्रागमत् तदा ॥४२९

कुमारः कनकरथः सन्निधायाभ्यधात् ततः ।
विज्ञाप्सुरस्मि तच्चूतमञ्जरी प्रेष्यतां बहिः ॥४३०

राजाऽऽचख्यावदोषेयं सदा चमरधारिणी ।
न रहस्यं भिनत्त्येषा देवो वेत्तीत्यवक् सुतः ॥४३१

देवैवं मे मनोराज्यं यदि ब्रह्माण्डमण्डपे ।
दिग्दन्तिदशनस्तम्भवलयैरचलाचले ॥४३२

सूर्याचन्द्रप्रदीपाभ्यां नित्योद्योततरङ्गिते ।
तारतारचक्रवालवालकैरतिमालिते ॥४३३

प्रतापकीर्त्तो देवस्य भूशक्रस्यात्मसम्भवे ।
स्वेच्छया दिवि जयन्तजयन्त्याविव दीव्यतः ॥४३४॥ त्रिभिर्विशेषकम्

स्मित्वा स्माह महीचन्द्रः पुत्रपौरुषविस्मितः ।
वत्सातुच्छेच्छ को नाम तवेच्छाप्रतिबन्धकः ॥४३५

कुमारो व्याहरद्देव यस्य कोशोऽम्बुराशिवत् ।
अक्षयः शश्वत् स्वाधीनः स्वाधीनं तस्य भूतलम् ॥४३६

स चाक्षयोऽखिलक्षोणिपाललक्ष्मीस्वयंग्रहात् ।
तद्ग्रहश्च चतुरङ्गचमूसम्पन्निबन्धनः ॥४३७

चतुरङ्गा चमूः स्वामिन् स्वाधीना दानशालिनः ।
दानं च कोशात् कोशश्च शेमुखीविमुखे कथम् ॥४३८

---

४३३.४. °मालते.



Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

कथं मतिस्तस्य यस्य राज्ये लक्ष्मीमदालसाः ।
कोटीध्वजानुच्छूयंते किराटा नरकीटकाः ॥४३९

विजिगीषुः स एवेह विपक्षक्षपणक्षमाः ।
यस्य प्रजाः श्रीमदेन न माद्यन्ति निरङ्कुशाः ॥४४०

प्रजानां तावदेव स्वं युक्तं जीवन्ति यावता ।
शेषं तु नृपकोशस्थं विपक्षक्षोदकोविदम् ॥४४१

वणिजामपि या लक्ष्मीः साऽपि देवस्य नेक्ष्यते ।
देवपादा वणिजो वा राजानोऽत्रेति वेद्मि न ॥४४२

भाण्डागारसारमेषां तद् गृहीत्वा प्रभो कुरु ।
पुष्कलं तेन पादातप्रभृति प्रबलं बलम् ॥४४३

ततो दिग्यात्रयाऽश्वेभकोशान् क्षुद्रमहीभुजाम् ।
गृहाणैवं च महतामप्यशेषं ग्रहीष्यति ॥४४४

अथोद्यत्कोशो भूपीठं वण्ठीभूतारिमण्डलम् ।
नभस्तलं रविरिवैकस्त्वमुद्द्योतयिष्यसि ॥४४५

अतितीक्ष्णो बद्धमुष्टिर्निस्त्रिंशो मलिनोऽपि च ।
अखण्डधारो यदसिस्तत् कोशस्य विजृम्भितम् ॥४४६

ततोऽब्रूत सुतं भूपः पलिताङ्कुरकर्बुरम् ।
तिलतन्दुलितं श्मश्रूत्क्षिप्य दक्षिणपाणिना ॥४४७

इयच्चिरं मया वत्स नाक्षत्रमिति निर्ममे ।
अधुना किं कृते कार्यमकार्यमिदमीदृशम् ॥४४८

किञ्च —

भूपः शरण्यः प्रजानां ताभ्यो द्रुह्यति चेदसौ ।
तच्चौरचरटादीनां तेनौपाध्यायकं दधे ॥४४९

अपि च —

न नः केनापि पूर्वेण पुंसैतत् क्वापि निर्ममे ।
तदधर्ममुं कुर्यां कीर्तिधर्महरं कथम् ॥४५०

अथाख्यत् कनकरथो धर्मः कार्यः सतां सदा ।
विज्ञप्यते मयाऽप्येवं देव तस्यैव वृद्धये ॥४५१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतः —

परचक्रागमे देव गृहाणि दर्शनानि च ।
विलुप्यन्तेऽथ दह्यन्ति तद्धर्मो वैरिवारणम् ॥४५२

न वैरिवारणे शक्तो नृपः स्याद् बलवर्जितः ।
न च कोशविहीनस्य राज्ञः स्यात् पुष्कलं बलम् ॥४५३

कोशश्च शुल्कमात्रेण कियान् स्याद् देव भूभुजाम् ।
तत् प्रजार्थग्रहेणाऽपि तद्रक्षा धर्म एव हि ॥४५४

विमुच्य जीविकामात्रं शेषस्यापहृतावपि ।
देव किञ्चिद्धनेनापि प्रजा जीवन्ति सर्वतः ॥४५५

यच्चादिष्टं देवपादैर्नेदं नः पूर्वजैः कृतम् ।
तैश्चाकृतं करिष्यामि कथं वत्सास्मि सम्प्रति ॥४५६

तत्राप्रसादः कर्तव्यो न मे देवेन जल्पतः ।
तेनैव ते पूर्वजा नः स्तोकलोकाधिपाः खलु ॥४५७

किञ्च —

दानेन धर्मः कीर्तिश्च दानं चार्थं विना कथम् ।
शुल्कागतं च ददतो राज्ञो जीवेद् बलं कथम् ॥४५८

अथ पद्मरथः प्राह वेत्सि वत्सोचितं स्फुटम् ।
स्वप्रजादण्डनीयेत्यक्षराणि न शृणोमि तु ॥४५९

यच्च ते सुविचारेण त्वायति प्रतिभासते ।
तत्र पुत्र पवित्रात्मन् प्रतिपन्थी भवामि न ॥४६०

लब्धावतारः कुमारः पितरं व्याहरत् ततः ।
य एते तात सामन्ताः समन्तात् नित्यसेविनः ॥४६१

तेऽपि जीवादिशेत्युच्चैर्वादिनोऽपि दुराशयाः ।
पारतन्त्र्यासुखोच्छित्त्यै देवपादापदैषिणः ॥४६२

तदमी कोशहस्त्यश्वापहारात् स्वस्वमण्डले ।
प्रेष्यन्तां संहता नैते शुभाः क्रूरग्रहा इव ॥४६३

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

यतः —

कोशादिबलसम्पूर्णा मिथोमेलकदुर्ग्रहाः ।
सामन्ता न नरेन्द्रस्य वश्याः स्युर्भुजगा इव ॥४६४

तथा —

अतिप्रसादो धीश्लाघाऽपराधसहनं तथा ।
मन्त्रिणामपि चोन्मादहेतुर्नेतुर्हिताय न ॥४६५

इदमेवं शुभं कार्यमित्युक्तेऽपि हि मन्त्रिभिः ।
तदुत्कर्षापकर्षाय विचार्य स्वयमञ्जसा ॥४६६

नैवमेतच्छुभं कार्यं किं त्वेवमिति भूभुजा ।
किञ्चिद् विशिष्य वा सर्वं स्वोपज्ञमिव दर्श्यते ॥४६७॥ युग्मम्

किञ्च —

परिहार्यं परीहासः सह सामन्तमन्त्रिभिः ।
अन्यथा संघर्षतोऽमी आज्ञां लङ्घेयुरीशितुः ॥४६८

इत्युक्ते सूनुना प्राणप्रियपुत्रोऽवदन्नृपः ।
वत्सोचितं त्वमाधत्स्व श्रयिष्येऽन्तःपुरं त्वहम् ॥४६९

पुत्रोऽवोचत् तात राज्यफलं विषयमाननम् ।
तदित्थमेव न पुना राज्यचिन्तार्दितात्मनाम् ॥४७०

ततः पद्मावती देव्या व्याजह्रे देव धीनिधे ।
न कुमारोक्तमित्येव कार्यं किन्तु विवेचितम् ॥४७१

राजाऽऽख्यद् देवि पुत्रोक्तं बालाग्रमपि नान्यथा ।
स्मित्वाऽऽह देवी देवस्याज्ञभूर्वक्त्वन्यथा कथम् ॥४७२

मया तु देवपादानामनुरोधान्न्यगद्यत ।
एतच्च चूतमञ्जर्याऽश्रावि नेदिष्ठयाऽखिलम् ॥४७३

सा चानुरक्ता सामन्ते देवराजे यथा सची ।
ततोऽसौ तस्य रहसि तन्निःशेषमचीकथत् ॥४७४

सोऽथ दध्यावियं तेषामुल्लापान् वारिताऽपि चेत् ।
वक्ति मे तदसौ मत्कानथैर्यात् (?) तेषु वक्ष्यति ॥४७५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परीक्षितुं मेऽथ भावं संदिष्टा भूभुजेत्यसौ ।
तथाऽपि मेऽस्यां गाम्भीर्यं गुणो दोषोऽन्यथा पुनः ॥४७६

यतः —

मायावर्तदुरन्तानां योषितां सरितामिव ।
विश्रब्धो मुग्धकोऽवश्यं विनश्यति विनश्यति ॥४७७

ततोऽवहित्थामास्थाय सामन्तोऽब्रूत तां प्रति ।
राज्यस्तम्भः कुमारोऽस्मज्जीवितेनापि जीवतात् ॥४७८

तदर्थे जीवितमपि ह्यस्माकमुपयोक्ष्यते ।
यत् तु कोशाश्वेभमुख्यं विकल्पोऽप्यत्र नास्ति नः ॥४७९

इत्यतुच्छमसावुक्त्वा प्रमुग्धा एतया सह ।
प्रातर्मितपरीवारो भूपं राजकुलेऽनमत् ॥४८०

राज्ञा नाभाष्यसौ प्राग्वन्नान्ये सामन्तमन्त्रिणः ।
ततो मेने देवराजः सत्योक्तिं चूतमञ्जरीम् ॥४८१

बहूत्थिते नृपास्थाने परिहासरसोर्मिभिः ।
तदुपज्ञैर्नैव राज्ञः परिहासो व्यबोध्यत ॥४८२

उत्थाय देवराजोऽगात् स्वावासे भुज्यनन्तरम् ।
गत्वा वासे वत्सराजसामन्तस्याब्रवीदिति ॥४८३

पाणिग्रहमाङ्गलिक्यं श्रीकुमारस्य युज्यते ।
द्वौ द्वौ गजौ तुरङ्गाश्च वस्त्रालङ्करणानि च ॥४८४

सोऽवदत् सैष नः सर्वं जिघृक्षुः स्वयमेव भोः ।
सभयं कथमित्युक्ते देवराजेन सोऽभ्यधात् ॥४८५

जयश्रीर्वल्लभा मेऽस्ति सा दुर्गदेवश्रेष्ठिनः ।
पत्न्या लक्ष्म्या सखीति स्वगृहे भोक्तुं न्यमन्त्र्यत ॥४८६

भुञ्जाना पट्टशालायामेषाऽपवरकाग्रतः ।
वार्ताः प्रावर्तयल्लक्ष्म्या सार्धं प्रेमसुधोर्मिवत् ॥४८७

इतश्चापवरकस्थो दुर्गदेवो व्यचिन्तयत् ।
वार्ताप्रसक्ता जयश्रीर्न मे श्रोष्यति भाषितम् ॥४८८

---

४८६.१. जगश्रीव°.

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

इति सागरदत्ताख्यं स स्वमित्रमवार्तयत् ।
सुहृदे स्वरहस्यं हि जनैः प्रायः प्रकाश्यते ॥४८९॥ युग्मम्

मम सूनोर्दुर्गरवेः प्रेमपात्रं विलासिनी ।
वसन्तश्रीर्नृपकुलरहोवार्तामचीकथत् ॥४९०

अद्य शय्यामाङ्गलिक्यं राज्ञः कृत्वा निवृत्त्य च ।
यावद् द्वाःस्थेनालपामि शय्यां तावन्नृपोऽश्रयत् ॥४९१

श्रीकुमारश्च देवी च तत्रासीनौ यथोचितम् ।
कुमारो व्याहरल्लोभपरिग्रहखनिर्नृपम् ॥४९२

देवारोप्य किमप्यागो ग्रामानादत्स्व मन्त्रिणाम् ।
उचितं दण्डमादाय देयास्तेषाममी पुनः ॥४९३

पौनःपुन्येनेति तेषां सर्वस्वमपि संहर ।
वणिजः शुल्कादिदोषारोपाद् दण्ड्या मुहुर्मुहुः ॥४९४

सामन्तान् ब्रूहि भो नित्यसेवया वो महान् व्ययः ।
तत् स्वदेशे यात कार्ये व्याहृता द्रुतमेत च ॥४९५

ततोऽमी नित्यपार्श्वस्थाः कदाऽप्युन्मार्गगामिनः ।
सन्निपातकृतो देव दुश्चिकित्स्यास्त्रिधातुवत् ॥४९६

एकैकशस्तु हूतानां कञ्चिदारोप्य दुर्नयम् ।
हस्त्यश्वकोशापहारात् तेषां स्यान्निग्रहः सुखात् ॥४९७

इत्यन्तर्जल्पतस्तस्य दुर्गादित्यस्य भाषितम् ।
निशम्य सम्यग् जयश्रीः स्पष्टमाचष्ट मे पुरः ॥४९८

जयश्रीप्रोक्तराजादिरहोमन्त्रमशेषतः ।
पाठितो वत्सराजेन देवराजोऽपि तं जगौ ॥४९९

राज्ञश्चमरधारिण्या मम प्रणयबद्धया ।
जगदे चूतमञ्जर्या राजमन्त्रोऽयमीदृशः ॥५००

परं तद्वाचि सन्देहादेवमेवं मयोच्यत ।
राट्सौधे राज्ञानालापाज्जज्ञे सत्यं तु तद्वचः ॥५०१

किञ्च –

सभोत्थाने परीहासचस्तरीं भूभुजाऽसृजम् ।
वाचं वाचंयम इव न तत्राप्याददे प्रभुः ॥५०२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जयश्रीचूतमञ्जर्योर्वाचां वाचामपि प्रभुः ।
विसंवादापवादं तन्नापादयितुमीश्वरः ॥५०३

ततश्च —

मिथो मन्त्रोपदेशेन संवादाच्च समन्ततः ।
शिष्योपाध्यायता जज्ञे मिथः सामन्तयोस्तयोः ॥५०४
अथ किं कार्यमित्युक्ते देवराजेन सोऽभणत् ।
त्वद्विचारे पूर्यते यद्देवराजस्ततोऽब्रवीत् ॥५०५
यथाऽस्यागां त्वत्समीपे मनोमेलश्च नौ यथा ।
तथा समस्तैः सामन्तैः क्रियते मेलको दृढः ॥५०६
निबध्यते दृढो ग्रन्थिर्मन्त्रिणां भेद्यते रहः ।
उपजीव्यते तद्बुद्धिः सिद्धिः स्तादीप्सितश्रियः ॥५०७
ततः श्रीविजयसेनराजंस्तैरखिलं कृतम् ।
जज्ञे दृढश्चित्तबन्धः सर्वसामन्तमन्त्रिणाम् ॥५०८
ततः सुबुद्धिसचिवस्तैराहूय न्यगद्यत ।
दूरे कथञ्चित् प्रेष्यन्तां पालकाख्या भटा द्रुतम् ॥५०९
यतोऽमी बलिनो राजप्रसादाद्वैतशालिनः ।
आसन्नेषु ततस्तेषु न सिध्यति मनीषितम् ॥५१०
दूरं गतेष्वेषु भूपं सपुत्रं न्यस्य पञ्जरे ।
क्रियते राजभ्रातृव्यः सुखाद् भूपोऽरिकेशरी ॥५११
सुबुद्धिरथ राजानमाचख्यौ श्रयते प्रभो ।
सिंहः सीमान्तजनतामुपद्रवति दुर्धरः ॥५१२
तं निग्रहीतुं बलिनः पालकान् प्रहिणु प्रभो ।
तद्गूढमन्त्राविदुरः सद्यस्तान् प्राहिणोन्नृपः ॥५१३
दूरगेषु पालकेषु तैः सामन्तैः समन्ततः ।
हस्तिशाला हयशालाः कोशा रुरुधिरे क्षणात् ॥५१४
ततः कोलाहलो जज्ञे प्रलयाम्भोदगर्जिवत् ।
किमेतदिति राज्ञोक्ते लोकोऽब्रूत शृणु प्रभो ॥५१५
राज्ये निवेशयाञ्चक्रे सामन्तैररिकेसरी ।
हस्तिशाला हयशालाः कोशा जगृहिरेऽभितः ॥५१६

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

ततो गृह्णीत गृह्णीत पापान् हत हतेति च ।
राजाऽत्याकुलमाचष्ट कोऽपि नाचेष्टत क्वचित् ॥५१७

सर्वं विनष्टं विज्ञाय हयमारुह्य दुष्टधीः ।
नष्टवान् कनकरथः स पत्ररथवेगतः ॥५१८

स तु पद्मरथो राजा सामन्तैर्न्यासि पञ्जरे ।
सिंहासने नरेन्द्रस्य सद्योऽध्यास्यरिकेसरी ॥५१९

स च भ्रान्त्वा प्रतिपदमिदं भूमिवलयं
लयं न क्वाप्याधाच्चकितचकितः पुण्यरहितः ।
यदन्यस्मिंश्चिन्तास्पदमरचयत् तत्तु स परि-
ग्रहग्रस्तो लोभग्रहविनटितः प्रापदभितः ॥५२०

विजयसेनमहीतिलकैषकः सपदि पद्मरथक्षितिपाङ्गजः ।
अशरणः शरणं प्रतिपन्नवान् सद इदं तदिदं परिभावय ॥५२१

श्रुत्वेदं भववृत्तमात्मघटितं तीव्रानुतापौजसा
जातस्मृत्युदयाद् दयां कुरु गुरो निस्तारयेति ब्रुवन् ।
राज्ञाऽसृष्ट महोत्सवः स कनकः श्रीमत्सुधर्मान्तिके
साम्यश्राजिनमद्भुतं व्रतमधाच्चित्राऽऽत्मनां ही गतिः ॥५२२

इति श्रीनिर्वाणलीलावतीमहाकथेतिवृत्तोद्धारे **लीलावतीसारे** जिनाङ्के **लोभपरिग्रहश्रीमिथुनस्वरूप-व्यावर्णनो** नाम षष्ठ उत्साहः * ॥

* ग्रं० ५३८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## सप्तम उत्साहः

अथ द्वितीयेऽह्नि पुनः सुधर्मा गणभृद्वरः ।
श्रीविजयसेनराजमुख्यानेवमुपादिशत् ॥१
क्रोधहिंसादिद्वन्द्वानां स्वरूपादिप्रकीर्तितम् ।
तदग्रतश्चराणां तु हृषीकाणामथोच्यते ॥२
ततः क्रोधाद्युपादानपञ्चास्रवनिबन्धनम् ।
भवदुःखं रामदेवादीनामाकर्ण्य राड् जगौ ॥३
भगवंश्चतुर्भविकः संसारोऽयमुदीरितः ।
कषायमूल एतेषां संशयस्तद्दुनोति माम् ॥४

तथा हि –

प्राक् किमेषां न संसारः किं वा नासन्नमी पुरा ।
क्रोधादिहेतुः संसारश्चतुर्भविक एव वा ॥५
इति संशयवात्याभिर्बाध्यते मे मतेर्लता ।
अथाह भगवान् राजन् जिनागमरहः शृणु ॥६॥ युग्मम्
अनादिनिधनो जीवः कषायाद्या अनादयः ।
तन्निदानश्च संसारोऽनादिरेव विबुध्यताम् ॥७
चतुर्भविकसंसारकीर्तनं तु दिगेव हि ।
यतोऽनादिभवश्रेणीं वक्तुं नेशोऽपि सर्ववित् ॥८
भवान्तराणामपि हि रीतिरेषैव बुध्यताम् ।
निःसंशयोऽथ राजाऽऽख्यात् प्रभो प्रस्तुतमादिश ॥९
भगवान् भाद्रपाथोदसोदरध्वनिडम्बरः ।
स्वयंवरः संयमर्द्धेर्जगाद श्रूयतामिति ॥१०
आस्रवाः स्युः कषायेभ्यस्ते चेन्द्रियनिबन्धनाः ।
तदिन्द्रियाणि राजेन्द्र सर्वानर्थमहाकराः ॥११

---

६.२. मतिर्लता.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुर्दान्तैरिन्द्रियहयैर्बलादुन्मार्गगामिभिः ।
क्षिप्यते दुर्गतिमहारण्ये जन्तुरनेकशः ॥१२

आसतामन्येन्द्रियाणि स्पर्शनेन्द्रियमेककम् ।
निबिडं कर्म बध्नाति दुर्गदुर्गतिकार्मणम् ॥१३

तथा हि —

अभ्यङ्गं शतपाकाद्यैरुद्वर्तं कुङ्कुमादिभिः ।
कालानुरूपवाःस्नानं काषाय्या चाङ्गमार्जनम् ॥१४

विलेपनमलङ्कारं पुष्पदाम यथाऋतु ।
मृद्वंशुकासनशय्या मृद्वङ्गीपरिरम्भणम् ॥१५

स्पर्शनेन्द्रियवश्योऽयमात्मा प्रार्थयतेऽनिशम् ।
तत्साधननिमित्तं चारम्भानारभते बहून् ॥१६॥ त्रिभिर्विशेषकम्

तथा हि —

हलयन्त्रीखेटनादि नृपसेवापणादि च ।
उष्ट्राश्वेभविक्रयादि मित्रबन्धुवधादि च ॥१७

परयोषामुरागेण रौद्रार्ताध्यवसायतः ।
घोरं रणं च कुरुते म्रियते चाजितेन्द्रियः ॥१८॥ युग्मम्

आत्मन्यारोप्य दुष्कर्मभारं दुःखाम्बुवारिधौ ।
नरके विवशो याति न पाति स्पर्शनेन्द्रियम् ॥१९

तत्रातिदुःसहं दुःखं सोढ्वाऽसङ्ख्यमनेहसम् ।
ततः कथञ्चिदुद्वृत्तः कुतिर्यङ्नृषु जायते ॥२०

प्राग्वत् त्वगिन्द्रियाधीनस्तत्रापि तदभीष्टयुक् ।
प्राप्नोत्यशर्मलहरीदृष्टान्तोऽत्रभवान् नृपः ॥२१

राज्ञा व्यज्ञापि शुश्रूषे स्वप्राग्वृत्तं प्रभोर्मुखात् ।
भगवानाह राजेन्द्र श्रूयतामवधानतः ॥२२

अस्ति जम्बूद्वीपपुरलवणाम्भोधिखातिकाम् ।
परितो धातकीखण्डद्वीपस्तद्बाह्यिकोपमः ॥२३

२१.३. लहरीदष्थान्तो. २३.३. पारितो.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मिन्नासीत् पूर्वमेरुप्रतिबद्धे च भारते ।
विजित्वरं स्वःपुरस्य श्रीकाञ्चनपुरं पुरम् ॥२४

यत्रार्हच्चैत्यशृङ्गेषु पताका भूरिशो बभुः ।
तत्कारिणां पुण्यकोटीशानां कोटीध्वजा इव ॥२५

तत्र राजा राजराज इवोद्यत्कोशशेवधिः ।
सौभाग्यसुन्दरतया न कुबेरः परं क्वचित् ॥२६

चक्रवर्तीव परितोऽप्युदीर्णबलवाहनः ।
किन्त्वसङ्ख्येयरत्नेशः श्रीमान् विमलवाहनः ॥२७॥ युग्मम्

तस्य शस्या मोदपात्रं देवी कर्पूरमञ्जरी ।
यस्याः श्रीशीलकर्पूरं परं न परिहीयते ॥२८

निबिडं बन्धमात्मानं नयेद् यः स्पर्शलोलुपः ।
तं स्पर्शनेभमाश्रित्य स राजा स्वेच्छयाऽचरत् ॥२९

तथा हि —

नवीननलिनीपत्रवत् तनूनि मृदूनि च ।
श्चयोतद्द्रुतिरसान्येष दिव्यवासांसि पर्यधात् ॥३०

पट्टांशुकनिचोलेषु पूर्णेषु मृदुपक्ष्मभिः ।
गण्डिकाद्यासनेषूच्चैरासामास स लीलया ॥३१

हंसरूतभृतां मुण्डहस्तपिण्डां च तूलिकाम् ।
निर्वृन्तशतपत्र्यादिस्रस्तरामध्यशेत सः ॥३२

शिरीषसुकुमाराङ्गीर्नवयौवनशालिनीः ।
वेशाः पस्पर्श सर्वाङ्गं गजवन्मीलितेक्षणः ॥३३

इत्थं गुणीकृताशेषशेषाक्षव्याप्तिश्च सः ।
पञ्चेन्द्रियोऽपि बकुलवत्त्वचेकेन्द्रियोऽभवत् ॥३४

त्यक्तराज्यधुराचिन्तो मन्त्र्यालापपराङ्मुखः ।
अन्तःपुरैकशरणः स राजाऽगमयद् दिनान् ॥३५

इतश्च —

क्षितिप्रतिष्ठितपुरे जिनशासनभावितः ।
जीवादितत्त्वविदुरः स्थिरसम्यक्त्वभूषणः ॥३६

---

२५.३. कोटीशिनां. ३२.४. श्रस्तर°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अणुव्रतगुणशिक्षाव्रतसंयमितक्रियः ।
नानासामन्तमूर्धन्यरत्नचुम्ब्यपदाम्बुजः ॥३७
जगच्छुभङ्करो नाम राजा राजर्षिरुद्ययौ ।
धर्मार्थकामाः संभूय यत्र मोक्षार्थकारिणः ॥३८॥ त्रिभिर्विशेषकम्

यस्यां रूपाद्वयं स्रष्टुं हस्तलेखः प्रजासृजः ।
शचीघृताचीश्रीगौरीरम्भारम्भो विभाव्यते ॥३९
हंसरूतनवनीतशिरीषनवमार्दवम् ।
उपादायादधे धात्रा यत्तनौ मार्दवं किल ॥४०
सतीमालाशिरोमाला सुदती परमार्हती ।
सा प्रियङ्गुलता देवी तत्प्रेमामत्रतामगात् ॥४१॥ त्रिभिर्विशेषकम्

जिनधर्मं राजधर्मं मिथोऽनाबाधया तयोः ।
साधयतोः शास्त्रनीत्या ययौ कालः कियानपि ॥४२
आगात् परिव्राजकैकाऽन्यदा देवीनिकेतने ।
सा च ज्ञाततदाकूता नास्तिक्यं प्रत्यपादयत् ॥४३

तथा हि —

नास्ति जीवस्तदभावान्नादृष्टं न भवान्तरम् ।
न च स्वर्गो नापवर्गो मुधैवात्मा प्रवञ्च्यते ॥४४
प्रमाणराजप्रत्यक्षनिर्णीतं वस्तु वस्तु सत् ।
तत् प्रधानानीन्द्रियाणि प्रीण्यन्ते तत्प्रियैस्ततः ॥४५

ततो देव्या जिनमतप्रवेदनपटिष्ठया ।
बहुधा हेतुदृष्टान्तैरेषा चक्रे निरुत्तरा ॥४६
मुण्डे किं पीतशुण्डाऽसि रण्डे तुण्डार्गलाऽसि वा ।
यदेवमस्मत्स्वामिन्या सार्धं विवदसेऽलसे ॥४७
इत्थं निर्भर्त्स्य चेटीभिर्निष्ठुरं कुक्कुटीव सा ।
अर्धचन्द्रप्रदानेन चरिका निरकाश्यत ॥४८॥ युग्मम्
ततश्च साऽति प्रद्विष्टा फलके दिव्यवर्णकैः ।
चित्रं चित्रकृता देव्या दिव्यं रूपमलेखयत् ॥४९

३८.१. नामं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दध्यौ च काञ्चनपुरे स्त्रीलोलो विमलो नृपः ।
जगच्छुभङ्कररिपुः कार्यं सिध्यति तत्र मे ॥५०

विमृश्येत्याशु सा पापा श्रीकाञ्चनपुरं गता ।
क्रमेण भूपमाशिष्य फलकं तददर्शयत् ॥५१

स च निर्वर्ण्य तद्रूपं धूनं धूनं शिरोऽभ्यधात् ।
किं किन्नरी खेचरी वाऽमरी वा भगवत्यसौ ॥५२

साऽऽख्यदेषा देव जगच्छुभङ्करनृपप्रिया ।
यत्पादशौचकिङ्कर्यः स्युः किन्नर्यादयो न वा ॥५३

रतिकेलिर्भवेद्याऽत्र भोक्तुः साऽन्यत्र न क्वचित् ।
सुधावापीसुखं किं स्याज्जलवाप्यां कदाचन ॥५४

यस्य सा गृहिणी सैष किङ्करोऽपि सुरेश्वरः ।
नैव सा गृहिणी यस्य सुरेशोऽपि स किङ्करः ॥५५

सौभाग्यसुन्दरशिरोरत्नं देवस्तथैव सा ।
तद्योग्ययोगात् पुनरुच्यतां गङ्गाब्धिसङ्गमः ॥५६

मा स्वान्तःपुरकेणापि सन्तुषस्तुषबन्धुना ।
शालिरूपामिमां भुङ्क्ष्व स्वयं विद्धि तदन्तरम् ॥५७

इत्युक्तिहविराहुत्या हृद्गेहेऽस्य स्मरानलम् ।
प्रज्वाल्य सा ययौ पापा पापाः परगृहैषिणः ॥५८

ततश्च स्वं कुलं कीर्तिं तत्कार्यमविचार्य सः ।
आह्वत् सत्याभिधं दूतं क्व विचारः क्व रागिणः ॥५९

अये सत्य क्षितिप्रतिष्ठितपुर्यां व्रज द्रुतम् ।
जगच्छुभङ्करनृपस्येदं मद्वचनं भण ॥६०

श्रीप्रियङ्गुलतादेवीं मच्छुद्धान्ते निवेशय ।
अहं पुनस्तव ग्रामसहस्रं करिणां शतम् ॥६१

पञ्च च स्वर्णकोटीस्ते दास्येऽन्यच्च प्रियं शृणु ।
तावकप्रतिपक्षाणां शिरश्छेत्स्यामि मानवत् ॥६२

ततो दूतः स सत्याख्यो गत्वा क्षितिप्रतिष्ठिते ।
जगच्छुभङ्करनृपं नत्वा वक्तुं प्रचक्रमे ॥६३

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

सेवकानां वराकाणां स्वामिन्नजननिर्वरम् ।
ये तत्त्वमविमृश्यैव स्वाम्यादेशं दिशन्त्यहो ॥६४

कथं देव तव पुरो ब्रुवे सन्नीतिवर्जितम् ।
तथाऽपि क्षम्यतामागः सर्वं सर्वंसहाधिप ॥६५

देवैवमेवं त्वां ब्रूते राजा विमलवाहनः ।
दूत्यादकथ्यमप्याख्यां धिग् दूत्यं पूत्यपावनम् ॥६६

तच्च सर्वं सत्यदूताख्यातं श्रुत्वा स भूपतिः ।
सामर्षमभ्यधादेवं भक्त्या मुक्तोऽसि तं वदेः ॥६७

नराधमोऽसि विज्ञातो न जातो राजतस्ततः ।
ततस्त्वदुपरिक्रोधयोधोऽपि मम लज्जते ॥६८

अन्यच्च मुक्तो दयया मया सम्प्रति दुर्मते ।
मम बाणा वहन्ते न त्वय्येवं हि मलीमसे ॥६९

राज्यश्रियं तु भवतः समादास्येऽस्मि निश्चितम् ।
तद्याहि दूरतः क्वापि यदि जीवितुमिच्छसि ॥७०

यदि वा –

राजनीतिपथाद् भ्रष्टस्त्याज्यो राज्यश्रिया स्वयम् ।
अपराधादतः शीर्षच्छेद्य एव हि वर्तसे ॥७१

तथाऽपि कृपया दत्तः षण्मासा अवधिस्तव ।
जलदुर्गं स्थलदुर्गं भजेथास्त्वन्यथा मृतः ॥७२

इत्यूर्जितं वचः श्रुत्वा दूतः स्यूतास्यतामिव ।
प्राप्तः प्राप्तः स्वपुरे च स्वप्रभोस्तदचीकथत् ॥७३

तेन दूतोपनीतेन वचसा जातवेदसा ।
प्रजज्वालोच्छलद्दुर्वाग्ज्वालो विमलवाहनः ॥७४

ततोऽनवेक्ष्य नृपतिर्नीतिं भीतिं च दुर्गतेः ।
नरान्तरमनापृच्छ्याविमृश्य स्वपरान्तरम् ॥७५

क्रोधाहङ्कारशिखरिशिखरारोहगौरवात् ।
प्रयाणकमहाढक्कामसौ तं प्रत्यवीवदत् ॥७६॥ युग्मम्

ततः सामन्तसैन्यानि मिलन्ति स्म महीतले ।
महाजलदवृन्दानि प्रावृषीव नभस्तले ॥७७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असङ्ख्यकरितुरगनरानीकसमाकुलः ।
उच्चैस्तरस्यन्दनौघयानपात्रकरम्बितः ॥७८
प्लावयन् काश्यपीपीठं शेषकूर्मौ च कुब्जयन् ।
बलोदधि प्रचचाल तदा वैमलवाहनः ॥७९॥ युग्मम्
सर्वतोदिक् च राजन्यसैन्यसञ्जातयोजनम् ।
योजनं तद् बलं गत्वाऽवसच्छुद्धमहीतले ॥८०
तत्र चास्थानमासीनो हृष्टसंतुष्टमानसः ।
उपेत्यामात्यवर्गेण विज्ञेन व्यज्ञपि प्रभुः ॥८१
तावन्नैवोद्योगवार्ता प्रकाश्या कस्यचित् प्रभो ।
यावन्न शकुनं श्रेष्ठं गूढारम्भा हि सद्धियः ॥८२
सम्पन्ने शकुने श्रेष्ठे श्रेष्ठं तदभिषेणनम् ।
तदभावे तु देवेन स्वदेशो दृश्यतां मुदा ॥८३
अवोचत ततो राजा क्वास्ति शाकुनिकः सुधीः ।
जगदे देवगुरुणा मन्त्रिणाऽस्ति ममान्तिके ॥८४
राजादेशान् मन्त्रिहूतः सिद्धार्थो नृपमानमत् ।
राज्ञोक्तः शीघ्रमीक्षस्व शकुनं रिपुमर्दनम् ॥८५
विधिना सुमुहूर्तेऽथ तच्च तेन निरीक्षितम् ।
सर्वथाऽप्यशुभं वीक्ष्य नृपो व्यज्ञप्यतामुना ॥८६
देव पुण्यानुभावेन सर्वं श्रेयो भविष्यति ।
शकुनं न पुनः श्रेष्ठं प्रभुर्जानात्यतः परम् ॥८७
सरोषमथ राजोचे मन्त्रिन् वेत्ति किमेष कः ।
किं वा जानन्ति तिर्यञ्चो वीक्ष्यन्ते येन तेऽपि च ॥८८
चित्तोत्साहो निरूप्यस्तु स चास्त्यनुपमो मम ।
ततः प्रभाते प्रस्थेयं न तु स्थेयं कथञ्चन ॥८९
अस्मिन्नवसरे द्वाःस्थो नृपमूचे सुमङ्गलः ।
देव नैमित्तिको द्वारि स्वामिपादान् दिदृक्षते ॥९०
राजाद्राक्षीन्मन्त्रिमुखं स ऊचे देव हूयताम् ।
प्रष्टव्यः प्रस्तुतं स्वार्थं न हि दोषोऽत्र कश्चन ॥९१

---

९०.१. द्वास्थो.

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

नृपादेशाद् वेत्रिणाऽथ द्रुतमेष प्रवेशितः ।
दत्वाऽऽशिषं निविष्टश्च सत्कृत्याप्रच्छि भूभुजा ॥९२

विद्वन् किंविषयं ज्ञानं तव जागर्ति कीर्त्यताम् ।
सोऽब्रूतातीतादिवस्तु स्वैरं पृच्छतु भूपतिः ॥९३

राजाऽन्वयुङ्क्त यात्रेयं किंफला मे भविष्यति ।
सूर्यं वीक्ष्याह देवास्ति लग्नं हि द्विस्वभावकम् ॥९४

तत्र मूर्तौ रविसुतो राहुणा लक्षितं च तत् (?) ।
दृष्टं च रविभौमाभ्यां नवांशः क्रूरवीक्षितः ॥९५

निर्याति पवने प्रश्नः कृतो देवेन नो शुभः ।
अन्यच्च पठतु स्वामी किञ्चित् सद्यः स पेठिवान् ॥९६

' विजओ मह होउ ' ऊचे

नैमित्तिकः पूर्वाचार्यादेशोऽयमुच्यते-

भणियं तिउणं पणजुय पासट्ठियमीस सत्तहिं विहत्ते ।
सुन्निक्कतिन्निसेसे असोहणं सोहणं सेसे ॥ (१)

देव सत्त अक्खरा पन्हे तिउणा इक्कवीसा जाया पणजुय त्ति छव्वीसा ।
अम्हे सव्वे वि दस पासट्ठिया मं मुत्तूण नव ॥ (२)

ते छव्वीसाए मेलिया पणतीसा सत्तहिं विहत्ते
सुन्नं चेव सेसं ता एयं पि न सोहणं ति ॥ (३)

ततश्च –

न शुभं सर्वथा स्वामिन् निमित्तमवलोक्यते ।
तद्यात्रेयं न सम्पत्त्यै विपत्त्यै केवलं प्रभोः ॥९७

रोषारुणाक्षो महिष इवाख्यन्नृपतिस्ततः ।
रे दुष्ट योग्यस्त्वमेव विपत्तेरित्यसभ्यवाक् ॥९८

किन्तु द्विजतया मुक्तो मुञ्च मे पाप दृक्पथम् ।
हनिष्यसेऽन्यथाऽवश्यं पुंव्याघ्रैः पशुवत् क्षणात् ॥९९

निमित्तं पततान् मूर्ध्नि तवैवेतिप्रवादिभिः ।
राट्पुरुषैर्निहत्यैष निरकाशि निमित्तवित् ॥१००

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मन्त्रिवर्गेऽथ तूष्णीके चक्रे विजयवर्मणा ।
सामन्तेन परीहासकथा राट् प्रासदत् तया ॥१०१
अथाविसंवादिनामा मन्त्री व्यज्ञापयन्नृपम् ।
वयं स्वामिकुलक्षेमकीर्तिकोशाधिकारिणः ॥१०२
तदस्माभिः स्वप्रतिभादृष्टं विज्ञप्यते प्रभोः ।
प्रभुणा चाप्रसादोऽत्रास्मासु कर्तुं न युज्यते ॥१०३
ततोऽब्रूत क्षितिपतिर्मन्त्रिन् ब्रूह्यविशङ्कितः ।
गच्छतां सुपथे राज्ञां हस्तदीपा हि मन्त्रिणः ॥१०४
अथाविसंवादिमन्त्री बभाषे योजिताञ्जलिः ।
राजनीतिरहो देवावधानेनावधार्यताम् ॥१०५
प्रभोऽन्तरारिषड्वर्गे दुर्धरो दुर्जयस्तथा ।
दुरन्तश्च स्मर एषोऽक्षषड्वर्गे मनो यथा ॥१०६
उक्तं च —
स एकस्त्रीणि जयति जगन्ति कुसुमायुधः ।
हरताऽपि तनुं यस्य शम्भुना न हृतं बलम् ॥१०७
स चातिलब्धप्रसरो दुर्वारः शरवद् भृशम् ।
दूरं विनाशयत्येव गुणानीकमशेषतः ॥१०८
सोऽपदेऽन्यकलत्रादौ मन्येत मनसाऽपि चेत् ।
राजन् दशाननस्येव तदा न हि हितावहः ॥१०९
किञ्च कीर्तिं कुलं लक्ष्मीं पौरुषं विनयं नयम् ।
यद् वा सर्वं दहत्येष परस्त्रीसङ्गमानलः ॥११०
तव देवान्तःपुरेऽपि दिव्याः सन्ति पुरन्ध्रयः ।
प्रियङ्गुलतिकायां तु तदाधिक्यं न मन्महे ॥१११
विग्रहश्च समर्थेन शब्दशास्त्रे प्रशस्यते ।
नीतिशास्त्रे पुनः स्वामिन् सर्वथाऽपि निषिध्यते ॥११२
अपि च —
सकलोर्वीभृतां मूर्ध्नि पादं विन्यस्य भूधव ।
तव वंशः समुदगादगाद् वृद्धिं च भूयसीम् ॥११३



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

छायया तव वंशस्य भूभृतोऽप्युन्नता अपि ।
सश्रीकाः स्युरपरथा विच्छायत्वं भजन्ति ते ॥११४

तत् परदारसङ्गेन किं तच्छायां विलुम्पसि ।
स्वामिंस्तदयमुद्योगो न शुभेन फलेग्रहिः ॥११५

न यदत्र परत्रापि परदाराभिलाषिता ।
प्रशस्यते विपश्चिद्भिस्तदस्या विरम प्रभो ॥११६

इत्युदित्वाऽविसंवादिसचिवे मौनमास्थिते ।
साहङ्काररुषाटोपमूचे विमलवाहनः ॥११७

यत एव हि वंशो मेऽन्यवंशेभ्यः समुच्छ्रितः ।
अत एव हि युज्यन्ते कान्ता मुक्ता इहैव हि ॥११८

किञ्च सन्त्येव मे गेहेऽप्यतिकल्पलताः प्रियाः ।
प्रियङ्गुलतया कार्यं किं नु मेऽस्ति तदीयया ॥११९

परं दूतमुखेनैष एवमेवं यदब्रवीत् ।
तद्दोषस्यौषधं दातुमेवास्म्येवमुपक्रमे ॥१२०

समर्थविग्रहेणैव व्यज्यते स्वभुजोऽर्जितम् ।
सैंहिकेयो विगृह्णाति पूर्णमेवेन्दुमादरात् ॥१२१

तदत्र यात्रारम्भे मां यः कश्चन निषेत्स्यति ।
कण्ठशोषात् परं किञ्चिन्न फलं तस्य सेत्स्यति ॥१२२

ततः प्रगे ततःस्थानादस्खलितैः प्रयाणकैः ।
क्रमात् तरङ्गिणीं प्राप स राजा तुङ्गशृङ्गिणीम् ॥१२३

याऽस्ताघा शुभसंयतेव जनतासन्तापसंहारिणी
या तारुण्यवतीव मञ्जुलकुचप्राग्भारसंधारिणी ।
या ग्रामीणसभेव सन्ततजडस्तोमावरुद्धान्तरा
युद्धोर्वीव च याऽतिदुस्तरमहाकल्लोलमालाकुला ॥१२४

तीरोपान्तप्रतिष्ठान् बकुलविचकिलाशोकपुन्नागपूगां-
स्तालीहिन्तालशालांस्तिलककुरबकान् नालिकेरान् रसालान् ।
अत्युन्नग्रान् स्वकग्रानिव सुमनयनैः प्रेक्षमाणानभीक्ष्णं
या चाश्लेष्टुं किलोच्छालितगगनतलालम्बिकल्लोलबाहुः ॥१२५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्या अर्वाक् कोशमात्रे स्कन्धावारं निवेश्य सः ।
आस्थानेऽस्थान् महीमेघवाहनोऽमलवाहनः ॥१२६

ऊचे च भो भोः सामन्ताः सुभटाः प्रकटौजसः ।
जेयो महाबलः शूरो राजा जयशुभङ्करः ॥१२७

तद् यो भीरू रणभरात् सोऽत एवैतु मन्दिरम् ।
निर्भङ्गवीरा धीराश्च सहायान्तु मया रणे ॥१२८

अकार्येऽत्यसमानेन बुद्ध्वा युद्धमुपस्थितम् ।
न कोऽपि किञ्चिदाचष्टाचष्ट मन्त्री पुनः स तु ॥१२९

वाहिनीयमसङ्ख्या ते वाहिनीयं च दुस्तरा ।
न नाव्या परिभाव्या तत् क्वाप्यस्यां पादवर्तनी ॥१३०

सद्यो नद्योघपार्श्वेन ततोऽश्वीयेन भूपतिः ।
दूरं जगाम दृष्ट्वा च पादवर्त्मैक्षयन्नरैः ॥१३१

ततो निवृत्त्य शिबिरे स्वावासे भुज्यनन्तरम् ।
दूतं सत्याभिधापूतं स भूमीपतिरादिशत् ॥१३२

अरे तत्र पुरे गत्वा मद्गिरा तं नराधिपम् ।
शक्तिकल्लोलिनीसिक्तां नीत्युक्तिमिति पाठय ॥१३३

स्वप्रातिभप्रदीपेन विदिता शेषनीतयः ।
संवादायैव सेवन्ते मन्त्रिमन्त्रमिहोत्तमाः ॥१३४

मध्यमास्तु मन्त्रिमुखा राज्यमज्यानि भुञ्जते ।
अधमास्तु द्वयीशून्या शून्यां कुर्वन्ति मेदिनीम् ॥१३५

तदज्ञमन्त्रिविकल कल्यान्यनिवेदितम् ।
स्त्रीमात्रोपदया मह्यं मह्यां स्या अकुतोभयः ॥१३६

सूर्योऽर्घाञ्जलिना शंभुर्भस्मना दशया शशी ।
स्त्रिया प्रसीदन्नस्म्येष न महार्घो महामते ॥१३७

तदिमां प्राभृतीकृत्य कृतकृत्यीभव द्रुतम् ।
मम प्रसादप्रासादं प्राप्य क्रीड च निर्भरम् ॥१३८

इमां मे दास्यसि न चेत् तत् सर्वस्वं प्रदास्यसि ।
यदि वा लज्जसे मह्यं योषिन्मात्रप्रदानतः ॥१३९

---

१३६.४. मह्या.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च किञ्चिन्नीतिमेतां ग्रामीणा अपि जानते ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥१४०

अपि च –

मामपि प्रति यैः कैश्चिदुत्पदैः शरभायितम् ।
मम प्रतापप्रदीपे रलै(?)स्तैः शलमायितम् ॥१४१

तदिमां देहि दुर्गं वा मित्रं वा किञ्चनाश्रय ।
न तृतीया गतिस्तेऽस्ति रुष्टे विमलवाहने ॥१४२

इति राज्ञा स संदिष्टः प्रविष्टस्तत्पुरं क्रमात् ।
दूतोऽब्रूत यथादिष्टं शुभङ्करमहीभुजः ॥१४३

ततः स्मित्वा लीलयोचे दूतं जयशुभङ्करः ।
अद्य रे कातरे तत्र वाक्साहसमिदं कुतः ॥१४४

निरर्गलप्रतोल्यास्य दूतदूत्येन वर्मितः ।
यदृच्छयेति वदितुं वावदूक तवोचितम् ॥१४५

तद् याहि तं विटं ब्रूहि कुर्याः कार्येण भाषितम् ।
निर्जलाम्बुदवन् मैव विधाः खटखटारवम् ॥१४६

यतः –

किं राजजल्पितं नीच प्रतिपन्नं खरस्वर ।
आदावेव गरीयांसि(?) तनीयांसि(?) ततः क्रमात् ॥१४७

इत्युक्त्वा व्यसृजद् दूतमाह्वत् सामन्तमन्त्रिणः ।
राजाऽब्रूत च भो भोः स दुराचारो निकटयभूत् ॥१४८

ब्रूते दूतेनैवमेवं तत् सज्जीभवत द्रुतम् ।
येनासौ कर्ममलिनो नैवाक्रामति नोऽवनिम् ॥१४९

ततः सामर्षमाचष्ट सामन्तो जयशासनः ।
क्व मृगारिः क्व च मृगः क्वोरगारिः क्व चोरगः ॥१५०

धर्माध्वगामी क्व स्वामी क्व चासौ पापजाङ्गिकः ।
तदादिश दिशाम्यस्य दक्षिणेशनिकेतनम् ॥१५१॥ युग्मम्

दुर्गराजोऽथाभ्यधत्तास्मद्भाग्यादेत्यसौ पशुः ।
अमुना स्वक्रोधरुद्रं क्षणाद् देव यजामहे ॥१५२

१४०.१. किंचन्नी°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यशोराजो जगादाथ देशे नो विशतु द्विषन् ।
जयसेनो मम भ्राता सम्मुखोऽस्य भविष्यति ॥१५३

नद्याश्च परतः स्थास्याम्यस्मि यास्यत्यरिः क तत् ।
प्राप्तं द्वारेऽथ दैवज्ञं वेत्री राज्ञे न्यवेदयत् ॥१५४

नृपाज्ञया प्रविष्टोऽसौ निविष्टश्च वरासने ।
राज्ञा पृष्टः क ते ज्ञानं सोऽवग् ज्योतिर्निमित्तयोः ॥१५५

राजाऽऽख्यत् तर्हि वीक्षस्व विपक्षजयितां मम ।
जगौ समरसिंहोऽथ देव पृच्छ्यमिहास्ति किम् ॥१५६

मृगेण जरता सार्धं संप्रलग्ने रणे हरेः ।
संशय्यते किं विजयो यदेवं पृच्छ्यते प्रभो ॥१५७

भूपेनाभिदधे सौम्य श्रूयतां तत्त्वमुच्यते ।
विजयो मृत्युरथवा युधि साहसिनां ध्रुवम् ॥१५८

तथाऽपि पृच्छ्यते विज्ञो भावोऽस्त्येषोऽपि धिग् विधेः ।
बलिनोऽपि विजीयन्ते जयन्त्यल्पदला अपि ॥१५९

ज्ञातस्वरूपैस्तद्रूपैः संस्थाप्यान्यं महीपतिम् ।
गम्यं युधीति दैवज्ञो विज्ञैः पर्यनुयुज्यते ॥१६०

ततो नैमित्तिकः प्राह प्रश्नोऽभून् मेषलग्नके ।
तत्र ग्रहस्थितिं सम्यग् निशामय विशांपते ॥१६१

मिथुने रविसूः कर्के गुरुः सिंहे च चन्द्रमाः ।
तुले बुधो मङ्गलश्च वृश्चिके शुक्रभास्करौ ॥१६२

प्रश्नलग्नानुसारेण विजयः स्वामिनो ध्रुवम् ।
राजाऽऽख्यच्छासनदेव्या धाम्ना जैत्राः सदाऽर्हताः ॥१६३

तथाऽपि पृच्छ्यसे विद्वन् दिग्यात्रासिद्धिकृद्दिनम् ।
उपयुज्य विचार्याशु राज्ञो नैमित्तिकोऽभ्यधात् ॥१६४

देवात्रैव मार्गकृष्णत्रयोदश्यां बृहस्पतौ ।
मैत्रभे वृश्चिकेन्दौ च तुलालग्नमभीष्टकृत् ॥१६५

---

१६५.४. तुल°.

अभीष्टेऽस्मिँल्लग्ने जिनमहनपूर्वं जयशुभं-
करो भेरीं प्रास्थानिकसुविधिनाऽवीवददसौ ।
दिवं सिन्धूः सिन्धुप्रभुमखिलशैलान् सककुभः
प्रतिध्वानैः सा चानयत विजयातोद्यकमलाम् ॥१६६

तध्वनेस्तत्र सैन्यानि समेतानि समन्ततः ।
प्राचीनमारुतादब्दवृन्दानीव घनागमे ॥१६७
तदैव दैवज्ञविज्ञापितोऽसौ भू पुरन्दरः ।
मुदा स्वकुलवृद्धाभिर्विहिताशेषमङ्गलः ॥१६८
सामानिकैरिव परिष्कृतः श्रीमण्डलेश्वरैः ।
चतुर्धामरराज्येव चम्वा च चतुरङ्गया ॥१६९
प्रास्थानिकैः प्रेर्यमाणस्तूर्यनिस्वाननिस्वनैः ।
विपक्षपक्षविच्छेदपिशुनैः शकुनैरपि ॥१७०
नन्दीश्वरस्येव यात्रां यात्रां तं विद्विषं प्रति ।
कर्तुकामः प्रतस्थेऽथ निर्विलम्बैः प्रयाणकैः ॥१७१॥
चतुर्भिः कलापकम्

प्रतिस्थानं प्रमदतो जिनचैत्यानि पूजयन् ।
प्रतीच्छंश्च प्रतिपदं प्राभृतानि प्रभूतशः ॥१७२
पितेवानन्दयन् सर्वान् प्रियालापादिगौरवैः ।
अभीदानं बन्दिमोक्षं सर्वतोऽपि प्रवर्तयन् ॥१७३
स्वदेशसीम्नि विजयश्रियो धाम्नि पराप्तवान् ।
शिबिरं स्थापयामास राजा जयशुभङ्करः ॥१७४॥ त्रिभिर्विशेषकम्

तथा हि —

संचारिदारुफलकैस्त्रिभूमं भूमिमण्डनम् ।
विमानमिव राट्सौधं प्राग् व्यधायि नियुक्तकैः ॥१७५
कीर्तिस्तम्भ इव स्तम्भो जयमङ्गलहस्तिनः ।
सौधासन्नवशानां तु तत्पृष्ठेषु न्यधीयत ॥१७६
तुरङ्गमन्दुराः सौधदक्षिणेनोत्तरेण च ।
कृताः पार्श्वेषु सौधस्याङ्गरक्षाणां गृहाः पुनः ॥१७७

---

१७३.१. चा°; १७३.२. मौरवैः. १७७.१. सौधं. १७७.४. गृहा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हस्तिशाला मन्दुराश्चाभितो जयनशालिनाम् ।
पदातीनां निवासास्तु कटकावेष्टतः कृताः ॥१७८

गव्यूतान् परतो राजसैन्यमावार्य सर्वतः ।
चतुरङ्गचमूयुक्ताः सामन्ता अवतस्थिरे ॥१७९

आसन्नानां वण्ठकलिर्माभूत् तेषां दवीयसाम् ।
राट्कार्येषु विलम्बश्च तत्कोशात् परतः स्थितिः ॥१८०

नियोगिनां च सर्वेषामाढ्यानां वणिजामपि ।
राट्सौधसविधे दत्ता आवासाः पत्तिरक्षिताः ॥१८१

वारनारीगृहा राजसौधात् तिर्यक् समन्ततः ।
आलीमुखे सिंहद्वारासन्ने सज्जाः पदातयः ॥१८२

गाणिक्यं तत्र माणिक्याभरणैर्दिङ्मुखानि च ।
विकासयन् विचचार नानाकामिमुखानि च ॥१८३

ततः सुवर्णहट्टाश्च रत्नदूष्यापणास्ततः ।
घृततैलतण्डुलान्नहट्टाश्चर्मकृतस्ततः ॥१८४

रजका धावकाश्चापि राजद्वाराग्रतः क्रमात् ।
ततः सुगन्धताम्बूलपूगप्रसवहट्टिकाः ॥१८५

तिर्यगाल्यां दौष्यिकान्ते कांस्यकृद् गान्धिकास्तथा ।
कणाट्टपार्श्वतो न्यूषुनैके कांदविका अपि ॥१८६

स्थानान्तरेषु परितो आभ्यन्त्यारक्षपूरुषाः ।
अज्ञातजनसञ्चारं वारयन्तः समन्ततः ॥१८७

गायन्ति पाना वाद्यन्ते मृदङ्गपटहादयः ।
पठन्ति भट्टथट्टाश्च प्रतिसामन्तमन्दिरम् ॥१८८

एवं स्वदेशसीमायामावासे वासवश्रियः ।
तस्य राज्ञो व्यतिजग्मुर्दिनाः कत्यपि लीलया ॥१८९

इतश्च —

श्रुत्वा सीम्नि तमायातं प्रयासेन महीयसा ।
तां तुङ्गशृङ्गिणीं सिन्धुं तीर्त्वा दर्पातितुन्दिलः ॥१९०

---

१८६.१. तिर्यगाल्यां.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रयाणैरनवच्छिन्नैरासन्नीभूय भूयसा ।
कोपाटोपेनावतस्थे राजा विमलवाहनः ॥१९१॥ युग्मम्
अथ स्वसैन्ये सेनान्यं सेनान्यं शक्तिसम्पदा ।
भूपं विजयवर्माणं चकार विमलः प्रभुः ॥१९२
ततो विजयवर्माऽसौ साक्षान् मान इव प्रभोः ।
प्रवादितरणतूर्यं युधेऽधावद् गजस्थितः ॥१९३
तमथायान्तमालोक्य दण्डेशो जयशासनः ।
शुभङ्करस्य नृपतेः प्रताप इव मूर्तिमान् ॥१९४
चतुर्धा सेनयाऽन्वीतो द्विपेन्द्रमधिरूढवान् ।
स्फुरन्निस्वाननिस्वानं सहसा सम्मुखोऽभवत् ॥१९५॥ युग्मम्
ततश्च —
तुरगखरखुरोत्थधूलिधूम्यालहरिनिरन्तररुद्धरोदसीकः ।
शिततरकरतालकुन्तमुख्यप्रहरणसंहतिकान्तिलोलदर्चिः ॥१९६
रभसवशविधावमानपत्तिद्विपरथघोटकनैकवन्ययूथः ।
अतिगुरुतरहेतिचक्रवालप्रसभविनाशितसत्त्वसङ्घभीष्मः ॥१९७
प्रसृमररणतूरपूरनादस्फुरदुरुकीचकपर्वघोषघोरः ।
गगनतलवहत्पृथत्कनानाकृतिनिशितोग्रफलस्फुलिङ्गभीमः ॥१९८
विमलजयशुभङ्कराभिधानस्फुरदवनीभृदनीककाननान्तः ।
प्रधनवनहुताशनः समन्ताद् भुवनभयङ्कर एव संप्रलग्नः ॥१९९॥
चतुर्भिः कलापकम्
इत्थं समरसंमर्देऽसृक्कर्दमितभूतले ।
तलवर्गप्रमादेन जयशासनकुम्भिनः ॥२००
कक्षा क्षुरप्रबाणेन सद्यो विजयवर्मणा ।
अच्छिद्यतायुर्नाडीव कदलीदललीलया ॥२०१
ततो मूलग्रहाभावात् शारिपट्टः सयोद्धृकः (?) ।
जीर्णचैत्यशिखरवन् निपपात महीतले ॥२०२
तदानीं चानावृत्ताङ्गः स कुम्भी जायशासनः ।
प्रहतो रिपुनाराचैर्न्यपतत् पर्शुभिर्द्रुवत् ॥२०३

२०२.२. शारिपट्ट·

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दैवात् तेन पततास्य शारिपट्टस्य मूर्धनि ।
जयशासनसेनानी स्वस्वामी हा न्यपात्यत ॥२०४

प्रासरन् हर्षकल्लोला विमलस्य बलोदधौ ।
शुभङ्करबलाब्धौ तु शोकौर्वानलहेतयः ॥२०५

यातेऽस्तं शूरतिलके सेनान्यां जयशासने ।
तद्दुःखदुःखित इव सूरः क्षेत्रान्तरं ययौ ॥२०६

प्रतिषिद्धे ततो युद्धसंरम्भे वेत्रिपाणिभिः ।
वरूथिन्यावुभे स्वं स्वं स्कन्धावारमुपेयतुः ॥२०७

द्वितीयेऽह्नि जयशुभङ्करेण नृपभास्वता ।
भूपः समरविजयः सेनानीत्वेऽभ्यषिच्यत ॥२०८

ततोऽसौ समरोत्साहोदञ्चद्रोमाञ्चकञ्चुकः ।
जयकुञ्जरमारूढश्चतुरङ्गचमूवृतः ॥२०९

विजयश्रीपरीम्भसंरम्भोत्तानमानसः ।
वैरिकाननदावाग्निः समित्क्षेत्रमुपागमत् ॥२१०॥ युग्मम्

तं चागच्छन्तमालोक्य जितकाशितयोन्मदः ।
विजयवर्माऽपि गजाधिरूढोऽभ्यैज्जयश्रिये ॥२११

ततः पुनः समित्तूर्योत्तालतालविलासतः ।
नृत्यत्कबन्धप्रबन्धं रणनृत्यमवर्तयत् ॥२१२

गण्डस्थलगलद्दानसरितौ पृतनेशिनौ ।
दन्तादन्ति हस्ताहस्ति हस्तिनौ तौ प्रजह्रतुः ॥२१३

ततः समरविजयाङ्गरक्षैर्दाक्ष्यदीक्षितैः ।
विजयवर्मकरिणः शिरोऽच्छिद्यत पत्रवत् ॥२१४

स्वगजं छिन्नशिरसं विजयो वीक्ष्य साहसात् ।
विद्युदुत्क्षिप्तकरणं ददौ प्रतिगजं प्रति ॥२१५

तमायान्तं श्रीसमरः सद्यः कुन्तेन वक्षसि ।
उभयापाणि जग्राह प्रीतदैवप्रसादवत् ॥२१६

---

२०६.४. शूरः.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेनागाढप्रहारेण वक्षःपृष्ठद्वयीभिदा ।
चक्रे विजयवर्माऽपि व्ययधर्मा सपद्यपि ॥२१७

ततः शुभङ्करबले हर्षाद्वैतं व्यजृम्भत ।
तेन निर्धाटितमिव शोकाद्वैतं त्वरेर्बले ॥२१८

उभयोरपि सेनान्योस्तत् तादृग् वीक्ष्य साहसम् ।
वीरान्तराणां वक्तुं नु प्राप देशान्तरं रविः ॥२१९

प्रतीहारैरवहारसंज्ञया वारिते रणे ।
स्वं स्वं शिबिरमीयाते अनीकिन्यावुभे अपि ॥२२०

तृतीयेऽह्नि श्रीविमलः सूनुं विजयवर्मणः ।
स्थापयामास विजयसिंहं दण्डाधिनायकम् ॥२२१

अमानस्वामिसन्मानपितृवैराब्धितीर्णये ।
जयेभयानपात्रं सोऽध्यारोहद् गुरुपौरुषः ॥२२२

सर्वाभिसारेण तं चायान्तं सिंहमिवाहवे ।
प्रतीयेष श्रीसमरविजयो विजयोद्यतः ॥२२३

भयङ्करो यमस्यापि नारदस्य प्रियङ्करः ।
उभयोरप्यनीकिन्योः प्रावर्तत महाहवः ॥२२४

ततश्च प्रावहन् रक्तसरितः कूलमुद्भुजाः (?) ।
तत्र पत्त्यैश्वकरिभिर्जलजन्तूयितं चिरम् ॥२२५

नाश्राम्यन् वाहनान्युच्चैरायुधानि न चाऽत्रुटन् ।
योधोत्साहो न व्यरंसीत् तथाऽभूत् केवलं त्वहः ॥२२६

तावुभावपि सेनान्यौ जिष्णू अपि महाभुजौ ।
निर्मथ्यापि रणाम्भोधिं नापतुर्विजयश्रियम् ॥२२७

एवं समरसंरम्भं दत्तस्तम्भमिवाक्षयम् ।
दर्शं दर्शं खिन्न इव रविरस्ताद्रिमाश्रयत् ॥२२८

अवहारे प्रतीहारपूरुषैर्विहिते ततः ।
ते उभे अप्यनीकिन्यौ स्वं स्वं शिबिरमीयतुः ॥२२९

इत्येवं समरभरे भुवनैकभयङ्करे ।
अत्यक्रमीत् त्र्यहो नाभूत् कान्तः कोऽपि जयश्रियः ॥२३०

---

२२५.३. पत्य°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सहासङ्ख्याङ्गिभिर्मृष्ट्वा प्रधानपुरुषक्षयम् ।
तुर्येऽह्नि विमलोऽभाणीद् दूतेन प्रति-भू भुजम् ॥२३१

क्षयं निर्मन्तुजन्तूनां सामन्तानामपि क्षयम् ।
उपेक्षसे किमुर्वीश तटस्थः कांदिशीकवत् ॥२३२

राज्ञः सुतोऽसि चेत् सत्यं तद् युध्यस्व मया सह ।
आश्लेष्टुमभिलष्यन्ति मद्बाणास्त्वां स्वबन्धुवत् ॥२३३

प्रियङ्गुलतिकामेकां कृत्वा वो मत्पदोपदाम् ।
राज्यश्रियं कल्पलतामुपभुंक्ष्वाकुतोभयः ॥२३४

इति दूतवचोहव्यनव्यक्रोधहुताशनः ।
वाचोज्वाला इवामुञ्चत् श्रीमान् जयशुभङ्करः ॥२३५

रे दूत भूताविष्टेनानात्मनीनेन पाप्मना ।
येनैष विश्वसंहारकारी वैरविषद्रुमः ॥२३६

रोपितः परिषिक्तश्च तादृग्दुर्वाक्यवार्भरैः ।
स एव दारुणतमं फलमस्य प्रदास्यति ॥२३७॥ युग्मम्

किञ्च —

परदाराभिलाषोऽयं क्षेत्रियव्याधिरुद्धतः ।
तस्य नापैष्यति स्पष्टं विना मत्कशराग्निना ॥२३८

तद्याहि दूतायातोऽहं तवानुपदमेव हि ।
द्विधाऽपि स्वपदे स्थैर्यं कारणीयः स किंप्रभुः ॥२३९

ततः स राजा सर्वौघमहाभेरीमवीवदत् ।
अरिमर्दनमुख्यांश्च सामन्तान् समनीनहत् ॥२४०

हस्तिकाश्वीयपादातरथ्याः सर्वाङ्गवर्मिताः ।
उत्साहोद्घुषिताश्चाभुः समुद्रगुणिता इव ॥२४१

सर्वतः कल्पितं मत्तमारुह्य जयकुञ्जरम् ।
सैन्यमध्यं नृपो भेजे व्योममध्यमिवार्यमा ॥२४२

दूतोक्तिश्रुत्या निस्वानस्वानैर्वाचालयन् दिशः ।
आगात् सर्वाभिसारेण विमलोऽपि नरेश्वरः ॥२४३

---

२४०.३. अरिर्मदन°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुर्धा सेनया श्लिष्टौ जयलक्ष्मै रणाङ्गणे ।
तौ राजानावमिलतां प्राक्प्रत्यक्सागराविव ॥२४४
रणतूर्याण्यवाद्यन्त वीरश्रीनृत्यहेतवः ।
त्रिलोकीकौतुकिश्रेणीमाह्वयन्ति प्रतिस्वनैः ॥२४५

ततश्च –

धानुष्काः पूर्वमेके शरवणमभितोऽरोपयन्नन्तरिक्षे
क्षिप्रक्षिप्रं क्षुरप्रैः किमपि लुलुविरे केशलावं तदन्ये ।
सर्वाङ्गं लग्नबाणाः क्षणमिह दधिरे श्वाविधां केऽपि केलीं
केचित् तूत्खातबाणास्रगरुणतनवः फुल्लसत्किंशुकाभाम् ॥२४६
चर्मासिस्तम्भहक्काडमरुकनिनदैः क्षेत्रपान् स्मारयन्तः
प्रोद्यन्नानाप्रहारार्चिततमतनवः पाटलास्रग्विणो नु ।
मूलाल्लूनोत्तमाङ्गास्तमस इव वपुर्नैकतां नाटयन्तो
ऽमुश्चर्मिप्रवीरा रणवरवरिकां सर्वतो घोषयन्तः ॥२४७
तार्क्ष्यारोहणभीषणा बहुविधैर्दिव्यायुधैर्दारुणा
विश्वस्यापि हि जिष्णवस्तुरगिणो वेगात् समुत्तस्थिरे ।
यैस्तादृग्बलशालिभिः प्रतिभटा अप्युद्भटा दानवा
जम्भारातिभयङ्करा अपि परोलक्षाः क्षणाज्जघ्निरे ॥२४८
वल्गन्ति स्म महारथा इव रथाश्चक्रायुधैर्दारितो-
त्सर्पद्दर्पपयोधिवैरिपटलीवक्षोदृषत्संपुटाः ।
यैर्मन्थाचलविभ्रमै रणमहाम्भोधौ ददानैर्भ्रमी-
स्तं निर्मथ्य समन्ततोऽपि विजयश्रीः स्राक् प्रचक्रे स्वसात् ॥२४९
युद्धाब्धिस्थजयश्रिये द्विपमहापोतस्थिताः सादिनो
धावन्तोऽभयतो ध्वजैः सितपटस्पृक्कूपकश्रीभृतः ।
केऽप्यास्फल्य मिथोऽरुजन् रणमहाम्भोधौ ममज्जुः परे
तीर्त्वाऽन्ये परिरेभिरे जयरमां स्फूर्जद्यशोभूषणाम् ॥२५०
प्रासर्पन् परितश्च रक्तसरितश्छिन्नप्रवीराननै-
र्व्याकोशाम्बुजकाननाः सशफराः श्वेतेतरैश्चामरैः ।
दण्डभ्रष्टसितातपत्रपटलैः प्रोत्फुल्लसत्कैरवा
नाराचासिकृपाणिकाप्रहरणैर्नागान्ववायाकुलाः ॥२५१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्थमायोधने योधनेतृसंहारकारिणि ।
भयादिव दवीयस्यां द्वाभ्यामपि जयश्रियि ॥२५२

शुभङ्करकराकृष्टकालपृष्ठान्निरित्वरैः ।
नाराचैर्जर्जरीचक्रे सज्जितोऽपि रिपुद्विपः ॥२५३॥ युग्मम्

पतयालुं विलोक्येभं विमलोऽतुलसाहसः ।
विद्युदुत्क्षिप्तकरणाद् ययौ स्वरथिनो रथम् ॥२५४

असमानमहो युद्धमन्याय्यं संप्रधारयन् ।
असमानभुजस्तम्भो राजा जयशुभङ्करः ॥२५५

जयद्विपादवतीर्यारुरोह रथमुत्तमम् ।
फलेग्रहावप्यनये तत्परा न हि सत्तमाः ॥२५६॥ युग्मम्

महारथस्थितौ तौ च युयुधाते पुनर्भृशम् ।
भोज्यान्तरादिव रुचिः स्फायते वाहनान्तरात् ॥२५७

तदा च चतुरङ्गया पृतनया तयोः संगरं निरीक्षितुमभोजिप्रे(?) मिलितवर्ष्मवंश्यालिवत् ।
निरुद्धकरणान्तरं गतनिमे[ष]विघ्नेक्षणं प्रसूनभृतपाणिकं दिवि दिवौकसां वृन्दमैत् ॥२५८

स्रग्पाणिर्जयलक्ष्मीश्च तदानीं तौ समासदत् ।
सजातीयमेलके हि निर्भीस्याद् भीरुकोऽपि हि ॥२५९

तस्मिन् समरसम्मर्दे मथ्यमानाब्धिभीषणे ।
शुभङ्करीयसामन्तदुर्गराजस्य कुम्भिना ॥२६०

मदोन्मत्तेन विमलकूबरी कूबराग्रतः ।
गृहीत्वोल्लालितो व्योम्नि दिव्यानां प्राभृताय नु ॥२६१॥ युग्मम्

रथमुत्क्षिप्तमालोक्योत्तरितुं करणं ददत् ।
दुर्गराजस्य वीरेणासिना जघ्नेऽधिकन्धरम् ॥२६२

श्रीशुभङ्कर राजस्य भृत्यभृत्येन लीलया ।
विमलो द्विदलीचक्रे धिक् त्वगिन्द्रियवैशसम् ॥२६३

अत्रान्तरे जयलक्ष्म्या वरस्रग्दाम चिक्षिपे ।
दिव्यैः कुसुमवृष्टिश्च श्रीमज्जयशुभङ्करे ॥२६४

निस्वानेष्ववलन् घाता नान्दीतूर्यमपूर्यत ।
अर्हद्धर्मो जयत्यत्रेदृशा यत्रेत्यघोष्यत ॥२६५

---

२५४.२. °साहस. २६२.२. उत्तरीतुं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीविमलवाहनस्य सैन्यं दैन्यभयाकुलम् ।
धीरयित्वा हतशेषं स राजाऽपृष्ठहस्तयत् ॥२६६

रणक्षेत्रं शोधयित्वोत्पाट्य वीरांश्च जीवतः ।
उत्पताकं मुदा प्राप स्वपुरं श्रीशुभङ्करः ॥२६७

रौद्रध्यानघनावेशात् स श्रीविमलवाहनः ।
रत्नप्रभायामुत्पेदे नारकोऽम्भोधिजीवितः ॥२६८

निमेषमात्रं तत्राक्ष्णोर्न शर्मास्ते प्रकाशयत् ।
सन्ततं दुःखमेवैकं गाढान्धतमसं यथा ॥२६९

तद्दुःखमनुभूयासौ तत उद्धृतवांश्चिरात् ।
जम्बूद्वीपेऽत्र भरते नर्मदाविन्ध्यकानने ॥२७०

चतुर्दन्तः श्वेतकान्तिः सप्ताङ्ग्यां सुप्रतिष्ठितः ।
विन्ध्याद्रिरेवादम्पत्योर्गजोऽभूदात्मभूरिव ॥२७१॥ युग्मम्

उद्यद्दन्तकमत्युदारकटकं द्राघिष्ठपादाद्भुतं
निर्यद्दानमहाप्रवाहसरितं वंशोन्नतिभ्राजितम् ।
अत्युच्चैस्तरकुम्भकूटघटनं शश्वद्दुरारोहणं
विन्ध्याद्रेर्युवराजमेव मनुते को नाम नामुं द्विपम् ॥२७२

प्राग्वद् वशाकरोत्क्षिप्तशीताम्भःशीकरोत्करैः ।
सिच्यमानोभयपार्श्वः सुखनिद्रालसेक्षणः ॥२७३

हस्तिनीहस्तसंस्पृष्टशिश्नकस्ताभिरेव च ।
सुकुमारद्रुशाखाग्रापनीतक्षोणिरेणुकः ॥२७४

वारुकादत्तसरससल्लकीक्लृप्तभोजनः ।
वारंवारं कराग्रेण तासां श्रोण्यादिकं स्पृशन् ॥२७५

अर्चन् करेणुकाः काश्चिद् विनिद्रकमलोत्करैः ।
पराभिस्ताड्यमानश्च तैरव च तदीर्ष्यया ॥२७६

क्रीडंस्ताभिः सरसीषु स्फुटत्कमलराजिषु ।
जलेभहस्तावगूढामीर्ष्यन् वीक्ष्य करेणुकाम् ॥२७७

मोच्यमानस्तन्तुबद्धस्ताभिरेवातिवेगतः ।
मोचयंस्तास्तन्तुबद्धा बद्धाक्षेपः क्षणादपि ॥२७८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति त्वगिन्द्रियसुखं दन्तिनीभिः स मानयन् ।
कामिनीभिः काम इव चिरं तस्थौ यदृच्छया ॥२७९॥

सप्तभिः कुलकम्

अन्यदा ददृशे सैष करीन्द्रः करिबन्धकैः ।
मेघवाहनराजाय न्यवेदि च ससौष्ठवम् ॥२८०
देव स्फटिकशैलस्य शिखरं किल जङ्गमम् ।
सुलक्षणश्चतुर्दन्तः सप्ताङ्गयां सुप्रतिष्ठितः ॥२८१
विन्ध्याटव्यां करीन्द्रोऽस्ति शक्रेभस्येव सोदरः ।
द्वारि तेनार्गलितेन सत्यः स्या मेघवाहनः ॥२८२
तेनाकारि वारिबन्धो दर्शितास्य स्वहस्तिनी ।
यूथं विहाय तत्पृष्ठे सोऽलगत् स्पर्शवशियतः ॥२८३
सा हस्तिनी धावयित्वा वारिबन्धे प्रवेशिता ।
एकया रथ्यया निष्काशिता चाथ द्वितीयया ॥२८४
वारिबन्धं प्रविष्टेऽत्र गजे रथ्याद्वयं क्षणात् ।
पिदधे स दधे मध्ये रिपुवत् करिबन्धकैः ॥२८५
क्षुधातृषाशोषितोऽसौ मुक्ताहारोऽत्यमर्षतः ।
क्षुत्तृड्दुःखं सहमानो कामनिर्जरया तया ॥२८६
अचिन्त्यवीर्ययोगेनाल्पकषायतया स्यात् ।
मध्यमगुणसम्पत्त्योत्तममर्त्यायुरार्जयत् ॥२८७॥ युग्मम्
ततश्चायुषि सम्पूर्णे स्वःपुरीनूतनप्रतौ ।
कौशिक्यामिव पूतायां कौशाम्ब्यामिह सत्पुरे ॥२८८
राज्ञः समरसेनस्य विष्वक्सेनस्य दोःश्रिया ।
राज्ञी मदनमञ्जूषा मञ्जूषा शीलसम्पदः ॥२८९
तेन हस्तीन्द्रजीवेन नन्दनत्वेन शिश्रिये ।
शुभलक्षणसम्पूर्णं सा च तं सुषुवे सुतम् ॥२९०॥ त्रिभिर्विशेषकम्
राजा च कारयाञ्चक्रे तस्य जन्ममहोत्सवम् ।
श्रीविजयसेन इति नामधेयोत्सवं तथा ॥२९१
स एष त्वं नृपायं ते स्पर्शनाक्षप्रवर्त्तितः ।
इत्थं भवपरावर्तः श्रीराजेन्द्र विभावय ॥२९२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततश्च –

सपदि विजयसेनः क्ष्मापतिः श्रीसुधर्मव्रतिपतिसततोद्यज्ज्ञानदीपप्रयोगात् ।
प्रसृमरवरजातिस्मृत्युदारप्रदीपावगतनिजभवौकोजन्मभूमीचतुष्कः ॥२९३

सुगुरुवचसि साक्षात् प्रत्ययाद्वर्धमानप्रवरगुरुविवेकोल्लासिसंवेगवेगः ।
जिनमतनिधिना मां दुर्गतेर्नाथ रक्षेत्यभिदधदयमूचे श्रूयतां तावदन्यत् ॥२९४॥ युग्मम्

इति श्रीनिर्वाणलीलावतीमहाकथेतिवृत्तोद्धारे **लीलावतीसारे** जिनाङ्के **स्पर्शनेन्द्रियविपाक-व्यावर्णनो** नाम सप्तम उत्साहः* ॥

* ग्रं० ३२३ ॥ ६० ॥ अर्हम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अष्टम उत्साहः

अथापरेऽह्नि विजयसेनादीनां सभासदाम् ।
सुधर्मस्वाम्युपादिक्षत् सुधाधाराकिरा गिरा ॥१
स्पर्शनस्य स्वरूपादि राजन् न्यक्षेण कीर्तितम् ।
अधुना रसनस्यैतद् विस्तरेण प्रकीर्त्यते ॥२
जातु कस्यापि विषयसत्त्वरं करणान्तरम् ।
रसनं तु सदाऽप्येवं तत् तेष्वेतत् सुदुर्जयम् ॥३

यदुक्तम् —

रसनाक्षेषु योगेषु मनो मोहश्च कर्मसु ।
व्रतेषु ब्रह्म चत्वारि जीयन्ते कृच्छ्रतः खलु ॥४
रसनास्वैरिणी चेयं रसान् विटनटानिव ।
यथेष्टमुपभुञ्जाना न तृप्यति सुदृप्यति ॥५
रसाः पुनरविरुद्धविरुद्धात्मतया द्विधा ।
तत्राविरुद्धा घृताद्या विरुद्धा मदिरादयः ॥६
तत्राद्येष्वपि लाम्पट्यमनर्थाय प्रजायते ।
सुधालौल्याच्छिरच्छेदं राहोराहुः पुराविदः ॥७
विरुद्धेषु तु वाञ्छाऽपि दुष्टा लौल्ये तु का कथा ।
नेष्टो जनङ्गमः स्प्रष्टुमप्याश्लेष्टुं किमुच्यताम् ॥८
रसनारसलाम्पट्यपट्यावृतमतीक्षणाः ।
अपेयाभक्ष्यरसिकाः पतन्ति नरकावटे ॥९

तथा हि —

ऐहिकामुष्मिकापायकारिणीमपि वारुणीम् ।
रसज्ञा विवशात्मानः पिबन्ति च वमन्ति च ॥१०
मदिरामदराक्षस्या ग्रस्तचैतन्यवैभवाः ।
पतन्ति दासपादेषु निन्दन्ति च गुरुमपि ॥११



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वादितानववादित्रा नृत्यन्ति च निरङ्कुशाः ।
रथ्यासु सुप्ता वदने लिह्यन्ते शुनकैरपि ॥१२
कादम्बरीपिबाः पापा मांसपेश्युपदंशिनः ।
क्रोडसट्टालावकीयं रसं च ब्रुवते सुधाम् ॥१३
क्रव्यादिनः क्रव्यकृते गोरिं(?) गायन्ति वागुराम् ।
लान्ति द्रुमूलं श्रयन्ते रक्षन्त्यम्बु मृगाप्तये ॥१४
गलजालादिभिर्घ्नन्ति निर्घृणा मत्स्यकच्छपान् ।
वीतंसपञ्जराद्यैश्च पापा हिंसन्ति पक्षिणः ॥१५
चणकादीन् विप्रकीर्य वशीकृतिकणानिव ।
विश्वास्य क्रूराः क्रोडादीन् क्षिण्वते क्षणतृप्तये ॥१६
भिन्दन्ति मधुजालानि सरघा घातयन्ति च ।
फलं च पञ्चोदुम्बर्या सन्धानानि च भुञ्जते ॥१७
अनन्तकायिकान् रात्रिभोजनं नवनीतकम् ।
कुक्कुट्यण्डकरसं च रसयन्ति रसोत्तृपः (?) ॥१८
पापीयांसः केऽप्यभक्ष्यं भक्षयन्ति न केवलम् ।
यागे छागादिकदनं वदन्ति च सुरश्रिये ॥१९
न मांसमद्ययोर्दोषो न राज्ञां मृगयादिषु ।
प्रवृत्तिरेषा भूतानां वायोस्तिर्यग्गतिर्यथा ॥२०
किञ्च जीवो नास्ति तदभावात् कस्य शुभाशुभे ।
ततश्चाश्नीत मांसादि स्वैरमित्यूचिरे परे ॥२१
इत्यादिवाक्यैः प्रवर्त्य हिंसादौ घस्मरान्नरान् ।
स्वयं पुरःसरीभूय नयन्ते नरके सुखात् ॥२२
तत्रातिदुःसहं दुःखं चिरं सोढ्वा कथञ्चन ।
तत उत्पद्य सिंहादौ पललास्वादलम्पटे ॥२३
दुष्कर्मभारिता यान्ति नरके भैरवे पुनः ।
रसनाराक्षस्यवश्या कं न क्लेशं करोत्यहो ॥२४॥ युग्मम्
रसनेन्द्रियलाम्पट्ये दृष्टान्तः स्पष्टमुच्यते ।
राजन् श्रीविजयसेन मन्त्र्यसौ जयशासनः ॥२५

---

१३.३. °सट्टां. १४.२. वग्गुरां. २२.२. हिंसादो.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो गुरूनमस्कृत्य मन्त्री व्यज्ञापयत् प्रभो ।
किं कथं प्राङ् मया चक्रे श्रावय श्रवणौ मम ॥२६

ततो ज्ञानरत्नदीपप्रकाशभुवनोदरः ।
श्रीसुधर्मागणधरस्तमूचे वाग्मिनां वरः ॥२७

अस्ति श्रीधातकीखण्डे प्रतीच्यमेरुभारते ।
मण्डलं कोशला नाम किलाखण्डलमण्डलम् ॥२८

अत एवार्हतां कल्पकल्याणकमहादिषु ।
मिलत्यखिलमप्यत्र किलाखण्डलमण्डलम् ॥२९

श्रीसुकाञ्चीपुरी तत्र सुकाञ्चीव भुवो बभौ ।
जज्ञे यस्या झणत्कारैर्वाचालं हरिदम्बरम् ॥३०

अर्हद्धर्मावचूलोऽत्र रत्नचूलोऽशुभन्नृपः ।
यत् सम्यक्त्वाचलस्याग्रे स्वःशैलोऽपि चलाचलः ॥३१

बाह्यं दृष्ट्वेवारिचक्रं विनमद्धर्मवैभवात् ।
तस्यान्तरङ्गमपि तत् स्वयं नेमे भयातुरम् ॥३२

तस्य प्रेमगुणरत्नावली रत्नावली प्रिया ।
यत् सम्यक्त्वझलत्कारो दिनं प्रत्यधिकाधिकः ॥३३

तस्या रूपं वपुर्भूषा शीलं तस्यापि भूषणम् ।
तस्यापि भूषा सम्यक्त्वं संवेगोऽस्यापि भूषणम् ॥३४

अद्य श्वो वा परिव्रज्यां राज्यं हित्वा जिघृक्षतोः ।
राज्यं च भुञ्जतोर्भोगफलकर्मोदयात् परम् ॥३५

मिथोऽवियुक्तमनसोर्यथा युगलधर्मिणोः ।
ययुः सहस्रा घस्राणां तयोरेकाहहेलया ॥३६॥ युग्मम्

अन्यदा सुषुवे देवी कुमारं स्फारकान्तिकम् ।
जितारिरिति नामास्य सुषुवे च महीपतिः ॥३७

समये च कलाचार्याभ्याशेऽभ्यास्यत् कलाः कलाः ।
विशेषाच्च धनुर्वेदमनिर्वेदं स राजसूः ॥३८

कलाकूपारपारीणं यौवनश्रीतरङ्गितम् ।
तं भूपो भूपकन्याभिः प्रमोदादुदवाहयत् ॥३९

---

२८.१. षंडे. ३८.२. °भ्यासे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुलाध्वनाऽनागता याऽध्यापकाध्यापिता न या ।
मांसाशितां कलामेनां पाठितोऽसौ रसज्ञया ॥४०

ततश्च –

दुर्दान्तरसनाश्वेनापहृतोऽपथगामुकः ।
कुमित्रैर्मृगयाऽटव्यां सोऽवस्थानमकार्यत ॥४१

तथा हि –

चलवेध्यव्यधाभ्यासस्तेषां भीक्रोधबोधनम् ।
वपुर्दार्ढ्यं श्रमजयश्चेत्याद्या मृगयागुणाः ॥४२

किञ्च –

नास्त्यात्मा तदभावाच्च न कर्म न परं जनुः ।
तदेव मान्यतां स्वेच्छा कृत्याकृत्यकथा वृथा ॥४३
पापर्द्धिव्यसनी सोऽथ दवाग्निरिव संहरन् ।
असङ्ख्यान् प्राणिनः सङ्ख्यातीतां पापर्द्धिमार्जयत् ॥४४
रसनारसनाट्येन नटितोऽसौ ततः पिबन् ।
मधूनि बहुधा क्षौद्रं भक्षयन् सर्वभक्ष्यभूत् ॥४५
पापः मित्रैः सपीत्यासौ ततो धावति गायति ।
दिगम्बरो नृत्यति च तदकीर्तिस्तथैव च ॥४६
ततो निरङ्कुशलसद्रसनालौल्यसागरम् ।
तं कुमारं तथा वीक्ष्य पितरौ तेमतुस्तमाम् ॥४७
स्वपुत्रानार्यकार्यौघासञ्जिताऽशुभसंहति- ।
सम्भावितोग्रनरकपातसम्भूतमन्युना ॥४८
अजस्रस्रवदुष्णोष्णबाष्पदूनास्यपङ्कजा ।
देवी भूपमथोपेत्य सगद्गदमदोऽवदत् ॥४९॥ युग्मम्
महापापादतो घोरान्नरकद्वारतो द्रुतम् ।
वार्यतां वार्यतां वत्सो मैव स्वामिन्नुपेक्ष्यताम् ॥५०
राजाऽऽख्यद् देवि सुजनर्बहुशोऽप्येष वारितः ।
नास्मान्निवर्तते पापादुपदेश्यस्तदेष न ॥५१

---

४७.४. °तुत्तगाम्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देव्यूचे चिन्त्यतां कोऽप्युपायस्तत्र पुनः प्रभो ।
रत्नाकरस्य रत्नानि धीमतो धीर्नवा नवा ॥५२

सोपक्रमे कर्मणि चोपायोऽपि स्यात् फलेग्रहिः ।
पुत्रोऽस्ति देवपादानां कुमारो वार्यतां ततः ॥५३

सखेदं पुनरूचे राट् क उपायोऽत्र साम्प्रतम् ।
मन्त्री विमलमत्याख्योऽत्रान्तरे भूपमब्रवीत् ॥५४

एकदाऽऽहूयतां देव कुमारोऽत्र स्वसन्निधौ ।
देवराज्योस्तदाऽऽलापे वक्ष्येऽहमपि किञ्चन ॥५५

राज्ञा सद्यः समाहूतः कुमारो नृपमानमत् ।
सिंहासनेऽथ स्वासन्ने तेन प्रेम्णा न्यवेशितः ॥५६

कच्चित् कुमार कुशलं सर्वाङ्गं तव सम्प्रति ।
इति पृष्टो मुदा पित्रा पुत्रोऽवादीत् कृताञ्जलिः ॥५७

यस्य प्रसादात् कुशलं जृम्भते जगतीतले ।
तस्य सुस्वामिनः पुत्रे कुशलं मयि निश्चलम् ॥५८

तातपादैरधुना तु हूतो येनाऽस्मि हेतुना ।
तन्निवेदनप्रसादं लब्धुं लुब्धे श्रुती मम ॥५९

व्याजहाराथ पृथ्वीशः शृणु वत्स विवक्षितम् ।
अनर्वाक्पारसंसारपारावारभयाकरात् ॥६०

प्रदीप्तभवनाकारादद्य श्वो वा विनश्वरात् ।
गृहवासान्मोहपाशान्निर्विण्णं मम मानसम् ॥६१॥ युग्मम्

नृजन्मकल्पवृक्षस्य महाव्रतमहाङ्कुरैः ।
महानन्दफलं वत्सादित्सते मानसं मम ॥६२

तत् कुमार महीभारं दुर्धरं धर सम्प्रति ।
शेषराज इवेदानीं विश्राम्याम्यस्य्विश्रमम् ॥६३

इति श्रुत्वा मुहुः स्मित्वा कुमारो नृपमभ्यधात् ।
तात प्रस्तूयते वक्तुं किञ्चित् प्रस्तुतवर्त्मनि ॥६४

यदि प्रसादविमुखास्तातपादा भवन्ति न ।
वत्सो यथेष्टमाचष्टामित्याचष्ट स्फुटं पिता ॥६५॥ युग्मम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः कुमारो जितारिः पापोपाध्यायपाठिताम् ।
चण्डां ताण्डवयामास वितण्डां स्वपितुः पुरः ॥६६

जन्मान्तरार्जितफलभोक्ताऽऽत्मा चेद् भवेत् पितः ।
तद् युज्यते सर्वमिदं तदभावे तु निष्फलम् ॥६७

यद्वाऽस्त्वात्मा बहुवादिप्रयुक्तहेतुजालतः ।
तथाऽपि कर्ता नैवासौ भुङ्क्तेऽसौ प्राक्कृतं यतः ॥६८

कृतनाशाकृतापत्तिदोषादात्मा करोतु वा ।
किन्तु न ज्ञायते कृत्यं शुभाशुभनिबन्धनम् ॥६९

अर्थापत्त्याऽथ बुध्येत शुभाशुभकरी क्रिया ।
दृश्यन्ते तारकादीनां यद्विमाना नभस्तले ॥७०

शुभक्रियाफलमिदं यदेषूत्पत्तिरङ्गिनाम् ।
तात तान्यप्यसङ्ख्यानि देवा अप्येष्वसङ्ख्यकाः ॥७१

प्रतिक्षणमसङ्ख्याताश्च्यवन्ते च भवन्ति च ।
तदेतद् घटते तर्हि चेद्यायुस्तत्र पापिनः ॥७२

यतोऽसङ्ख्यास्त एवेह हिंसा तत् स्वर्निबन्धनम् ।
बलादापतितं तात हिंस्राद्यैस्तज्जितं जितम् ॥७३

किञ्चाहिंस्रा यतयोऽत्र ते मिता एव यद् भुवि ।
ततस्ते स्युः कुण्ठिपङ्गुभिक्षाकास्ते मिता यतः ॥७४

तथा हेत्वनुरूपं स्यात् कार्यमेतत् सुविश्रुतम् ।
कायक्लेशात् ततस्तात स्यात् सुखप्रभवः कथम् ॥७५

तत् सर्वशास्त्रतत्त्वज्ञमौलिना स्वामिना वृथा ।
दीक्षिष्ये सम्प्रतीत्युक्तं तदाचन्द्रं महीं पृणु ॥७६

सर्वथाऽनुपदेश्योऽयमिति भूभृति मौनिनि ।
सखेदं सास्रमूचेऽथ देवी रत्नावली सुतम् ॥७७

हा हा पुत्र किमपरं वैराग्यस्य व्रतस्य च ।
त्वत्पितुः कारणं हंत तव दुश्चेष्टितं विना ॥७८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपि च —

त्रिलोकख्यातयशसो देवस्यैतस्य नन्दनः ।
धिग् दैवेन कृतः किं त्वं यदभव्योऽसि पुत्रक ॥७९

भविष्यसि कथं वत्स भवाब्धौ क्षिप्त एनसा ।
यत् प्रत्यक्षं भवस्येवं हा हता सा जनन्यपि ॥८०

कलङ्कितोऽद्य भवता पितृवंशोऽतिनिर्मलः ।
हा पुत्र भगिनिका माता त्वय्यभव्ये करोतु किम् ॥८१

वत्स यद्यपि भव्योऽसि तथाऽपि भवभाजनम् ।
कथमासन्नभव्यस्य स्युरुल्लापा अमूदृशाः ॥८२

तत्प्रसादं कुरु वत्स मा मुधा भूः स्ववैरिकः ।
पापादमुष्माद् विरम रमस्व जिनवर्त्मनि ॥८३

कुमारोऽथाह सक्रोधं मातस्त्वं यदि धार्मिकी ।
तदप्रियं कर्कशं च किमेवं मयि भाषसे ॥८४

दुर्भाषिणी तु निर्भाग्यंमन्या धन्याऽसि न क्वचित् ।
सर्वथोपेक्षणीया तत् त्वमेवं भाषसे मुधा ॥८५

किं चास्म्यनुचिताचारफलमाप्स्यामि किं तव ।
य आस्खलति तस्यैव भज्यते दन्तमालिका ॥८६

मन्त्री विमलमत्याख्योऽथाचख्यौ तं स्वमातरि ।
कुमार मा कुपोऽपत्यस्नेह इत्यपराध्यति ॥८७

मृगीगवाश्वाशकुनिकलविकद्विकादयः ।
अपत्यस्नेहनटिताः पश्य किं न हि कुर्वते ॥८८

कुमारनिरपेक्षोक्तिबाणवृन्दैररुन्तुदैः ।
श्रीरत्नचूलो राणमौनव्रतभङ्गमकार्यत ॥८९

ततोऽवदन्नृपस्त्वद्वद् यद्युपेक्षाऽस्ति नस्त्वयि ।
राज्यं दद्मः कथं तस्मात् तत् कुर्या येन नः सुखम् ॥९०

अथाभाणि कुमारेण देवपादा दिशन्तु मे ।
यत् किञ्चनाप्यनुचितमाचराम्यवकीर्णिवत् ॥९१

---

७९.४. पुत्रकः.

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

राज्ञोचे पुत्र ये घस्रा जिनधर्मावकेशिनः ।
ते गरीयोदुःखलक्षाम्भोधिभ्रमनिबन्धनम् ॥९२
प्राप्ते नृत्वे सर्वधर्मकर्मनिर्माणकर्मठे ।
न हि निर्मन्तुजन्तूनां युक्तियुक्तं प्रमापणम् ॥९३
नक्तंदिनं शबरवदटव्यां वसतस्तव ।
राज्यश्रिया गुणः को नु चिन्तामणिवयस्यया ॥९४
नानाविधानि पेयानि खाद्यान्यपि च सन्ति ते ।
मलाविलैर्निन्दितैश्च मद्यमांसैरलं ततः ॥९५
जीवघातेऽनार्यकार्ये यन्निमित्तं तवोद्यमः ।
तल्लभ्यते धनेनापि स्वयं हिंसा ततो वृथा ॥९६
अहर्निशमिदं वत्स यदाखेटकखेटनम् ।
तच्च प्राचीनपुरुषमेरां लुम्पति मूलतः ॥९७
कुलमेरामतियतां कथं शास्ति विधास्यसि ।
स्वयं भिन्दन् स्वमर्यादां यादोवज्जडसङ्गतः ॥९८
तदनुत्तानचित्तेन प्रशस्तेन दिवानिशम् ।
देशकोशचतुरङ्गचमूचिन्ता विरच्यताम् ॥९९
किञ्चाहिंस्रेण धर्मज्ञमिश्रेण भवताऽनघ ।
आचन्द्रार्कमिदं राज्यं प्राज्यं न्याय्यं प्रभुज्यताम् ॥१००
स्मित्वा जितारिणाऽभाणि साशङ्कः प्रहरेन्न यः ।
तस्य वाणिजकस्येव न हि राजति राजता ॥१०१
अथाऽऽख्यद् विमलमतिर्मतिवैभवगीःपतिः ।
देवामात्यैः स्वप्रतिभाप्रतिभातमुदीर्यते ॥१०२
श्रूयते स्वामिभिः सम्यक् संप्रधार्य विधीयते ।
न पुनस्तेषु विज्ञप्त्या प्रसादः प्रतिहन्यते ॥१०३
तद्ब्रुवेऽस्मि कुमाराय सारं स्वानुभवास्पदम् ।
यदि सम्यक् श्रीकुमारोऽवधत्ते सुप्रसद्य मे ॥१०४
कुमारोऽप्यभ्यधाद् धीमन् स्वमेधोद्बुद्धमुच्यताम् ।
राज्ञां धियः सचिवधीः सध्रीची हि दिवाऽनिशम् ॥१०५

---

१०१.२. सासंकः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मन्त्र्यूचे नन्दनोद्याने देव स्वपुरमण्डने ।
मुनिवृन्दारकैर्नित्यं सेव्यो वृन्दारकैरपि ॥१०६

संसाराम्बुधितारणैकतरणिः प्रोद्यन्मनःपर्यवा-
वध्युद्वीक्षितविश्वविश्वसरणिः सिद्धान्तचिन्तामणिः ।
नानालब्धिमहानिधिर्नरसुरश्रेणीवसत्सन्निधिः
कल्येऽभ्यैत् किल जङ्गमः सुरतरुः श्रीसुव्रतः सद्गुरुः ॥१०७॥ युग्मम्

तं चानन्तुमहं तदैव गतवान् रोमाञ्चितस्त्रिप्रद-
क्षिण्या चारुमहीरजस्तिलकविभ्राजिष्णुपञ्चाङ्गकः ।
भक्त्या वन्दितवान् सुसाधुपरिषद्विभ्राजितं श्रीगुरुं
मर्त्यामर्त्यसभान्तरे समुचितस्थाने ततस्तस्थिवान् ॥१०८

ततश्च मन्दरक्षुब्धदुग्धाम्भोधिगभीरधीः ।
श्रीसुव्रतगुरुश्चक्रे देशनां क्लेशनाशिनीम् ॥१०९

अत्रान्तरे गलत्कुष्ठगलिताङ्गुलिनाशिकः ।
स्फुटिताङ्गस्रवत्पूतिधारासंसिक्तभूतलः ॥११०

मधुजालकवद् विष्वग्मक्षिकाकम्बलावृतः ।
चण्डालवत् शिष्टलोकैः संपर्कालापवर्जितः ॥१११

चलाचलकृमिकुलाकुलिताखिलविग्रहः ।
अज्ञानिजनताक्रोश्यस्तास्वसभ्योक्तिभीषणः ॥११२

दुष्कर्मोदयदृष्टान्तो विद्वन्निर्वेदमन्दिरम् ।
वसुमित्रो नाम पुमानाययौ तत्र पर्षदि ॥११३॥
चतुर्भिः कलापकम्

श्रीसुव्रतं सूरिराजं नमस्कृत्य कृताञ्जलिः ।
स च विज्ञापयामासौष्ठस्फोरोन्मितया गिरा ॥११४

यथा दुःख्यस्मि भगवंस्तथाऽन्योऽप्यस्ति कश्चन ।
भगवानाह हे भद्र सावधानो निशामय ॥११५

---

१०७.३. °संनिधि.	११०.१. °कुष्ठि.



Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

अनन्तरभवेऽप्यासीद् यत् ते दुःखं किमप्यहो ।
तदनन्ततमे भागेऽप्येतद् दुःखं न वर्तते ॥११६
यतस्त्वयाऽप्रतिष्ठाने महादुःखमनुक्षणम् ।
त्रयस्त्रिंशिसागराणि निरन्तरमसह्यत ॥११७
ततश्चान्तर्मुहूर्तायुर्मत्सीगर्भे झषोऽभवः ।
ततोऽभूरप्रतिष्ठाने त्रयस्त्रिंश्यब्धिजीवितः ॥११८
षट्षष्टिं सागराण्येवं दुखं सोढ्वा निरन्तरम् ।
अजीर्णदुष्कर्मशेषाच्छुनीगर्भमुपागमः ॥११९
कालाज्जाता कालशुनी तद्बाल्येऽमृत तत्प्रसूः ।
दुर्दान्ताभीरडिम्भैः सा योध्यते स्म श्वपोतकैः ॥१२०
तत् तीक्ष्णदन्तनखरप्रहारैर्दारिताङ्गिका ।
क्षुत्तृष्णार्ता मृता जज्ञे राष्ट्रवर्धनपत्तने ॥१२१
आजन्मनिःस्वतासह्ययोगराजाख्यवण्ठतः ।
माहिलस्य गृहदास्यां चौर्यागःकृत्तनश्यथ (?) ॥१२२
त्वग्दोषदूषिताङ्गयां च प्राजनिष्ट भवान् सुतः ।
तद्दोषात् प्राच्यदुष्कर्मशेषतश्चेति कुष्ठयभूः ॥१२३॥ त्रिभिर्विशेषकम्
कुष्ठयाह भगवन् केन कर्मणा भवपञ्चके ।
दुःखीत्यभूवं प्रसद्याविष्कुरु ज्ञानभास्कर ॥१२४
सूरिरूचे भद्रमुख त्वमत्रैव हि भारते ।
श्रीकाञ्चनपुरस्वामिनभोवाहनभूपतेः ॥१२५
देव्याः कनकमञ्जर्याः पुत्रोऽभूः कनकध्वजः ।
मातापितृभ्यां मेने स स्ववंशालङ्कृतिध्वजः ॥१२६॥ युग्मम्
स च राक्षसवन् मांसप्रियो हिंसापरायणः ।
गोलिकाधनुषा पक्षिकुलं विव्याध शैशवे ॥१२७
श्येनैः शकुन्तशकुनिमुखानाकाशचारिणः ।
जालैः कच्छपमत्स्यादींश्चाग्रहीज्जलचारिणः ॥१२८
मृगादीनां च मृगयां स्वयं मृगयुभिस्तथा ।
निर्मिमाणः स नातृप्यद् भस्मकव्याधिमानिव ॥१२९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं बहुना —

न स प्रकारः कोऽप्यस्ति येनासौ मांसलोलुपः ।
जलस्थलाम्बरचरान्नावधीद् दण्डपाणिवत् ॥१३०

जुगुप्सते धर्मगुरून् साधूनुपहसत्यपि ।
मित्राद्यैर्वारितोऽवादीन्नास्त्यात्मा न भवान्तरम् ॥१३१

प्रज्ञापनीयो नैवायमिति शिष्टैरुपेक्षितः ।
अपेक्षितश्च पापिष्ठैः सोऽजनिष्ट निरङ्कुशः ॥१३२

ततश्च तादृग् दुष्कर्मार्जितदुष्कर्मभारितः ।
निममज्जाप्रतिष्ठाननरकाब्धौ स चासि भोः ॥१३३

तत् तादृग्गुरुमाणिक्यधाम्ना ध्वस्ततदावृतेः ।
जातिस्मृतिनिधिस्तस्योज्जघटेऽचिन्त्यवीर्यतः ॥१३४

स्वैहिकोदन्तदृष्टान्ताद् गुरुवाचाऽनुमापितान् ।
जातिस्मृत्या स्वसंवित्त्या निश्चिक्ये प्राग्भवानसौ ॥१३५

सोऽथ व्यज्ञापयत् सूरिं निःसन्दिग्धमिदं प्रभो ।
कनकध्वजनास्तिक्यफलमास्वादितं मया ॥१३६

तदत्र भगवन्नस्मि भवभ्रमणरीणधीः ।
सर्वाहारपरीहाराद्युष्मद्देवनृपाश्रयात् (?) ॥१३७

प्राणत्यागं चिकीर्षामि [वु]वुर्षामि च सद्गतिम् ।
गुरुराख्यदिदं कर्तुं जागर्ति तव योग्यता ॥१३८॥ युग्मम्

ततस्तस्य गुरोः पार्श्वेऽनशनं प्रतिपद्य सः ।
गृध्रपृष्ठविधानेनावतस्थौ स्थेमपर्वतः ॥१३९

तत्र गृध्रकंककाकवृकश्वानशिवादिभिः ।
भक्ष्यमाणः शुभध्यानात् क्षीणायुः कल्प आदिमे ॥१४०

विमानाधिपतिर्देवो विभाकरविभोऽभवत् ।
सद्यप्रयुक्तावधिश्च तद्गुरोः पार्श्वमागमत् ॥१४१॥ युग्मम्

स एवाहं कुष्ठी सकलजनतादुर्भगतमः
प्रसादाद् वः पूज्याः सपदि दिविषद्भूवमभजम् ।

---

१४२.२. °भूय°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति व्याहृत्योच्चैश्चरणकमलं सुव्रतगुरो-
नैमज्जित्वा (?) नाट्यं व्यरचयदगात् स्वास्पदमसौ ॥१४२

इति पुण्यापुण्यफलं मयाद्याध्यक्षमीक्षितम् ।
कुमार बहुमन्यस्व मन्यस्व पितृभाषितम् ॥१४३
विहस्याह कुमारोऽथ मन्त्रिन् कुहकमोहितः ।
मां मोहयितुमारब्धो जितारिर्मोह्यते न हि ॥१४४
कालदष्ट इवासाध्य उपदेशत्र्यचामसौ ।
इति निश्चित्य सचिवो जुजुषे जोषमञ्जसा ॥१४५
ततो राजा रत्नचूडश्चूडारत्नं विवेकिनाम् ।
शरीरचेष्टामाधत्स्वेत्युवाच निजनन्दनम् ॥१४६
महाप्रसादो देवेत्यभिधायोत्थाय राजसूः ।
समाससाद स्वावासं जितकाशी स्वचेतसा ॥१४७
अथ देवी सनिर्वेदं मेदिनीशं व्यजिज्ञपत् ।
धर्मानभिज्ञस्त्वत्सूनुः कथं देव भविष्यति ॥१४८
राजाऽऽख्यद् देवि कः कस्य स्वः परो वाऽथवा न कः ।
संसारनाटकेऽमुष्मिन् संदृब्धे कर्मसूत्रिणा ॥१४९
आन्तरारिजितोऽप्येष जितारिः कीर्तितो मृषा ।
न चारोपिततारत्वं शुक्तिकार्धं तदर्थकृत् ॥१५०
दुष्कर्मसन्निपात्येष योग्यो धर्मौषधस्य न ।
तदस्य चिन्तया देवि मा विषादं कृथा वृथा ॥१५१
तदस्य राज्यदानेनैहिकं कार्यं समाप्यते ।
पारत्रिकं तु प्रव्रज्याङ्गीकारात् परिपूर्यते ॥१५२
यशोभाजनमन्त्र्यूचे चतुःकर्णं महीभुजे ।
भाविताईद्वचनानामेतद्देवाति युज्यते ॥१५३
स्वामिन् कुमारः किन्त्वेष राज्यस्यार्हो न सर्वथा ।
देवो जानात्येव तस्य राज्यकार्यौत्सहिष्णुताम् ॥१५४
ततः सीमालभूपालैः सम्भवी देशविप्लवः ।
ततः सङ्घस्य चैत्यानां धर्मस्यापि च विप्लवः ॥१५५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवादिष्टं नोचितं तत् पाल्यतां तावदुर्व्यसौ ।
यशोराजकुमारः स्याद् यावदुर्वीधुरन्धरः ॥१५६
यशोभाजन साध्वेतद् यशोभाजनमेव नः ।
इति प्रतिश्रुत्य राजा प्राग्वत् स्वं राज्यमन्वशात् ॥१५७
सोऽन्यदा व्यसनासक्तो राज्यकार्यपराङ्मुखः ।
जितारिरश्वथट्टेन ययावाखेटकं प्रति ॥१५८
गच्छता तेन दृष्ट्वाऽग्रे मुक्तोऽश्वो जम्बुकं प्रति ।
अपरैरश्ववारैश्च ततोऽसौ मृगधूर्तकः ॥१५९
ऋजुमार्गेण धावित्वा झटित्येव निवर्तते ।
काटेषु(?) लीयते तूर्णं निर्गच्छति च वामतः ॥१६०
प्रवृत्य दक्षिणेनाशु ततोऽपि च निवर्तते ।
यद्दिशा तेऽभिधावन्ति वलत्येष ततस्ततः ॥१६१
शृगालसिंहेन तेन नृसिंहा अपि ते क्षणात् ।
शृगालतामनीयन्त दुर्गतौ योग्यतामपि ॥१६२
तं हन्तुमेवमेतेषामभ्यायातां परस्परम् ।
कुमाराश्वो जसरविहयेनास्फलितोऽधिकम् ॥१६३
कुमाराश्वोऽग्रकायेन नभस्युल्ललितो भृशम् ।
कुमारं पातयामास दृषद्दृढमहीतले ॥१६४
गाढाभिघातेन तेन कुमारश्चूर्णिताङ्गकः ।
कुम्भीपाकेऽतिसुखतः प्रवेशायेव वेधसा ॥१६५
क्षणाद् विपन्नो जितारी रसलौल्यकुमित्रयुक् ।
रौद्रध्यानहयारूढो नरकं प्रापदादिमम् ॥१६६॥ युग्मम्
तत्र सागरमेकं सोऽनुभूयाशर्म केवलम् ।
मगधेषु अग्रगाधेषु ग्रामे गोब्बरनामनि ॥१६७
कुटुम्बिनः सत्यहरेः सर्वदेवीप्रियोदरे ।
दुहितृत्वेन संपेदे जितारिर्नरकात् ततः ॥१६८॥ युग्मम्
सा च सत्यमतिर्नाम्ना यौवने पर्यणीयत ।
सत्यनामाभिधानेन कुटुम्बितनुजन्मना ॥१६९

---

१६०.१. धावित्वा.

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

क्रमात् तस्याः सुतो जज्ञे नागदेवाभिधः स च ।
जातोऽष्टवार्षिकः पित्रोः प्रत्याशावल्लिपादपः ॥१७०

अन्यदा तद्गृहे काचिच्चरिका समुपागता ।
तां लोभयामास नानाशक्तिकौतुकदर्शनैः ॥१७१

अस्मन्मते मिलसि चेत् तन्न भोगमविद्यया ।
उपभुङ्क्षे सदा सर्वेन्द्रियशर्म यदृच्छया ॥१७२

तया च प्राग्भवाभ्यस्तरसनेन्द्रियलौल्यतः ।
मेने तदुक्तं साऽथाख्यत् सिद्धिर्ज्येष्ठसुतार्पणात् ॥१७३

सत्यमत्याऽभाणि कथमिदं मातर्विधीयते ।
पापो वै वेत्सि वत्से न का माता कश्च नन्दनः ॥१७४

यद्येतदुचितं न स्यात् कथं स्वं पुत्रमार्पयम् ।
पूज्याभ्यो योगिनीभ्यः किं ज्येष्ठः पुत्रो न मे प्रियः ॥१७५

किञ्च गेहे निवसता मन्ये स्युर्बहवोऽङ्गजाः ।
नन्वीदृग् सिद्धिरिति मे वचनं माऽन्यथा कृथाः ॥१७६

तया प्रतिश्रुते ज्येष्ठस्तत्पुत्रो विदधे बलिः ।
शिक्षिता शाकिनीमन्त्रं ताभिः साऽभक्षयज्जनम् ॥१७७

अन्यदा जगृहे ताभिर्माहिलस्य कुटुम्बिनः ।
प्रियः पुत्रो वामदेवस्तेनाहूताश्च मान्त्रिकाः ॥१७८

एकेन मान्त्रिकेणाथाकृष्टाः साक्षादिमाः समाः ।
उक्ताश्च मुक्त एवास्मिन् जीवितं वोऽन्यथा न हि ॥१७९

ततो मुक्तः स पापाभिरथ ग्राम्यैर्जनैर्जगे ।
एताः साक्षान्मारयस्तन्नोज्झ्या ग्रामहितैषिभिः ॥१८०

किन्तु भिण्टैर्वेष्टयित्वा प्रदीप्यन्तामिमा समाः ।
येनाखिलस्य ग्रामस्य सम्पनीपद्यते शिवम् ॥१८१

ततश्च तास्तथा कर्तुं नीयमाना व्यलोकयन् ।
शान्ता महासतीः साध्वीर्मूर्ता इव शमश्रियः ॥१८२

सत्यमत्या तयाऽचिन्ति धन्या वन्द्या इमा परम् ।
या ईदृक् पापविरताः पुण्या अत्र परत्र च ॥१८३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहं तु निष्कृपा पापाकुलद्वयकलङ्किनी ।
इहैवं मरणं प्राप्याप्स्याम्यमुत्र तु दुर्गतिम् ॥१८४
मुहुर्मुहुश्चिन्तयन्ती सैवं ग्रामेयकैः क्षणात् ।
प्रदीपिता सत्यमती ताभिः सह पलालवत् ॥१८५
तेन साध्वीगुणगणग्रहणे सहृदा हृदा ।
उपार्ज्य सा मनुष्यायुर्विपद्य च समाधिना ॥१८६
पुर्यामत्रैव कौशाम्ब्यां बुद्धिसागरमन्त्रिणः ।
प्रियपत्न्या जयादेव्याः कुक्षौ तनयतामगात् ॥१८७॥ युग्मम्
क्रमेण तनयो जज्ञे जज्ञे सपदि मन्त्रिणा ।
वर्धापितेन धात्रेय्या मन्त्रिणीबद्धसख्यया ॥१८८
पारितोषिकदानेन सचिवस्तामवर्धयत् ।
दधते न चिरं सन्तो ह्युपकाराधमर्णताम् ॥१८९
महोत्सवैर्नवनवैः प्रीणयित्वाऽखिलं पुरम् ।
जयशासन इत्यस्य नामधेयमधात् पिता ॥१९०
स च त्वमेष सचिव स्वयं सम्यग् विभावय ।
सुधर्मस्वामिनेत्युक्तः स ईहादौ प्रविष्टवान् ॥१९१

क्षणं मूर्छाव्याजान्मनसि चलिते प्राग्भवदिशं
समायाते जातिस्मरणसहिते तत्र सपदि ।
तदाख्यातं बुद्ध्वा पुनरपि यथावत् सुचरितं
प्रभुं नत्वा व्यज्ञापयत मुदितः सैष सचिवः ॥१९२
निःसन्दिग्धमिदं प्रभूक्तमखिलं स्वामिंस्तदादिश्यता-
मीदृक्कश्मलकर्ममर्मभिदुरं किञ्चिद् रहस्यं मम ।
ईदृक् सौम्यजिनेश्वरस्य चरणं योग्योऽस्मि चेद् देहि तद्
योग्यः सम्प्रति किन्तु किञ्चिदपरं तावत् क्षणं श्रूयताम् ॥१९३

इति श्रीनिर्वाणलीलावतीमहाकथेतिवृत्तोद्धारे **लीलावतीसारे** जिनाङ्के **रसनेन्द्रियविपाक-व्यावर्णनो** नाम सप्तम उत्साहः* ॥

---

१८७.३. जय॰.

* ग्रं० २७२ ॥ छ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## नवम उत्साहः

अथापरे द्यवि श्रीमान् सुधर्मप्रभुरभ्यधात् ।
घ्राणलौल्यविपाकं भो निशामय दिशां विभो ॥१

नानापरिमलासक्तो घ्राणदुष्टभुजङ्गमः ।
प्रत्यासन्नोऽनर्थसार्थनिदानं वश्यितो न चेत् ॥२

मूर्छामतुच्छां दत्तेऽसौ चैतन्यमपहन्ति च ।
अश्नाति प्राणपवनं श्वभ्रपातं तनोति च ॥३

तथा हि –

एलालवङ्गकक्कोलत्वग्जातीफलगर्भितम् ।
पञ्चसौगन्धिकं गन्धलुब्धस्ताम्बूलमिच्छति ॥४

एलापाटलकर्पूरप्रमुखैर्वासितं पयः ।
द्राक्षादिपानकं कापिशायनं च पिपासति ॥५

सुगन्धिनागरंगाम्रमातुलिङ्गादि सत्फलम् ।
कर्पूरचन्दनरसवासिपूगीफलादि च ॥६

एलाकर्पूरचूर्णादिवासितं मोदकादि च ।
कर्पूरपूरितं वर्षोपलादि च जिघत्सति ॥७॥ युग्मम्

चन्द्रचन्दनकस्तूरीघुसृणादिविलेपनम् ।
सौरभ्यलुभ्यद्भ्रमरमालाः कुसुममालिकाः ॥८

कृष्णागुरुप्रभृतिभिः केशवस्त्रादिवासनम् ।
सुगन्धलक्षपाकादितैलाभ्यङ्गं च सर्वतः ॥९

चिञ्चरीक इवाश्रान्तं घ्राणेन्द्रियवशंवदः ।
प्रतिक्षणं वर्धमानातुच्छमूर्च्छोऽभिलष्यति ॥१० त्रिभिर्विशेषकम्

एतच्च विपुलां लक्ष्मीं विना सम्पद्यते न हि ।
विपुला श्रीश्च न प्रायो विनारम्भपरिग्रहौ ॥११

---

१०.१. °वासांत.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदासक्तश्च विक्लो रागद्वेषविसंस्थुलः ।
कृत्याकृत्यान्धबधिरः पतति प्राणसंशये ॥१२
दुष्कर्मबन्धान्निबिडान्नरकेऽसौ विडम्ब्यते ।
ततः कथञ्चिदुद्वृत्तः कुतिर्यङ्नृषु जायते ॥१३
तत्रापि गन्धसम्बन्धलुब्धघ्राणाहिसङ्गतः ।
भवे भवे वराकोऽसौ दुःसहं दुःखमश्नुते ॥१४
राजन्नत्र च दृष्टान्त एष श्रेष्ठी पुरन्दरः ।
स नत्वोचे स्वचरितं शुश्रूषे त्वन्मुखात् प्रभो ॥१५
देवदुन्दुभिनिर्घोषसनाभिध्वनिडम्बरः ।
आकर्ण्यतां नैगमेशेत्युवाच गणभृद्वरः ॥१६
जम्बूद्वीपो द्वीपराजो योजनलक्षनायकः ।
लवणस्तद्विगुणेशः समुद्राणां धुरि स्थितः ॥१७
ततोऽपि धातकीषण्डो द्वीपस्तद्विगुणाधिभूः ।
ततः परत्र कालोदस्तद्द्विगुणमितीश्वरः ॥१८
ततश्च पुष्करवरनामा द्वीपस्तृतीयकः ।
चकास्ति योजनलक्षषोडशकाधिनायकः ॥१९। त्रिभिर्विशेषकम्
न जाने केनचित् कस्माच्चिद्विवादात् कदाचन ।
मानुषोत्तरशैलेन सीम्ना द्वेधा व्यभाज्यसौ ॥२०
पूर्वार्धे तत्र च प्राचीप्रतीच्योर्मन्दरद्वयम् ।
सप्त सप्त विदेहाद्या वर्षाश्च प्रतिमन्दरम् ॥२१
प्राग्मन्दरप्रतिबद्धे क्षेत्रे भरतनामनि ।
चकाशे मध्यमखण्डभूषा श्रीविजयापुरी ॥२२
या वप्रशृङ्गस्खलनभीत्याऽर्केणाप्यलङ्घिता ।
परिखावारिशमितशेषभूवहनक्लमा ॥२३
यक्षहर्म्यतलालीनाचार्यताल्प्रतिष्ठया ।
एकया यत्र दिवि च सङ्गीतकमजायत ॥२४
तस्यां शस्यक्रमलक्ष्मीररिसिंहो महीपतिः ।
यन्नाममन्त्रत्रासाय प्रत्यर्थिकरिणामहो ॥२५



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

प्रेयसी तस्य पद्मश्रीः काप्यभङ्गुरसौरभा ।
नक्तंदिवविकाशिन्यां यस्यां राजाऽत्यरज्यत ॥२६

स च क्षोणीपतिर्घ्राणविषयासक्तमानसः ।
सारं सौरभ्यमेवैकमिन्द्रियार्थेष्वमन्यत ॥२७

तथा हि —

जलजस्थलजानेककुसुमामोदषट्पदः ।
सर्वर्तुरम्यनानाङ्गरागविच्छित्तिकोविदः ॥२८

नैकजातीयकुसुमद्रुतिस्नानातिपावनः ।
गन्धसारघनसारपटवासाधिवासितः ॥२९

आमकर्पूरकस्तूरीश्रीकृष्णागुरुचन्दनैः ।
केशवस्त्रवपुर्वासवेश्मवासातिलालसः ॥३०

समुच्छलत्परिमलवासिताशेषदिङ्मुखः ।
गन्धस्कन्धश्चरिष्णुर्नु व्यचरत् स यदृच्छया ॥३१॥

चतुर्भिः कलापकम्

गुणीकृताशेषशेषहृषीकविषयोत्करः ।
स प्रियप्राभृतेऽप्यासीत् सुरभौ राभसिक्यभाक् ॥३२

इतश्च पुर्यां श्रीमत्यां भीमत्यां न कदाचन ।
राजाश्रीविमलकीर्तिस्तस्य कीर्त्तिमती प्रिया ॥३३

कमलावती तत्पुत्री चतुःषष्टिकलावती ।
अनौपाधिकसौभाग्यसौगन्ध्याढ्यवपुर्लता ॥३४

अधीतिनी कामशास्त्रे रतिकेलीविचक्षणा ।
तस्मै श्रीअरिसिंहायाऽथोपतस्थे स्वयंवरा ॥३५॥ युग्मम्

स तां महाडम्बरेणोपयेमे मेदिनीपतिः ।
तया पुनः स संयेमेऽङ्गसौरभमुखैर्गुणैः ॥३६

लक्ष्मीमलक्ष्मीमार्यां चानार्यां वर्णात् तिलोत्तमाम् ।
रम्भां रम्भागिरं मेने स तयाऽनुपमश्रिया ॥३७

ततः स भूपः पद्मश्रीप्रमुखं प्रेममन्दिरम् ।
अवरोधमवरोधं सुखश्रीणाममन्यत ॥३८

२७.३. वैकं. ३५.१. कामशास्त्रै.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शयने जागरे स्थाने प्रस्थाने भवने वने ।
दिने दिनान्ते छायेव तस्याभूत् साऽनुयायिनी ॥३९

भोगिनी साऽथ पद्मश्रीः प्रद्वेषविषपूरिता ।
तस्याः छिद्राणि मृग्यन्ती दिवानिशमखिद्यत ॥४०

तामुच्चाटयितुं भूपं वशीकर्तुमथैषिका ।
मान्त्रिकांस्तान्त्रिकान् योगिन्यादिकानप्युपाचरत् ॥४१

योगचूर्णं चरिकया ददे तस्याः परे द्यवि ।
ऊचे च गन्धे प्रक्षिप्य देयं नसि यथा विशेत् ॥४२

पद्मश्रीस्तत् सुगन्धेषु न्यस्य गन्धान् ददौ प्रभोः ।
ते गन्धलोभादाघ्राता भूभुजः प्राविशन्नसि ॥४३

तैश्च चूर्णलवैर्मन्दो ग्रहिलः स्यात् पटुर्वशः ।
तदा च स नृपो मन्दस्ततोऽभूद् ग्रहिलो भृशम् ॥४४

ततश्च –

हसति रोदिति पूत्कुरुते नृपो भ्रमति गायति तारतरस्वरम् ।
स्वमुखवादनतालपुरःसरं निवसनेन विना परिनृत्यति ॥४५

शपति निन्दति पूज्यतमानपि प्रहरतेऽनुचरांश्च निरागसः ।
ननु महौषधिमन्त्रगणागणा विफलतामुपयान्ति विधिं विना ॥४६

ततोऽमात्यैः स संयम्य चिक्षिपे दारुपञ्जरे ।
हूता वैद्या मन्त्रतन्त्रयोगचूर्णविदोऽपि च ॥४७

स्वस्वक्रियारम्भितैश्च न चाभूत् प्रगुणो नृपः ।
तत्राथ मन्त्रिणोऽभूवन्निराशा विगतादराः ॥४८

सम्प्रधार्य ततः सम्यक् सर्वैः सामन्तमन्त्रिभिः ।
तन्मूर्त्यन्तरवद् राज्येऽस्थापि पुत्रोऽरिकेसरी ॥४९

ततोऽरिकेसरी राजा संजज्ञे राजकेसरी ।
क्रमविक्रमशालित्वादधृष्यो वैरिकुञ्जरैः ॥५०

निर्भाग्या सा च पद्मश्रीर्नंष्टाऽगात् तातमन्दिरम् ।
पतिकार्मणपाप्माऽस्याः पपातात्रैव मूर्धनि ॥५१

स चारिसिंहो ग्रहिलोऽनादरान्मन्दरक्षितः ।
निर्गत्य भ्राम्यन् दिक्ष्वाप पुरं क्षितिप्रतिष्ठितम् ॥५२

---

५२.२. °नादारान्.

आरक्षैः प्रत्यभिज्ञाय सोऽरिसिंहोऽयमित्यसौ ।
ग्रहिलो दर्शयाञ्चक्रे विजयराजभूभुजः ॥५३

तेनोच्छलत्क्रोधवह्निज्वालपाटलचक्षुषा ।
तद्धूमलहरीसध्र्यङ्भ्रकुटीभीष्ममौच्यत ॥५४

रे सोऽयं नित्यवैरी नस्तत् खरारोपणादयम् ।
पुरे विगोप्यैवमेवं बहिरेवं विडम्ब्यताम् ॥५५

ततश्चाभिदधे मन्त्रिमौलिना श्रीसुबुद्धिना ।
देवावधार्यतां तावन्नीतिपूतं वचो मम ॥५६

मृतस्य मारणे देव सुभटस्य यशो न हि ।
ग्रहिलश्च मृत एवेत्यादेशोऽनुचितः प्रभोः ॥५७

अपि च –

निरायुधस्य व्यसनं प्राप्तस्य गृहमेयुषः ।
रणक्षेत्रे पतितस्य वधोऽरेरपि नोचितः ॥५८

किञ्चारिकेसरी राजा पुत्रोऽस्य विदितः प्रभोः ।
एतस्यैवं कृतेऽवश्यं तवामित्रीभविष्यति ॥५९

तत्सेनयाऽपि देवस्य त्रासिताया भुवो ध्रुवम् ।
जलस्थलाद्रिदुर्गाणि मुक्त्वाऽन्यच्छरणं न हि ॥६०

कृतप्रतिकृतं कर्तुं तव साम्प्रतमीश्महे ।
वयं न त्वादृशाः किन्तु तदस्मद्देशतो व्रज ॥६१

भाणयित्वेति दत्वा च शम्बलं प्रेष्यतेऽसकौ ।
एवंकृते प्रभोः कीर्तिः कार्तिकेन्दुविजित्वरी ॥६२॥ युग्मम्

राज्ञा तथा कारितेऽसौ भ्रमन् खेटपुरं ययौ ।
राज्ये कृतप्रसादेन पर्यज्ञायि नटेन च ॥६३

ज्योत्कृत्य भाषितस्तेन स्वामिन्नेवं किमटचसे ।
स विचेताः प्रतिब्रूते नैवासम्बद्धमेव वा ॥६४

ज्ञातं तेन धातुदोषादिनास्य मतिविभ्रमः ।
जज्ञे बम्भ्रम्यते तेन स नतोऽचिन्तयन्नटः ॥६५

---

६२.२. °सको. ६४.२. किमटयसे.

आपन्नानामुत्तमानां येऽत्रानुपकृता अपि ।
उपकुर्वन्ति त इमे जगत्यां नरभास्कराः ॥६६

आपद्गतानां दुर्दैवाद्ये तूपकृतपूर्विणाम् ।
प्रत्युपकुर्वते ते तु किञ्चिदानृण्यमियूरति ॥६७

ये तूपकारकेऽप्यूच्चैर्दुर्दशाविवशात्मनि ।
नोपकारपरास्ते स्युर्ऋणदासा भवे भवे ॥६८

तदेनमुपकुर्वेऽस्मि यद्येष प्रगुणो भवेत् ।
तद्राज्यं मेऽस्य प्रसादाद् भविताऽनृणताऽथवा ॥६९

ततोऽसौ स्वगृहे तेनोपचेरेऽभ्यङ्गभोजनैः ।
न पटुवभूत् ततो धन्वन्तरिर्वैद्यस्य दर्शितः ॥७०

स्वाम्येष नो न जानेऽस्मि कुतोऽप्येवं दशां गतः ।
तदाप्त सम्यक् कथय यथैष स्याद् द्रुतं पटुः ॥७१

इत्थं नटप्रकटिते तत्स्वरूपे भिषग्वरः ।
शास्त्रानुभवचक्षुर्भ्यां तं वीक्षामास सर्वतः ॥७२॥ युग्मम्

शैलूषमवदच्चैवं वातपित्तकफोद्भवः ।
विकारो नास्य तल्लिङ्गाभावाद् विषविकारवत् ॥७३

न भूतशाकिनीदोषोऽप्यत्र कोऽपि निरीक्ष्यते ।
सम्भाव्यते तदेतस्य दोषः कार्मणसम्भवः ॥७४

कार्मणं चास्य नासायां नासां स्पृशति यन्मुहुः ।
नटेनोचे कार्मणस्य त्वं जानासि प्रतिक्रियाम् ॥७५

धन्वन्तरिरथाचख्यौ कार्मणानामशेषतः ।
विधिं प्रतिविधिं वेद्मि ततोऽवादीन्नटः पुनः ॥७६

पुण्यात्मन्नेष राजासीच्चेदमुं कुरुषे पटुम् ।
दारिद्र्यमुद्रा द्रवति तदा सप्तकुलात् तव ॥७७

ततः प्रोचेऽगदङ्कारः करोम्येनमनामयम् ।
त्वं चेदक्तनि(?)हुडुङ्कीदुग्धमानयसे सखे ॥७८

त्रिलाहविषये सा च तुङ्गे गोशृङ्गपर्वते ।
तस्या अमून्यभिज्ञानानीत्यवादीद्भिषग्वरः ॥७९

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

नटः प्रतीतपुरुषांस्तन्निमित्तमथादिशत् ।
तैश्च तदौषधीदुग्धमानिन्ये स्वगृहादिव ॥८०
वैद्येन विधिना तच्च प्रयुक्तं तस्य भूभुजः ।
प्रशान्तकार्मणोद्गारः सोऽचिरात् प्रगुणोऽभवत् ॥८१
अहो तव परिज्ञानमहो तव चिकित्सितम् ।
इति प्रशंसन् शैलूषो दोषज्ञं बह्वपूजयत् ॥८२
कथंकारमिहास्मीति राज्ञोक्ते भरतोऽभ्यधात् ।
स्वानुभूतं व्यतिकरमरिसिंहाय भूभुजे ॥८३
ततो राजाऽवदद् यामः स्वपुर्यामधुनैव हि ।
नटोऽवादीदेवमेव गच्छतां देव नो शुभम् ॥८४
यतो राज्यं निधानं च परहस्तगतं यदि ।
न लभ्यते लभ्यते वा परया शक्तिसम्पदा ॥८५
ततोऽरिसिंहोऽवादीत् किं प्राप्तकालमिहाधुना ।
तौ च धन्वन्तरिनटौ तं व्यजिज्ञपतामिति ॥८६
यदावयोर्गृहे लक्ष्मीः स प्रसादस्तवैव हि ।
यत् सरांसि प्रपूर्णानि तत् पयोदविजृम्भितम् ॥८७
तदिमां स्वरमां देव मानयात्रैव तिष्ठ च ।
आवां पुनस्तत्र यावः स्वामिकार्यस्य सिद्धये ॥८८
नटवृत्त्या प्रधानानां करिष्यामि भिदामहम् ।
वैद्यस्तु तस्य भूपस्य भैषजात् कीर्तिशेषताम् ॥८९
अस्मद् विज्ञप्त्यैव पादोऽवधार्यस्तत्र भूभुजा ।
इत्युक्त्वा नटवैद्यौ तौ जग्मतुर्विजयां पुरीम् ॥९०
नटेन घटितं नाट्यमरिकेसरिणः पुरः ।
तत्रागते रसबन्धं सूक्तमेकं नटोऽपठत् ॥९१
कृतं वेत्ति गुणान् वेत्ति वेत्ति विज्ञापितं सुधीः ।
सेवकस्य स्थितिं वेत्ति स्वामिनस्तस्य कोपमा ॥९२
प्रजगे ननृते व्याप्य तदेवास्यानुचारिभिः ।
रङ्गप्रसङ्गात् पुनरप्यपाठीत् पाठविन्नटः ॥९३

८८.१. स्वरगां.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्र जाते पिता शेते न शङ्काशङ्कुवर्जितः ।
तस्य काशसुमस्येव निष्फलं जन्म जन्मिनः ॥९४

तदेव च सुविस्तार्य प्रगीतं पार्श्वसारिभिः ।
रसस्थैर्यमवातार्यापठत् सूक्तं पुनर्नटः ॥९५

भिक्षां देहीति विलपन् घटकर्परपाणिकः ।
पिता भ्राम्यत्यरिगृहे यस्यास्याजननिर्वरम् ॥९६

पुनः प्रस्तावमासूत्र्य सूत्रधारशिरोमणिः ।
निवार्योच्चैः कलकलं सुभाषितमभाषत ॥९७

पराक्रमेण लभ्यन्ते राज्यश्रीकीर्तिनायिकाः ।
पितरौ न हि लभ्येते पराक्रमशतैरपि ॥९८

कथान्तरावतारेण पुनः शैलूषभूषणः ।
सुभाषितसुधासारं सुधाकर इवामुचत् ॥९९

यच्छ्रियोऽन्यजनो भुङ्क्ते विदिशे भिक्षते पिता ।
तेनभूर्भारयाञ्चक्रे मातुर्यौवनहारिणा ॥१००

अथो निवार्य भरतः कोलाहलहलाहलम् ।
सुभाषितसुधावृष्टिं वितेने वैनतेयवत् ॥१०१

अधमाधमस्य पुंसस्तस्यास्यं को नु पश्यतु ।
पिता यस्यारिभवने भिक्षार्थं चाटु भाषते ॥१०२

इत्यपरापरैः सूक्तैर्नटोक्तैः तस्य भूभुजः ।
प्रभिन्नं न हि रोमापि मुद्गशैल इवाम्बुदैः ॥१०३

पुनः प्रस्तावमानीय रङ्गाद्रङ्गावतारकः ।
सदस्यानां हृदि न्यास्यत् सूक्तिमुक्तावलीमिति ॥१०४

यस्योत्सङ्गे शिरः कृत्वा सर्वस्वं विनिवेद्य च ।
शेते सुनिर्वृतः स्वामी मन्त्रिणस्तस्य कोपमा ॥१०५

सुप्रक्रममुपक्रम्य क्रमवेदी कुशीलवः ।
पपाठ पाठकप्रष्ठः सूक्तं श्रेष्ठतमं पुनः ॥१०६

धिग् धिग् तान् मन्त्रिणो येषां जीवतामपि सुप्रभुः ।
दिगम्बरो वराकश्च भिक्षाकश्च भ्रमेद् भुवि ॥१०७

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

पुनः क्षणान्तरं कृत्वा हृत्वा रोलं च सर्वतः ।
कुशीलवोऽतिकुशलः स इदं सूक्तमुक्तवान् ॥१०८

धिक्कृता धीर्धीसखानां तेषां येषामधीश्वरः ।
रङ्कवद् वैरिगेहेषु भिक्षायै परिसर्पति ॥१०९

प्रस्तावान्तरमारभ्य रचिताञ्जलि भारतिः ।
सुभाषितमभाषिष्ट शिष्टचेष्टितसृष्टिकृत् ॥११०

देव त्वमेव नः स्वामीत्याख्यातां राज्यगे प्रभौ ।
तद्भ्रष्टे तूपेक्षकाणां मन्त्रिणां स्तादजीवनिः ॥१११

तत्तादृक् सूक्तरचनाचातुरीचतुरं वचः ।
निशम्य मन्त्रिभिर्जज्ञे ब्रूते साकूतमेव भोः ॥११२

पुनःपुनर्नवनवप्रतिभाप्रतिभास्वरः ।
नटेश्वरः सूक्तखानिं प्रक्रमादुदजीघटत् ॥११३

प्राणैरप्युपकुर्वन्ति स्वामिनं ये महौजसः ।
न संहता न भिन्नाश्च श्रीसामन्ता जयन्ति ते ॥११४

तथा —

तेषां कः प्रेक्षतामास्यं सामन्तानां समन्ततः ।
प्रभुप्रसादानास्वाद्य पापा ये स्वप्रभुद्रुहः ॥११५

तथा —

यः प्राणैरपि गृह्णाति स्वामिने विजयश्रियम् ।
शुचेर्दक्षानुरक्तस्य तस्य भृत्यस्य कोपमा ॥११६

पापाः पदातयोऽलीकाडम्बराश्चाटुकारिणः ।
स्वामिप्रसादानादाय द्रुह्यन्ति स्वामिनेऽत्र ये ॥११७

ततो नृपं विना सर्वैः सामन्तार्यैरबुध्यत ।
साभिप्रायमयं नाट्यकपटेन नटोऽवदत् ॥११८

अथोचे मन्त्रिसामन्तैरतिकालमजायत ।
अये नट ततो नाट्यमिदं संवृणु संवृतम् ॥११९

ते मन्त्रिणः सुरगुरोर्गृहे गत्वा मिथोऽभ्यधुः ।
भेदकृत् कोऽप्यसौ तन्न हिताय स्वस्य नापि नः ॥१२०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्घाट्यते भीषयित्वा तदयं वन्यसत्त्ववत् ।
ततस्तत्र नटो हूतः पृष्टो देवोऽधुना क भोः ॥१२१

कोऽयं देवोऽस्मि पृच्छयेयं मन्त्रिन्नित्यवदन्नटः ।
देवोऽरिसिंहोऽस्याः पुर्याः स्वामीत्यूचेऽथ मन्त्रिणा ॥१२२

स किं केनाप्यर्पितो मे यत् पृच्छयेऽस्मि नटोऽभ्यधात् ।
त्वयाऽटता क्वापि देवो दृष्टः स्यादिति मन्त्र्यवक् ॥१२३

नटोऽब्रूताथ देवः क्वेति वः साकूतमीरितम् ।
अन्यथा भवता देवो दृष्टः क्वापीति युक्तिमत् ॥१२४

मन्त्र्यूचे यत्कृते यत्नस्तदेवापह्नुते कुधीः ।
सुधीस्तु साधयन्नेव तत् कार्यं वक्ति किञ्चन ॥१२५

आख्यन्नटः प्रेक्षणेन हृदावर्ज्य भवादृशाम् ।
कुटुम्बं वर्तये मन्त्रिन् कार्यमित्येव मे ननु ॥१२६

सम्भावयामि तत् सिद्धं नान्यत् कार्यं ममाधुना ।
असम्बद्धमिवाख्यातं तदमात्यवर त्वया ॥१२७

सचिवोऽब्रूत हे धूर्त प्रलपस्यत्र किं वृथा ।
यतोऽस्ति यत् तवाकूतं तज्ज्ञातं त्वत्सुभाषितैः ॥१२८

किञ्चास्माकमभीष्टं श्रीस्वामिपादाब्जसेवनम् ।
तद् विश्रभ्य किं न वक्षि वृत्तान्तं स्वामिनः स्फुटम् ॥१२९

विश्रभ्याथ नटोऽवादीद् देवः खेटपुरेऽस्ति भोः ।
निरामयो राज्यलक्ष्म्यै चक्रपाणिरिवोत्सुकः ॥१३०

अहो मन्त्रिमतेस्तैक्ष्ण्यं द्रढीयस्त्वं च किञ्चन ।
नटहृद् वज्रघटितं ययाऽभेद्यत लीलया ॥१३१

ततो मन्त्र्यादिभिः प्रोचे त्वमितोऽपसर द्रुतम् ।
अरे नट न नष्टश्चेद् विनष्टोऽसि ततो ध्रुवम् ॥१३२

प्राणप्रहाणभीत्याऽथ नाटयन् भयनाटकम् ।
काकनाशं नटो नष्टोऽरिसिंहान्तिकमासदत् ॥१३३

द्वितीयेऽह्न्यमात्याद्या अरिकेसरिणोदिताः ।
क्वासौ नटो भरतवन्नाट्यवेदविदां वरः ॥१३४



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स तैरूचे प्रभोऽस्माकं तं सद्योऽपि जिघांसताम् ।
किन्तु देवाकीर्तिभीत्या प्रच्छन्नं तच्चिकीर्षताम् ॥१३५

कथञ्चित् ज्ञातवृत्तान्तो नटो नंष्ट्वा क्वचिद्ययौ ।
यत एते महाधूर्ता आकारेङ्गितवेदिनः ॥१३६॥ युग्मम्

व्यापाद्यते किमित्येष राज्ञोक्ते मन्त्रिभिर्जगे ।
पापोऽयं भेदकारी नो जलकान्त इवाम्भसाम् ॥१३७

किं न श्रुतं स्वामिना यत् पुत्रं सामन्तमन्त्रिणः ।
पर्वींश्चाश्रित्य तेनोक्तं ततो वध्यतमोऽसकौ ॥१३८

राज्ञोक्तं भोः क्वचित् तातः कुशली वर्तते किमु ।
तैरूचेऽनुमितोऽस्तीति नटोक्तिः साऽन्यथा कथम् ॥१३९

ततोऽरिकेसरी राजा साशङ्कं दध्यिवानिति ।
न ज्ञायते नटे तस्मिन्नेते किमपि चक्रिरे ॥१४०

गूढाभिसन्ध्यथाचष्ट गम्भीरं धीरधीर्नृपः ।
भवद्भिर्न कृतं सुष्ठु यदसौ मे न मेलितः ॥१४१

यतस्तन्मुखतस्तातोदन्ते सम्यग् विनिश्चिते ।
राज्यं च प्रापिते ताते स्यान्मे सत्पुत्रधुर्यता ॥१४२

श्रीताते च राज्यभाजि मम राज्यमसंशयम् ।
तदन्विष्यानीय तातं राज्ये स्थापयत द्रुतम् ॥१४३

ततोऽमात्यः सुरसूरित्यमृशत् किमु मायया ।
सद्भावादथ राजेदमाख्यातं तत् परीक्ष्यते ॥१४४

यतः —

भूभुजङ्गस्य यो मन्त्री विश्वस्य स्यात् प्रमद्वरः ।
तस्मादेव हि सोऽवश्यं विनश्यत्यचिरादपि ॥१४५

मन्त्र्यूचे नेति राड्नीतिर्यद्राज्यं क्रियतेऽन्यसात् ।
राज्यानीहस्तापसः स्यान्न्यस्यान्यस्मिन् नृपश्रियम् ॥१४६

राजाऽचिन्तयदस्योक्तिः कृत्रिमाऽकृत्रिमाऽथवा ।
ततः परीक्ष्योऽसौ सम्यक् स्वर्णवत् हृत्कषोपले ॥१४७

---

१३९.३. तैरूचो.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतः –

चेद् विश्रब्धः प्रधानानां राजा व्याजान् वितन्वताम् ।
मृगयूनां मृग इव तदाऽवश्यं विनश्यति ॥१४८

अथाह नृपतिर्मन्त्रिस्ताते राज्यधुरन्धरे ।
न मेऽभूज्जात्वकल्याणं तदेतदुचितं न हि ॥१४९

किञ्च लोके साधुवादः पितृ राज्यसमर्पणात् ।
तातस्यानन्तरं राज्यं ममावश्यं क्रमागतम् ॥१५०

सचिवोऽवोचत विभो राजनीतिरियं न हि ।
यदि स्वामी प्रियतातस्तत्रैव प्रातु(?) तत्प्रियम् ॥१५१

तातस्यानन्तरं राज्यं तवैवेति न निश्चितम् ।
प्रियदेव्यङ्गजः प्रायः कुमारो भूभुजां प्रियः ॥१५२

तत्र राज्ये निविष्टे च चेद् विधास्यसि विड्वरम् ।
तदिदानीमेव देव राज्यं त्याज्यं न सर्वथा ॥१५३

नृपोऽथाब्रूत शृणुत भोः भोः सामन्तमन्त्रिणः ।
मृतस्यापि पितुः पिण्डा दीयन्ते कुलपुत्रकैः ॥१५४

यस्य सर्वर्धिपूर्णस्य जीवन्नेव पिता पुनः ।
भिक्षते परगेहेषु कुलीनः स कथं भुवि ॥१५५

देवरक्षितनामाऽथ मुग्धः सामन्तनन्दनः ।
समीचीनं वक्ति देव एवमेवैतदित्यवक् ॥१५६

ततः कृतकतोषेणारिकेसरिमहीभुजा ।
सर्वः स्वाङ्गपरिष्कारो ददेऽस्मै पारितोषिकम् ॥१५७

तत्पिता देवराजोऽथ दध्यौ कार्यं विनाशितम् ।
हहाऽमुना यन्नृपोऽस्मद्भावमेवं परीक्षते ॥१५८

सामन्तेन ततः पुत्रोऽभाण्यन्यायं प्रशस्य रे ।
नृपप्रसादं गृह्णासि राजनीतिं न बुध्यसे ॥१५९

देवस्तुष्यतु वा मा वा नीतिरेव प्रशस्यते ।
नीतिस्त्वन्यादृशी लोके नृपाणां पुनरन्यथा ॥१६०

मद्दृक्पथादपसरादत्से चेत् पारितोषिकम् ।
भीतभीतेन तेनाथ तन्मुक्तं दन्दशूकवत् ॥१६१

---

१५७.३. परिष्वारो.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो भूपेनाभिदधे भो भोः सामन्तमन्त्रिणः ।
किमेष पक्षो वोऽपीष्टो न्यायः सर्वेप्सितः प्रभो ॥१६२
राजा सरोषमाचष्ट कीदृग् न्यायोऽयमुच्यते ।
यद् वाऽवामानि युष्माभिस्तातस्तद्बिभिथामुतः ॥१६३
सुरसूरिरथामात्यः पृथ्वीनाथं व्यजिज्ञपत् ।
तिर्यङ्मात्रमिहोन्मिण्ठो दुःखमालान्यते करी ॥१६४
नरसिंहस्य देवस्य स्वच्छन्दस्य किमुच्यताम् ।
परं वाच्यं हितं भृत्यैर्भावि दैवकृतं पुनः ॥१६५
तच्च प्रवेदितं तावत् स्वामिनो हितचिन्तकैः ।
स्वामिरुच्यं तु दुर्दैवप्रेलितं को निषेधतु ॥१६६
केवलं तत्र नास्माकं स्वामिन्ननु मतिः क्वचित् ।
यच्चावमानितस्तातोऽत्र प्रमाणं प्रभुः पुनः ॥१६७
तदत्र कार्येन वयं प्रष्टव्याः स्वामिनाऽधुना ।
सिद्धमेवोपदेष्टव्यं पुण्यसृष्टं भविष्यति ॥१६८
किं भविष्यति राज्ञोक्ते देवो जानाति के वयम् ।
किन्तु कर्तव्यमस्माकं स्वाभिना देश्यमञ्जसा ॥१६९
आदिदेश ततो राजा तातमानयत द्रुतम् ।
देव को यातु राजोचे यस्योत्साहः प्रसर्पति ॥१७०
कस्योत्साहो न देवाज्ञादेवताराधने प्रभो ।
तद् यस्य योग्यता तत्र स्वामी तस्य प्रसीदतु ॥१७१
राजाऽऽख्यत् कीदृशा यूयं निष्ठुराः कृतघातिनः ।
ये न स्मरन्ति तातस्य प्रसादान् प्रत्यहं कृतान् ॥१७२
देवासतां तातकृताश्चिरकालतिरोहिताः ।
नैव स्मरिष्यन्ति देव कृतानपि हितानमी ॥१७३
यतो वयं पट्टभक्ता भक्ता न पुरुषे पुनः ।
यो यदा पट्टमध्यास्ते तस्यैव हितचिन्तकाः ॥१७४
मोदमाद्यन्मनोम्भोधिर्विकसन्नेत्रपङ्कजः ।
कान्तिकल्लोलितास्येन्दुः स राजेन्दुस्ततोऽवदत् ॥१७५

---

१७१.४. तस्या. १७५.१. मेद्यन्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अये सचिवसामन्ताः समन्ताद् यूयमीक्षिताः ।
परं पीयूषवत् क्वापि न विकारो व्यलोक्यत ॥१७६
अहो. वः शेमुषी काऽपि गम्भीरा सागरादपि ।
इत्थं निर्मथने सोऽपि विकृतिं याति नत्वियम् ॥१७७
लोकोत्तरं किमप्येतदैक्यमत्र्यं भवादृशाम् ।
सर्वेषां विदुषां चैका धीरित्याभाणकः स्फुटः ॥१७८
सर्वाङ्गीणां स्वामिभक्तिदेवीमर्चयितुं किल ।
सर्वाङ्गीणमलङ्कारं तेभ्यः प्रीतः प्रभुर्ददौ ॥१७९
जीविकां द्विगुणां चक्रे तेषां तुष्टः प्रजापतिः ।
ईदृशां सुप्रधानानामक्षयित्वमपीष्यते ॥१८०
स तु धन्वन्तरिर्वैद्यो नटवद् विजयां पुरीम् ।
प्राप पृथ्वीपतिं चैतमुपतस्थे स्वविद्यया ॥१८१
प्रसादपात्रद्वारा चासन्ना सेवा नृपेऽभवत् ।
राज्ञश्चाजीर्णदोषेणापाटवं ससृजेऽन्यदा ॥१८२
स चानिवृत्तेऽपि दोषे राज्ञः पथ्यमदापयत् ।
राजवैद्यैस्तन्निषिद्धं तच्च व्यज्ञायि मन्त्रिभिः ॥१८३
दध्ये च तैः परीक्ष्योऽयं किमज्ञोऽथारिगृह्यकः ।
राजा व्यज्ञाप्यथामात्यैर्वैद्योऽयं नो न सम्मतः ॥१८४
किमेष तातगृह्योऽथाविज्ञ एव चिकित्सति ।
परीक्ष्यस्तदयं देव सोऽवक् कथं परीक्ष्यते ॥१८५
देव केनापि विश्वास्य भाण्यते सो नृपं यदि ।
विषादिना हंसि तदा तुभ्यं स्वर्णमियद्ददे ॥१८६
चेदभ्युपैष्यति तदा ज्ञास्यते तातगृह्यकः ।
राजाऽऽख्यल्लोभतोऽन्योऽपि मन्त्रिन्नङ्गीकरोत्यदः ॥१८७
सत्यं देव तथाऽप्येष ज्ञास्यते वचनच्छलात् ।
ततः पुरोधसा सम्यक् शिक्षितेन स भाणितः ॥१८८
धन्वन्तरिस्ततोऽवादीन् मा वादीरिति मे पुरः ।
इयद्दास्ये तव स्वर्णं कुरु वैद्य ममोदितम् ॥१८९

---

१७७.१. शेमुखी.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न विश्वसितं तस्यैष मैष वक्तीति मायया ।
ततो वैद्येन सोऽभाणि किमित्येवं व्यवस्यसि ॥१९०
ऊचे पुरोधा आनेष्येऽरिसिंहं प्राच्यभूपतिम् ।
अविश्रब्धोऽब्रूत वैद्योऽमुमेवोपास्स्व तेन किम् ॥१९१
पुरोहितोऽवददेष प्रत्यनीको ममाधिकम् ।
तद्वैर्यसौ मया मार्यो घातुकेनापि निश्चितम् ॥१९२
वैद्योऽभ्यधादरिसिंहो जानासि क्वापि तिष्ठति ।
धूर्तोऽब्रूत तस्य पार्श्वे यान्त्यायान्ति नरा मम ॥१९३
आख्यद् वैद्यो राड्विरुद्धमिति मे नाभिधाः सखे ।
मा भैषी वैद्य यदिदं बहुसामन्तसम्मतम् ॥१९४
चेद् ब्रूषे तांस्तदा सर्वानानयामि तवान्तिके ।
भिषग् जगौ ममानेन राज्ञा किन्नु विनाशितम् ॥१९५
उपद्रुता यदि यूयं ततोऽहं किङ्करोम्यदः ।
आख्यद् धूर्तोऽरिसिंहो राट् तव राज्यं प्रदास्यति ॥१९६
वैद्योऽवादीत् तान् मनुष्यान् मम तावत् प्रदर्शय ।
ततः सम्यग् विचार्याहं भणिष्यामि यथोचितम् ॥१९७
शिक्षयित्वा केऽपि नरास्त तस्तस्य पुरोधसा ।
आनीतास्तैश्च वैद्योऽसावुक्तो राजा दिशत्यदः ॥१९८
चक्रेन किञ्चिदादिष्टं सोऽवक् किञ्चिन्न वेद्म्यहम् ।
तैरूचे वक्षि किं मिथ्या यन्नटस्त्वं च राण्नरौ ॥१९९
ततो विहस्य तेनोचे समादिशति किं प्रभुः ।
शिक्षितैस्तैरभाण्येवं तत्कार्यं साधय द्रुतम् ॥२००
ऊचे वैद्यः कृतोपायो वर्ते सिद्धिस्तु दैवतः ।
केशग्राहं गृहीत्वाथ तैः सोऽपात्यत भूतले ॥२०१
बध्वा नीतः पुरो राज्ञस्तदुक्तं च न्यवेदि तैः ।
राज्ञा सरोषमूचेऽसौ सत्योक्तौ तेऽस्ति जीवितम् ॥२०२
मृत्युभीत्या तेन सर्वमूचे राज्ञा विगोप्य सः ।
खरारोपपुरभ्रान्त्यादिना निर्विषयीकृतः ॥२०३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नटवत् सोऽपि कृष्णास्योऽरिसिंहान्तिकमागमत् ।
मिथस्ते व्यमृशन् कार्यं कार्यं किमधुना ननु ॥२०४

नटोऽवग् विवररससिद्धया कृत्वा महद् बलम् ।
राज्यमुद्दाल्यते तस्माद् यथा लोप्त्रं मलिम्लुचात् ॥२०५

राजाऽऽख्यद् रससिद्धिर्मे सिद्धैवास्ति ततश्च ते ।
भूरिस्वर्णं समुत्पाद्य चतुरङ्गां चमूं व्यधुः ॥२०६

कृत्वा कोशं महा चम्वा स्वराज्यग्रहहेतवे ।
अरिसिंहः सिंह इव प्रतस्थे स्वां पुरीं प्रति ॥२०७

तमागच्छन्तमाकर्ण्य केसरीवारिकेसरी ।
सद्यः सर्वाभिसारेण प्रतिपेदेऽभ्यमित्रताम् ॥२०८

संलग्ने प्रधने द्वयोरपि तयोर्निर्दैन्ययोः सैन्ययोः
दत्त्वाऽऽदाय च न प्रहारमभितोऽतृप्यन् भटाः कामिवत् ।
हस्तिभ्यामभियुज्य संयति चतुर्दन्ते समासूत्रिते
शस्त्राशस्त्रिकथां हहा पितृसुतावेतौ चिरं चक्रतुः ॥२०९

क्रोधेनान्धतमोऽरिकेसरीनृपो हस्तीन्द्रसत्कोष्ठकात्
कुन्ताग्रेण कृतान्तदन्ततितिवत् तीक्ष्णेन भीष्मेन च ।
अत्युच्चैः समुदक्षिपत् स्वपितरं किन्त्वैष रौद्राशयात्
कष्टं कष्टतमे जगाम नरके पातालकूपे किल ॥२१०

नश्यमानं तच्च पितृशिबिरं भयकातरम् ।
धीरयित्वाऽऽददे राट् स पितृश्रीः पुत्रमेति यत् ॥२११

स चारिसिंहो नृपतिरत्रैव प्राणलौल्यतः ।
राज्यभ्रंशादि संप्राप परत्र नरकं पुनः ॥२१२

नरके प्रथमे तत्र सागरं दुःखसागरम् ।
विगाह्याजनि कृष्णाहिर्भीषणो मलयाचले ॥२१३

यस्मिश्चन्दनभूरुहां परमहो एकातपत्रं पदं
यस्मिन् किन्नरगीतयः श्रुतिसुधाः स्तभ्नन्ति खे खेचरान् ।
यत्सौरभ्यरमां प्रगृह्य मरुतो विस्मापयन्ते दिशः
श्लिष्यन्ते बत यत्र चन्दनलता नैकैर्भुजङ्गैः समम् ॥२१४

---

२०८.४. °मिश्यताम्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र नारकजीवोऽहिः प्राग्वद् गन्धातिलोलुपः ।
चन्दनद्रुषु स भ्रान्त्वाऽधिकाधिकसुगन्धिषु ॥२१५

उद्यत्परिमलोल्लोलप्लाविताशेषदिक्तटे ।
एकाङ्गे सरले तुङ्गेऽसजद् गोशीर्षपादपे ॥२१६॥ युग्मम्

स चान्यदा काष्ठतड्भिश्छेत्तुमारम्भि पादपः ।
तदुत्सङ्गमवरुध्य स्थितः सोऽहिर्न मुञ्चति ॥२१७

यदा ते छेत्तुमायान्ति तदा धावति तान् प्रति ।
ततो दूरस्थितैरेव तैः सोऽविध्यत पत्रिणा ॥२१८

वेदनार्तोऽपतत् पृथ्व्यां तैर्बाणे दययोद्धृते ।
तानेव प्रत्यधावत् स भयार्तास्ते पलायिताः ॥२१९

स च प्रहारनिःस्पन्दो ददृशे चारणर्षिणा ।
ददौ चाराण्य(?)कारुण्यात् स तस्यार्हन्नमस्कृतिम् ॥२२०

तेनापि श्रद्दधे सम्यक्संज्ञिना धरणेन्द्रवत् ।
पराप्ताव्यक्तसम्यक्त्वो नमस्कृतिपरोऽमृत ॥२२१

ततोऽत्र भरते पुर्यां श्रीकौशाम्ब्यामिहैव हि ।
भोगावत्यमरावत्योर्मध्यभूभगिनीश्रियि ॥२२२

पुरन्दरयशःश्रेष्ठिप्रियायाः कुक्षिपङ्कजे ।
स पुरन्दरदत्ताया आययौ राजहंसवत् ॥२२३॥ युग्मम्

कालक्रमात् सुतो जज्ञे जज्ञे वर्धापनं महत् ।
पुरन्दर इति तस्य नामधेयं व्यधीयत ॥२२४

स च त्वमेवाधुनाऽपि गन्धगृध्नुः षडंह्रिवत् ।
राज्ञः पुर्याश्चातिमान्यो धत्से श्रेष्ठिपदं महत् ॥२२५

ततश्चेहापोहं सपदि कलयन् श्रेष्ठितिलकः
क्षणं मोहाज्जातिस्मरणमलभत् प्रातिभमिव ।
स्वयं साक्षात् तेनाध्यवसितनिजप्राग्भवविधि-
र्वहद्बाष्पः सूरिक्रमकमलमानम्य स जगौ ॥२२६

२२०.१. °निस्पंदो.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रसादाद् वः स्वामिन् सपदि समभूवं समुचितः
सुमार्गे प्रस्थातुं किमपि जिनचन्द्रप्रकटिते ।
प्रभो नातः स्थातुं क्षणमपि सहे तत् कुरु कृपां
प्रपां प्राप्तस्तृष्णक् चिरयति पयः पातुमिह किम् ॥२२७

इति श्रीनिर्वाणलीलावतीमहाकथेतिवृत्तोद्धारे **लीलावतीसारे** जिनाङ्के **घ्राणेन्द्रियविपाक-व्यावर्णनो** नाम नवम उत्साहः* ॥

* ग्रं० २३७



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# दशम उत्साहः

श्रीसुधर्मामुनिराजो व्याजहार पुरन्दरम् ।
प्रव्राजयिष्यसे सौम्य क्षणं चक्षुर्गतिं शृणु ॥१
अयमात्मा विपरीतशिक्षेणेक्षणवाजिना ।
आदौ स्वदारसर्वाङ्गोपाङ्गमार्गस्थितिस्पृशा ॥२
पश्चात् पण्याङ्गनागात्रविलासापथयायिना ।
ततः परकलत्रादिकापथप्रस्थितिश्रिता ॥३
अथ कुत्सितनट्यादिलीलाविपथगामिना ।
परस्तान् मन्त्रिसामन्तराट्प्रियाप्रान्तरव्रजा ॥४
ततोऽपि स्वेच्छपानादिकान्ताकान्तारधारिणा ।
अधिकाधिकवेगेन पात्यते नरकावटे ॥५॥ चतुर्भिः कलापकम्

किञ्च –

स्वर्णरूप्यचित्रलेप्यदावेश्मादिमयीष्वपि ।
स्त्रीष्वक्ष्णा भ्रमितो मूढो मुधा पापेन लिप्यते ॥६
आस्तां स्त्रीरूपमन्यच्च रमणीयं गृहादिकम् ।
चक्षुषा दर्शितं दृष्ट्वाऽप्ययमात्माऽतिमुह्यति ॥७

अपि च –

गन्धादयो हि विषयाः संवेद्यन्ते कदाचन ।
कदाचन ततोऽवश्यं विकारायेन्द्रियान्तरम् ॥८
उन्मीलितं तु चक्षुश्चेत् पश्यत्येव शुभाशुभम् ।
रागद्वेषौ ततस्तस्माच्चक्षुरक्षीणशक्तिकम् ॥९

किं बहुना –

न तथा स्वान्तरं वश्यावश्यं स्याद् गुणदोषकृत् ।
यथा चक्षुस्ततस्तेषु प्रधानमिदमेव हि ॥१०

---

७.२. गृहाधिकं. ९.१. उन्मालितं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदवश्येऽस्मिन्नवश्यं दुर्गतिर्देहिनां भवेत् ।
यथाऽस्य धनदेवस्य सुभद्राकुक्षिजन्मनः ॥११
धनदेवस्ततोऽवादीच्चक्षुःप्रत्ययतः कथम् ।
भवेऽभ्राम्यमहं स्वामिन् प्रसद्य प्रतिपादय ॥१२
ततः सुधर्मा सौधर्माधिपसंसेव्यसन्निधिः ।
सन्निधिर्ज्ञानरत्नानां जगाद शृणु सम्प्रति ॥१३
श्रीपुष्करवरद्वीपे प्रत्यक् स्वर्णाद्रिसंयुजि ।
भारते मध्यमे खण्डेऽभूत् काञ्चनपुरं पुरम् ॥१४
प्राकारः काञ्चनो यत्र संक्रान्तः परिखाम्भसि ।
बिभृते काञ्चनाम्भोजश्रियं काञ्चन शाश्वतीम् ॥१५
ऐश्वर्यतर्जितघनवाहनो घनवाहनः ।
तत्र राज्यं प्रशशास स्फुरद्दम्भोलिपाणिकः ॥१६
रम्भागर्भसगर्भोरु रम्भादेव्यस्य वल्लभा ।
वल्लभा सर्वतो यस्या लज्जा शीलश्रियाः सखी ॥१७
स च राजा स्वभावेन चक्षुश्चरनिवेदिताः ।
प्रतिप्रतीकं लावण्यपुण्याङ्गीः पश्यति स्त्रियः ॥१८
विचित्रनायिकाचित्रशालिकाश्चित्रशालिकाः ।
प्रतिस्तम्भं दन्तदारुपुत्रिका अप्यकारयत् ॥१९
पृष्ठतः पार्श्वतोऽग्रे च सर्वतोऽप्यङ्गनासखः ।
स नारीकुञ्जर इव विरेजे राजकुञ्जरः ॥२०
अन्येद्युर्द्युसदां प्रभोरिव नटास्तत्रागता उद्भटा-
स्तैः श्रीमान् घनवाहनो नरपतिः प्रेक्षाक्षणं याचितः ।
तेनाऽप्यद्भुतनाट्यकौशलकलालाम्पट्यपट्वात्मना
सामन्तैः सचिवैः पुरीवरनरैः सार्धं मुदाऽदीयत ॥२१
नादयन्तोऽथ ब्रह्माण्डं तौर्यिकाः समहस्तकैः ।
तूर्याण्यवादयन्नृत्ता नर्तक्यः पक्षसारिकाः ॥२२
मूलपात्रं कामदत्ता ततो रङ्गमवातरत् ।
सभासदां हृदि पुनस्तद्दिदृक्षामनोरथः ॥२३

---

२२.१. वादयंतो.

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

विघ्नं युवचकोराणां च ज्योत्स्नां प्रलिलिक्षताम् ।
स्वमुत्तरीयं मुक्त्वाऽसौ लास्यं प्राक्रमत स्वयम् ॥२४

यत्रोमाप्यनुमा यत्र नाट्यवेदश्च तुच्छवाक् ।
यत् स्तम्भनं विश्वदृशां जैत्रं तन्त्रं स्मरस्य यत् ॥२५

तदङ्गहारकरणचारीचरणचञ्चुरम् ।
उद्यत्कटाक्षपुष्पासौ तत्र नृत्तमवर्तयत् ॥२६॥ युग्मम्

तस्या रूपकलावाग्भिर्निर्निमेषनिरीक्षणः ।
शतकोटिदतामिच्छुः सत्योऽभूद् घनवाहनः ॥२७

न केवलं वपुर्वाचोस्तद्विद्याभिः सभासदाम् ।
मनःकपेरपि चिरं स्तम्भमुद्रा व्यजृम्भत ॥२८

ततो राजा ददे तस्या अधिकं पारितोषिकम् ।
सामन्तामात्यपौरा अप्युचिताभ्यधिकं ददुः ॥२९

ततश्च पूर्वाह्णेऽपराह्णे प्रदोषेऽथ महानिशि ।
राजा मुहुर्नवमिवागापयत् तामनर्तयत् ॥३०

दिव्यं भोज्याङ्गरागादि दिव्यं भूषांशुकादि च ।
स्वतोऽधिकं प्रतिदिनं तस्यै प्रादान्नरेश्वरः ॥३१

तस्या ददानः स्वर्णादिमनीषितमनेकशः ।
न पश्चान्नाग्रतः पश्यत्यक्षिरागान्धवन्नृपः ॥३२

तत ऊचे मिथोऽमात्यै राज्यमेतद् विनंक्ष्यति ।
यतः कोशक्षये राज्ञो भावी तन्त्रक्षयो ध्रुवम् ॥३३

तत्क्षयेऽरिपराभूतिस्ततो जनपदक्षयः ।
ततः सामन्तमुक्तस्य भाविनी वनवासिता ॥३४

अस्यां पद्यामिव नद्यां राड् नीलीरागतां गतः ।
न निवर्तयितुं शक्यः किं कार्यं साम्प्रतं ततः ॥३५

यतः —

गणयन्ति नापशब्दं न वृत्तभङ्गं क्षयं न चार्थस्य ।
रसिकत्वेनाकुलिता वेश्यापतयश्च कवयश्च ॥३६

आख्यद् यशस्करामात्यः सर्वानर्थखनिर्नटी ।
एतां विषादिना हिंस्तानर्थो न स्याद् यतः क्वचित् ॥३७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुबुद्धिरभ्यधत्ताथ ज्ञास्यतीदं नृपो यदि ।
तदा न नः प्राणरक्षा यदेष विषमोऽधिकम् ॥३८
ततो विमलमतिनाऽभिदधे भैष्ट मा मुधा ।
स्वयं विज्ञप्यते स्वामी चेत् तां त्यक्ष्यति तच्छुभम् ॥३९
न चेत् तदाऽसौ चतुर्थोपायसाध्यो भविष्यति ।
सर्वे विरक्ताः सामन्ता अत्रेत्येतन्न दुष्करम् ॥४०
इत्यैकमत्यान्निश्चित्य मिथो ग्रन्थिग्रहः कृतः ।
प्राप्ताश्च ते भूपपार्श्वेऽवग् मन्त्रीमतिशेखरः ॥४१
एकमाख्यानकं देव प्रभोर्विज्ञप्यमस्ति नः ।
निशामयतु तत् स्वामी विधायावहितं मनः ॥४२
घनवाहनभूमीश आख्यादाख्याहि धीनिधे ।
ततो भणितुमारेभे मन्त्री श्रीमतिशेखरः ॥४३
श्रीवसन्तपुरे जज्ञे जितशत्रुर्महीपतिः ।
सुदर्शनास्य देव्याद्या द्वितीया प्रियदर्शना ॥४४
जयसिंहः सुतोऽभ्याया अन्यस्या जयमङ्गलः ।
तौ च जातौ कलाम्भोधी राज्योचितवपुर्लतौ ॥४५
उभाभ्यामपि देवीभ्यां स्वस्य स्वस्याङ्गजन्मनः ।
राजा राज्याभिषेकाय व्यज्ञप्यत ततोऽन्यदा ॥४६
पृथ्वीपतिरथाभाणीद् युवां द्वे अपि मे प्रिये ।
तद्वत् प्रियौ सुतावेतौ कलाकूपारपारगौ ॥४७
तयोः श्रेयस्तरो यस्तु स्थापयिष्यामि तं पदे ।
युष्मत्समक्षं परीक्षां कुर्वे सर्वेप्सितं ह्यदः ॥४८
आहूतो जयसिंहोऽथ स चायातस्तदैव हि ।
राज्ञोक्तश्च विनोदेन केन पुत्राधुना स्थितः ॥४९
सोऽवक् प्रेक्षाविनोदेन सारं किं पुत्र जन्मनः ।
तेनोचे देव राजश्रीस्तस्याः सारं च पुत्र किम् ॥५०
पञ्चप्रकारविषयसेवनं तात नापरम् ।
ऊचे राजा राज्यलक्ष्म्याः साधनं वत्स किं ननु ॥५१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुत्रोऽवक् प्राक्कृतं कर्मेति कृत्वा संकथां क्षणम् ।
विसृष्टो जयसिंहोऽथाकारितो जयमङ्गलः ॥५२
समागतः स सहसा राज्ञा दापितमासनम् ।
तातं नत्वाऽऽसनं स्पृष्ट्वा पाणिनासिष्ट भुव्यसौ ॥५३
सहर्षमथ राज्ञोचे वत्सासनमलङ्कुरु ।
सोऽवोचद्देवपादानां पुरतो भूर्ममासनम् ॥५४
राज्ञोक्तश्च विनोदेन केन वत्साधुना स्थितः ।
सोऽवक् तात राजनीतिरहस्यपरिशीलनैः ॥५५
राजाऽवोचत पुत्र त्वं सोमालो न श्रमोचितः ।
स्मित्वाऽऽह पुत्रः किं तर्हि नीतिमध्यापितः पितः ॥५६
नृपोऽवक् किं फलं नीते राज्यश्रीपालनं पितः ।
राज्यस्य किं फलं पुत्र तात धर्मस्य साधनम् ॥५७
धर्मस्य साधनं वत्स देवार्चाव्रतधारणे ।
तात राजरक्षिताः स्युर्व्रतिदेवतदर्चकाः ॥५८
राजाऽऽख्यत् पुत्र राज्यस्य फलं विषयसेवनम् ।
राज्ञो विषयिणस्तात राज्यश्रीः कथमेधते ॥५९
वत्स पुण्येन राज्यश्रीर्नश्येद् विषयिणः कथम् ।
देव पौरुषहीनस्यासम्भवी पुण्यसम्भवः ॥६०
नीतिः का पुत्र राज्यश्रीपालिका तात कथ्यते ।
सामन्तानामविश्वासो विषयासक्तिवर्जनम् ॥६१
निष्फलत्यागत्यागश्च मन्त्रिमन्त्रोपजीवनम् ।
नित्योद्योगो रथाश्वेभपत्तिनित्यनिरीक्षणम् ॥६२
प्रातिवेशिकराजेभ्यः प्रीतिः परतरैः सह ।
नित्यं च चरचक्षुर्भिः प्रतिवेश्युपलम्भनम् ॥६३
सद्भावोक्तिर्मन्त्रिणां न सामन्तोत्कर्षवर्जनम् ।
पौरमानः क्रोधमानमायालोभविनिग्रहः ॥६४
द्यूतभूतपरीहारो निद्रानङ्गद्विषज्जयः ।
इति नीतिस्तात राज्योद्यानपीयूषसारणिः ॥६५॥ पञ्चभिः कुलकम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदमी मन्त्रिणः सर्वे विवदन्तेऽत्र भूरिशः ।
तद्देवो वक्तु को नाम कुमारो राज्यभाजनम् ॥६६

घनवाहनभूपोऽवग् विवादः कुत एष वः ।
ऊचेऽमात्यैः परीहासात् ततोऽब्रूत नरेश्वरः ॥६७

कः कस्य पक्षो वो मध्ये त ऊचुः पौरुषं मतम् ।
सुबुद्ध्यादेर्देव देवगुर्वादेः पुण्यमेव हि ॥६८

ततश्च चिन्तयाञ्चक्रे घनवाहनभूभुजा ।
एवमन्यापदेशेन मामप्येतेऽनुशासति ॥६९

अयेऽमी सुन्दरा नैवायाताः केनापि हेतुना ।
हुं नटीकारणादेते घटिताः कूटचेतसः ॥७०

घटन्तां सर्व एवैते मन्त्रयन्तां च किञ्चन ।
नटीं दृष्टिसुधावृष्टिं त्यक्ष्याम्येतद्भयान्न हि ॥७१

केऽमी वराकाः सचिवाः कश्चाहं घनवाहनः ।
तदमी फेरवः सत्यं भेषयन्ति मृगाधिपम् ॥७२

इत्थं विमृश्य धात्रीशस्तानूचे नावधारितम् ।
मया भवत्प्रलपितं निश्चिनुध्वं ततः स्वयम् ॥७३

दध्ये ततश्च सचिवैरये ज्ञातास्मदाशयः ।
क्रुद्धो द्रोग्धुमनाश्चैष प्रतिकार्यो द्रुतं ततः ॥७४

विमृश्येति तत्प्रसत्त्यै विधाय च कथान्तरम् ।
स्वस्थानं सचिवा ईयुश्चिकीर्षितकृतत्वराः ॥७५

नटीविनटितो राजा हितं न हि शृणोत्यपि ।
राज्यारिश्चेति निग्राह्यः सामन्तानिति तेऽभ्यधुः ॥७६

त ऊचुर्वयमेतेन धूलेरपि लघूकृताः ।
युष्मद्भियाऽकार्ष्म नेदं युष्मदुक्तकृतः परम् ॥७७

कृतैकमत्यैः सामन्तामात्यैर्भूपाङ्गजोऽपि च ।
परमार्थं निवेद्याशु विदधे स्ववशंवदः ॥७८

ततो मध्यंदिनेऽन्येद्युरेकाकी घनवाहनः ।
बबन्धेऽमात्यसामन्तैश्चिक्षिपे दारुधाम्नि च ॥७९

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

श्रीत्रिभुवनमल्लोऽथ दानशौण्डोऽभ्युदैन्नृपः ।
हस्तिमल्लप्रतिमल्लः प्रतापेनार्कसोदरः ॥८०
ततः सचिवसामन्तक्लृप्तनीतिपराक्रमैः ।
श्रीत्रिभुवनमल्लोऽभूदेकमल्लो जगत्यपि ॥८१
घनवाहनभूपेनान्यदा तादृग्दशास्पृशा ।
भाणिता मन्त्रिणो गत्वा तीर्थे स्वं साधयाम्यहम् ॥८२
तैश्च तद्भूभुजः प्रोचे तेनोचे किमिहोचितम् ।
देवात्रैव हि यत् कृत्यं कुर्यात् तीर्थगमो वृथा ॥८३
राज्ञोक्तं हेतुना केन देव क्लीबोऽयमक्षमः ।
तीर्थे मर्तुं वध्यमानोऽन्यथाऽधात् किं न पौरुषम् ॥८४
किञ्च —
करिष्यति मृतोऽसौ किं तिष्ठत्वत्रैव धर्मकृत् ।
अपि च द्विड्गृहे भिक्षुः श्रीदेवं लघयिष्यति ॥८५
अन्यच्च वैरिमिलितो मा धात् किमपि विड्वरम् ।
राज्ञोक्तं को मया सार्धं कर्तुमीशोऽस्ति विड्वरम् ॥८६
किञ्च —
पृच्छतैतं कुतो हेतो देव तीर्थे मुमूर्षसि ।
पृष्ठश्च तैः सदम्भेनाभिदधे धर्महेतवे ॥८७
मन्त्रिणोऽभ्यधुरत्रैव धर्मं दानादिकं कुरु ।
सोऽब्रूत रे दुराचारा धर्मं तीर्थं विना कुतः ॥८८
तदुक्तं तै राज्ञ ऊचे राजाऽपि व्याजहार तान् ।
मुञ्चतैनं स्वैरमेतु स्वशक्ति चैष पश्यतु ॥८९
ततोऽमात्यैर्जरतोऽश्वान् शंबलं च प्रदाय सः ।
मुक्तो जगाम समरसेनस्य स्वरिपोर्गृहे ॥९०
द्वारे स्थित्वा भाणितं च यथा त्वां घनवाहनः ।
दिदृक्षते ततोऽसौ तच्छ्रुत्वा क्रुद्धोऽब्रवीन्निजान् ॥९१
आसन्नस्य रिपोर्मूलान्यनुच्छिद्य शयीत यः ।
असौ प्राप्तोदयात् तस्माद् ध्रुवमेव विनश्यति ॥९२

---

८०.२. °भ्युदैर्नृपः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं विस्मृतं वः पापेनामुना वयमुपद्रुताः ।
कृतप्रतिकृतं शीघ्रं कुरुतास्य दुरात्मनः ॥९३
व्यज्ञप्यमात्यैः स्वगृहमागतस्य द्विषोऽपि न ।
कुलीनः प्रहरेद् देव त[द]दृष्टः प्रयात्वसौ ॥९४
राज्ञा प्रतिश्रुते तत्र तैर्दत्वोचितशम्बलम् ।
विसृष्टोऽसौ तदुपरि रुष्टो जयपुरं गतः ॥९५
राज्ञो विजयसेनस्य ज्ञापितं घनवाहनः ।
त्वां दिदृक्षुस्ततस्तेन प्रधानानामितीरितम् ॥९६
निष्काशितोऽत्रागतोयमेतद्द्वाराऽस्य नन्दनम् ।
निगृह्णीमोऽभाण्यमात्यैः सुप्तोऽहिर्बोध्यते न हि ॥९७
देव चेत् तद्ग्रहेच्छा वस्तदेतेन विनाऽपि हि ।
तं गृहाण किमूनं ते नृपोऽवग् नीतिरीक्ष्यताम् ॥९८
उपकारगृहीतेन शत्रुणा शत्रुमुद्धरेत् ।
पादलग्नं करस्थेन कण्टकेनेव कण्टकम् ॥९९
ततः प्रधानैर्मानिते प्रावेशि घनवाहनः ।
सन्मान्याभिदधे किं ते समागमनकारणम् ॥१००
घनवाहन आचख्यावेकान्ते कीर्तयिष्यते ।
ततो राज्ञा वासगृहं व्ययस्वं चास्य दापितम् ॥१०१
राज्ञाऽऽदिष्टा रहः श्रोतुं मन्त्रिणोऽगुस्तदन्तिके ।
ततो रहस्युपविश्य व्याजह्रे घनवाहनः ॥१०२
सर्वेऽपि करिणः शुल्कस्थानानि बहुधा कराः ।
राज्ञो विजयसेनस्याहं त्वेतस्य पदातिकः ॥१०३
प्रसह्य दापयत्वेकं मम राज्यं यथा तथा ।
तच्च प्रधानैरागत्य सर्वं राज्ञे न्यवेद्यत ॥१०४
राजाऽऽख्यत् किं मतं वोऽत्र धवलो मन्त्र्यथावदत् ।
देवस्तद्राज्यमादातुं समर्थः स्वयमेव हि ॥१०५

९५.४. जयदुरं. १००.१ मनिते.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

संग्रह्यते तद्विरक्तविश्रम्भार्थमसौ परम् ।
राज्ञोचे साधु साधूक्तमेवमेतन्न संशयः ॥१०६

यतो यो योऽस्य पुत्रेण दूनः सोऽस्य मिलिष्यति ।
वश्यितोऽनेन तद्देशो भविष्यति सुखात् स्वसात् ॥१०७

तन्न्याय्यमस्य साहाय्यमित्युक्ते भूभुजा ददुः ।
अमात्यास्तस्य संवाहं दुर्विगाहं सुरैरपि ॥१०८

तद्बलात् सबलंमन्यः सद्योऽथ घनवाहनः ।
गत्वाऽधाक्षीत् पुत्रदेशमभांक्षीच्च वनेभवत् ॥१०९

ये त्रिभुवनमल्लेनावज्ञाताः केऽपि ठक्कुराः ।
मिलितैस्तैर्जितकाशि मन्योऽभूद् घनवाहनः ॥११०

तेषां ग्रामपुराद्यांश्च लञ्चाभृशममंस्त सः ।
सर्वस्वेनापि तस्येष्टं तैरनिर्यातनं यतः ॥१११

श्रीत्रिभुवनमल्लोऽथ व्यज्ञप्यत सुबुद्धिना ।
तदा देव पितृत्यागादित्यप्रेक्षातरोः फलम् ॥११२

तदुपेक्षस्व नेदानीं मेदिनीं जननीमिव ।
पराक्रमक्रमो राजसिंहानां हि फलेग्रहिः ॥११३

ततः सर्वाभिसारेण श्रीत्रिभुवनमल्लराट् ।
निस्वानवाचालिताशस्तं सद्योऽप्यभ्यषेणयत् ॥११४

सीम्नि स्थित्वा वत्सराजं दण्डराजं प्रतापवत् ।
सपदि प्रेषयामास तं प्रति प्रतिपन्थिनम् ॥११५

विश्वस्यापि भयङ्करे रणभरे लग्ने तयोः सैन्ययोः
स्वस्वस्वामिकृते जयश्रियमहो प्राणैरपि क्रीणतोः ।
श्रीदण्डाधिपतिः प्रयुध्य स चिरं विश्वम्भरां देवतां
पर्याचींद् घनवाहनस्य शिरसा पाथोरुहश्रीस्पृशा ॥११६

ततो जयजयारावो निस्वानस्वानमेदुरः ।
त्रिभुवनमल्लसैन्ये जज्ञे विश्वोदरम्भरिः ॥११७

नैकपञ्चेन्द्रियाघातपातकेनातिकश्मलः ।
प्रथमे नरके कुम्भीपाकेऽगाद् घनवाहनः ॥११८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्रैकं सागरं पक्वः स शुद्धिं किञ्चिदाप्तवान् ।
ततः कथञ्चिदायुष्कक्षयेण निरकाश्यत ॥११९

तत्रैव भारते वर्षे श्रीकाञ्चनपुरेऽथ सः ।
धनावहसार्थवाहधनदेव्योः सुतोऽजनि ॥१२०

स क्रमाद् धनदेवाख्यः कुलोचितकलाञ्चितः ।
धनश्रियाश्रेष्ठिपुत्र्या पितृभ्यामुदवाह्यत ॥१२१

पूर्वजन्मभवाभ्यासाद् धनदेवः स पुङ्गवः ।
दृग्नश्यया समाकृष्टो भ्राम्यन् प्रेक्षणकादिषु ॥१२२

अतिशाद्वलरूपासु नवतारुण्यभूमिषु ।
तरुणीषु विशश्राम कामं कामवशंवदः ॥१२३॥ युग्मम्

मठे देवकुले राजकुले श्रीराजवर्त्मनि ।
रमणीरूपचकितो नाज्ञासीत् कृत्यमात्मनः ॥१२४

अन्यदा तेन ददृशे नवयौवनशालिनी ।
सुरूपा रत्नाभरणालङ्कृता लङ्खपुत्रिका ॥१२५

तस्यामध्युपपन्नोऽसौ चूतलुम्ब्यां यथा शुकः ।
तां भूरिभूरिणाऽयाचन्नापत् तत्तोलितामपि ॥१२६

त्वमस्माभिर्मिलसि चेत् तत् तवैषा भवेत् परम् ।
तत् प्रतिश्रुत्य सोऽत्याक्षीत् सर्वं पितृकुलादिकम् ॥१२७

गीतनृत्यादि तत्पार्श्वेऽभ्यस्य जातो महानटः ।
तां गौरीं प्राप्तवांश्चक्रे धनदप्रीतिमन्वहम् ॥१२८

अन्यदा विजयपुर्यां सुधर्मक्ष्मापतेः प्रियाम् ।
निरीक्ष्य कमलादेवीं नटीं सोऽमंस्त मर्कटीम् ॥१२९

गृहीत्वा स्वं वियुज्यैभ्यः पुर्यां तत्र स्थितोऽमृशत् ।
मेलकः कमलादेव्या देव्येव मम दुर्लभः ॥१३०

दुःसाधमभ्युपायेन सुसाधं वा विपश्चिताम् ।
आकृष्यन्ते ह्युपायेन दिवोऽपि हि दिवौकसः ॥१३१

निश्चित्येति नृपावासासन्नसौरभिकापणे ।
गृहीत्वाऽट्टं धनदेवोऽपणायत् कुङ्कुमादिकम् ॥१३२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा हि –

कुङ्कुमागुरुकर्पूरकस्तूरीचन्दनद्रति- ।
पटवासाम्बुवासादि व्यवहार्षीत् तदेव सः ॥१३३

यस्य श्रीमलयगिरेरिव सौरभवीचयः ।
परितो वासयाञ्चक्रुः सर्वान् सौरभिकापणान् ॥१३४॥ युग्मम्

किञ्च –

तदेव सुरभिद्रव्यं विक्रीणीते स्म स प्रधीः ।
शुद्धान्तदास्यो अमर्यस्तत्रागुर्यस्य सौरभैः ॥१३५

महार्घमप्यल्पमूल्यात् ददानेऽत्राब्रुवन्निमाः ।
सुवर्णं सुरभीत्येष सत्यमाभाणकं व्यधात् ॥१३६

क्रमेण कमलादेव्या दास्योऽप्यागुस्तदापणे ।
स च ता निश्चित्य सम्यक् सुवस्तुभिरुपाचरत् ॥१३७

तस्य सौभाग्यभणितिनानारतिकथादिभिः ।
तास्तथा वासितास्ताभिर्यथा देव्यप्यवास्यत ॥१३८

ततश्च तस्य सर्वाङ्गसौरभादित्सयोत्सुका ।
स्वाभिसन्धिनिधिं तस्मै देव्यलेखीत् सुपत्रकम् ॥१३९

यथा –

इयज्जानाति यो धूर्तः स सङ्गमघटापटुः ।
स्वेष्टं घटयते किं स किं मुधा परितप्यते ॥१४०

लिखित्वा पत्रकं पुट्यां स्वयं क्षिप्त्वा नियम्य च ।
तै × × श्च बन्धुरा इत्याख्याः कूटस्य तस्य हो ॥१४१

इत्यादिश्य प्रैषि देव्या दासी सा च तथा व्यधात् ।
धनदेवः सुधीर्दध्यावयेऽत्रास्ति रहो ध्रुवम् ॥१४२॥ युग्मम्

क्षणान्तरे समागच्छेरिति दासीं विसृज्य सः ।
पुटीमुच्छोट्य रहसि तत् पत्रकमवाचयत् ॥१४३

ततः सहर्षरोमाञ्चः संसिद्धाभीष्टमान्यथ ।
स तस्यै जात्यकस्तूर्या लिलेख प्रतिपत्रकम् ॥१४४

१३५.१. °द्रव्य. १३९.४. देव्वलोखीत्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा –

केलीगृहेऽत्रास्मि पूर्वमायास्यामि प्रिये ध्रुवम् ।
त्वमप्युद्यानिकाव्याजादेयाः सायं घनस्तनि ॥१४५

तच्च न्यस्तं तेन पुट्यां सा च तस्याः क्षणान्तरे ।
समेयुष्या ददे दास्यास्तया देव्याः समर्पिता ॥१४६

देव्येकान्ते च पश्यन्ती तद्व्यलोकत पत्रकम् ।
मुहुर्मुहुर्वाचयन्ती यावत् तिष्ठति हर्षुला ॥१४७

अत्रान्तरे कञ्चुकिना देवी विज्ञापिता यथा ।
देवि देवः समैतीति मा भूदत्याकुला ततः ॥१४८

अभ्यायान्त्यास्ततो देव्या भ्रष्टं तत्पत्रकं भुवि ।
राज्ञा चागच्छतादाय वाचितं ही विधेर्विधिः ॥१४९

पप्रच्छे कमला राज्ञा किमेतदिति साऽऽकुला ।
जाने नास्मीत्यभ्यधत्त किं वाऽन्यद् वक्तु सा तदा ॥१५०

पृष्टा दास्यः कस्य हट्टाद् गन्धानानयताधुना ।
ऊचुस्ता धनदेवस्य ततो राजा क्रुधाऽभ्यधात् ॥१५१

अरे रे तं दुराचारं कृत्तनाशाकरश्रुतिम् ।
खरमारोप्येतिदोषघोषणेन पुरान्तरे ॥१५२

भ्रमयित्वोच्चशूलायामारोपयत तत्क्षणात् ।
ततोऽसौ व्यञ्जिताङ्गस्तैस्तथाऽभ्रमि पुरेऽभितः ॥१५३॥ युग्मम्

क्रमेण प्राप्तोऽसौ साधुप्रतिश्रयगृहाग्रतः ।
ददर्श तत्र च मुनीन् दान्तान् शान्तान् महात्मनः ॥१५४

अत्रान्तरे स्वयोगेनागुण्यत केन साधुना ।
तस्य तादृक्पापभाविदुर्गत्युद्धारबन्धुना ॥१५५

अरहंतनमुक्कारो जीवं मोएइ भवसहस्साओ ।
भावेण कीरमाणो होइ पुणो बोहिलाभाय ॥१५६

उद्गृहीतं च तेनेदं वणिजा तत्त्वतृष्णजा ।
गुणयन्नेव तदसौ शूलायां हाऽधिरोपितः ॥१५७

---

१४५. घनस्नालि.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततोऽचिन्त्यधाम्ना तस्य भव्यत्वपाकतः ।
कषायाल्पतयाऽऽत्मीयताहक्पापातिनिन्दया ॥१५८
आयौवनादृष्टिरागदौरात्म्यपरिगर्हया ।
तिर्यङ्नरकगत्याख्यदुर्गतिद्वारवारणात् ॥१५९
मध्यमगुणसम्पत्त्या तत्तत्साधूपबृंह[णात् ] ।
तत्पाठस्य परावृत्त्या स नरायुरुपार्जयत् ॥१६०॥ त्रिभिर्विशेषकम्
क्षणाद् विपद्य कौशाम्ब्यां महापुर्यामिहैव हि ।
धनस्य सार्थवाहस्य धनदस्य श्रियां भरैः ॥१६१
शीललक्ष्मीसुभद्रायाः सुभद्रायाश्च योषितः ।
स जीवो धनदेवस्य नन्दनः समजायत ॥१६२॥ युग्मम्
धनदेव इति नाम पितृभ्यां तस्य निर्ममे ।
प्राचीनभवतन्नाम्नः कथञ्चिच्छ्रवणादिव ॥१६३
स च त्वमेव सुमते स्वमत्येदं विभावय ।
येन स्वानुभवात् तेऽपि द्रढीयान् प्रत्ययो भवेत् ॥१६४

ईहापोहादि कुर्वन्नथ खलु धनदेवः स सार्थादिनेता
जातिस्मृत्या परीतो निजजननचतुष्कं यथावद्ददर्श ।
श्रीसूरेन्दोः पदाब्जे न्यपतदथ ततः संयमर्धिं किलाप्तुं
विज्ञो व्यज्ञापयच्च व्रतितिलकभवाब्धेरितस्तारयेर्माम् ॥१६५

सुगुरुरभयदेवो भक्तिरच्छा जिनोक्ते विरतिरखिलपापाच्चेति कैवल्यहेतुः ।
विलसति बत सम्प्रत्यद्भुता योग्यता भोः परमवहितहृद्यं श्रूयतां श्रोत्रवृत्तम् ॥१६६

इति श्रीनिर्वाणलीलावतीमहाकथेतिवृत्तोद्धारे **लीलावतीसारे** जिनाङ्के **चक्षुरिन्द्रियविपाक-व्यावर्णनो** नाम दशम उत्साहः * ॥

---

१६६.१. °रिच्छा. १६६.४. परसव°.

* ग्रं. २७४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## एकादश उत्साहः

अथ श्रीमान् सुधर्मेशः सुधर्मेशस्तुतक्रमः ।
श्रीविजयसेनराजमुखेभ्यः पुनरादिशत् ॥१

श्रोत्रं वः प्रीण्यते श्रोत्रस्वरूपोत्कीर्तनापथा ।
को न हि प्रीयतेऽसौ स्वरूपस्योत्कीर्तनादिह ॥२

असौ श्रवणहरिणो गीतिमाकर्ण्य हारिणीम् ।
यानपानाशनत्यागात् प्राणान्न गणयत्यपि ॥३

अखर्वगान्धर्वरागात् श्रोत्रमत्तमतङ्गजः ।
निबिडं बन्धमात्मानं नयते न यतः सुखम् ॥४

आदौ शृणोति गीतादि युवा कौतुकमात्रतः ।
सत्कलैषेति मुदितस्ततोऽभ्यस्यति गायति ॥५

क्रमक्रमात् ततश्चैष तिरस्कृत्य क्रियान्तरम् ।
मनुते गीतवातूलो गीतमेकं जने फलम् ॥६

चारणैर्गायकंभट्टैरत्युच्चैः कृत्यवर्णितः ।
अनीदृशोऽपि चेद्दक्षंमन्यस्तेषु द्युवृक्षति ॥७

वेणुवीणामृदङ्गादिध्वनिडम्बरगर्भिताम् ।
गीतिहालां पिबन् मूढो हा धर्मार्थौ प्रहापयेत् ॥८

वीणात्रिसरिकासारङ्गिकारावणहस्तकान् ।
पण्याङ्गनागानगर्भान् सुधापायं पिबत्यसौ ॥९

पानगानरसावेशात् प्रसङ्गादग्रतोऽग्रतः ।
चोक्षाचोक्षव्यवहारं हा हारयति पातकी ॥१०

अथ पण्याङ्गनागीतकटाक्षस्मरसायकैः ।
प्रभिन्नचेता ग्रहिलो हा महेलाः करोति ताः ॥११

गीतादिव्यसनात् तासां सर्वस्वस्यापि दायकः ।
मुग्धो न गणयेत् कोशक्षयं राज्यक्षयं न च ॥१२

---

२.४. वरूप°. ७.१. °र्गाथकै. ८.१. तारं°. ८.३. पाना° ११.१. पाना°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः क्लिश्नाति कोशार्थं प्रजाः सामन्तमन्त्रिणः ।
अलीकक्षूणकैर्वृत्तिं पदातीनां भनक्ति च ॥१३

दण्डहीनः कोशहीनो मुक्तः सामन्तमन्त्रिभिः ।
ततो राज्याय दायादैः प्रधानैर्वा स रुध्यते ॥१४

रणायोत्तिष्ठमानोऽसौ रौद्रध्यानी बलं विना ।
विनाश्यते तैर्नरकं याति गीतितरोः फलम् ॥१५

ततः कुनरतिर्यक्षु गीतव्यसनतो भ्रमन् ।
सुमानुषत्वं लभते कथञ्चिन्नमध्यमैर्गुणैः ॥१६

दृष्टान्तः पुनरत्रायं राजन् सूरः पुरोहितः ।
पुरोहितस्ततः सूरः सूरिमेवं व्यजिज्ञपत् ॥१७

कथङ्कारं मया स्वामिन् श्रोत्रेन्द्रियनिबन्धनः ।
दुःखाम्भोधिरवगाढो ज्ञानाब्धे प्रतिपादय ॥१८

ततः सिंहमहाराज सूरेणेति निवेदिते ।
सुघोषाघोषनिर्घोषः सुधर्मस्वाम्यथाभ्यधात् ॥१९

जम्बूद्वीपेऽत्रैव वर्षे भारते भाति राजतः ।
भरतांतस्तिरोमानदण्डो वैताढ्यपर्वतः ॥२०

तत्रोभे बाहुवत् श्रेण्यौ नानापूरत्नभूषणे ।
तत्राभूदुत्तरश्रेण्यां नभआभरणं पुरम् ॥२१

यत् श्रीविद्याधरैर्विद्याधरीभिश्च विभास्वरम् ।
देवैर्देवाङ्गनाभिश्च देवलोक इवाशुभत् ॥२२

श्रीमान् कमलवेगाख्यस्तत्र विद्याधरेश्वरः ।
सुरेश्वर इवाभासीत् शतकोटिदपाणिकः ॥२३

साहसं यस्य पादातं सद्बोधो मन्त्रिमण्डलम् ।
विवेकः सामन्तजातमास्तिक्यं बान्धवव्रजः ॥२४

सर्वाधिकारी संवेगो निर्वेदस्तु नियोगिनः ।
दयातत्त्वरुचिक्षान्तिमुखमन्तःपुरं तथा ॥२५

श्रीप्रज्ञप्तिमहाविद्या दृढप्रणिधिसंहतिः ।
नृपतिप्रक्रियामात्रं पादाताद्यपरं पुनः ॥२६॥ त्रिभिर्विशेषकम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा —

अर्हदाज्ञैव कोटीरं स्याद्वादो मणिकुण्डले ।
पुण्यश्रीरत्नतिलकस्ताम्बूलं सूनृतं वचः ॥२७
जयश्रीर्मणिकेयूरं दानं रत्नाङ्गुलीयकम् ।
हारः पञ्चनमस्कारो लीलाब्रज्यांह्रिभूषणम् ॥२८
यशःकीर्ती च संव्यानोपसंव्याने समन्ततः ।
तस्य राज्ञः परिष्कारभारो भारोऽपरः परम् ॥२९॥ त्रिभिर्विशेषकम्
त्रिलोकसारदलिकघटितेव गतोपमा ।
सुधासारसंभृतेवातुल्यसौभाग्यभाजनम् ॥३०
शीलशालीन्यकौलीन्यसम्यक्त्वार्जवशेवधिः ।
देवी मदनरेखाऽभूत् तस्य खेचरभूभुजः ॥३१॥ युग्मम्
तयोः श्रीकमलवेगश्रीमन्मदनरेखयोः ।
भुञ्जतोः पुण्यकल्पद्रुफलं वैषयिकं सुखम् ॥३२
उपर्यनेकपुत्राणामुपयाचिततुष्टया ।
कुलदेव्या द्वे प्रदत्ते उदीयाते सुते क्रमात् ॥३३॥ युग्मम्
तयोर्जन्मोत्सवश्चक्रे पित्रा पुत्रोत्सवाधिकः ।
मदनपूर्वा मञ्जूषा शलाकेत्यभिधाऽपि च ॥३४
धात्रीभिर्लाल्यमाने ते खेल्यमाने नृपैरपि ।
ज्योत्स्नाज्योत्स्नेशमण्डल्याविव वृद्धिमुपेयतुः ॥३५
अधीतिन्यौ ते च सर्वकलासु निजनामवत् ।
यौवनं कामराजस्य मित्रं चित्रमचित्रयत् ॥३६
रूपश्रिया रतिजितौ शरज्ज्योत्स्नाजितौ त्विषा ।
मत्या चातिसरस्वत्यौ पार्वत्या अतिसौभगे ॥३७
क्षोभयन्त्यौ च विद्याभृत्सुरासुरमनोऽम्बुधीन् ।
क्रमक्रमेण जज्ञाते ते स्मरावतरोचिते ॥३८॥ युग्मम्
सूर्योदयक्षणेऽन्येद्युस्ते स्वसौधस्य मूर्धनि ।
सहारूढे वयस्याभिः खेलितुं नैकखेलनैः ॥३९

३७.३. मात्या.  ३९.१. °क्षणै.



Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

यावत् सौधोपरि परिक्रीडन्ते ताः सुनिर्भरम् ।
तावज्जगाद मदनशलाका विस्मयोन्मुखी ॥४०
हला हला व्योम्नि दूरेऽत्यव्यक्तोऽश्रुतपूर्वकः ।
कोलाहलध्वनिः कोऽपि कर्णातिथिरभून्मम ॥४१
जगौ मदनमञ्जूषा श्रुती ते भगिन वादिते ।
अपरा काऽपि किमपि न शृणोत्यन्यथा कथम् ॥४२
अथ क्षणान्तरेऽन्यान्याप्यूचे किञ्चित् निशम्यते ।
अथ सर्वा अवदधुः शुश्रुवुश्चास्फुटं ध्वनिम् ॥४३
सम्भावनाबलज्ञाततत्तद्व्यतिकराऽपरा ।
तत्पुरवासिकुरङ्गवेगभूर्मतिसुन्दरी ॥४४
व्याजहार हला ज्ञातं लेशोद्देशादिदं मया ।
कोलाहलस्यास्य मूलं भगिन किं श्रूयतां हलाः ॥४५
अस्त्यस्मिन्नेव वैताढ्ये भूमीभृत्युत्तमाङ्गवत् ।
सिद्धं कूटं तत्र चैत्यं प्रसिद्धं वः किरीटवत् ॥४६
तत्र यात्रार्थमायातां यातां विद्याभृतां किल ।
दवीयस्त्वाददृश्यानामयं कलकलध्वनिः ॥४७
क्षणेऽत्राभयसुन्दर्योदैर्ये तत्सखि नानृतम् ।
किं त्वतिप्राज्यलोकोत्थो ध्वनिरेष विजृम्भते ॥४८
तादृग्जनश्च यात्रायां सा च चैत्रेऽद्य फाल्गुनः ।
तदन्यत् कारणं किञ्चिद् विद्याभृन्मेलके वद ॥४९
मतिसुन्दर्यवग् भूयो यात्रैवात्र निबन्धनम् ।
यतोऽतीतप्रदोषे मे तस्थुष्याः सौधमूर्धनि ॥५०
अकस्मादेव मे तातोऽवतीर्णो व्योममण्डलात् ।
मया चासनदानादि तद्वेलोचितमादधे ॥५१॥ युग्मम्
पित्रा गृहीताऽस्म्युत्सङ्गे ततोऽप्रच्छि मयाऽसकौ ।
तदा तात प्रस्थितस्येयतीवेला क्व तेऽत्यगात् ॥५२
पिताऽऽख्यत् पुत्रि जानासि सिद्धायतनमस्ति यत् ।
तात जाने तर्हि वत्से तत्राद्य प्राप्तवानहम् ॥५३

५३.४. °वाहनं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तातान्यदाऽपि तत्रैषि वेला नत्वियती लगेत् ।
यत् प्रगेऽद्य प्रस्थितोऽसि विकाले च समागमः ॥५४
तदद्य सिद्धायतने विलम्बोऽभूत् कुतः पितः ।
व्याजहार पिता पुत्रि सावधानं निशामय ॥५५
अस्ति स्वस्तिश्रियां धाम पुरं गगनवल्लभम् ।
यद् वीक्ष्य स्वःपतेर्मन्ये त्रिदिवं स्वं न वल्लभम् ॥५६
प्रज्ञप्त्यादिमहाविद्याप्रभीष्टा(?)तुलशासनः ।
परमार्हतराजोऽत्र राजा पवनवेगराट् ॥५७
सर्वविद्याभृतां चक्री श्रेणिद्वितयनायकः ।
दिवं भुवं चान्तरा यो नित्यमन्तरराजति ॥५८
तस्योपयाचितशतैः कुलदेव्याऽतितुष्टया ।
देवी रत्नवती पुत्ररत्नात् सत्याभिधा कृता ॥५९
तस्य जन्मनि वैताढ्यसर्वचैत्येषु चक्रिणा ।
अकाले यात्राकरणेऽद्यादिष्टाः खेचराः समे ॥६०
ततोऽमुत्रासन्नसिद्धायतने महनिर्मितौ ।
कमलवेगादिविद्याभृतामाज्ञामदात् प्रभुः ॥६१
ततः पुत्रि तत्र विद्याधराणां मेलके सति ।
कमलवेगखचरो महोत्सवमचीकरत् ॥६२
तत्र तीर्थे स्नानगानार्चननर्तनवन्दनैः ।
पुनानस्य जनुर्वत्से कालक्षेपोऽद्य मेऽभवत् ॥६३
अन्यच्च श्वः समेतव्यमिहेत्यङ्गीकृतं समैः ।
अवश्यं तत्र गन्तव्यं तत् कल्येऽमुन्यनन्तरम् ॥६४
ततो मयाऽभाणि तात श्रान्ता विश्राम्यताधुना ।
ततस्तातोऽस्मि च स्वे स्वे तल्पेऽस्वपि च लीलया ॥६५
प्रातस्ततोहमुत्थाय युष्मत्पार्श्वे समागमम् ।
ततोऽकाले चैत्ययात्राकारणं निश्चितं मया ॥६६
ततो जगाद मदनशलाका हे वयस्यिकाः ।
वयमपि तादृग्तीर्थनत्या स्याम निरंहसः ॥६७

---

५६.३. °मन्ये.

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

भगन्ये तत्साधु साधूक्तमित्युपबृंह्य ताः समाः ।
स्वस्ववेश्मसु गत्वा च स्नात्वा भुक्त्वा विलिप्य च ॥६८

निवस्य देवदूष्याणि जग्मुः सङ्केतितास्पदम् ।
स्मृत्वा विद्यां समुत्पेतुः सिद्धचैत्यं ययुश्च ताः ॥६९॥ युग्मम्

तत्र चानादिनिधनं सर्वश्रेयोनिबन्धनम् ।
जिनेन्द्रबिम्बं विधिना नमस्यामासुराशु ताः ॥७०

ततो विद्याधरीदेवीकिन्नरीणां विमध्यतः ।
ता नमस्कृत्य मदनमञ्जूषाद्याः समासत ॥७१

महाशनिजवः पूर्वं प्राप्तो विद्याधरेश्वरः ।
तत्रापश्यत् तां मदनमञ्जूषां स्मरशेवधिम् ॥७२

जिघृक्षुरिव तां ज्ञात्वा मदनेन रुषा शरैः ।
विद्धो महाशनिजवः सद्यश्चिन्तातुरोऽजनि ॥७३

तथा हि –

कस्यैषाभिनवस्य पङ्कजभुवो लोकोत्तरा निर्मितिः
किञ्चोच्चैर्विमलं कुलं तिलकयत्येषाऽद्भुतालङ्कृतिः ।
अस्यैषा पुरुषोत्तमस्य हृदये संधास्यते श्रीश्रियं
किं वाऽन्यैर्मम नेत्रपत्रपुटयोरेषा सुधां वर्षति ॥७४॥

स्त्रीरत्नं तदियं यस्य गृहे खेचरचक्रयसौ ।
यथातथेयं तद्ग्राह्या प्रतिमल्लोऽत्र को मम ॥७५

यद्वा मेऽक्ष्णा चञ्चलेन मनो मुग्धं विमोहितम् ।
तदिमे बोधयित्वाशु सुपथे स्थापयाम्यहम् ॥७६

हे मनश्चक्षुषी तीर्थे युवां यात्रार्थमागते ।
तन्निषिद्धं किमारब्धं धिग् धिग् वामिति चापलम् ॥७७

इत्यनुशिष्यमाणे ते बलात् तामेव जग्मुषी ।
मनःस्पृशा दृशा तस्याः परिरब्धे मुदा चिरम् ॥७८

तयोस्तादृग्दृग्विलासं मन्त्री वरमतिर्विदन् ।
पप्रच्छ कञ्चन सखे केयं कमललोचना ॥७९

---

७१.४. समासतः.   ७६.१. अक्ष्णां.

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

सोऽवक् कमलवेगस्य विद्याधरपतेरियम् ।
श्रीकन्या सुभगंमन्या सुमुखी विमुखी नरात् ॥८०

दध्यौ स मन्त्री मत्स्वामी यथाऽस्यां लोललोचनः ।
मत्स्वामिनि तथैषाऽपि ततोऽभूत् प्रियमेलकः ॥८१

अथ श्रीसिद्धायतने यात्रामासूत्र्य खेचराः ।
सर्वे स्वां स्वां पुरीं जग्मुः शिवपुर्यां तु योग्यताम् ॥८२

महाशनिजवः सैष मन्दमन्दगतिर्ययौ ।
स्वपुरं सुन्दरानन्दं तन्मनस्तु तया सह ॥८३

तत्सङ्गमोत्सवोपायशतचिन्ताव्रजं सृजन् ।
श्रीमान् महाशनिजवस्तेन व्यज्ञपि मन्त्रिणा ॥८४

देवस्य हृद्गर्भगृहे या विवेश बलादपि ।
सा श्रीकमलवेगस्य कन्या विद्याधरेशितुः ॥८५

महाकुलं कलास्थानं युवानमपि खेचरम् ।
मन्यते स्वगुणाहंयुश्चञ्चासध्यञ्चमेव सा ॥८६

प्रभुं तु सा तदा तादृग्दृग्विलाससरोरुहैः ।
वपुष्मन्तं स्मरमिव पूजयामास सत्वरम् ॥८७

ततोऽभिरुचितस्तस्याः स्वाम्यवश्यं न संशयः ।
तादृशामीदृशा भावा मनोभावं विना न हि ॥८८

सुधीः सुदर्शनः सैष तत् तस्या वरकोऽधुना ।
श्रीकमलवेगपार्श्वे प्रेष्यते सा यदीष्यते ॥८९

पितृपार्श्वे परं तस्यां समेयुष्यां शुभक्षणे ।
उदीर्यं सर्वथा कार्यमित्यादेश्यः सुदर्शनः ॥९०

महाशनिजवेनाथ शिक्षां दत्वा सुदर्शनः ।
प्रहितस्तत्र तत्कार्यसाधने प्रहितः स हि ॥९१

तत्र प्राप्तेन मदनमञ्जूषाध्यक्षमीरितम् ।
श्रीकमलवेगराजन् महाशनिजवो नृपः ॥९२

इमां मदनमञ्जूषां मञ्जूषां गुणसम्पदाम् ।
भवन्तं याचते तावद् देवो जानात्यतः परम् ॥९३॥ युग्मम्

---

८१.२. लोलुल्लोचनः.

ततो निरूपितं राज्ञा मुखं तस्यास्तनूभुवः ।
महाशनिजवः कोऽयं तयाऽप्रच्छि शनैः सखी ॥९४
सख्या प्रोचे प्रियसखि योऽसौ तत्र तदा त्वया ।
चिरं कटाक्षमालाभिः सर्वतोऽर्चित एष सः ॥९५
ततोमदनमञ्जूषा जोषमाजुष्य तस्थुषी ।
तातेन जगदे वत्से प्राप्तकालमिहास्तु किम् ॥९६
हर्षाश्रुप्लावितदृशा रोमाञ्चाञ्चितगात्रया ।
ऊचे पुत्र्या पित्रधीनाः पुत्र्यो न स्ववशाः पितः ॥९७
ततो ज्ञाततदाकूतस्तं दूतं प्रोक्तवान् नृपः ।
जवाद् गत्वाऽशनिजवं वदोद्वह जवादिमाम् ॥९८
दूतः सुदर्शनो गत्वा कार्यसिद्धिं प्रभोर्जगौ ।
महद्धर्या स च मदनमञ्जूषां तामुपायत ॥९९
ततस्तां सुन्दरानन्दां सुन्दरानन्दपत्तने ।
निनाय मेदुरामोदो महाशनिजवो जवात् ॥१००
अनिच्छन्ती स्फुरद्धर्यसौन्दर्यमपि खेचरम् ।
कौमारमेव मदनशलाका वहते परम् ॥१०१
स श्रीमहाशनिजवस्तया वल्लभया सह ।
रममाणो रतिसुखं नवस्मरकलामधात् ॥१०२

ततश्च —

नानोद्यानसरोवापीसरिद्गिरिवणादिषु ।
तत्रार्हत्समवसृतिश्रीसिद्धायतनादिषु ॥१०३
यात्राभिः सुपवित्राभिः पुण्यपुण्यव्ययार्जने ।
वितन्वन्तौ दम्पती तौ दिनंदिनमतीयतुः ॥१०४॥ युग्मम्

सन्मार्गस्थितिमातनोति नितरां यो निम्नगानां क्षणाद्
यो भिन्ते घनबन्धनानि च दिशां सम्यग् दशानामपि ।
यश्चोच्चैः कमलाकरान् वितरितुं प्रोद्घाटयत्यञ्जसा
सोऽन्येद्युः प्रससार कोऽपि हि शरत्कालः क्षमापालवत् ॥१०५

१०४.४. दिनंदनं. १०५.४. सरत्कालः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः सर्वावरोधेन निर्विरोधेन भूषितः ।
स रेमे नन्दनोद्याने खचरेशः सुरेशवत् ॥१०६

इतश्च —

रत्नपुरशिरोरत्नश्रीभानुपृथिवीभुजः ।
तनयः काञ्चनच्छायः सुव्रताशुक्तिमौक्तिकम् ॥१०७
आजन्माऽपि चतुःषष्ट्या सुरेन्द्रैः सेवितक्रमः ।
पञ्चचत्वारिंशिधनुस्तनुर्दम्भोलिलाञ्छनः ॥१०८
भुक्तापोज्झितसाम्राज्यः संयमश्रीपरिष्कृतः ।
अम्लानकेवलज्ञानादर्शसंक्रान्तविष्टपः ॥१०९
आकाशगेन छत्रेण पुण्येनेव विराजितः ।
चामराभ्यां यशःकीर्तिभ्यां त्वीदृग्भ्यां प्रवीजितः ॥११०
देवदुन्दुभिनाऽऽकाशे शब्दाद्वैतं प्रदर्शयन् ।
सांह्रिपीठेनासने[न] रत्नेनौजःश्रियाश्रितः ॥१११
धर्मचक्रेणान्तरारिघातचक्ररुचाऽग्रतः ।
आर्हत्यसौधध्वजेनेन्द्रध्वजेन च शोभितः ॥११२
केवलश्रीदर्पणेन दिव्यभामण्डलेन च ।
निधिष्विव नवस्वर्णकमलेषु पदौ दधत् ॥११३
नैकाभिर्देवकोटीभिः सम्यक्त्वैरिव देहिभिः ।
मूर्तिमद्भिर्नु चारित्रैः संयुतः संयुतायुतैः ॥११४
नमद्भिरभितो वृक्षैः कृतपुण्यप्रवर्षणः ।
कीर्त्यमानयशोराशिश्चतुर्धाऽमरचारणैः ॥११५
पुण्यस्कन्ध इवाध्यक्षस्तीर्थं किल चराचरम् ।
तीर्थेश्वरः पञ्चदशः श्रीधर्मस्त्रिजगत्प्रभुः ॥११६
युगादिदेवादिजिनचतुष्कोत्पत्तिपावने ।
श्रीअयोध्यापुरे पुष्पकरण्डे समवासरत् ॥११७॥

एकादशभिः कुलकम्

ततश्च समवसृते धात्रीं योजनमात्रिकीम् ।
मरुद्बहुकरैर्वायुकुमाराः क्षणतोऽमृजन् ॥११८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिषिचुर्वसुधां गन्धाम्बुभिर्भक्तिभरैरिव ।
रजःशान्त्यै शरन्मेघा इव मेघकुमारकाः ॥११९

क्ष्मां बबन्धुः स्वर्णमणिरत्नाश्मभिरुदंशुभिः ।
व्यन्तरास्तत्र चक्रेशसौधे वर्धकिरत्नवत् ॥१२०

जानुदघ्नीः सुमनसोऽधोवृन्ताः पञ्चवर्णिकाः ।
मुमुचुस्ते दिव्यवृष्ट्या सद्यः संपुष्पितेव भूः ॥१२१

रत्नस्वर्णमयानुच्चैस्तोरणांस्ते चतुर्दिशि ।
शालभञ्जीध्वजच्छत्रमकरप्रवरान् व्यधुः ॥१२२

तदन्तरे च परितो रुप्रप्राकार आदधे ।
भवनेशैर्वलयितप्रालेयाद्रिभ्रमप्रदः ॥१२३

तदूर्ध्वं कपिशीर्षाणि कानकानि चकाशिरे ।
चामीकरारविन्दानि स्वःस्रवन्तीप्रवाहवत् ॥१२४

सकूटहिमवच्छीललीलो ज्यौतिषिकैः कृतः ।
सुवर्णवरणो रत्नकपिशीर्षस्तदन्तरे ॥१२५

वैमानिकैर्मणिकपिशीर्षश्चक्रे तदन्तरा ।
रत्नवप्रो रत्नगिरेरिव सारसमुच्चयः ॥१२६

तत्सर्वमध्येऽशोकाख्यश्चैत्यपादप उन्नतः ।
जम्बूवृक्षानुजन्मेव विचक्रे वानमन्तरैः ॥१२७

तन्मूले महदुच्चैश्च रत्नपीठं व्यधायि तैः ।
तस्यालवाललीलां यद् दध्रे कान्तितरङ्गितम् ॥१२८

तस्योपरि विचक्रे तैः देवच्छन्दश्चतुर्मुखः ।
अनेकभङ्गिसुभगो वैमानिकविमानवत् ॥१२९

तदुत्सङ्गेषु चतुरो रत्नसिंहासनान् व्यधुः ।
सांह्रिपीठान् मेरुशैलशिलासिंहासनश्रियः ॥१३०

तत्पुरश्चामरधरौ यक्षौ बभतुरुज्ज्वलौ ।
वहन्मन्दाकिनीस्रोतोहिमाद्रिशिखरोपमौ ॥१३१

देवच्छन्दोपरि सितछत्रत्रयमराजत ।
मिलिताश्विनराधोज(?)राकेन्दुत्रितयोपमम् ॥१३२

---

१३१.३. श्रोतो°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवच्छन्दक ऐशान्यां रत्नैरैवप्रमध्यतः ।
गृहेऽपवरक इव विश्रामाय कृतोऽर्हतः ॥१३३

प्रतिवप्रं च चत्वारि चतुरस्रविमानवत् ।
द्वाराणि रेजिरे तत्र धर्मस्येव चतुर्भिदः ॥१३४

कल्पद्रुपल्लवैस्तत्र चक्रुर्वन्दनमालिकाः ।
दिग्वधूनां चतसृणामिव शोणाश्मकंबिकाः ॥१३५

प्रतिद्वारमराजन्त सध्वजा रत्नतोरणाः ।
सकीर्तयो भगवतः प्रतापा इव सर्वतः ॥१३६

तोरणान्युभयतश्च स्वर्णरत्नघटा बभुः ।
भव्येभ्यः सज्जिता धर्मनिधानकलशा इव ॥१३७

कानक्यो धूपघटिका घनधूमलतामुचः ।
द्वारेषूभयतो रेजुर्यववारकविभ्रमाः ॥१३८

वाप्यः स्वच्छपयःपूर्णास्तत्राभुर्विकचाम्बुजाः ।
स्वर्वाप्य इव तीर्थेशं द्रष्टुमेयुः सुरैः सह ॥१३९

इत्यादिव्यन्तराश्चक्रुः सर्वेभ्यो धन्यमानिनः ।
सुस्वामिबहुकार्याप्तौ बहु हृष्यन्ति सेवकाः ॥१४०

पौरस्त्यदेशनादेशात् तथैवस्थं सुरैः क्षणात् ।
आहृत्येवेति समवसरणं तत्र निर्ममे ॥१४१

ततश्च देवकोटीभिः परितः परिवारितः ।
सर्वथाऽदृष्टचरवद् दृश्यमानः पुनः पुनः ॥१४२

प्रभो चिरं जय स्वामिन् नन्द जीव चिरादिति ।
आशास्यमानः पुरतो मुहुर्निर्जरचारणैः ॥१४३

परिबंभ्रम्यमाणेषु भक्तितो नु प्रदक्षिणम् ।
नवसु स्वर्णपद्मेषु न्यस्यन्नंह्रिसरोरुहम् ॥१४४

पूर्वद्वारेण समवसरणं प्राविशत् प्रभुः ।
श्रीधर्मनाथतीर्थेशः साक्षादिव महोदयः ॥१४५॥

चतुर्भिः कलापकम्



Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरुञ्छयन्तं नु चलैः कौसुम्भैरिव पल्लवैः ।
प्रदक्षिणीकृत्य चैत्यपादपं पादपोत्तमम् ॥१४६
तीर्थं नमस्कृत्य कृत्यमिवमावश्यकं किल ।
पूर्वसिंहासने पूर्वाभिमुखो न्यषदत् प्रभुः ॥१४७॥ युग्मम्
त्रिदिशि प्रतिरूपाणि रचयाञ्चक्रिरे सुरैः ।
प्रभोः सदृशि प्रभुवद्वक्तृणि प्रभुवैभवात् ॥१४८
ततो गणेन्द्रप्रमुखसाधवः स्वःपुरन्ध्रयः ।
साध्व्यश्च पूर्वद्वारैत्य प्रददुस्त्रिः प्रदक्षिणाम् ॥१४९
तीर्थं च तीर्थनाथं च नत्वा सपुलकोत्करम् ।
दिशि दक्षिणपूर्वस्यामासामासुर्महर्षयः ॥१५०
तत्पृष्ठतोऽस्थुः स्वर्देव्य ऊर्ध्वास्तदनुसंयताः ।
प्रभुपूजार्थकमलमुकुलायितपाणयः ॥१५१
पूर्ववद् भवनपतिज्योतिष्कव्यन्तरस्त्रियः ।
अपाग्द्वाराऽऽगत्य तद्वत् नैऋतेऽस्तु यथाक्रमम् ॥१५२
प्रत्यग्द्वारेण भवनेशज्योतिर्व्यन्तराऽमराः ।
प्राग्वत् प्रविश्य न्यषदन्नपरोदग्दिगन्तरे ॥१५३
इन्द्रादिदेवा राजादिनरा नार्य उदग्दिशा ।
प्रदक्षिणय्येशं [प्राग्वन्]नत्वैशान्यामुपाविशत् ॥१५४
तिस्रस्तिस्रो दिशि दिशि बभूवुरिति पर्षदः ।
ताभिश्च शाखाभिरिव बभौ कल्पद्रुमः प्रभुः ॥१५५
सर्वभाषानुकारिण्या विस्तारिण्या च योजनम् ।
सुधाविस्राविण्याऽथ वाण्या श्रीधर्मो धर्ममादिशत् ॥१५६

भो भोः संसारसिन्धौ विधुरनिरवधौ मज्जनोन्मज्जनानि
व्यातन्वद्भिर्भवद्भिः कथमपि नृजनुः प्रापि चिन्तामणीव ।
सम्यग्नीत्या तदाराधयत यदमुतः शुद्धसम्यक्त्वरत्ना-
द्यासाद्यासादयध्वं तदपि शिवपदं यत्र निःसीमशर्म ॥१५७

इतश्च सोऽशनिजवो ललनाभिः समं ललन् ।
उदीच्या गच्छतोऽपाच्यां विमानान् व्योम्न्युदैक्षत ॥१५८

---

१४९.३. द्वारे°. १५१.१. तत्पृष्ठेतो.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किमेतदिति संभ्रान्तो यावदेष व्यचिन्तयत् ।
तावत् प्रज्ञप्त्याऽस्य कर्णे व्यज्ञप्यत रहस्यवत् ॥१५९
देवायोध्यापुरे देवदेवं श्रीधर्मतीर्थपम् ।
अभ्यायातं मुदा नन्तुं यान्ति खे खेचरा अमी ॥१६०
अथाशनिजवोऽवादीदासन्नान् खेचरान् प्रति ।
प्रभुं नन्तुं गम्यते भोः सत्वरं देव गम्यते ॥१६१
ततो विमानं विकृत्य कृत्यवित् सपरिच्छदः ।
तदारुह्य द्रुतं प्राप श्रीधर्मस्वामिनोऽन्तिके ॥१६२
विधिना स प्रभुं नत्वा सान्तःपुरपरिच्छदः ।
उपशक्रं निषसाद शक्रलीलां विडम्बयन् ॥१६३
तत्रान्तरे भगवतो देशनारत्नरोहणात् ।
केचित् सम्यक्त्वमाणिक्यं देशव्रतमणिं परे ॥१६४
केचिच्च चारित्रचिन्तामणिमप्युपलेभिरे ।
पर्युपास्तिर्भगवतां न कस्याऽप्यवकेशिनी ॥१६५॥ युग्मम्
देशनोपरमे स्वामी देवच्छन्दमशिश्रियत् ।
सर्वा अपि परिषदः प्रायः स्वास्पदमैयरुः ॥१६६
अस्मिन् क्षणे समागत्य देवेनैकेन सादरम् ।
ऊचे मदनमञ्जूषा वन्दे त्वां श्राविकोत्तमे ॥१६७
तयाऽप्युत्थाय चक्रेऽस्या गोरवात् प्रतिवन्दनम् ।
सदाचारविधौ सन्तः प्रमाद्यन्ति क्वचिन्न हि ॥१६८
तदाऽशनिजवस्यासीद्गृहायोत्कः परिच्छदः ।
ततः स देवोऽवग् विद्याभृत्पते क्षणमास्यताम् ॥१६९
प्रतिश्रुतं खेचरेण सुरेणारम्भि भाषितुम् ।
सौम्ये मदनमञ्जूषे सावधानं निशम्यताम् ॥१७०
भगिनी तेऽस्ति या लघ्वी पुरुषद्वेषिणी किल, ।
सा प्राच्यजन्मपतिनाऽविवाह्यमरकेतुना ॥१७१
साऽऽख्यत् क्वासौ कथं वाऽस्या जन्मान्तरपतिः स च ।
किमर्थं च त्वं ब्रवीषि देवोऽवग् श्रूयतां शुभे ॥१७२

---

१६१.३. तंतुं. १६३.३. उपशकं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्यैव जम्बूद्वीपस्यैरावते परिदिद्युते ।
सत्याभिधं चन्द्रपुरं पुरं चन्द्रमुखीमुखैः ॥१७३

तत्रासीत् सोमदत्ताख्यो द्विजः षट्कर्मकर्मठः ।
चतुर्दशानां विद्यानां तत्त्ववित् तत्प्रणेतृवत् ॥१७४

तस्य प्रिया सोमभद्रा सोमादित्यस्तयोः सुतः ।
सर्वविद्यः कृतः पित्रा स च सर्वज्ञमान्यभूत् ॥१७५

दीक्षितब्रह्मदेवस्य नन्दना हृद्यदर्शना ।
सुदर्शना तेन मुदा पितृभ्यामुदवाह्यत ॥१७६

इतश्च –

सम्यग्ज्ञानलतावितानमुदिरः सम्यक्त्वरत्नाकरः
प्रव्रज्याप्रमदावसन्तसमयः शश्वत्तपःश्रीप्रियः ।
नानालब्धिनदीनदीपरिवृढः पुण्यस्वकोशो दृढ-
स्तत्रागाद् दृढधर्मसूरितिलकः षण्डे सहस्राम्रके ॥१७७

कल्पद्रुममिवोदीतं श्रुत्वाऽगात् तं नमस्यितुम् ।
सान्तःपुरपरीवारो जितारिर्वसुधाधवः ॥१७८

प्रदक्षिणय्य नत्वा च यियाचिषुरिवेप्सितम् ।
कृताञ्जलिः स उर्वीशो न्यविक्षत गुरोः पुरः ॥१७९

सद्देशनासेतुबन्धः प्रबन्धेन गरीयसा ।
भवाम्भोधिं लङ्घयितुं बबन्धे सूरिणा ततः ॥१८०

सोमादित्योऽशृणोद्राजा सूरिपार्श्वे ययाविति ।
ततोऽहंमानी सामर्षः स चिन्तां चकृवानिति ॥१८१

तत्र गत्वा राट्समक्षं तं जित्वा च सिताम्बरम् ।
नृपं विपरिणमय्य स्वं यजमानमादधे ॥१८२

विचिन्त्येति सोऽभिमानी तत्रागत्याभ्यधाद् गुरुम् ।
किमेवमत्युच्चगिरा विरसं रारटीषि भोः ॥१८३

गुरुः –

सर्वज्ञोपज्ञधर्मोक्तौ विरसं मूढ किं ननु ।
अजीर्णदोषिणो यद्वा याति पथ्यमपथ्यताम् ॥१८४

---

१७९.२. यियाचिपु°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्विजः —

भो भो असति सर्वज्ञे तदुक्तधर्मसंकथा ।
गगनाम्भोजसौरभ्यकीर्तनामनुधावति ॥१८५

गुरुः —

ऐहिकामुष्मिकानेकानुष्ठानादिनिबन्धनम् ।
किं नास्त्येव हि सर्वज्ञः सर्वभावावभासकृत् ॥१८६

द्विजः —

सर्वज्ञो नास्ति सद्ग्राहकसकलसमक्षादिमानातिगत्वा-
यत् स्यादेवं तदेवं खसुममिव तथा चैष तस्मात् स नास्ति ।
हेतुर्नासन् परात्माऽपि हि न खविषयोऽभ्रं(?) च रूपाद्यभावात्
तज्ज्ञानं तच्च सर्वार्थगतमिति कथं नाम विद्यात् समक्षम् ॥१८७
प्रत्यक्षेऽसति नानुमानमपि तं गृह्णाति तद्विस्फुटम्
व्याप्तिज्ञप्तिभवं न साऽनिशपरोक्षे लिङ्गलिङ्गिद्वये ।
तज्ज्ञप्तावनुमान्तरात् पुनरवस्था नैव तत्कारणा-
भावान्नास्त्यनुमानमत्र समयोऽप्येतस्य न ज्ञापकः ॥१८८

तथा हि —

किञ्चिज्ज्ञपूर्वेऽत्र न हि प्रमाणता सर्वज्ञपूर्वस्तदसिद्धितोऽस्ति न ।
अपौरुषेयेऽत्र च सर्वविद् वृथा तन्नागमः सर्वविदः प्रसाधकः ॥१८९
तस्यादृष्टो नैव(?)सादृश्यबोधस्तस्याभावात् तत्र नैवोपमानम् ।
दृष्टाद्यं(?) किं तं विना दुर्घटं तन्नार्थापत्तेरप्यमुष्योपपत्तिः ॥१९०
ततः प्रमाणपञ्चकं न यत्र वृत्तिमश्नुते ।
भवत्यभावगोचरः स सर्ववित् खपुष्पवत् ॥१९१

गुरुः —

यत् प्रोक्तं भवतो न सर्वविदुरोऽध्यक्षादिदृश्यः स किं
दृश्यो नास्ति तवैव सर्वजगतीवास्तव्यलोकस्य वा ।
आद्ये निश्चितसाधनं न भगवद्दीक्षासु योग्यो भवान्
प्रत्यक्षोपरमो निषेधति न च त्वन्मातृजन्मादिकम् ॥१९२

---

१८६.३. सर्वज्ञा.

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

सर्वेऽपि पश्यन्ति न ही तमित्यदो जानाति सर्वज्ञमृते न कश्चन ।
त्वं चेद् विजानासि तदाऽसि सर्ववित् तं त्वं निषेधत् स्वमहो निषेधसि ॥१९३

तथा यो यत्रार्थे नियतमविसंवादिवचनः
स तत्सम्यग्ज्ञाता त्वमिव निजगेहप्रभृतिषु ।
तथा चिन्ताल्का(?)शशभृदुपरागादिषु जिन-
स्ततस्तद्विज्ञाता कृतिभिरुररीकर्तुमुचितः ॥१९४

न चेयन्मात्रेऽस्यावगतिरिति विद्वज्जनमतं
पटायाक्षिस्फारं घटमुखमिहस्थं हि मनुते ।
ततस्तद्दृष्टान्ताद् भगवति समात्यक्षममना(?)-
नुमानं दृश्यैकावगतिरिव दृश्यान्तरगतौ ॥१९५

यतः –
एकात्यक्षा × × × × × × ×
सर्वात्यक्षावरणविगमे सर्ववित्त्वं न किं तत् ।
किं वा स्थेयो जगति भवताऽपीन्द्रियातीतदर्शी
यागस्वर्गान्वयगतिरपि स्यात् कथं ह्यन्यथा ते ॥१९६

अपौरुषेयागमतोऽथ यागस्वर्गा वयस्यावगतिः समस्ति ।
नैवं वचः स्यात् पुरुषं विना नो शाल्यङ्कुरः शालिमृते किमु स्यात् ॥१९७

यत उक्तम् –
ताल्वादिजन्मा ननु वर्णवर्गो वर्णात्मको वेद इति स्फुटं च ।
पुंसश्च ताल्वादिरतः कथं स्यादपौरुषेयोऽयमिति प्रतीतिः ॥१९८

ततश्च –
यः सर्वज्ञो यथाऽभूत् स च भरत इवाध्यक्ष आसीत् तदानीं
नानासंशीतिहृत्याऽनुमित उपमितः प्राग्भवैः सर्वविद्भिः ।
अर्थाद्वाऽतीन्द्रियार्थप्रणयनत इहापन्न उक्तः श्रुते चे-
त्यास्तेऽसौ सर्वमानप्रथित इतरथा सर्वलोपप्रसङ्गः ॥१९९

सोमादित्य तदस्ति सर्वविदुरोऽत्रान्यत्र वा सर्वथा
तद्धर्मप्रतिपादनं न विरसं तत्सौम्य विद्धि स्वयम् ।
इत्येवं दृढधर्मसूरितिलकैरुक्तः स मुक्तांहसा
नत्वा पूज्यपदौ जगाद भगवन् सुष्ठु त्वया बोधितः ॥२००

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चारित्रावरणकर्मक्षयोपशमतोऽथ स: ।
ऊचे पित्राद्यनुमत्या दीक्षिष्येऽहं तवान्तिके ॥२०१
प्रभुराहास्त्वविघ्नं ते मा स्म भोः प्रतिबध्यथाः ।
गत्वा गृहे ततः सोऽवग् पितरौ दयितामपि ॥२०२
आद्यश्वेताम्बराचार्यपार्श्वे धर्मः क्षमादिकः ।
भवाब्धिसेतुर्निर्वाणहेतुस्तात श्रुतो मया ॥२०३
ततस्तं त्वदनुज्ञातस्तातांगीकर्तुमुत्सहे ।
सहेद्भवदवस्थानं कः पश्यन् निर्गमं सुधीः ॥२०४
इति स्वपुत्रस्य वाचं मन्वाना वज्रनिष्ठुराम् ।
ततो माता साश्रुपाता जगादेति सगद्गदम् ॥२०५
वत्सास्माककुलादित्य सोमादित्य विदांबर ।
श्रेष्ठवर्ण ज्येष्ठपुत्र किमवाच्यमवोचथाः ॥२०६
त्रयीमुखाः क्व भूदेवास्तीर्थस्नात्रपवित्रिताः ।
शूद्राधमाः श्रमणकाः क्वामी मलमलीमसाः ॥२०७
धर्मस्य वार्ता द्विजेषु न श्वेताम्बरधारिषु ।
कस्तूर्यामोदो मृगेषु न गर्ताशूकरादिषु ॥२०८
तद्वत्स श्रमणोपान्ते दीक्षेच्छां मा कृथाः क्वचित् ।
चेत् कुलस्य पितुः स्वस्य मम चेच्छसि गौरवम् ॥२०९
पिताऽप्याचष्ट ते वाक्यं प्राङ्मेऽभूच्चन्दनं हृदि ।
अधुना तु त्वदाख्यातं तत्र वज्रानलायते ॥२१०
त्रयीबाह्येषु शूद्रेषु धर्मः श्रमणकेषु कः ।
त्रयीबाह्यं ह्यनुष्ठानं कष्टं कष्टाय केवलम् ॥२११
त्वयाऽधीता त्रयी ब्रह्म षट्कृत्वोऽष्टौ समाधृतम् ।
गृहाश्रमेऽधुना पुत्रान् जनयित्वा त्रयीधरान् ॥२१२
अध्याप्य बहुशश्छात्रानिष्टापूर्तं विधाय च ।
भोजयित्वा द्विजान् वानप्रस्थो भूयाः कुलोत्तम ॥२१३॥ युग्मम्
शूद्राधमानां तु धर्मं न चक्रुः कुर्वते न च ।
करिष्यन्ति न च क्वापि सर्ववर्णोत्तमा द्विजाः ॥२१४

२०२.१. प्रभुरागहा°.    २११.२. श्रवणकेषु.

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

ततस्तदत्यसंबद्धमश्रद्धेयं न सूनृतम् ।
स्वच्छाशय कदाचित् ते न वक्तुमपि कल्पते ॥२१५

सोमादित्योऽथ गुरुराट्प्रदत्तज्ञानशेवधिः ।
वाग्वैभवं कुटुम्बस्य व्यतानीद् दुर्गतिच्छिदे ॥२१६

हे तातानाद्यविद्याख्यठकेन ठकितात्मनः ।
मतिमोहोऽनादिरासीन् ममापीयच्चिरं हृदि ॥२१७

सम्यग्गुरुगिरातत्त्वज्ञानेनाघाति सोऽधुना ।
तत्त्वस्य साक्षात्कारो हि धियां स्यात् परमं बलम् ॥२१८

तत् तात तत्त्वविदुषामविद्याशिल्पिकल्पितम् ।
नालम्बनं भवत्येतद् यत् तातेन प्रजल्पितम् ॥२१९

ततश्च –

वेदा अधीता न त्राणं न त्राणं भोजिता द्विजाः ।
न त्राणं जनिताः पुत्रा इति वेत्ति न कः सुधीः ॥२२०

यतः –

सर्वे वेदास्तन्न कुर्युः सर्वे यज्ञाश्च भारत ।
सर्वतीर्थाभिषेकाश्च यत् कुर्यात् प्राणिनां दया ॥२२१

दया च धर्मस्य मूलं सा च पूर्णाऽर्हतां मते ।
एकेन्द्रियादिकान् जीवान् नैवान्ये जानतेऽपि हि ॥२२२

यच्च शूद्राधमा इत्याद्युक्तं तन्नैव युक्तिमत् ।
के शूद्रा ब्राह्मणाः के वेत्यपि ज्ञातव्यमस्ति यत् ॥२२३

हिंसासक्ता अविरता ब्रह्मचर्यविवर्जिताः ।
पाप्मिचाटुकृतो वेश्यादिप्रतिग्रहधारिणः ॥२२४

यामिच्छागादिपंचाक्षघातनिर्घृणमानसाः ।
कथं वयं ब्राह्मणाः स्मः शूद्रा एवेति लक्षणैः ॥२२५॥ युग्मम्

श्रमणा भगवन्तस्तु हिंसाद्यघपराङ्मुखाः ।
समितिगुप्तिगुप्ताश्च स्वाध्यायध्यानलालसाः ॥२२६

प्रतिबन्धप्रतिकर्मपरतप्तिविनाकृताः ।
शत्रुमित्रतृणस्त्रैणस्वर्णपर्णसमाशयाः ॥२२७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दान्ताः शान्ताः तपोलीना निरीहास्त्यक्तमत्सराः ।
कथं शूद्रा अधमा वा किन्तु ते ब्राह्मणोत्तमाः ॥२२८॥

त्रिभिर्विशेषकम्

किञ्च यज्ञोपवीतेन ब्राह्मणः स्याद् गुणेन वा ।
यद्याद्यस्तद्ब्राह्मणः स्यात् तद्वृत्तौ योऽपि सोऽपि हि ॥२२९
गुणेन चेत् स हिंसादिरहिंसादिरथो मतः ।
आद्ये व्याधादयो विप्रा द्वितीये साधवः परम् ॥२३०

यतः –

सत्यं ब्रह्म तपो ब्रह्म ब्रह्म चेन्द्रियनिग्रहः ।
सर्वभूतदया ब्रह्मेत्येतद् ब्राह्मणलक्षणम् ॥२३१
ब्राह्मणो ब्रह्मचर्येण यथा शिल्पेन शिल्पिकः ।
अन्यथा नाममात्रं स्यादिन्द्रगोपककीटवत् ॥२३२
अथ द्विजद्विजीजातो ब्राह्मणो न तदप्यलम् ।
स्त्रीणां चापलतो नैव सम्यग् निश्चीयते पिता ॥२३३
कुशावलम्बसुहृदा तदनेन न किञ्चन ।
तन्मां तातानुजानीहि येनाशु प्रव्रजाम्यहम् ॥२३४
भट्टोऽवादीद्वत्स गृहाश्रमपालनकातराः ।
अदातारः कापुरुषाः पाषण्डमधिशेरते ॥२३५

तदुक्तम् –

गृहाश्रमसमो धर्मो न भूतो न भविष्यति ।
पालयन्ति नराः शूराः क्लीबाः पाषण्डमाश्रिताः ॥२३६
पुत्रो जगाद किं तात ये केचित् व्रतमाश्रिताः ।
सर्वे कापुरुषास्तेऽत्र यदि वा केचिदेव हि ॥२३७
आद्ये जैमिनिमन्वाद्याः सर्वे कापुरुषास्तव ।
तद्भाषितं ततो मिथ्या नानुष्ठेयं बुधैः क्वचित् ॥२३८
सिद्धसाधनमन्यस्मिन् केचिदाजीवकाः किल ।
तत् काशपुष्पवदिदमवकेशिवचस्तव ॥२३९



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनर्जनयिताऽऽचष्ट वत्स पृच्छ स्वमातरम् ।
भवद्भिः सममेवासौ प्रश्निताऽत्र न वा पितः ॥२४०

ततो माताऽऽह हे वत्स प्रव्रजिष्यसि किं कृते ।
सोऽवग् धर्मकृते मातस्तर्हि वत्स निशामय ॥२४१

मात्रापित्रोरसमाधि कृत्वा प्रव्रजतस्तव ।
अधर्मो निश्चितस्तावद्धर्मः सन्दिग्ध एव भोः ॥२४२

पुत्रोऽवादीदत एव युष्मान् विज्ञापयाम्यहम् ।
यन्मे युष्मत्समाधानात् पुण्यं पुण्याय जायते ॥२४३

भक्त्यानुकूलितौ तौ च पत्नीं पृच्छेत्यवोचताम् ।
साऽऽख्यत् पठितमूर्खस्य ब्रवीम्येतस्य किं पितः ॥२४४

सोमादित्यस्ततः स्मित्वा प्रेयसीं प्रत्यवोचत ।
जाड्यज्वरहरे वाचां देवि साक्षात् सरस्वति ॥२४५

प्रसद्य सद्यस्त्वमेव मामध्यापय बालिशम् ।
पठितमूर्खे मय्येवमुपालम्भस्तवैव हि ॥२४६॥ युग्मम्

परीहासविलासेनानेन स्मरशरातुरम् ।
तं मत्वा साऽपाङ्गदृशा पश्यन्ती तमभाषत ॥२४७

भक्तानुरक्तां तारुण्यपुण्यां मामेवमेव हि ।
मुञ्चन् प्राणेश निःक्लेशशोच्यतामुपयास्यसि ॥२४८

प्रियोऽथ हे प्रिये नाहमपरीक्षितकारकः ।
सुपरीक्षितकारी तु कथं यास्यामि शोच्यताम् ॥२४९

पुनः प्रियाऽऽख्यत् प्राणेश प्रेक्षावत्तां प्रवेद्मि ते ।
आसंघर्षात् त्वयुक्तोक्तिमन्तुं क्षन्तुं ममार्हसि ॥२५०

किञ्च दीक्षिष्यसे त्वं चेत् तद्दीक्षिष्येऽस्म्यपि ध्रुवम् ।
सदने कानने वाऽपि सत्यः पत्यनुगामुकाः ॥२५१

सोमादित्यो मुदाऽऽचष्ट साधु साधु पतिव्रते ।
इदं ते भाषितं कान्ते प्रेमहेमकषोपलः ॥२५२

ऊचे पितृभ्यां यः पन्था यूनस्तव विवेकिनः ।
स आवयोर्विशेषेण सुकुले ह्येकमार्गता ॥२५३

---

२४०.४. न या. २५१.४. °गामुकः. २५२.३. इदं च ते.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततश्च स्वजनान् सर्वान् सुखाकृत्य स कृत्यवित् ।
पत्न्या पितृभ्यां स सह दीक्षायै गुरुमाश्रयत् ॥२५४

सोमदत्तं सोमभद्रां सोमादित्यं सुदर्शनाम् ।
चतुरोऽप्यदिदीक्षत् तान् दृढधर्मयतीश्वरः ॥२५५

अभ्यास्यतां गुरोः पार्श्वे संयतौ तौ श्रुतक्रिये ।
श्रीसुव्रताभिधमहत्तरापार्श्वे च संयते ॥२५६

संवेगात् ते च चारित्रं चिरमाचेरुरुज्ज्वलम् ।
तपोऽग्निना चात्महेममधिकाधिकनिर्मलम् ॥२५७

भीष्मे ग्रीष्मेऽन्यदा भीमैरस्नानादिपरीषहैः ।
ब्राह्मण्यबन्धुभिरिव सोमादित्यो जितोऽवदत् ॥२५८

कीदृग् धर्मो विना शौचं शौचं न मलधारणे ।
ततः प्रासुकनीरेण स्नानं नानुचितं खलु ॥२५९

आजन्मलग्नाब्रह्मण्यवासना या तिरस्कृता ।
सा वहन्ती च तद्वैरं व्यलगत् सोमदत्तजे ॥२६०

ततोऽनुशास्यमानोऽपि गुरुणा जनकेन च ।
बकुशत्वं प्रपेदे स गात्रप्रक्षालनादिभिः ॥२६१

वार्यमाणो निन्द्यमानो गीतागीतमुमुक्षुभिः ।
स मनाक्मलिनाचारस्तस्थौ पृथगुपाश्रये ॥२६२

तादृग्ज्ञानरमावासस्तादृग्वैराग्यशेवधिः ।
स्वैराचारः सोऽपि जज्ञे मरे(?) कर्मरिपोर्बलम् ॥२६३

सखेदं सोमदत्तोऽथ गुरून्नत्वा व्यजिज्ञपत् ।
भवाब्धेरेवमुन्मग्नोऽप्यस्मि मङ्क्ष्यामि सुप्रभो ॥२६४

यतः –

पृथक्स्थितोऽसौ स्वैरित्वाद् विरुद्धं किञ्चिदाचरन् ।
मा भूद् भवभ्रमीत्यस्य द्वितीयः स्यामहं यदि ॥२६५

तदाऽऽज्ञाबाह्योऽहमपि भविष्यामि भवास्पदम् ।
तत् प्रसद्यैषोऽपि विभो कथञ्चिदनुवर्त्यताम् ॥२६६॥ युग्मम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुरुत्वे संगतोऽस्यान्येऽप्येवं स्युर्व्रतालसाः ।
जगौ मुनिः साधवस्तं हीनाचारं हि जानते ॥२६७
ततो नालम्बनं स स्यात् तेषां युष्मद्गिराऽपि च ।
सोमादित्यस्तत् प्रसह्याहूयतां स्वपदान्तिके ॥२६८
सूरिभिः साधवः पृष्टास्तद्वचस्तैः प्रमाणितम् ।
जगदे गुरुभिर्भूयो नाऽनुशिष्यः स केनचित् ॥२६९
सोमादित्यस्ततो हूतो गच्छेऽप्यस्थाद् यदृच्छया ।
एवं शुद्धव्रतस्तातः पुत्रस्तु शबलव्रतः ॥२७०
प्रान्तेऽनशनमाधाय समाधाय च मानसम् ।
सौधर्मे श्रीप्रभे तौ च विमाने जज्ञतुः सुरौ ॥२७१
पिताऽभवद् विमानेशः पुत्रस्तस्यैव किङ्करः ।
एतावदन्तरं हि स्याच्छुद्धाशुद्धचरित्रयोः ॥२७२
किञ्चिच्चंछबलचारित्रे सोमभद्रासुदर्शने ।
प्राग्वत् तयोरेव पत्न्यौ देव्यौ तत्रैव जज्ञतुः ॥२७३
ते प्राक्शबलचारित्रादल्पायुष्कतया च्युते ।
सोमभद्रा त्वमभवः सुदर्शना तु ते स्वसा ॥२७४
सोमदत्तः पुनरहं सागरायुर्विमानराट् ।
निष्कलङ्काखण्डपुण्यविलासः स्यादमूदृशः ॥२७५
इतिदेवोक्तवृत्तान्ताज्जातिस्मृत्येकबीजकात् ।
प्रापन्मदनमञ्जूषा जातिस्मृतिमहानिधिम् ॥२७६
इयं देवमथावोचद्देवमेवेति निश्चितम् ।
तदहं प्रव्रजिष्यामि व्रजिष्यामि तवान्तिकम् ॥२७७
जगाद देवोऽद्याप्यस्ति कर्मभोगफलं तव ।
ऊचे मदनमञ्जूषा स पुत्रः क्वास्ति मेऽधुना ॥२७८
निर्जरो व्याजहाराथ भद्रेऽस्त्यत्रैव भारते ।
कच्छो नाम जनपदः पदमाश्चर्यसम्पदाम् ॥२७९
तत्रास्ति रत्नखचितं रुचितं महसाऽञ्जसा ।
मेदिन्यास्तिलकमिव मेदिनीतिलकं पुरम् ॥२८०

२७४.२. च्युते.

तत्रोत्तराशाधिपतिः स्फुरन्नवनिधीश्वरः ।
अलकायामिवाराजद् राजा श्रीनरवाहनः ॥२८१

अर्हन् देवो गुरुः साधुर्धर्मः सर्वज्ञभाषितः ।
इति तत्त्वं सत्त्वमिव यस्याध्यात्मं व्यजृम्भत ॥२८२

तस्य प्राणप्रिया जज्ञे देवी श्रीकमलावती ।
निःसीमरूपकमला कमला श्रीपतेरिव ॥२८३

स च त्वदीयतनयदेवजीवस्ततच्युतः ।
तस्याः कुक्षाववातारीत् सरस्यामरविन्दवत् ॥२८४

समयेऽजायतैतस्यास्तनयोऽद्भुतरूपवान् ।
नाम्ना श्रीअमरकेतुर्मीनकेतुरिव श्रियः ॥२८५

क्रमेण तं कलापात्रं कलाचार्यो विनिर्ममे ।
युवराजरमापात्रं पुनः श्रीनरवाहनः ॥२८६

तमन्यदा राज्यपदेऽभिषिच्य नरवाहनः ।
धर्मरत्नगुरूपान्ते प्रव्रज्याराज्यमाददे ॥२८७

स च राजाऽमरकेतुर्धूमकेतुः प्रतापतः ।
इन्द्रियार्थेषु शब्दस्य साम्राज्यपदवीमदात् ॥२८८

ततश्च —

मधुमत्ताङ्गनागीतगीतपीयूषवाहिनीम् ।
सदाऽवगाहते स्मासौ राज्यचिन्तापराङ्मुखः ॥२८९

गीतविद्याकोविदानां स्त्रीणां पुंसां च भूरिशः ।
सुवर्णरत्नालङ्कारान् स ददौ ठकितः किल ॥२९०

चारणाद्यैः श्रुतिसुखमत्युच्चैः कृत्यवर्णितः ।
अतादृशोऽपि तादृक्षं मन्यस्तेषु द्युवृक्षति ॥२९१

गान्धर्व्यसत्कलागेहं गान्धर्वमिव देहवत् ।
तस्य राज्ञः पुरो वा(?)गात् पानगायनपेटकम् ॥२९२

राज्ञा सपरिवारेण सद्योऽस्यावसरो ददे ।
यदिष्टं यस्य तत्रासौ विलम्बं नावलम्बते ॥२९३

२८२.१. साधुधर्मः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा गीतं तथा नृत्तं तथा चान्तःसु(?) भाषितम् ।
पानपत्न्या यथा तस्यां राजा तन्मयतामगात् ॥२९४

स्वर्णं रत्नानि वस्त्राणि ग्रामाकरपुराणि च ।
दत्तान्यस्यै बहवमंस्त सुतीर्थेऽर्पयितादपि ॥२९५

अहर्निशमुपतल्पं स्थितां तां पानवल्लभाम् ।
स्वेच्छयाऽगापयच्छास्ति कः स्वच्छन्दं नृपद्विपम् ॥२९६

इत्यस्थानामानदानात् कोशस्य विमृशन् क्षयम् ।
मन्त्री विमलमत्याख्यो रहस्युर्वीशमभ्यधात् ॥२९७

राज्यश्रियो मूलपीठं पूर्वजैर्वः प्रतिष्ठितम् ।
कोशमस्थानदानेन किमेव खनसि प्रभो ॥२९८

स्वामिन् दत्तेन वीरेभ्योऽमुना हि विजिगीषुराट् ।
राज्यान्तरं लीलयैव दुःसाधमपि साधयेत् ॥२९९

वृथा क्षीणे पुनः कोशे प्रारब्धो रिपुभिर्नृपः ।
राज्यभ्रष्टो निःसहायः सह याति वनेचरैः ॥३००

कोशाद्यकामया पृष्टाः शिष्टमेतैर्यथास्थितम् ।
भास्वानिवास्तसमये राट्कोशोऽजनि निर्वसुः ॥३०१

अन्यच्च किञ्चिद्देवस्य वच्मि चेन्नापराध्यहम् ।
राजाऽऽख्यन्नापराधस्ते ब्रुवाणस्य हितोचितम् ॥३०२

देवासमीक्ष्याभिधायी यत्किञ्चिद् भाषते जनः ।
गायकीं पानपत्नीं तत् सौधे न्यासेध यत्नतः ॥३०३

पोस्फुर्यमाणाधरोऽथ कोपात् पाटललोचनः ।
राजोचे राजतोऽमात्या विज्ञाः किं येन शास्सिरे ॥३०४

राज्ञा भृत्या अमात्याद्याः क्रियन्ते यदि कल्पतः ।
एतावताऽपि किं ते स्युः शिक्षकाः स्वामिनः पितुः ॥३०५

तथा सामन्तमन्त्र्यादेः कोशाः सर्वे ममैव हि ।
समुद्रवत् ततः कोशः कल्पान्तेऽपि ममाक्षयः ॥३०६

अप्रसन्नं प्रभुं बुद्ध्वा मन्त्र्यवोचत् कृताञ्जलिः ।
एवमेतत् प्रभो पौरप्रवृत्तिः कीर्तिता मया ॥३०७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेत्ति सर्वं देव एव पामरो वेत्ति किं जनः ।
वयं प्रभोरपत्यानि शिक्षणीयाः समन्ततः ॥३०८
सन्तु सामन्तादिकोशाः कोशा येऽन्यमहीभुजाम् ।
स्वाधीनाः स्वामिनस्तेऽतिचण्डदोर्दण्डशालिनः ॥३०९
सान्त्वयित्वेति नृपतिं तदहर्जातमान्यसौ ।
गृहेऽगाद् राजविज्ञप्तिहेवाकस्तु बहिर्ययौ ॥३१०
सामन्तस्यारिसिंहस्यान्यदा मन्तुं विनैव हि ।
देशश्च राजधानी चापहृत्यामरकेतुना ॥३११
तेभ्यो विलेभे डुम्बेभ्यः कुटुम्बेभ्य इवात्मनः ।
क्व वा विवेको विषयासक्तश्रवणसञ्ज्ञिनाम् ॥३१२॥ युग्मम्
ततस्तेनारिसिंहेन साभिमानेन सिंहवत् ।
सामन्ता मन्त्रिणः सर्वेऽप्येवं रहसि भाषिताः ॥३१३
या मे गतिरभूत् सा वोऽप्यद्य श्वो वा भविष्यति ।
तच्चिन्तयत यत् कृत्यं यद्भविष्या विनंक्ष्यथः ॥३१४
यतोऽयं गीतवातूलो नापवादं समीक्षते ।
राज्यं न चिन्तयत्येवाधत्ते कोशक्षयं भशम् ॥३१५
कलकण्ठीः पानपत्नीः क्षेप्स्यत्यन्तःपुरेऽचिरात् ।
ततो डुम्बमयं सर्वमयमेकीकरिष्यति ॥३१६
अतोऽद्य स्थाप्यते राजा प्रतिस्फुरन्निदं(?) समैः ।
ततो विमातृजं राज्ञो भयमिह समूहवत्(?) ॥३१७
तेनागत्य गीतासक्तो × × × × रसज्यत ।
मन्त्रिसामन्तशक्त्या [च] राज्यंद्वयमधिष्ठितम् ॥३१८
प्रवाहितोऽमरकेतुर्नद्यामद्यैव सुन्दरि ।
व्यसनं नात्र नामुत्र कस्यापि स्याच्छुभावहम् ॥३१९
ऊचे मदनमञ्जूषा तत् किं कार्यं मयाऽधुना ।
भद्रे गच्छ वनेऽमुत्र द्रुतं द्रक्ष्यसि तत्र तम् ॥३२०
तं च नीत्वाऽऽशु वैताढ्ये नभआभरणे पुरे ।
भगिनीं स्वस्य मदनशालाकां त्वं विवाहय ॥३२१

३१६.१. प्रान°. ३१७.३. विमातृनं. ३१९.२. नामु.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो युवां भुक्तभोगे धर्ममत्याः पदाम्बुजे ।
प्रव्रज्य केवलं प्रान्ते प्राप्यात्रैव हि सेत्स्यथ ॥३२२
स च ते प्राग्जन्मपुत्रोऽमरकेतुरितो भवात् ।
षष्ठे भवे सेत्स्यतीति धर्मस्वामी ममादिशत् ॥३२३
तत्सौम्ये व्रज तत्र त्वं यथादिष्टं समाचर ।
आख्यान्मदनमञ्जूषा त्वं तमानीय मेऽर्पय ॥३२४
देवोऽग्र मे सहायाता देवाश्चेलुर्दिवं प्रति ।
पश्चादेकाकिनः स्थातुं न च भद्रे ममोचितम् ॥३२५
भो भो महाशनिजव मदुक्तं कुर्वती सखे ।
त्वया नेयं निषेद्धव्येत्युक्त्वा दिवमगात् सुरः ॥३२६
साऽपि मदनमञ्जूषाऽल्पीयस्तरपरिच्छदा ।
पतिमापृच्छ्य वेगेन् देवादिष्टे वने ययौ ॥३२७
ददर्श च तमालस्य पादपस्य तले स्थितम् ।
अमराकारममरकेतुं द्रुतमुपास्पत् ॥३२८
उच्छोट्य तद्बन्धनानि तयाऽसौ मधुरं जगे ।
भो भद्र • त्वं सुपुरुषलक्षणाढ्यो निरीक्ष्यसे ॥३२९
विषमां दुःसहामेतां दशां प्राप्तश्च लक्ष्यसे ।
मिथो विरुद्धादेतस्मान्मनश्चित्रीयते मम ॥३३०
व्याजहार नृपोऽकस्मात् तां दृष्ट्वा विस्मिताशयः ।
हे सुन्दरीदं किं चित्रं चित्रचित्रार्णवे भवे ॥३३१
यतः —
जगद् विनटयत्येष निर्निमित्तरिपुर्विधिः ।
नृतिर्यङ्नारकसुररूपैर्नैकैरनन्तशः ॥३३२
धिग् धिग् भवो यत्र राजा रङ्को रङ्कस्तु भूपतिः ।
पत्तिः पतिः पतिः पत्तिर्दायकोऽर्थी स दायकः ॥३३३
ततः स्मित्वाऽऽह मदना सत्यं सत्पुरुषो भवान् ।
ईदृश्या यद्यपि न हि विषादी कथमन्यथा ॥३३४
किन्तु यत् ते विधत्ते स्म दशावेशममूदृशम् ।
तत्कारणमहं श्रोतुमिच्छामि स्वच्छमानसा ॥३३५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राजाऽवदत् कच्छदेशे मेदिनीतिलकं पुरम् ।
तत्राहममरकेतुर्गीतासक्तोऽभवं नृपः ॥३३६

गीतासक्तेर्मया ग्रामसहस्रं दत्तमन्यदा ।
डुम्बानामथ मन्त्र्यूचे देवेदं युज्यते न हि ॥३३७

मयाऽपमानितश्चैष दायादैः कृतमेलकः ।
मां गृहीत्वा संयमय्य निम्नगायामचिक्षिपत् ॥३३८

बाहुबन्धनतो नास्मि तरीतुं सरितं क्षमः ।
अस्फुरत्पौरुषो नष्टजीविताशः स्थितः क्षणम् ॥३३९

अत्रान्तरे महानद्यास्तस्या उपरिगामिणा ।
भारुण्डपक्षिणाऽऽत्तोऽहं बुभुक्षा क्षामकुक्षिणा ॥३४०

मां गृहीत्वा गच्छतोऽस्य प्रदेशेऽत्र नभस्तले ।
भारुण्डेनान्येन लग्नं युद्धं भक्ष्यनिबन्धनम् ॥३४१

युद्धाकुलस्य तस्याहं छुटितश्चरणग्रहात् ।
वल्लीवनेऽत्र पतितो ददृशे सुन्दरि त्वया ॥३४२

ततो मदनमञ्जूषा सविषादमदोऽवदत् ।
अहो महाधीर दशा विषमोपस्थिता तव ॥३४३

हा हा धिग् धिग् विधेरस्तु परव्यसनकारिणः ।
परान् विनाशयन्नेष स्वयं किं न विनश्यति ॥३४४

विधेरजननिर्वाऽस्तु विचारविमुखात्मनः ।
स्वापत्यानां महापुंसां यो दत्ते सम्पदापदौ ॥३४५

सम्पत्तिश्च विपत्तिश्च द्वे प्रिये वा महीयसः ।
वारकेण ततो भुङ्क्ते भोक्ता युक्तमसावुभे ॥३४६

तयेत्युक्ते स भूपालो विकसन्नेत्रपङ्कजः ।
व्याजहार हारसुहृद्दशनाभीशुधोरणिः ॥३४७

प्रत्युपकारमर्हन्ति शत्रवस्तेऽथवा विधिः ।
राज्यश्रीत्याजनेनापि यैस्त्वं मे मेलिताश्च ते(?) ॥३४८

धनदेव्यसि किं सौम्ये किं वा व्योमाधिदेवता ।
यद्वा तिलोत्तमारम्भोर्वशीष्वन्यतराऽप्सराः ॥३४९



Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

स्मरं विना रतिर्वाऽसि किं वा पातालसुन्दरी ।
त्रैलोक्यलक्ष्मीर्यद्वाऽसि सत्यं ब्रूहि प्रियंवदे ॥३५०
जगाद सा किमनया कथया पृथिवीपते ।
अथात्र तव निर्बन्धस्तदाकर्णय सत्तम ॥३५१
भरतेऽत्रैव वैताढ्ये नभआभरणे पुरे ।
श्रीमान् कमलवेगोऽस्ति महाविद्याधरेश्वरः ॥३५२
देव्यस्य मदनरेखा तयोरस्म्यस्मि नन्दना ।
नाम्ना मदनमञ्जूषेत्यादिव्यतिकरो निजः ॥३५३
समस्तोऽपि विस्तरेणामरकेतोस्तयोच्यत ।
यावद्देवेन तेन त्वत्पित्रा प्राग्भवभाविना ॥३५४
भगिन्यास्तेऽमरकेतुरयं भावी मनःप्रियः ।
इत्युदित्वा प्रेषिताऽहं त्वत्कृतेऽत्रागतेति भोः ॥३५५
चतुर्भिश्च कुलकम्

तदलङ्करु वैताढ्यं स्वसारं मे सुखाकुरु ।
इति तद्वाचमाकर्ण्य प्रतिवाचं नृपोऽग्रहीत् ॥३५६
तडिल्लताभ्यस्तरले स्त्रीणां वाङ्मनसे सदा ।
कस्तद्वचसि विश्वस्याद्विश्वस्यापि भयङ्करे ॥३५७
अजानानस्त्वत्स्वरूपं संशयानस्त्वदीरिते ।
बाहुमात्रसहायोऽहं निर्मामि त्वद्वचः कथम् ॥३५८
स्मित्वा मदनमञ्जूषा सुधायूषाभमाख्यत ।
मयि कोऽयमविश्वासस्तव प्राग्जन्ममातरि ॥३५९

किञ्च –

तादृग्व्यसनतीर्णस्याप्याप्तस्यात्र घने वने ।
शीतवातातपक्षुत्तृट्सिंहादिश्वापदास्पदे ॥३६०
किमूनमस्ति ते दुःखं यतोऽभ्यधिकशङ्कया ।
मय्यप्येवमविश्वासी विश्वासी दीनचेतसि ॥३६१॥ युग्मम्
वैमानिकविमानानां मानश्रीपश्यतोहरे ।
तदारोहविमानेऽत्र नात्र भीतिः कुतोऽपि ते ॥३६२

३५५.४. °त्रागितेति. ३६०.३. शीतदातप°. ३६०.४. °स्वापदा°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नृपो दैवमथालम्ब्य तद्विमानमशिश्रियत् ।
क्षणात् प्रापच्च कमलवेगविद्याधरान्तिकम् ॥३६३
ततो मदनमञ्जूषाऽध्यास्य तं नृपमासने ।
नमस्यामास जनकपादौ पादातदारवत् ॥३६४
निर्निमित्तं किमत्रागाः कश्चायं सुभगाकृतिः ।
इति पृष्टा साऽथ मूलात् पितुः सर्वं व्यजिज्ञपत् ॥३६५
एष चैवं महाराज ईदृग् देवेन दर्शितः ।
इतो भवात् तृतीयस्मिन् भवे मम तनूद्भवः ॥३६६
मदनमूर्तिर्मदनशलाकायाः कृते वरः ।
मया तात समानीतस्तत् तस्या दर्श्यतामयम् ॥३६७॥ युग्मम्
ततः कमलवेगेन वेगेन परिरभ्य सः ।
प्रियालापैर्गौरवेणामरकेतुरभाष्यत ॥३६८
पित्रादेशेन मदनशलाका तत्र चायती ।
जयन्तीमपि जयन्ती दृष्टेत्यमरकेतुना ॥३६९

करकमलमुखाम्बुजा विकचलोचनेन्दीवरा
　　कटाक्षलहरीभरा स्फुरदुरोजचक्रोद्धुरा ।
कचोच्चयमधुव्रता रतिरतीशकेलीपदं
　　समुज्ज्वलरसापगा न्वियमुपैति लीलागतिः ॥३७०

तां दृष्ट्वा नयनानन्ददायिनीं कौमुदीमिव ।
बभारामरकेत्वब्धिः प्रमोदोत्कलिका इति ॥३७१
अयेऽतिसारोऽपि पथ्यं जायतेऽनुगुणे विधौ ।
राज्यभ्रंशोऽपि यदयमिति लाभाय मेऽभवत् ॥३७२

किञ्च —

किमुदन्वन्नवनीतनिर्मिततया मृद्वीसुमाधुर्यभाक्
　　शरदिन्दुद्युतिसंभृतेनु परितः सौन्दर्यरोचिर्मयी ।
किमु पुष्पेषुशिलीमुखाहिततया सौरभ्यभृत् सद्गुणा
　　मम भाग्यैर्नियतं कृतेयमनघा दूराच्च मामाकृषत् ॥३७३

३७०.३. कथो°.

साऽथ तातपदौ नत्वोत्थिता याम्या गरिष्ठया ।
श्लिष्टा कल्पलताश्लिष्टपारिजातलतायिता ॥३७४
तातासन्नासनासीना साऽथ तं क्षितिपातिथिम् ।
अपाङ्गप्रेक्षणसुधारसैर्मुहुरसिस्नपत् ॥३७५
ततो मदनमञ्जूषा तामाख्यत् खल्विमा दृशः ।
जातिस्मृतेः प्रिये पुष्यन्त्यप्रिये सङ्कुचन्ति यत् ॥३७६
लब्ध्या पृष्टे कथमिति ज्येष्ठयोक्ते सुरोदिते ।
ईहादिपूर्वममरश्रीमदनशलाकयोः ॥३७७
अचिन्त्यवीर्योल्लासेन कर्मलाघवतस्तथा ।
उदैज्जातिस्मृतिदीपः प्राग्भवप्रेमदीपकः ॥३७८॥ युग्मम्
श्रीतातमथ मदनशलाकेति व्यजिज्ञपत् ।
देवाहमस्मै नृपाय संप्रदेयाऽविलम्बितम् ॥३७९
ततः पितृभ्यां सुलग्ने नानाकौतुकमङ्गलैः ।
पाणिग्रहमहश्चक्रे तयोः श्रीकृष्णयोरिव ॥३८०
खेचरेश्वरदत्तेऽथ प्रासादे प्रिजमेलकः ।
तयोरजनि दम्पत्योर्गङ्गासागरयोरिव ॥३८१
अथो मदनमञ्जूषा दिष्ट्या पितरमभ्यधात् ।
तात विद्यानुग्रहोऽस्य प्रसद्य प्रविधीयताम् ॥३८२
ततः श्रीकमलवेगो विनीतं तं यथाविधि ।
विद्ययाऽपि परिणाय्य वितेने खेचरं वरम् ॥३८३
कृतकृत्याऽथ मदनमञ्जूषा पित्रनुज्ञया ।
महाशनिजवं भेजे कुलवध्वाः पतिः पतिः ॥३८४
ऊचेऽन्यदाऽमरकेतुः प्रिये यामः स्वपत्तनम् ।
वैमात्रेयमहिं हत्वा स्वीकुर्मो राज्यशेवधिम् ॥३८५
[ततो] जगाद मदनशलाका देव गम्यते ।
कुलदेव्युक्तवच्चेत् त्वं मदुक्तमनुवर्तसे ॥३८६
राजाऽऽख्यत् सपरीहासं सपत्नी[ त्वं ] करोषि किम् ।
आर्यपुत्रेति मा वादीर्मदुक्तमवधारय ॥३८७

३७६.३. जातिस्मृतः. ३७८.३. उद्दै°. ३८१.२. प्रसादे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिरापराध्यमात्यादीन् सद्यश्चेन्निजिघृक्षसि ।
तन्न यामो मदुक्त्या चेत् तदा यामोऽधुनैव हि ॥३८८

यत एकमुखं केन जिग्येऽमात्यादिमण्डलम् ।
पुण्योदयोऽपि हि प्रायः [स]न्न्यायमनुधावति ॥३८९

प्रियोक्तमाश्रुतं राज्ञा बद्धः प्रस्थाननिश्चयः ।
विज्ञप्तः खेचरेशश्चावोचत् किं वः प्रदीयते ॥३९०

पुत्रीविद्याप्रदानेन सर्वमेव व्यतारि मे ।
यच्चान्यद् वो ज्ञपयामि तद् विधेयं प्रसद्य मे ॥३९१

प्रपेदे तेन तत् सर्वं विसृष्टौ तौ च दम्पती ।
कृत्वा विमानमारुह्य स्वपुरे निशि जग्मतुः ॥३९२

विमातृजो जयसिंहः प्रसुप्तो जगृहेऽमुना ।
क्षिप्तश्च तस्यां सरिति कृतप्रतिकृतं कृतम् ॥३९३

भूयं(?)देव्या तया सार्धं तच्छय्यामध्यशेत सः ।
मङ्गलपाठकोऽपाठीदथ प्रत्यूषमङ्गलम् ॥३९४

निहत्यामरकेतुं तं मातङ्गमिव कश्मलम् ।
सत्यं देव जगत्सिंहस्त्वं जयी विजयस्यपि ॥३९५

तत्पठितमथाकर्ण्य नृपः कोपारुणेक्षणः ।
देव्या निवार्यमाणोऽपि सय्योत्था(?)यमदोऽवदत् ॥३९६

अरे क्व जयसिंहोऽस्ति नाम ब्रूषे निरर्थकम् ।
तद्विजेताऽमरकेतुरष्टापद उदैदयम् ॥३९७

तत् कञ्चिच्चछरणं गच्छामरकेतुस्तवान्तकृत् ।
इत्युक्त्वा तमसौ च्छुर्याऽवधीत् प्रैषीद्यमौकसि ॥३९८

ततो हाहारवगर्भस्तत्र कोलाहलोऽजनि ।
तच्छ्रुत्वा मन्त्रिसामन्ताः सर्वे मिमिलुरेकतः ॥३९९

असम्भाव्यमिदं सत्यमसत्यं चेति बोधितुम् ।
राज्ञा सौधे समस्तैस्तैः प्रहितः सुनरेश्वरः ॥४००

इतश्च नामावशेषे तथा मङ्गलपाठके ।
भीतभीतः परिजनः सर्वो नृपमुपस्थितः ॥४०१

---

४००.३. राजा.

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

स्वं स्वामी जीवितं च त्वमनाथानामसि प्रभुः ।
इत्याख्यान् धीरितो राज्ञा स्वस्वस्थाने न्ययोजि सः ॥४०२
प्रातर्मङ्गल्यमाधायास्थाने सिंहासने स्थितः ।
स नृपः सौधपादातमव × × × समूहवत् ॥४०३
निशातशर्वलाकुम्भशक्तिपट्टिशपाणयः ।
भिन्दिमालकरवालचक्रदण्डधनुर्धराः ॥४०४
राजसौधान्तःपुरांग[णर ?]क्षा महाभटाः ।
तं परिवारयामासुर्भास्करं तत्करा इव ॥४०५॥ युग्मम्
सचिवादिषु साटोपं भूपं विज्ञाय देव्यवक् ।
देव साम प्रयुञ्जीथास्तदसाध्ये हि निग्रहः ॥४०६
राजोचे विद्याभृतो मे नैषु सामादि युज्यते ।
किं त्वेतेषामपराधविषद्रोः फलमर्प्यते ॥४०७
देव्याख्यद् युज्यते नैवाधुनैवाकाण्डविड्वरः ।
दोषान्तरेणान्यदाऽमून् निगृह्णीयाः कदाचन ॥४०८
देवे विरज्यते येन न जनोऽतिभयातुरः ।
जनानुराग एवायं प्रभवः सर्वसम्पदाम् ॥४०९
देवि क्व यास्यन्ति जना विरक्ता मयि वैरिणि ।
किञ्च किं न श्रुतं देवि रोषे घातः प्रियं मुदि ॥४१०
चेद् हनिष्यसि देवामून् केषां स्वामी भविष्यसि ।
को वैकाकी जयी स्वामिन् वृन्दमेव नरेन्द्रति ॥४११
तद्देव सामन्तमन्त्रिप्रजान्वावर्जनं वरम् ।
तथाऽपि राजा क्रोधान्धो धूपं पात्रीं न मन्यते ॥४१२
सर्वमेतत् सुविज्ञाय तेन प्रणिधिना क्षणात् ।
सामन्तामात्यचक्रस्य चक्रे हृ[द]यशायकम्(?) ॥४१३
तैश्च सम्यक् सम्प्रधार्य वचोयुक्तिपटुः पुमान् ।
प्रहितः प्रणतो बद्धाञ्जलिर्भूपं व्यजिज्ञपत् ॥४१४
प्रसादान् नु प्रभोर्भुक्त्वा स्युर्दैवात् केऽपि तद्द्रुहः ।
दैवं हि दुष्टं नो दत्ते चपेटां किन्तु दुर्मतिम् ॥४१५

---

४१५.२. स्युर्देवान्.

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

अपकीर्तिफलं जन्मान्तरोपात्तं कुकर्मतः ।
स्वाम्यकर्मापेक्षमेवमपराधं व्यधात् प्रभोः ॥४१६
उदितः पुण्यतश्चन्द्रस्तारकैः परिवार्यते ।
तत्क्षयाद् भास्वदुदये स तैरेव विमुच्यते ॥४१७
सुदिनोदयतो भास्वांस्तथा प्रतपति प्रभो ।
तत्क्षये सोऽपि रक्तोऽपि सन्ध्यातद्ध्वान्त(?)माप्यते ॥४१८
पश्यतामुदयत्यर्कः पश्यतामस्तमीयते ।
सम्पदां विपदां प्राप्तौ वदन् स्वल्पमिवान्तरम् ॥४१९

किञ्च –

एक एवायाति गर्भे जायतेऽप्येककः स्फुटम् ।
हस्त्यश्वरथपादातश्रियोऽभ्यायान्ति पुण्यतः ॥४२०
पुण्यक्षये स एवान्यैः जितोऽटति नगान्तरे ।
स्वामिन् सोमकथाऽत्रार्थे प्रसद्य श्रूयतां क्षणम् ॥४२१
सोमो नाम नृपो नित्यं सम्मानयति सेवकान् ।
दुष्कर्मतोऽथ दायादैः प्रारब्धोऽत्याजि सेवकैः ॥४२२
दायादमिलितैस्तैः सो राज्यान्निर्घाटितो हठात् ।
पुण्योदयेऽथ तैरेव स राजा विदधे पुनः ॥४२३
तुष्टः स राजा तेष्वाधात् प्रसादमति हि प्रभो ।
अस्मद्दुष्कर्मनिर्मातं मन्तुं क्षान्त्वा प्रसीद तत् ॥४२४
त्वत्पादसेवाहेवाकः परिस्फूर्जति कोऽपि नः ।
लज्जया नेश्महेऽभ्येतुं प्रमाणं देव एव नः ॥४२५
अथ देव्यवदद् भद्र नापराधोऽत्र कोऽपि वः ।
कर्मैव सर्वसत्त्वानां वितनोति शुभाशुभे ॥४२६
तदत्रायातनिर्भीकाः प्रभुं प्रणमताञ्जसा ।
वर्धापनानि कुर्वीध्वं राट्प्रसादान् प्रतीच्छत ॥४२७
अत्रान्तरेऽमरकेतुर्धूमकेतुरिव ज्वलन् ।
प्राह प्रिये मेति वादीरेषामागःफलं ददे ॥४२८

---

४२३.१. सा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अरे पुण्यैश्चेत् कृतोऽहं भवद्भिः किं फलं मम ।
कुर्वीध्वं शरणं कञ्चिदवश्यं मारयामि वः ॥४२९

तच्च शिष्टं तेन गत्वा प्रधानानां ततश्च ते ।
निश्चिक्युर्म्रियते क्षत्राचारेण न पुनर्मुधा ॥४३०

ऐकमत्येन तैः सेव्यं सर्वं स्वस्य नृपस्य च ।
सद्यः संवर्मयाञ्चक्रे तदधीनं ह्यदोऽखिलम् ॥४३१

ततः पुनः शक्तिभक्तियुक्तं भाणयितुं वचः ।
प्रहितस्तैर्जगौ भूपं प्रचुरश्चतुराननः ॥४३२

फलितोऽपि तिलस्तंबो निष्पत्रोऽत्र यदश्नुते ।
तदस्माभिर्विनाऽवश्यं विद्याबल्यपि लप्स्यसे ॥४३३

किञ्च –

तमो विगृह्य रविणा प्राप्तं तेजस्विनाऽपि किम् ।
पृष्ठलग्नस्यास्य भिया किलैकः पर्यटत्ययम् ॥४३४

तेजस्विभिर्युतो ध्वान्तजयीन्दु शोभते यथा ।
तथाऽस्माभिः कृतकोशपानः शोभिष्यसे ध्रुवम् ॥४३५

अथ विद्यामदाद् योद्धुमस्माभिरभिलष्यसि ।
तदागच्छाशु यन्नद्यां सविद्योऽपि प्रवाह्यसे ॥४३६

पोस्फूर्यमाणाधरेण कोपिनाऽमरकेतुना ।
ततः स्ववीरा औच्यन्त युध्यध्वं तैर्युताऽथवा ॥४३७

वीरा उदीरयामासुर्नैषा नीतिः क्षितीश्वर ।
प्रधानेषूपस्थितेषु वैमुख्यमधिपस्य यत् ॥४३८

अन्यच्च –

कोपाटोपो यदप्येषु स्वामिनो नोपशाम्यति ।
तथाऽप्यलक्ष्यभावोऽद्य देवो व्याहरताममून् ॥४३९

कालान्तरे पुनर्दोषान्तरेणामून् यथोचितम् ।
निगृह्णीयाः संप्रधार्याऽनुगृह्णीयाः प्रसह्य वा ॥४४०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च —

बालाङ्गनादिलोकोऽत्र सर्वोऽप्येकमुखः प्रभो ।
एतं चैकमुखं जेतुं शक्रोऽपि हि न शक्नुयात् ॥४४१

तत् प्रसीद प्रभो सम्मानय सामन्तमन्त्रिणः ।
हस्त्यश्वकोशाद्यध्यक्षान् स्वसात् कुरु यथा तथा ॥४४२

तान् प्रत्यूचे ततो राजा गुरुहुङ्कारपूर्वकम् ।
न वर्तध्वे ममाज्ञायां चेद् यूयं यात तद्द्रुतम् ॥४४३

तेषां सहाया भवत तान् युष्मांश्चकहेलया ।
पातालगानप्यवश्यं हन्म्येवाहीन् सुपर्णवत् ॥४४४

पुनः प्रवीरैस्तैरूचे भग्नभाग्योऽसि भूधव ।
तथाऽपि प्रत्यावृत्त्या तेऽस्माकं चित्रीयते मनः ॥४४५

यद्वा फलर्द्धयः काश्चित् पापस्पृक्पुण्यसम्भवाः ।
वंशस्येव प्रपाताय जायन्ते पातकोदये ॥४४६

पुण्यशून्यस्य विद्याऽपि स्फुरिष्यति न ते ध्रुवम् ।
स्नेहहीनस्य वीरस्य कियत् तेजो विजृम्भते ॥४४७

दुर्वचांसि न हीदृशि संस्युः पुण्यवतः क्वचित् ।
कर्पूरपात्रादुद्गारो नामेध्यस्य कदाचन ॥४४८

यदाऽस्माभिरपि त्यक्तस्तदा त्यक्तोऽसुभिर्ध्रुवम् ।
जलैस्त्यक्ता जलचराः प्राणन्ति प्राणिनः कियत् ॥४४९

राजसिंहासनमिदं मन्दबुद्धे त्यज द्रुतम् ।
सूरस्यासनमध्यास्ते न सुतोऽपि शनैश्चरः ॥४५०

यच्च विद्याबलं बाहुबलं यच्च बलान्तरम् ।
तदेव संस्मरेदानीं नेदीयांस्तव दण्डभृत् ॥४५१

देव्याऽथ पुनरप्यूचे पृण देव परिच्छदम् ।
अकाण्डे मैव सर्वेषामपकारपरो भव ॥४५२

किञ्च —

परमार्थेन न स्वामिन् कोऽपि कस्यापि सेवकः ।
प्रज्वलन्तीं दिशं सर्वः समाश्रयति नेतराम् ॥४५३

---

४५०.३. शूर०. ४५१.४. नेदेयां०.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपि तादृक्बला वीराश्चक्रभृच्चक्रपाणयः ।
सामन्तामात्यजनताः प्रीणते जनका इव ॥४५४
तद्देवराज्यप्रासादमूलस्तम्भानिमान् भिनु ।
माऽकाण्डविड्वरं कृत्वा स्वं परं च विनाशय ॥४५५
ततो देवी सुवचनैश्चन्दनादपि शीतलैः ।
प्रावृड्जलैरिव गिरिः कोपतापं नृपोऽमुचत् ॥४५६
व्याहरच्च कथं देवि प्रीणेऽमून् योद्धुमुत्थितान् ।
देव्याख्यत् त्वत्पदोरेतान् पातयाम्यस्तु देव्यदः ॥४५७
देवी चक्रे ततो व्योम्नि तत्पुरावारिकां शिलाम् ।
व्योमस्थाऽऽख्यच्च रे दुष्टा उपाध्वं नृपमादरात् ॥४५८
न चेद्वश्चूरयिष्यामि प्रक्षिप्य तां महाशिलाम् ।
ततस्तादृगसम्भाव्यदर्शनात् ते भियाऽभ्यधुः ॥४५९
यदि राजा शरण्यः स्यात् कुर्मस्तं शरणं तदा ।
परं राजाऽपि नो हन्ता वरं हिंद्धि त्वमेव तत् ॥४६०
देव्यवादीदभयं वो नृपं शरणमीयुषाम् ।
ते स्कन्धपरशर्वधाः सर्वे तमुर्वीशमथाश्रयन् ॥४६१
शिलां संहृत्य देव्याख्यत् प्रभौ युक्तं व्यधत्त न ।
तेऽप्यूचुः पापिनोऽप्यस्मान् पृष्ठहस्तय सुप्रभुः(? भो) ॥४६२
श्रीदेव्युक्त्यनुरोधेन मधुरालापपूर्वकम् ।
ते पृष्ठहस्तिता राज्ञाऽमरकेतुर्नृपोऽभवत् ॥४६३
तत्तदागः स्मरन् भूपो मन्त्र्यादिच्छिद्रमीक्षते ।
तदाज्ञादेवतामेते सम्यगाराधयन्ति तु ॥४६४
यद्दोषात् तां दशां प्राप्ता भूयस्ते पानगायनाः ।
पुनस्तं क्ष्मापतिं श्रुत्वा भेजुः प्राग्वदमंस्त सः ॥४६५
तद्गीतपानमलिनश्रुतिग्रहिलितो नृपः ।
व्यस्मरत् तद्दुरन्तत्वमनुभूतमिहैव हि ॥४६६
इत्थं व्रजति काले चान्यदा सुस्वप्नसूचितम् ।
देवी प्रासूत तनयं प्राचीव हिमरोचिषम् ॥४६७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तज्जन्मोत्सवमाधाय भूभुजाऽमरकेतुना ।
अमरसेन इत्यस्य नामधेयं व्यधीयत ॥४६८

स च क्रमात् कलापात्रं विक्रान्तो विनयी नयी ।
त्यागी प्रियंवदो मूर्तः क्षात्रो धर्म इवाशुभत् ॥४६९

प्रागमन्तुदोषेण दोषान्तरारोपान्नृपोऽन्यदा ।
सामन्तान् मन्त्रिणो हन्तुमारेभे व्यषदन्नमी ॥४७०

सुबुद्धिना धीरितास्ते मा भैष्ट स्थाप्रमद्वराः ।
यतोऽभ्यस्तभुजङ्गस्य सन्ति निग्रहहेतवः ॥४७१

तथा हि –

गीतासक्तश्चन्द्रलेखां डुम्बिनीं नक्तमेकिकाम् ।
शय्यान्ते गापयत्येष एकमागःपदं स्फुटम् ॥४७२

न दत्तेऽमरसेनाय कुमाराय महीयसे ।
विद्यां च यौवराज्यं च द्वितीयमिति च ध्रुवम् ॥४७३

सुलक्षणः सुतश्चतमञ्जर्या भूभुजा भृशम् ।
सम्मान्यते कुमारस्य पुर एतत् तृतीयकम् ॥४७४

तदमीभिः पदैर्देव्यादयो भेद्याः सुखादपि ।
सुखादपि ततोऽस्माकं सेत्स्यत्येव मनीषितम् ॥४७५

अन्येद्युश्च श्रीमदनशलाकां रहसि स्थिताम् ।
मन्त्री सुबुद्धिराचष्टाच्छलं किञ्चिन्निवेदये ॥४७६

देव्यूचे ब्रूहि निःशङ्कं मन्त्र्याख्यद्देवि भूपतिः ।
तवानुमत्या किं भुङ्क्ते डुम्बिनीं चन्द्रलेखिकाम् ॥४७७

राज्यवादीदसम्भाव्यं सर्वथा भणितं त्वया ।
यतो राजाऽन्यदेवीभिः सह शेते दिवैव हि ॥४७८

मयैव सह रात्रौ तु ततः किं नैव वेद्म्यहम् ।
यद्येवं स्यान्मन्त्र्यथाख्यदुपयुंक्ष्वात्र सादरम् ॥४७९

परेद्युरमरसेनकुमारोऽभाणि मन्त्रिणा ।
यथा सुलक्षणो राज्ञो वल्लभस्त्वं तथा न हि ॥४८०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च –

किं न हि स्थाप्यसे यौवराज्ये विद्यां न पाठ्यसे ।
कुमारे वयमिच्छामो राज्यसर्वधुरीणताम् ॥४८१

मैवं तिष्ठ निरुद्योगो मास्मास्मानमुपेक्षथाः ।
सुलक्षणादयोऽधीतविद्या यास्यन्ति जैत्रताम् ॥४८२

ततोऽभाणि कुमारेण सुबुद्धेऽन्यादृशं मनः ।
नैवास्ति देवपादानां मा विषादं वृथा कृथाः ॥४८३

सचिवोऽवोचत स्वामिन्नेवमेव भवत्विति ।
किन्तु स्वमत्या मदुक्तं कुमारः पश्यतु स्वयम् ॥४८४

देवीकुमारयोरेवं शङ्काबीजं मनोभुवि ।
निक्षिप्य क्षिप्रमाधत्त शेमुषीमिति वृष्टिवत् ॥४८५

उपचर्याभ्यधाच्छय्यापालिकामभ्यधाध्यसौ(?) ।
राज्यालापो हले राज्ञोर्मम कथ्यो यथाश्रुतः ॥४८६

अन्येद्युरवदच्छय्यापालिका मन्त्रिणं प्रति ।
मन्त्रिन्नद्य रहो रात्रौ राज्ञी राजानमब्रवीत् ॥४८७

पूर्वं मां घनमाश्लिक्षः प्रोषितप्राप्तवत् प्रिय ।
मन्दादरं प्राणनाथ किमद्यैवं विरक्तवत् ॥४८८

ससम्भ्रममथोर्वीशस्तां प्रति प्रत्यपादयत् ।
इदानीं शिथिलाश्लेषे घर्म एवापराध्यति ॥४८९

इति राज्ञोर्मिथो वार्तां श्रुत्वाऽमात्योऽभ्यधादिमाम् ।
इयं हले रहोवार्ता प्रतिपाद्या न कस्यचित् ॥४९०

मन्त्रिणोचेऽन्यदा देवी तत्र किञ्चन निश्चितम् ।
देव्योक्तं नास्ति शङ्का मे ततस्तां सचिवोऽवदत् ॥४९१

पूर्ववत् सादरो राट् चेन्न शङ्का त्वं च वेत्सि तत् ।
दध्ये देव्याऽनादरो राट् ततः शङ्का मनागभूत् ॥४९२

प्रद्विष्टा चन्द्रलेखायां ततो देव्यवदन्नृपम् ।
नानेयैषा वासगृहे छुप्त्या सर्वं हि दह्यते ॥४९३

---

४८५.४. शेमुखीं°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्मित्वाऽथाचष्ट पृथ्वीशो मा भैषीर्देवि किञ्चन ।
सा च बाढमशङ्किष्टामुचत् तद्बीजमङ्कुरम् ॥४९४

अन्यदा चामरसेनकुमारेण पितोच्यत ।
देव विद्यां देहि मह्यं स च मौनमशिश्रियत् ॥४९५

तन्मात्राऽप्यन्यदोचेऽसौ कुमाराय प्रदीयताम् ।
विद्या च यौवराज्यं च सोऽवग् योगोऽधुनाऽपि न ॥४९६

कषायिता देव्यवादीन्नूनं योग्यः सुलक्षणः ।
अस्मै च दित्सुस्त्वं सर्वं राजा योषं तदाऽप्यधात् ॥४९७

तच्च देव्या कुमाराय शिष्टं स च कषायितः ।
सद्योऽमिलदमात्याद्यैस्तद्बीजमिति पुष्पितम् ॥४९८

ततः सुबुद्ध्यमात्येन कुमारो व्यज्ञपि प्रभो ।
मिलितं मद्वचः स्वामिभृत्या नादृष्टवादिनः ॥४९९

किञ्च —

चण्डालीसङ्गाच्चण्डाली चक्रे राज्यमदोऽमुना ।
न चैष जीवंश्चण्डालीं चण्डाल इव मोक्ष्यति ॥५००

तदयं पाप्मनाऽनेन वधाख्यं दण्डमर्हति ।
तत् कुमार विलम्बोऽत्र शिवतातिर्न ते ध्रुवम् ॥५०१

कुमारामात्यसामन्तैस्ततश्चक्रे मिथो ग्रहः ।
राजा तु मातङ्गगीताद्यासक्तो नैव वेद तत् ॥५०२

कुमारेण ततः पृष्टा माता तातस्य विद्यया ।
सन्निधिः सर्वदाऽपि स्याद् यद्वा न स्यात् कदाचन ॥५०३

तदाशयमजानत्या तयोचे दारसङ्गमे ।
विद्या सन्निहिता नास्य सपत्नीमत्सरादिव ॥५०४

मातङ्गीसङ्गतो राज्ञि द्विष्टः सर्वः परिच्छदः ।
विभेद्याथ कुमारेण चक्रे स्वादेशतत्परः ॥५०५

कुमारसङ्केतितैश्च वेत्रिमुख्यानिवारितैः ।
घातुकैश्चूतमञ्जर्याऽऽश्लिष्टोऽघाति नृपोऽन्यदा ॥५०६

---

५०२.४. नैव न वेद.     ५०६.४. अघानि.

तद्बीजं फलितं चेति सत्यं चैतदजायत ।
महाजनविरोधेन कुञ्जरः प्रलयं गतः ॥५०७
कुमारोऽमरसेनोऽथ जज्ञे वसुमतीपतिः ।
क्रमविक्रमरोचिष्णू रामराज्यमपालयत् ॥५०८
स च रौद्रध्यानभूताधिष्ठितोऽमरकेतुराट् ।
घर्मायां भीष्मघर्मायामब्ध्यायुर्नारकोऽभवत् ॥५०९
तत्र सोढ्वा महादुःखं दुःखव्यापारसम्भवम् ।
कथञ्चित् तत उद्वृत्तः स प्राग् दुष्कर्मशेषतः ॥५१०
दृषद्दृढकठोरायां दुष्प्रापतृणपाथसि ।
शमीकरीरबब्बूलबदरीकण्टकौकसि ॥५११
विन्ध्याचलमहाटव्यां कृष्णसारमृगोऽजनि ।
लक्ष्माङ्कलङ्कितः कृच्छ्रात् पादचारी स चाभवत् ॥५१२॥ त्रिभिर्विशेषकम्
सह मात्राऽटाट्यमानः स क्रमाद् यौवनोन्मदः ।
यूथेन सह बभ्राम वने वनगजेन्द्रवत् ॥५१३
गोरि(?)गानप्रवीणेनाकर्णमाकृष्टधन्वना ।
तद्गीतलुब्धश्रुतिः स व्याधेन निहतोऽन्यदा ॥५१४
अकामनिर्जराजीर्णदुष्कर्मा मध्यमाशयात् ।
निबध्य च मनुष्यायुः कृष्णसारमृगोऽथ सः ॥५१५
इहैव पुरि कौशाम्ब्यां शूरदेवद्विजन्मनः ।
शूराख्यायां धर्मपत्न्यां शूर त्वं नन्दनोऽभवः ॥५१६

तदनुवहत ईहाद्यात्मके राजमार्गे किल किमपि हि मूर्च्छैकाग्र्यतः पश्यतश्च ।
सुगुरुतरणिधाम्ना तस्य शूरस्य जातिस्मरणरुचितचिन्तारत्नलाभो बभूव ॥५१७

सोऽथ व्यज्ञपयद् गुरुं गुरुतमं संसारवारांनिधिं
तीर्त्वा यामि यथा प्रभो शिवपदद्वीपे प्रसीदेस्तथा ।
सोऽप्याख्यज्जिनवल्लभप्रकटितं सावद्ययोगोत्तम-
श्रीपोतं श्रय भोः समीहितपदं प्राप्नोषि येन द्रुतम् ॥५१८

इति श्रीनिर्वाणलीलावतीमहाकथेतिवृत्तोद्धारे **लीलावतीसारे** जिनाङ्के **श्रवणेन्द्रियविपाक-व्यावर्णनो** नाम एकादश उत्साहः* ॥

---

५१४.३. तद्गीतं. * ग्रं. ५४७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## द्वादश उत्साहः

अथ श्रीविजयसेनमुख्याः पञ्चापि सद्धियः ।
सुधर्मस्वामिनं विज्ञापयामासुः कृताञ्जलि ॥१
स्वामिंश्चतुर्गतिव्यूहैः सुदुर्भेद्यात् सुरासुरैः ।
रागद्वेषमहामोहदण्डाधिपतिभीषणात् ॥२
हिंसाद्यतिरथात् कामक्रोधमुख्यमहारथात् ।
हृषीकवर्गनासीरमहावीरभयङ्करात् ॥३
अस्माद् भवरिपोर्भीताः श्रिता युष्मत्पदाम्बुजम् ।
शीलेन संवर्मयास्मान् येनैतं विजयामहे ॥४॥ त्रिभिर्विशेषकम्
भगवानाह युक्तं वः श्रीशीलं वर्म किन्त्विह ।
महाव्रताः पञ्च पञ्च मेरुतोऽपि हि दुर्वहाः ॥५
स्वाङ्गेऽपि मूर्छाविच्छेदो रात्रिभुक्तिविवर्जनम् ।
द्विचत्वारिंशिदोषत्यग्भोज्यमाहार्यमह्न्यपि ॥६
गुप्तिसमित्यष्टकं च धार्यं नित्याप्रमादिभिः ।
द्रव्याद्यभिग्रहा नाना प्रतिमा द्वादशापि हि ॥७
केशलोचो भूमिशय्या यावज्जीवममज्जनम् ।
नित्यं गुरुकुले वासस्तनौ निःप्रतिकर्मता ॥८
भवप्रत्यर्थ्यभिमरसोदराकारधारिणाम् ।
परीषहोपसर्गाणां जयनं चावधानतः ॥९
अष्टादशश्रीशीलाङ्गसहस्रव्यूहमध्यतः ।
अहर्निशमवस्थानं छिद्रभङ्गविवर्जनम् ॥१०
विकथागौरवत्यागात् स्वाध्यायध्यानपूरणम् ।
वैयावृत्त्यतपोमैत्र्यादिपूतमुनिदर्शनम् ॥११
प्रपाल्यमिच्छाकारादि प्रतिलेखादिकं तथा ।
समाचार्यं सदा धार्यं धैर्यमापत्सु सर्वतः ॥१२

---

४.४. येनेतं. ११.४. मनि°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हीनाचारपरीहारः प्रवराचारसेवनम् ।
उत्तरोत्तरनिर्मेरगुणश्रद्धानमन्वहम् ॥१३

इति शीलमहावर्मवर्मिताः सत्त्वशालिनः ।
अमुं भवप्रत्यनीकं महानीकं जयन्त्यहो ॥१४

ततः श्रीविजयसेनराजमुख्यैः शिवोन्मुखैः ।
गुरुर्विज्ञापयाञ्चक्रे चक्रेशः शीलशालिनाम् ॥१५

भगवन् सर्वमेतन्नो भाति युष्मत्प्रसादतः ।
प्रभो प्रसन्नदृष्टीनां गुणा अनुचराः खलु ॥१६

इयद् विद्म वयं तावदस्माकमधुना प्रभो ।
महापुरुषदृष्टान्तैर्व्रतायोत्तिष्ठते मनः ॥१७

कालान्तरे तु यत्किञ्चिद् भावि तद् विद्म नो वयम् ।
किञ्च योग्यायोग्यतां नो बुध्यध्वे यूयमेव हि ॥१८

व्याजह्रे भगवान् सौम्याः कल्प इत्येवमीरितम् ।
जागर्ति योग्यताऽवश्यं भवतां भवतान्तिहृत् ॥१९

प्रमोदमेदुरै राजादिभिर्व्यज्ञप्यत प्रभुः ।
सिद्ध्यैकलग्नं कं लग्नं प्रसादय दयानिधे ॥२०

प्रत्युवाच प्रभुरिहागामिन्यां पञ्चमीतिथौ ।
वैशाखशुक्लपक्षस्य विलाससरसीश्रियि (?) ॥२१

प्रभोऽस्त्वेवमिति प्रोच्य प्रभुं नत्वा च भक्तितः ।
श्रीमद्विजयसेनाद्याः सर्वे प्रविविशुः पुरीम् ॥२२

सामन्तामात्यसम्मत्या जयसिंहं स्वनन्दनम् ।
नन्दनं सद्गुणद्रूणां राजा राज्येऽभ्यषिचत ॥२३

राजादिष्टाश्च मन्त्र्याद्याः स्वं स्वं धौरेयमङ्गजम् ।
स्वकुटुम्बधुरासर्वधुरीणं स्थागतिष्ठिपन् ॥२४

राजा विजयसेनोऽथ प्रतीहारैरजूहवत् ।
सामन्तान् मन्त्रिणः सर्वान् पौरान् जानपदानपि ॥२५

समैयरुर्मरुद्वेगात् ते च प्राभृतपाणयः ।
मुक्त्वोपदां नृपं नत्वा सन्निषेदुर्यथौचिति ॥२६

---

१४.४. सहा°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जगाद नृपतिर्भो भोः सामन्ताद्या महाशयाः ।
अयं श्रीमान् जयसिंहः सुस्वामी वः प्रतिष्ठितः ॥२७

वयं पुनर्निरवद्यां पद्यां श्रीमुक्तिपत्तने ।
प्रतिपत्स्यामहे दीक्षां सुधर्मस्वामिनोऽन्तिके ॥२८

युष्मन्मध्येऽपि यः कोऽपि दिदीक्षिषुरुपैतु सः ।
यद्गृहे तु न निर्वाहस्तस्य दद्मो मनीषितम् ॥२९

श्रीजयसिंहस्तूचेऽथ हे वत्स त्वमियच्चिरम् ।
परस्कन्धाधिरूढोऽस्थास्त्वत्स्कन्धेऽरोप्यथाऽखिलम् ॥३०

तदन्तरारिषड्वर्गं विजयेथा दिवानिशम् ।
गृहे हि वश्ये बाह्यानां सम्भाव्येतापि वश्यता ॥३१

विजयश्रीपरीरम्भहेतून् सेतून् रणार्णवे ।
सामन्तानमितौजस्कान् मन्यस्वामून् स्वबाहुवत् ॥३२

चतुर्धा धिषणाधारान् सदाचारधुरन्धरान् ।
स्वस्वान्तवदमात्यांश्च मन्येथाः सर्वकर्मसु ॥३३

राज्यस्य साङ्गोपाङ्गस्य सर्वसम्पन्निबन्धनम् ।
स्वकुक्षिमिव रक्षेस्त्वं पौरीर्जानपदीः प्रजाः ॥३४

श्रीजयसिंहराजोऽथ विनयी नृपमब्रवीत् ।
यदादिशति तातस्तत्तीर्थशेषेव मूर्ध्नि मे ॥३५

अथ श्रीविजयसेनः सामन्ताद्यानुपादिशत् ।
निधा[नमिव कल्प-]द्रुरिव चिन्तामणीव वा ॥३६

परमाप्तवत् परमतत्त्ववत् परमात्मवत् ।
जयसिंहमहाराजः समाराध्यो दिवानिशम् ॥३७॥ युग्मम्

तेऽपि विज्ञापयामासुः स्वाम्यादिष्टमिदं हि नः ।
हृत्पद्मकोशे किञ्जल्ककमलां कलयिष्यति ॥३८

इतिनिर्मातनिःशेषैहिककृत्यकदम्बकः ।
अथामुष्मिककृत्येषु मनो व्यापारयन् नृपः ॥३९

राजादेशाद् व्रतारम्भे प्राचीनमिव मङ्गलम् ।
चैत्येष्वष्टाह्निकां चक्रुः श्रीजयशासनादयः ॥४०



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वस्य प्रादुःकर्तुमुच्चैरथ निष्क्रमणोत्सवम् ।
कोशाम्ब्यन्तेऽभितस्तेनूरथ निष्क्रमणोत्सवम् ॥४१

विश्वेऽप्यभयदानस्यारम्भं ज्ञापयितुं किल ।
विष्वक् प्रवर्तयामासुरभीदानं प्रदानतः ॥४२

अथ दानप्रवाहेण प्रदानमिव शिक्षयन् ।
पश्चाद्देशात् क्रमोच्चैस्त्वाद् यथोत्तरगुणस्थितिम् ॥४३

अनुल्वणाक्षतां शंसंस्तिमिताक्षतया ध्रुवम् ।
सलीलगतिगामित्वादद्भुताचरितानि वा ॥४४

सङ्कोचितकराग्रत्वात् ख्यान् सङ्कोचं परिग्रहे ।
चलाचलैः कर्णतालैर्विश्वचञ्चलतामिव ॥४५

खटिकाश्वितितत्वाच्च शुक्लध्यानमिवादिशत् ।
आवेदयन् मङ्गलानि मन्ये गुलुगुलारवैः ॥४६

शृङ्गारितः शैलतुङ्गो जयमङ्गलकुञ्जरः ।
भूपाय सज्जयाञ्चक्रे श्रीसंयमकरीन्द्रवत् ॥४७॥

पञ्चभिः कुलकम्

स्नातालिप्तो देवदूष्यमाल्यभूषणभूषितः ।
तमध्यासामास राजकुञ्जरो राजकुञ्जरम् ॥४८

मूर्धोपरिचरद्भाग्यसुभगातपवारणः ।
दिनचारार्थसेविद्विपक्षीज्योत्स्नाभचामरः (?) ॥४९

भरतेशादिवैराग्यभङ्ग्यभङ्गुरपाठकैः ।
उत्कीर्यमानासमानकीर्तिमङ्गलपाठकैः ॥५०

पुरतःप्रवाद्यमाननान्दीनादितदिङ्मुखः ।
तारतारैर्द्विजमन्त्रैस्त्रासितामित्रमन्त्रितः ॥५१

चतुर्दिगन्ताभयकृच्चतुरङ्गवरूथिनीम् ।
परीतश्रीजयसिंहसामन्तामात्यसेवितः ॥५२

प्रेक्षाप्रतीक्ष्यैर्विद्वद्भिः श्लाघ्यमानो मुहुर्मुहुः ।
सौधात् पुरे परिपाट्यै प्रतस्थे पृथिवीपतिः ॥५३॥ पञ्चभिः कुलकम्

---

४६.१. श्वेतित०. ४९.४. ०त्स्नां भाचमर.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः प्रतिपदं स्वर्णमर्थिभ्यः पुण्यवद् ददत् ।
प्रतिहट्टं प्रतिगृहं प्रतीच्छन् नागरार्चनाम् ॥५४
प्रतितीर्थं प्रतिचतुर्हट्टं सङ्गीतकक्षणे ।
कल्पद्रुम इवाभीष्टं यच्छन् सङ्गीतकारिणाम् ॥५५
पदे पदे कौतुकिभिर्दर्शितानेककौतुकः ।
पुरःपठद्भट्टथट्टैः प्रोद्घुष्टबिरुदावलिः ॥५६
जयशासनमन्त्र्याद्यैः दीक्षासरभसाशयैः ।
वशामतल्लिकारूढैः स्वर्णधाराधरैः सह ॥५७
धर्मान्तरेभ्योऽर्हद्धर्मस्यात्यन्तोत्कर्षसिद्धये ।
अपरेषां च भव्यानां दीक्षाकाङ्क्षाऽभिवृद्धये ॥५८
राधे शुक्लचतुर्थ्यां श्रीकौशाम्ब्यां पुरि सर्वतः ।
राजा श्रीविजयसेनः परिबम्भ्रम्यते स्म सः ॥५९॥ षड्भिः कुलकम्
मोहारिसंहाररुधे किल वीरजयन्तिकाम् ।
पञ्चापि ते स्वस्वधाम्नि वीररात्रिं जजागरुः ॥६०
स्नात्वाऽऽलिप्य प्रगे क्षौममुक्तालङ्कारभासुराः ।
श्वेतपुष्पैः स्रग्विणश्च मूर्तधर्ममया इव ॥६१
अनुत्तरविमानानामिवावतरदर्शिकाः ।
शिबिकाः पुंसहस्रेण वाह्याः पञ्च समाश्रिताः ॥६२
छत्रच्छलादवाड(?)सिद्धिशिलया त्वरया रयात् ।
चामराभ्यां प्रत्ननूत्नपुण्याभ्यां च किलान्विताः ॥६३
पुष्पवृष्टीर्लाजवृष्टीराशीर्वृष्टीश्च सर्वतः ।
सादरं प्रतिगृह्णानाः पौरनारीसमीरिताः ॥६४
दीक्षायैवमप्येवं स्यामेत्यार्यैकृतस्पृहाः ।
दानं ददानाः पूर्णाशं पुष्करावर्त्तमेघवत् ॥६५
मरुत्प्रेङ्खोलितलतापल्लवैर्भृङ्गगुञ्जितैः ।
कोकिलाकोमलारावैः किलाह्वातुं समुद्यते ॥६६
वसन्तऋतुराजस्य लीलासिंहासने वने ।
नन्दने ते क्रमात् प्रापुः श्रीसुधर्मपदान्तिकम् ॥६७॥ सप्तभिः कुलकम्

६४.३. प्रतिग्रह्नानाः.   ६६.३. °लारापैः.

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

विजयसेनजयशासनसूरद्विजपुरन्दरसुधीधनदेवाः ।
प्रभुसुधर्मगणभृत्पदमूले सुविधिनाऽथ परिवव्रजुरेते ॥६८

गुरुक्रममहातीर्थसेवाहेवाकशालिनः ।
सम्यग्ज्ञानक्रियाभ्याससंनद्धकरणत्रयाः ॥६९
मुनिप्रवीरतिलकैर्मैत्रीपावित्र्यधारिणः ।
विशेषाद्रामदेवाद्यैस्तदेकक्षेत्रदीक्षितैः ॥७०
विजयसेनराजर्षिमुखा मुनिमतङ्गजाः ।
प्रचक्रुः संयमोद्योगमुद्योगं त्वन्तरारिपुः ॥७१॥ त्रिभिर्विशेषकम्

जयसिंहमहाराजं सान्तःपुरपरिच्छदम् ।
अथाभाष्य विजह्रे श्रीगुरुर्भास्वानिवान्यतः ॥७२
भव्यैर्विजयसेनाद्यैः प्राज्यैश्चाग्र्यैर्महर्षिभिः ।
बालखिल्यैरिव परिषेव्यमाणक्रमः स च ॥७३
नानाकरग्रामवरपुरीषु सरसीष्विव ।
प्रबोधयन् भव्यपद्मखण्डान् विस्फूर्जितैर्गवाम् ॥७४
सरोमालास्तपंपायां श्रीचम्पायां महापुरे ।
सहस्राम्रवणे प्रादुरासीज्ज्ञानदिवाकरः ॥७५॥ त्रिभिर्विशेषकम्

उद्यानपालकेनाथ तत्पुरीस्वःपुरीहरिः ।
राजा श्रीविमलसेन इत्थं व्यज्ञप्यत क्षणात् ॥७६
देव वर्धाप्यसे यस्मात् सहस्राम्रवणे वने ।
अनेकसाधुशाखावान् श्रीसुधर्मा गणेश्वरः ॥७७
धर्मकल्पद्रुमो धर्मं ददानोऽस्ति सभासदाम् ।
सुरासुरनृणां स्वामिन् देवो जानात्यतः परम् ॥७८॥ त्रिभिर्विशेषकम्

घोषयित्वा ततः पुर्यां श्रीसद्गुरुसमागमम् ।
सहान्तःपुरसामन्तामात्यपौरपरिच्छदः ॥७९
राजा तत्र महोद्याने गत्वा नत्वा च सद्गुरुम् ।
मुनीन्नमस्यन् विजयसेनराजर्षिमैक्षत ॥८०॥ युग्मम्

ततश्च तस्य सर्वाङ्गोपाङ्गसन्तापकारकः ।
सहसैव प्रजज्वाल हृदि क्रोधदवानलः ॥८१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दध्यौ च सैष मे वैरी येन नामास्म्युपद्रुतः ।
शीर्षच्छेद्यस्तदस्त्वेष प्रकटं छन्नमेव वा ॥८२

इति दुर्ध्यानमेतस्य मनःपर्यवसंविदा ।
गुरोर्निवेदयाञ्चक्रे गुरुश्चैवं तमब्रवीत् ॥८३

अपि धर्मार्थमारम्भे पापा वल्गन्ति पाप्मनि ।
दौर्गत्याधिव्याधिपात्रं ते स्युरत्र परत्र च ॥८४

गुरुणेत्युपदिष्टोऽपि राजा नाबुद्ध रोषणः ।
ततो विजयसेनर्षिर्गुरूनेवं व्यजिज्ञपत् ॥८५

अस्योपकारमीक्षध्वे चेत् तद्ब्रूत विशेषतः ।
इति तस्य गिरा राज्ञः क्रोधाग्निः शतहेत्यभूत् ॥८६

प्रभुर्भाद्रपदाम्भोदो ववर्ष वचनामृतम् ।
राज्ञो विमलसेनस्य क्रोधोषर्बुधशान्तये ॥८७

साहस्राणां सहस्रं यः सङ्ग्रामे दुर्जयं जयेत् ।
स जयत्वेकमात्मानमेषोऽस्य परमो जयः ॥८८

किञ्च –

सुरासुरशिरोरत्नचुम्बितांह्रिसरोरुहाम् ।
साधूनामपकारेच्छुर्नरकान्धौ पतेत् ध्रुवम् ॥८९

सुरेन्द्रकृतसान्निध्यान् साधून् द्रोग्धुं क्षमेत कः ।
पापस्तु तत्परीणामाद्भवाम्भोधौ निमज्जति ॥९०

भूपाल तदलं कृत्वा क्रोधमत्र महात्मनि ।
रजः क्षिप्तं लगेन्नेन्दौ किन्तु क्षेप्तरि निश्चितम् ॥९१

अहो भगवता ज्ञातं हहा दुश्चिन्तितं मम ।
इति भूपस्त्रपाभाराद् वेष्टुं भुवि किलैहत ॥९२

पुनर्भगवतोचेऽसौ सौम्यानेनैव हेतुना ।
इहायाम तन्महर्षिममुं क्षमय तातवत् ॥९३

एतद्गुरूक्तमाकर्ण्य स सकर्णशिरोमणिः ।
हृत्पश्चात्तापतप्तं नु सिञ्चन् बाष्पभरैर्नृपः ॥९४

---

८७.३. राजो.

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

विजयसेनराजर्षिर्निपत्य पदपद्मयोः ।
क्षमयित्वा हृदन्तस्थं निनिन्देति सुदुष्कृतम् ॥९५

हा हा धिग् धिग् मम मनो त्वय्यध्यायदमङ्गलम् ।
अहहाहमधन्योऽत्र कलङ्कः स्वकुलेऽभवम् ॥९६

श्रुतिः स्मृतीराजनीतिः सर्वं वा विस्मृतं मम ।
यतस्त्वां स्वगृहायातं न्यजिघांसमनंहसम् ॥९७

पूर्वं पुमांसो मेऽकार्षुर्वैरिणोऽप्येयुषो गृहम् ।
आपदम्भोधिमग्नस्याप्युद्धारं परमं खलु ॥९८

मया नु तव राजर्षेर्देवसेव्यपदश्रियः ।
पापं तच्चिन्तयाञ्चक्रे येन स्याद् दुर्गतिः स्वसात् ॥९९

तत् प्रसीद प्रसीदाशु पुंस्पाशे मयि पुंस्पते ।
त्वत्प्रसत्तिसुधाभिर्मे पापतापः प्रशाम्यतु ॥१००

अथावोचत राजर्षिर्मर्षितारिपरीषहः ।
संयमप्रतिपत्त्यैव प्रसन्नोऽहं जगत्यपि ॥१०१

विशेषतस्तु भवति भगवद्वचनोद्यते ।
तच्चिन्तितमिदं निन्द प्रायश्चित्तमुरीकुरु ॥१०२

गुरूपान्ते च तच्चक्रे सर्वं सर्वंसहापतिः ।
प्रसन्नोऽस्मै गुरुः श्राद्धधर्मचिन्तामणिं ददौ ॥१०३

विजयसेनमनुराजमहर्षिं विमलसेननृपतेर(र्दुः?)रिताग्निम् ।
उपशमय्य विजहार सुधर्माऽप्यमृतदः पुरवरान्तरमारात् ॥१०४

ते सूत्रतोऽर्थतश्चाप्येकादशाङ्गयामधीतिनः ।
तपोर्णवस्य पारीणाः सर्वे गीतार्थतामगुः ॥१०५

इत्थं वरं चरित्राब्धिममृतश्रीनिबन्धनम् ।
ज्ञानेन्दुकौमुदीभारैर्भृशमुल्लास्य सर्वतः ॥१०६

गुरून् विज्ञापयामासुराशु गत्वरमेव नः ।
वपुस्तस्मादनशनं प्रतिपद्येमहि प्रभो ॥१०७॥ युग्मम्

व्याजहार गुरुः सौम्याः सम्यक् संलिख्यतां वपुः ।
ततः संलेखनां गाढां ते दशापि वितेनिरे ॥१०८

---

९५.२. निपत्य.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथाममत्वाः स्वाङ्गेऽपि सर्वभावेषु निःस्पृहाः ।
क्षमिताशेषसत्त्वाश्च प्राग्दुष्कृते विगर्हिणः ॥१०९

गुरुदत्तालोचनाश्च सुकृतस्यानुमोदकाः ।
चतुःशरणयुक्ताश्चानशनं प्रतिपेदिरे ॥११०॥ युग्मम्

परमेष्ठिनमस्कारध्यानधाराधिरोहिणः ।
सर्वे मासिकभक्तेन विधिना ते विपेदिरे ॥१११

ततश्च मुनिराजास्ते महापुण्यरथस्थिताः ।
सौधर्मकल्पे प्रत्येकं विमानेषु क्षणादगुः ॥११२

ततः स्वस्वविमानेषूपपाद शयनान्तरे ।
उत्पेदिरे द्युगङ्गायां सुवर्णकमला इव ॥११३

समानचतुरस्राङ्गाः सप्तधातुमलोज्झिताः ।
नवनीतमृदुस्पर्शाः प्रभापूरितदिग्मुखाः ॥११४

विज्ञानपारदृश्वानश्चावधिज्ञानशालिनः ।
महावीर्या वज्रकायाः सम्पूर्णशुभलक्षणाः ॥११५

अणिमादिमहर्द्ध्याढ्या अचिन्त्यमहिमालयाः ।
विमानेशा इन्द्रसामानिकास्ते जज्ञिरे सुराः ॥११६॥ त्रिभिर्विशेषकम्

अन्तर्मुहूर्तास्त्रिदशीभावमासाद्य ते सुराः ।
देवदूष्यं चापनीयोपविष्टा ददृशुर्मुदा ॥११७

विमानमप्रतिमानं स्वर्णरत्नमणीमयम् ।
इतस्ततः संपततः सन्ततं च दिवौकसः ॥११८

तद्विभूतिं चानुभूततरां वीक्ष्यातिविस्मयात् ।
स्फाराक्षास्ते किमिदमित्यन्तः सम्भ्रममूहिरे ॥११९॥ युग्मम्

अस्मिन्नवसरे तत्तत्किङ्करास्त्रिदिवौकसः ।
स्वं स्वं स्वामिनमुत्पन्नं वीक्ष्योद्यत्प्रमदोर्मयः ॥१२०

प्रतिनादेन ककुभः कुर्वतः प्रतिदुन्दुभीन् ।
दुन्दुभीन् वादयामासुः प्रातस्तूर्यसहोदरान् ॥१२१॥ युग्मम्

प्रभो जय जय स्वामिन् नन्द नन्द क्षतावधि(?) ।
त्वमस्माकमनाथानां नाथः समुदगाश्चिरात् ॥१२२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रायस्व विजितं सर्वं विजयस्वाजितं पुनः ।
राज्यमेकच्छत्रमत्र स्वामिन् कुरु सुरालये ॥१२३

इत्युच्छ्रित्य करानुच्चैर्माद्यद्दन्तावला इव ।
गर्जन्तोऽलमनुत्तालं पेठुर्वैतालिकामराः ॥१२४॥ त्रिभिर्विशेषकम्

कल्पः सौधर्मनामायं कल्पानामाद्य उद्यते ।
विमानमेतद् देवस्य राजधानीपुरोपमम् ॥१२५

अमी पुण्यधनक्रीता वयमाज्ञाकराः सुराः ।
एते च रत्नप्रासादा विलाससदनोपमाः ॥१२६

नित्यपुष्पफलाश्चेमे लीलाराममनोरमाः ।
इमाः केलीरत्नवाप्यः स्वर्णाम्भोरुहभास्वराः ॥१२७

अमी क्रीडाचला रत्नचूलाः काञ्चनसानवः ।
अमूः सुधातरङ्गिण्यो जलकेलीनिबन्धनम् ॥१२८

आगामिभवकल्याणसार्वकामिकतीर्थभम् ।
सिद्धायतनमेतच्च देवालय इवौकसि ॥१२९

महासभा सुधर्मेयं दिव्यभोगैकरङ्गभूः ।
इति व्यजिज्ञपन् स्वे स्वे तान् कृताञ्जलयः सुराः ॥१३०॥
षड्भिः कुलकम्

इति तद्वाचमाकर्ण्य विमानर्द्धिं विलोक्य च ।
दध्युस्ते विस्मयात् प्राप्तमस्माभिः सुकृतात् कुतः ॥१३१

ततो दत्तावधानास्ते सद्योऽप्यवधिदीपतः ।
भूमीगृहमिव स्वं स्वं ददृशुः प्राक्तनं भवम् ॥१३२

बतार्हद्धर्ममहिमा मितैः वर्षैः परापि यत् ।
स्वःश्रीरसंख्यवर्षाण्यस्माभिरेवं त्वचिन्तयन् ॥१३३

अभिषेकगृहं स्वामिन् प्रसादं कुर्वलङ्कुरु ।
कुर्मोऽभिषेकं येनेति व्यज्ञाप्यन्त सुरैरिमे ॥१३४

समुत्थाय ततो दत्तहस्तिकाः स्वस्ववेत्रिणा ।
तेऽलञ्चक्रुः सिंहपीठं समं जयजयारवैः ॥१३५

---

१२३.४. सुरालय. १२४.२. माद्यं°. १३३.१. बताह्°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः पुष्पोदकैर्गन्धोदकैः शुद्धोदकैस्तथा ।
अभ्यषिञ्चन्त तान् वृन्दारका जिनमिवादरात् ॥१३६
संमृष्टा गन्धकाषाय्या लिप्ता गोशीर्षचन्दनैः ।
संवस्त्रिता देवदूष्यैर्भूषिता माल्यभूषणैः ॥१३७
पार्श्वयोश्चामराभ्यां ते भान्तश्छत्रेण मूर्धनि ।
मूर्तज्ञानत्रयेणेव व्यवसायसभामगुः ॥१३८॥ युग्मम्

तत्रावाच्यत तैः सुपुस्तकवरं सिंहासनोत्सङ्गगं
यस्मिन् राजत एव पत्रनिचयो रैष्टी च वर्णावली ।
जात्यस्वर्णमयोऽन्तरा दवरको नानामणीवस्तिका
भास्वद्रिष्टमणीमये च परितो भातस्तरां पृष्ठके ॥१३९
यस्योद्दीप्रविडूरभूमणिमयं स्फारं मषीभाजनं
सान्द्रो रिष्टमणीमयो मषिरसो रैष्टं पिधानं घनम् ।
हैमी शृङ्खलिका द्रढीयसितरा वाज्री महालेखिनी
जन्मान्तावधि देवकृत्यमखिलं लेख्यं तथा धार्मिकम् ॥१४०॥ युग्मम्

ततः सर्वश्रिया सर्वद्युत्या सर्वबलेन च ।
पुरो मङ्गलतूर्येण पूर्यमाणे ककुम्मुखे ॥१४१
स्फुरत्परिमलोद्दामपुष्पदामादि भूरिशः ।
पूजावस्तु गृहीत्वा ते सिद्धायतनमीयिरे ॥१४२॥ युग्मम्
तत्र चाष्टोत्तरशतं प्रतिमानां प्रमृज्यते ।
स्नापयन्ति स्म तैर्दिव्योदकैर्भक्तिरसैरिव ॥१४३
दिव्याङ्गरागैर्भङ्गीभिः स्वप्रतापैर्नु पिञ्जरैः ।
विलिप्यानर्चुः कुसुमैर्यशःसुरभिनिर्मलैः ॥१४४
कृत्वा प्रसूनप्रकरं तत्फलैरिव तन्दुलैः ।
ते मुदा लिलिखुर्लेखाः पुरस्तादष्टमङ्गलीम् ॥१४५
प्रतिमास्त्रिः प्रणम्याथ न्यञ्च्येषज्जानु वामकम् ।
दक्षिणं भूतले न्यस्य विरचय्यालिकेऽञ्जलिम् ॥१४६
षड्जमध्यमगान्धारग्रामोद्गारमनोरमम् ।
गन्धर्ववर्गेणारब्धे चारुसङ्गीतकामृते ॥१४७

---

१४०.३. वाजी.　　१४६.२ न्यंचे°.



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

अष्टोत्तरशतश्लोकमयैर्नवनवैः स्तवैः ।
ते भक्तिवल्लीप्रसवैर्गम्भीरैस्तारमस्तुवन् ॥१४८॥ त्रिभिर्विशेषकम्
तदन्विमे स्तूपचैत्य इव माणवनामनि ।
स्तम्भे तीर्थंकरास्थीनि स्थितान्यानर्चुरञ्जसा ॥१४९
सुधर्मानामधेयायां सभायां सपरिच्छदाः ।
जय वर्धस्व जीवेत्याशास्यमानाः पुरः सुरैः ॥१५०
गत्वा सर्वेन्द्रियग्रामसुखं प्रत्यूषवातवत् ।
ते नानाभङ्गि सङ्गीतं चिरकालमचीकरन् ॥१५१॥ युग्मम्
अन्यदा देवराजस्य सर्वावसरसंसदि ।
मिलितानां दशानामप्येषां त्रिदिववासिनाम् ॥१५२
मिथोदर्शनतो जज्ञेऽनुरागो निरुपाधिकः ।
प्रयुक्तावधितश्चाभूत् पूर्ववन्मैत्र्यमुत्तमम् ॥१५३॥ युग्मम्
ततः सभाया उत्थायामिलन्नेकत्र ते समे ।
मिथस्तुल्यर्द्धिदृष्ट्या च परं सन्तोषमूहिरे ॥१५४
ततः कदाचिद्वापीषु तेऽक्रीडन् कलहंसवत् ।
उद्यानेष्वलिवत् पुष्पकेलीं तेनुः कदाचन ॥१५५
कदाचनाद्रिशृङ्गेषु विलेसुस्ते मृगा इव ।
सरित्सु पूर्णपद्मासु कदाचिच्चक्रवा[क]वत् ॥१५६
कदाचनापि श्रीनन्दीश्वरयात्रां वितेनिरे ।
जिनजन्मादिकल्याणमहांसि च कदाचन ॥१५७
इत्यादिलीलां सुकृतफलबीजोपमां मुहुः ।
मिलितास्ते स्म कुर्वन्ति किलैकात्म्यमिवाश्रिताः ॥१५८
यः श्रीशौर्यपुरेऽवतारजनुषी श्रीरैवताद्रौ पुन-
र्दीक्षाकेवलनिर्वृतीः समगमत् तस्यास्य नेमिप्रभोः ।
व्याख्यायां त्रिदशाः प्रमोदविवशा एते दशाप्यन्यदा
वन्दित्वा भगवन्तमुक्तविधिना च्युत्यावधिं(?) तुष्टुवुः ॥१५९
जयजगत्त्रयकल्पमहीरुह त्रिजगदर्चितपादपयोरुह ।
भवदवानलनिर्दलनाम्बुद प्रमदमन्दिरनेमिजिनेश्वर ॥१६०

१५९.२. निवृतीः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धुरि कुरङ्गमदाविलवक्षसा सुपरिरभ्य वृतोऽसि शिवश्रिया ।
इति किलाम्बुदसोदरदीधितिस्त्वमसि राजिमतीविमुखस्तथा ॥१६१
प्रतिदिनं विषमायुधसंकथाप्रथनहेतुतया नरकावहा ।
समुचितं खलु राज्यमतिस्त्वया समममुच्यत राजिमती च सा ॥१६२
गतवताऽऽयुधधामनि वादिते कुतुकतो भवता हरिवारिजे ।
यदभवत् किल शब्दमयं जगद्भुवनशब्दमयत्वगतिस्ततः ॥१६३
विततमूलकदम्बकमोहसंज्ञितमहत्तमतालमहीरुहः ।
मदनमस्तकसूचिविसूत्रणात् जिनपते भवतैव विशोषितः ॥१६४
जिनशिवाङ्गजशक्तिधरं स्फुटं घनसुहृत्कमनीयमहारुचे ।
ननु कुमारवरेण सुतेजसा यदि परं भवता व्यततार कः ॥१६५
शिवपुरीपथसृष्टिकरो भवांस्त्रिजगतीजनरक्षणविचक्षणः ।
सकलदुष्कृतसंहृतिकृच्च तन्नहि परं पुरुषान्तरमिष्यते ॥१६६
नमदमर्त्यशिरोमणिमालिकाद्युतितरङ्गवतीविमलक्रमः ।
सुभगसीमतया किल निर्वृतिप्रियतमैकपते भवते नमः ॥१६७
इति नवस्तवनोपदयाऽनया यदुनरेन्द्रकुलाम्बरभास्वतः ।
जिनपतेरमृतेशितुरामृतीं श्रियमिता इव ते द्युसदोऽभवत् ॥१६८
भगवन्तमनुज्ञाप्यासित्वा सिंहासनेषु ते ।
एकैकबाहोः प्रत्येकं द्वात्रिंशत् पात्रिका व्यधुः ॥१६९

ततश्च —

वीणावेणुमृदङ्गशङ्खतिलिमाढक्काहुडुक्कादिकान्
बिभ्राणैश्चतुरष्टभिः सुरुचिरैः स्त्रीपुंसपात्रैः पृथक् ।
श्रीनेमेः पुरतस्त्रिलोकजनताचेतश्चमत्कारकं
कृत्वा नाट्यविधिं प्रणम्य च पुनः पप्रच्छुरेते प्रभुम् ॥१७०

प्रभो कदा नश्च्यवनं क्षेत्रेऽवतरणं क्व च ।
कुतः सम्बोधनं सिद्धिः कदेति प्रतिपादय ॥१७१
मयि सिद्धे मम तीर्थे दिवश्च्युत्वाऽत्र भारते ।
सूरात्मदेवात् सम्बुद्धाः सेत्स्यथेत्यवदत् प्रभुः ॥१७२
ततस्तुष्टाः समोत्थायं सूरदेवामरं परे ।
नवापि विनयाद्चुर्वयं बोध्यास्त्वयाऽनघ ॥१७३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुरु प्रतिज्ञामत्रार्थे येन स्यान्नो मनोधृतिः ।
सोऽवगृध्रुवं करिष्येऽदो मैवात्रार्थे विषीदत ॥१७४
आसन्नस्य च नासन्नसिद्धिसङ्गोत्सवश्रुतेः ।
विषादानन्दौ बिभ्राणा वार्धिवद् गरलामृते ॥१७५
दशापि देवास्ते प्राप्ताः स्वविमानेषु वेगतः ।
विमानदेवीरत्नादि शोचन्ति स्म मुहुर्मुहुः ॥१७६॥ युग्मम्
चिन्ताचान्ताः करतल्पशायिमुखाम्बुजाः ।
क्षणं क्षणं वर्षमिव यावन्निर्वाहयन्ति ते ॥१७७
तावद्वाताहतदीप इव यद्वेन्द्रजालवत् ।
जयशासनर्षिदेवो दधेऽकस्माददर्शनम् ॥१७८॥ युग्मम्
इतश्चात्रैव भरते मनीषितसुरद्रुमः ।
समुद्रवेलोपनीतरत्नरोचिर्विभास्वरः ॥१७९
उद्दण्डपद्मषण्डाढ्यसरसीकुलसङ्कुलः ।
चम्पकाशोकमाकन्दपुन्नागोद्यानमालितः ॥१८०
नालिकेरीनागवल्लीद्राक्षामण्डपमण्डितः ।
एलालवङ्गकक्कोलकर्पूरवनबन्धुरः ॥१८१
चन्दनोन्मेदुरामोदामोदिताशेषदिङ्मुखः ।
नाम्ना मलयविषयो देशो देशोत्तमोऽस्ति भोः ॥१८२॥
चतुर्भिः कलापकम्

यत्र ग्रामः स नो यत्र निपानाः पञ्चसप्त न ।
न तन्निपानं यत् पञ्चसप्तदेवकुलश्रि न ॥१८३
न तद्देवकुलं यत्र व्याख्योर्व्यः पञ्चसप्त न ।
व्याख्योर्वी सा न या पञ्चसप्तच्छात्रशतान्विता ॥१८४
न सच्छात्रोऽस्ति यः पञ्चसप्तशास्त्राणि नाबुधत् ।
न तच्छास्त्रं यत्र पेतुः शलाकाः पञ्चसप्त न ॥१८५
तत्र च्छत्रमिवोन्नम्रं कम्रं सर्वककुप्श्रियाम् ।
दत्तारीभाङ्कुशावर्तं कुशावर्तमभूत् पुरम् ॥१८६
मुद्रयन्ते सरसां पद्माः पौराणां यत्र नो पुनः ।
दण्डो विजृम्भते राज्ञां नागराणां न जातुचित् ॥१८७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तच्छशास विशामीशो नाम्ना श्रीजयशेखरः ।
महाहवे महाबाहोर्यस्येव जयशेखरः ॥१८८
प्रतापतपनो यस्य चक्रे परमहः क्षितौ ।
निराचक्रे च यदसौ तदहो कौतुकं महत् ॥१८९
देवीमधुव्रतीव्रातकाम्यसौभाग्यमञ्जरी ।
बभूव तस्य देवस्य देवी भुवनमञ्जरी ॥१९०
लज्जाऽतिसज्जा सध्रीची प्रोन्मीलच्छीलकेलिभिः ।
यस्याः प्रसाधयाञ्चक्रेऽलंचक्रे च वपुर्लताम् ॥१९१
सुखाम्भोधिविगाहिन्यास्तस्याः शुक्तेरिवोदरे ।
जयशासनदेवात्मा मुक्ताभः सोऽवतारमैत् ॥१९२
तदा च कार्त्तिकज्यौत्स्नीशेषेऽशेषे हितावहम् ।
मुखे विशन्तं भास्वन्तं वीक्ष्य भूपस्य देव्यवक् ॥१९३
राज्ञा च स्वप्नविज्ञैश्च तत्स्वप्नास्वप्नभूरुहः ।
फलं न्यवेदि मार्तण्डप्रचण्डतनयोदयः ॥१९४
सम्पूर्णेष्वङ्गेष्वशेषेषु मासेषु च निरामया ।
तनयं सुषुवे देवी प्राचीवाहिमरोचिषम् ॥१९५
महीभुजाऽथ स्वराज्याभिषेकोत्सवतोऽधिकः ।
पुरे विरचयाञ्चक्रे पुत्रजन्ममहोत्सवः ॥१९६
जन्मोत्सवात्युत्सवेन पितृष्वस्रा जयश्रिया ।
पुत्रस्य समरसेन इति नाम विनिर्ममे ॥१९७
धात्रीभिरिव राज्ञीभिर्नृपैर्बालधरैरिव ।
कुमारः शिश्रिये रूपश्रियेव विनयश्रिया ॥१९८
क्रमेण च कलाचार्यस्तं कलाभिरपूरयत् ।
निष्कलाभगौरवेण कलाचार्यं त्वहो नृपः ॥१९९
त्रिलोकस्त्रैणसौन्दर्यसारमादाय यत्नतः ।
यासां सृष्टिः सृष्टिकृता मन्ये निरुपमा कृता ॥२००
महासामन्तकन्यास्ताः चतुरष्टाऽपि चैकदा ।
बिवाहयन् कुमारेण विच्छर्देण महीयसा ॥२०१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कलाचार्येण परिणायितं द्वासप्तर्ति कलाः ।
त दृष्ट्वा कृपणंमन्यो मन्येऽभूज्जयशेखरः ॥२०२॥ त्रिभिर्विशेषकम्
श्रीकुमारावतंसाय श्रीप्रासादावतंसकम् ।
द्वात्रिंशद्वल्लभावासपरिक्षिप्तं पिता ददौ ॥२०३
तत्र द्वात्रिंशता दारैरुदारैर्विलसन्नसौ ।
ताराभिः सप्तविंशत्या श्लिष्टं तारेशमत्यगात् ॥२०४
यौवनेन वयोराज्ञा युवराजं कृतं पुरा ।
तं मृष्ट्वा यौवराज्येऽपि स्थापयन्नातुषन्नृपः ॥२०५
कुमारः समरसेनो राजपाट्यां कुतूहली ।
महीयसाऽश्वथट्टेन जगामोद्यानमन्यदा ॥२०६
तत्राश्वखुरशब्देन भीतभीतोऽथ जम्बुकः ।
पलायमानो ददृशे कुमारेणाविदूरतः ॥२०७
ततश्च यौवनोन्मादान्निर्विवेकतया हृदः ।
तद्वधाय कुमारेण मुमुचेऽश्वोऽतिवेगतः ॥२०८
स चिरं खेदितो मृत्युभीत्या नश्यन् वनान्तरे ।
नृसिंहेन हहा तेन शल्येनाघानि जम्बुकः ॥२०९
प्रशंसितः पापमित्रैः कुमारोऽथ प्रहर्षुलः ।
यदा तदा कुमित्रोक्त्या क्रीडया खेटकं व्यधात् ॥२१०
दृष्ट्वा वराहमन्येद्युर्दुर्धरं सिंहपोतवत् ।
कुमारः प्रेरयामास तुरङ्गममसुं प्रति ॥२११
पलायतेऽभ्येति वोच्चैर्बिभेत्युद्भेषयत्यपि ।
कातरश्च प्रवीरश्च म्लेच्छवच्छूकरोऽभवत् ॥२१२
कुमारस्तु तस्य पृष्ठं कथञ्चन मुमोच न ।
प्रजहार च तं कोलं कोऽलं तिर्यग्नरं प्रति ॥२१३
प्रहतेनापि तेनाश्वपदोऽच्छेद्यत दंष्ट्रया ।
म्रियमाणो मारयते कातरोऽपि हि शूरवत् ॥२१४
छिन्नांह्रिस्तुरगो वेगान्निपपात महीतले ।
कुमारस्तत उत्फल्य तुरङ्गान्तरमाश्रयत् ॥२१५

२०५.१. °राजा. २०८.३. तद्वाधाय.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरुञ्छितः कुमारोऽथ पापमित्रैर्मुहुर्मुहुः ।
स्तुतश्च शूकराखेटं मेने शौर्यकषोपलम् ॥२१६

ततश्च —
पितृवाक्यं राज्यकार्यं पुरमन्तःपुरं तथा ।
कुमारो गणयामास स्वशरीरसुखं च न ॥२१७
दिवानिशमसौ किन्तु प्राणिसंहारकारिणीम् ।
मृगयां रचयामासाजन्माप्याखेटिकः किल ॥२१८

यतः —
क्रीडेति प्रथमं कुतूहलरसैर्बध्नाति मूलं मना-
गुत्कर्षादपकर्षतश्च तदनु प्रौढिं परां गच्छति ।
आक्रम्य क्रमतः क्रियान्तरमथ प्राप्तोदयं बाधते
वृद्धं हि व्यसनं शनैः सुमनसामप्येककार्यायते ॥२१९
क्षणेऽत्र भोः सिंहराजप्रतिबोधक्षणोऽधुना ।
विमृश्येति शूरसाधुदेवस्तत्र समाययौ ॥२२०
प्रातर्मङ्गलवेलायामदृश्यं च पुरम्बरे ।
भाद्राब्दसोदररवः प्रारेभे पठितुं यथा ॥२२१
हन्ति यः शरणायातांस्तस्य का देव शूरता ।
कथं न शरणायाता ये तव क्ष्मातलं श्रिताः ॥२२२
निरायुधान् क्ष्मातलस्थान् वर्महीनान् निहन्ति यः ।
घोरायुधो हयारूढो वर्मितो वीरताऽस्य का ॥२२३
धिक् पौरुषं विक्रमं धिग् दाक्ष्यं धिग् [धिक्] च शेमुखीम् ।
कान्दिशीकान् शृगालादीन् नरकेसरिणां घ्नताम् ॥२२४
तिरश्चा शूकरेणापि शस्त्रहीनेन भीरुणा ।
युद्धे पलायते यस्तु भटवादोऽस्य कीदृशः ॥२२५
नृसिंह पूर्वपुंभिस्ते नेदमाचरितं क्वचित् ।
पापात् तदस्माद् विरम रमस्व जिनसंयमे ॥२२६
स्वकृतं दुष्कृतं भोग्यं नात्र रङ्को न भूपतिः ।
विरमास्मात् ततः पापात् किं बहूक्तैः कृतीश्वर ॥२२७

---

२२७.४. कृतीश्वरः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निशम्येति कुमारेण प्रोचेऽपाठ्यद्य केन भोः ।
मङ्गलपाठकैरूचे केनाप्यप्रेक्ष्यवर्ष्मणा ॥२२८
ततः कुमारः प्रगेऽपि मृगयायां गतो रयात् ।
समायातश्च मध्याह्ने मज्जितो बुभुजे च सः ॥२२९
विलिप्य चान्ततताम्बूल आस्थाने तस्थिवान् मुदा ।
क्षणेऽत्र स पुनर्देवः समागान्नटपेटकी ॥२३०
दृष्ट्वा कुमारो विज्ञप्तस्तेन प्रस्तावर्वेदिना ।
प्रेक्षस्व प्रेक्षणं देव कुमारेणाप्युरीकृतम् ॥२३१
ततश्च –
रङ्गभूः सज्जयाञ्चक्रे गृहीता वर्णकादयः ।
आतोद्याद्युपकरणं सर्वं च प्रगुणीकृतम् ॥२३२
प्रतिष्ठितः पूर्वरङ्गो नृत्तं गीतं च निर्मितम् ।
शूरदेवनटो रङ्गाद् गातुमेवं प्रचक्रमे ॥२३३
यावन्न चक्रे मृगया मुनिकेवलिनिर्मिता ।
तावन्न प्राप्यते स्वामिन् शर्म दुःखोर्मिवर्जितम् ॥२३४
तद्देव तन्मनीभूयान्तरङ्गां मृगयां शृणु ।
हृद्वृत्तिरित्यटव्यस्ति विकल्पोरुतरून्नता ॥२३५
मिथ्यात्वाद्या निवसन्ति किरयस्तत्र भूरयः ।
दर्शनज्ञानावरणमोहान्तरायका मृगाः ॥२३६
वेदनीयनामगोत्रायूंषि गोमायवस्तथा ।
कार्मणवर्गणाशष्पचर्वणानर्वविग्रहाः ॥२३७
नानाविकल्पद्रुषण्डच्छायास्वाबद्धगोष्ठयः ।
निरीतयश्चिरायुष्का नित्यमेवाकुतोभयाः ॥२३८॥ त्रिभिर्विशेषकम्
तत्र याहि त्वमादाय जीववीर्यं महाधनुः ।
परिधाय च चारित्राङ्गुनं सर्वाङ्गमण्डनम् ॥२३९
पृष्ठे बद्ध्वा सुलेश्येषुधर्मध्याननिषङ्गकम् ।
शीलाङ्गसहस्रव्याधैर्हृद्वृत्तिं परिवेष्ट्य च ॥२४०

---

२३५.४. °तरुन्नता. २४०.४. वृत्तिं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्या मध्येऽप्युदीर्याख्यां शकटोर्व्याभसंस्थितिम् ।
कृत्वा निषेद्धुं तज्जीवान् क्षपकश्रेणिसद्वृतिम् ॥२४१

अपूर्वकरणे स्थित्वा गुप्त्याऽधिज्यं विधाय च ।
वीर्यचापं सुलेश्येष्वा घातयाणकुरङ्गकान् ॥२४२॥

चतुर्भिश्च कुलकम्

क्षिप क्रमेण मिथ्यात्वमिश्रसम्यक्त्वशूकरान् ।
प्रत्याख्यानाप्रत्याख्यानैणांश्च तेनेषुणैकदा ॥२४३

गती तिर्यङ्नारकयोरानुपूर्व्यौ तथा तयोः ।
अपर्याप्तमेकद्वित्रिचतुरिन्द्रियजातिकाः ॥२४४

स्थावरातपमुद्योतसूक्ष्मसाधारणानि च ।
स्त्यानर्द्धित्रिकमष्टानां शेषं चैकेषुणा क्षिप ॥२४५

ततो नपुंसकं वेदं स्त्रीवेदं च मृगावथ ।
हास्यादीन् मृगदारांश्च षडेकेनेषुणा क्षिणु ॥२४६

ततः पुरुषवेदं च कुरङ्गं हिन्धि पत्रिणा ।
ततः संज्वलनक्रोधमानमायामृगान् क्रमात् ॥२४७

त्रिखण्डं लोभसारङ्गं कृत्वा द्वे शकले दले ।
खण्डं तृतीयं संख्यातान् खण्डान् कृत्वा क्षणात् क्षिप ॥२४८

द्वाभ्यां क्षणाभ्यामप्राप्तः केवलं प्रथमे क्षणे ।
घातय प्रचलानिद्रे देवगत्याऽऽनुपूर्विके ॥२४९

वैक्रियं तीर्थमाहारानादिसंहननानि च ।
संस्थानकं चान्यतरद् यौगपद्यात् त्रयोदश ॥२५०॥ युग्मम्

क्षणेऽन्तिमे ज्ञानविघ्नदशकं दृकूचतुष्ककम् ।
हत्वैकबाणेन भज केवलं विजयश्रियम् ॥२५१

भवोपग्राहिकर्माणि फेरून् दुःशकुनोपमान् ।
तिरस्कृत्याक्षयसुखं मोक्षमाप्नुहि धीनिधे ॥२५२

इति हत्वा मत्या निर्दयवृत्त्या चान्तरारिपशुवृन्दमिति ।
शिवपदमचिरादपि गच्छ सुखादपि हित्वा मलमयमङ्गमिति ॥२५३



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

इति साभिनयं तेन नटेनाखेट आन्तरे ।
गीते प्रमुदिता संसत् सर्वस्वं दातुमैहत ॥२५४
अथ चिन्तयाञ्चकार कुमारः स्थिरधारणः ।
अये प्राभातिकपाठिप्रायः कोऽप्येष नो पुमान् ॥२५५
व्याजहार कुमारोऽथ भो भोः सुकृतिशेखर ।
नटरूपेणामुना किं स्वं रूपं प्रकटीकुरु ॥२५६
प्रादुरासीत् ततो दिव्यालङ्कारैर्भासुरः सुरः ।
जगाद च श्रीकुमारं सावधानं निशामय ॥२५७
रन्त्वा रत्नविमानेषु किं रज्यस्यश्मवेश्मसु ।
त्यक्त्वा च तान् रत्नराशीन् का सक्तिर्मलिने धने ॥२५८
भुक्त्वा च तरुणीर्दिव्या रागोऽशुच्यबलासु कः ।
मुक्त्वा चांशुकभूषास्ताः कुत्सितास्वासु का रतिः ॥२५९
दिव्याङ्गरागैरालिप्याङ्गरागेष्वेषु का स्पृहा ।
स्थित्वा तादृक् परीवारे का खलेऽत्र जने स्थितिः ॥२६०
कुमारो व्याहरत् सुष्ठु त्वयाऽशिक्षीन्द्रजालकम् ।
ततोऽस्मि तुष्टो याचस्व स्वेच्छया स्वमनीषितम् ॥२६१
सुरोऽथ चिन्तयामास हा किमेवं लपत्यसौ ।
दुर्लभबोधिकोऽयं किं यदित्युक्तो न बुध्यते ॥२६२
प्रयुक्तावधिना तेन ज्ञातं नेत्येष भोत्स्यते ।
तत् प्राप्यावसरं किञ्चिद् बोध्योऽयमिति चेतसा ॥२६३
सुरो दृश्येतरो जज्ञे पेटकं चास्य धामवत् ।
स्मित्वा कुमारोऽवक् कोऽपि मोहयिष्यति मामपि ॥२६४॥ युग्मम्
द्वितीयेऽह्नि नमस्कृत्य पितरं जयशेखरम् ।
तदास्थानसरस्यस्थात् कुमारो राजहंसवत् ॥२६५
अन्येऽपि मन्त्रिसामन्तप्रमुखा राजपौरुषाः ।
चक्रवाकादय इव निषेदुस्तत्र सर्वतः ॥२६६
अत्रान्तरे चन्द्रपुराच्चन्द्रशेखरभूपतेः ।
दूतस्तत्रागतो नत्वोपविष्टोऽप्रच्छि भूभुजा ॥२६७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कच्चित् चन्द्रशेखरस्य मत्स्वसुश्च जयश्रियः ।
तत्पुत्रहरिचन्द्रस्य कुशलं सर्वतोऽपि हि ॥२६८
देवदेवातिवात्सल्याच्छ्रेयोऽस्त्येवास्य किं पुनः ।
यक्षिणीधातुवादादौ हरिचन्द्रस्य कौतुकम् ॥२६९
अन्यदा योगिनैकेन यक्षिणीमन्त्र ईरितः ।
कुमारोऽपृच्छत् तच्छक्ति योग्युवाच शृणु प्रभो ॥२७०
यद्येषा यक्षिणी सिध्येत् तदा वश्यं जगद् भवेत् ।
कोशोऽक्षयो व्योम्नि गतिस्तदाराधय यक्षिणीम् ॥२७१
कुमारेणैष पप्रच्छे को न्वस्याः साधनाविधिः ।
सोऽवक् कृष्णचतुर्दश्यां श्मशानेऽयुतजापतः ॥२७२
नृमांसपलसहस्रहोमात् सिध्यति यक्षिणी ।
उत्तरसाधकोऽस्म्येकोऽन्ये चत्वारश्चतुर्दिशि ॥२७३
बिभीषिकास्रूत्थितासु जापैकाग्र्यं विशेषतः ।
मदुक्तं चादरात् कार्यं कुमारेण प्रतिश्रुतम् ॥२७४
ततः कृष्णचतुर्दश्यामनापृच्छ्यैव भूभुजम् ।
कुमारः सर्वसामग्र्या श्मशाने योगियुग् ययौ ॥२७५
दिग्रक्षके पुंश्चतुष्के योगिन्युत्तरसाधके ।
मन्त्रजापः समारेभे कुमारेणैकचेतसा ॥२७६
अर्धरात्रं कृते होमे विजित्योग्रा विभीषिकाः ।
पञ्चमांसपलशती जुहुवे नृपसूनुना ॥२७७
अथाग्निकुण्डादुत्तस्थौ वेतालो विब्रुवन्निति ।
विद्यासाधकमद्म्ययुत्तरसाधकमद्मि वा ॥२७८
भीतो योगी ततो हन्तुमारेभे तेन स द्रुतम् ।
पाप्मिना योगिनाऽथोचे पाहि पाहि कुमार माम् ॥२७९
मदुक्तं कार्यमित्येतद् वचः संस्मृत्य भूपसूः ।
मुक्त्वा होमं खड्गपाणिर्वेतालं प्रत्यधावत ॥२८०
वेतालो योगिनं लात्वा दिशमेकामधावत ।
कुमारश्च तमन्वेव महारण्ये गतावुभौ ॥२८१

२७५.२. अमापृच्छ्यैव.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स वेतालः प्रगे योगिशिरश्छित्वाऽविशद्दरीम् ।
कुमारस्तां दरीं रोषादारब्ध खनितुं बलात् ॥२८२
वेतालेनाथ हुञ्चक्रे पतितो राजसूर्भुवि ।
दाहज्वरेण जगृहे पतितं दुष्कृतं तयोः ॥२८३
ते च दिग्रक्षिणो मर्त्या राट्सूनूक्तानुसारतः ।
क्रमात् तत्रापुरद्राक्षुस्तं कुमारं तथास्थितम् ॥२८४
ततो दण्डिकया तैः स निन्ये चन्द्रपुरं पुरम् ।
राज्ञश्च दर्शयाञ्चक्रे तद्वृत्तान्तोक्तिपूर्वकम् ॥२८५
ततो राजा विषण्णोऽपि सद्यो वैद्यानजूहवत् ।
तैश्चारेभे कुमारस्य क्रिया दाहज्वरोचिता ॥२८६
राज्ञा च यक्षिणी शान्तिकर्मणा मानिता भृशम् ।
प्रासीदत् स्वस्थ्यभूत् पुत्रो जज्ञे वर्धापनं महत् ॥२८७
पित्राऽन्यदा सपरुषं शिक्षायै भाषितः सुतः ।
धिग् धिग् धियं ते किं न्यूनं यदेवं क्लिश्यसे मुधा ॥२८८
एतावताऽप्यपमानममानं धृतवान् हृदि ।
कुमारोऽल्पपरीवारश्छन्नं निशि गृहान्निरैत् ॥२८९
निर्गमात् तुर्यमुद्याहस्तद्राज्ञा समदेशि वः (?) ।
स चेद् वः सन्निधावेति तदा धार्योऽत्र सर्वथा ॥२९०
इति यावदसौ वक्ति तावदन्यः पुमान् जगौ ।
आगाद्देव द्वियोजन्यां कुमारो वर्ध्यसे ततः ॥२९१
ततः सद्यः प्रमुदितो राजा वेत्रिणमादिशत् ।
पूःशोभाकार्यतां वेगात् श्रीकुमारोऽभिगंस्यते ॥२९२
ततश्च सज्जिताः सर्वे हस्त्यश्वरथपत्तयः ।
राजा जयेभमारोहत् सान्तरङ्गपरिच्छदः ॥२९३
कुमारः समरसेनः पट्टहस्तिनमाश्रयत् ।
सामन्तास्तुरगान् मन्त्रिमुख्याश्चारुरुहू रथान् ॥२९४
ततः सर्वौघेण हरिचन्द्रस्याभिगमं प्रति ।
जयशेखरराजेन्द्रश्चचाल चलयन्निलाम् ॥२९५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रोशमात्रे हरिचन्द्रो नृपमभ्येत्य नेमिवान् ।
राजा तमङ्कमारोप्याचलन्निजपुरं प्रति ॥२९६

अत्रान्तरे गजघटागलगर्जिश्रुतेरिव ।
दैवाद् घनघटागर्जिरुज्जजृम्भेऽल्पवृष्टिकृत् ॥२९७

ततोऽब्दधारावाहाभिः श्लिष्टोत्कृष्टा बभूव भूः ।
गन्धसारोदारगन्धान् गन्धवर्तीव चामुचत् ॥२९८

ततः समरसेनस्य करी विन्ध्याटवीं स्मरन् ।
स्मरातुर इवाधावीदन्वधावीद् वरूथिनी ॥२९९

धावमानो वायुवेगाद् गजो गम्भीरवेद्यसौ ।
सैन्यप्रमुक्तान् नाराचान् न मेने मशकानपि ॥३००

निषादिसादिनां वेगाद् गजं तमनुधावताम् ।
तदीयभाग्यमिव हाऽस्तमियाय दिवाकरः ॥३०१

ततोऽन्धकारे प्रसृते तदभाग्य इवाऽभितः ।
यो यत्राभूत् स तत्रास्थात् तमसा स्तम्भितः किल ॥३०२

कुमारेभस्तु तरसा गच्छन् निखिलया निशा ।
विन्ध्याटव्यां पूर्वभुक्तां नदीं प्राप प्रियामिव ॥३०३

अथ क्रीडति तत्रेभे तत उत्तीर्य वेगतः ।
तस्यास्तीरे पयः पातुमुपविष्टो नरेन्द्रसूः ॥३०४

क्षणेऽत्र प्रच्छन्नचारी दध्यौ सूरसुरः स च ।
प्रस्तावो वर्ततेऽमुष्य प्रतिबोधाय साम्प्रतम् ॥३०५

यतः –

यावन्न दुःखं संप्राप्ता वियुक्ता नेष्टबान्धवैः ।
तावन्न प्राणिनः प्रायो धर्मं गृह्णन्ति भावतः ॥३०६

ततः पुंरूपेण तेनाग्राहि बाहौ स राजसूः ।
स च तं प्राहरत् क्षुर्या प्रहारोऽमुष्य नालगत् ॥३०७

पुंसाऽन्येन ततोऽमुष्य छुरीमुद्दाल्य हस्ततः ।
नद्यां निमज्जयाञ्चक्रे भूपभूर्जलकुम्भवत् ॥३०८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुमारः क्षणमात्रेण ददर्श नरकालयान् ।
परमाधार्मिकाहन्यमाननानाजनोच्चयान् ॥३०९

पृष्टः कुमारेण पुमान् भोः केऽमी घ्नन्ति निर्घृणाः ।
के वा रटन्तो विरसं निहन्यन्ते वराककाः ॥३१०

पुमानाह नाहमपि सम्यग् जाने ततः सखे ।
गत्वा द्वावपि पृच्छावोऽथ गत्वा तावपृच्छताम् ॥३११

के यूयमिति तेऽप्यूचुः परमाधार्मिका वयम् ।
पुमानूचे क इमे च किं वेमान् हथ चौरवत् ॥३१२

परमाधार्मिकोऽवादीदेते ते नारकाः सखे ।
अयं च नरको येनामी हन्यन्ते च तच्छृणु ॥३१३

एतेन जग्धं देवस्वं तज्जिह्वा छिद्यतेऽस्य भोः ।
चैत्यार्चाविघ्नकृच्चैष कुम्भीपाकेन पच्यते ॥३१४

बिम्बाशातनया पाप उद्बद्धः शाल्मलीतरौ ।
उत्सूत्रभाषिणोऽस्यास्यं सीव्यते नृपनन्दन ॥३१५

साधुदाननिषेद्धाऽयं क्षुधार्तः स्वाङ्गमाद्यते ।
सङ्घस्य प्रत्यनीकोऽसावयोभ्राष्ट्रेषु पच्यते ॥३१६

साध्वीगन्ता ज्वलदयःपुत्रीमालिङ्ग्यते बलात् ।
निर्मन्तुजन्तुहन्ताऽयं पाट्यते क्रकचेन भोः ॥३१७

मृषावाद्येष पिशुनः पाटितास्यो रटत्यलम् ।
स्तैन्यकार्येष छिन्नाङ्ग उद्बद्धः कण्टकिद्रुमे ॥३१८

अयं परस्त्रीभोक्ता चाश्लेष्यते शाल्मलीलताम् ।
महापरिग्रही त्वेष तप्तायोऽनसि योज्यते ॥३१९

रात्रीभोजी कुमारायं भोज्यतेऽशुचिपिण्डकान् ।
मधुमद्यपिबोऽसौ च प्रतप्तं पाय्यते त्रपु ॥३२०

इति श्रुत्वा च दृष्ट्वा च चिन्तयत्येष राजसूः ।
केऽप्येते पुरुषाः प्रातःपाठकृन्नटबान्धवाः ॥३२१

पुनः स पुरुषः प्राह दृष्टं पापफलं सखे ।
सुकृतस्य फलं सम्यक् कुमारेक्षस्व सम्प्रति ॥३२२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्युक्त्वा भुवनपतिगृहेष्वेतं स नीतवान् ।
तत्र देवांश्च देवीश्च कुमारो वीक्ष्य तं जगौ ॥३२३

केऽमी पुमानाख्यदमी शबलव्रतपालनात् ।
अकामनिर्जराबालतपसश्च पुराकृतात् ॥३२४

जघन्यमध्यमोत्कृष्टाज्जाता भुवनवासिनः ।
राजपुत्रस्ततो दध्यौ ज्ञायते सेत्यवाग्यसौ ॥३२५॥ युग्मम्

अथ नीतो व्यन्तरेषु तेन पुंसा नरेन्द्रसूः ।
व्यन्तरर्द्धिं दर्शयित्वा तत्कारणमथादिशत् ॥३२६

रज्जूद्बन्धादितः केचित् किञ्चिच्छोभनचेतसा ।
अकामनिर्जराबालतपोभ्यां व्यन्तरा अमी ॥३२७

इत्यधो दर्शयित्वैष गृहीत्वा तं नृपात्मजम् ।
व्योम्नि ज्योतिश्चक्रर्द्धिं दर्शयामास सर्वतः ॥३२८

कर्मणाऽमी केन जाता इत्युक्ते राजसूनुना ।
स पुमानाह शबलविरत्याऽज्ञतपस्यया ॥३२९

तं गृहीत्वा च सौधर्मे विमानेऽगाज्जघन्यके ।
कुमारस्तत्र देवर्द्धिं वीक्ष्य विस्मित ऊचिवान् ॥३३०

केनेयं कर्मणा जज्ञेऽज्ञतपस्यादिना सखे ।
अत्रान्तरे कुमारेण पृष्टोऽयं कः पुनर्भवान् ॥३३१

पुमानूचेऽहं वयस्यस्तव प्राग्भवसंस्तुतः ।
ततः कौशाम्ब्यादि वृत्तं स्पष्टमाचष्ट तस्य सः ॥३३२

यावच्छ्रीनेमितीर्थेशं सूरदेवस्त्वहं स च ।
यद्यत्र तव सन्देहः स्वर्द्धिं तद् दर्शयामि ते ॥३३३

इत्याख्याय स्वविमाने तं निनाय स निर्जरः ।
स्वःश्रियं विस्मयकरीं तस्य चासावदीदृशत् ॥३३४

तमादायाथ शक्रस्य सभायां सोऽनयत् क्षणात् ।
अत्याश्चर्यकरीमिन्द्रविभूतिं दृष्टवानयम् ॥३३५

इन्द्रसामानिकः सोऽपि सूरदेवः कृतानतिः ।
उपशक्रं निषसाद कुमारस्तस्य पार्श्वतः ॥३३६

---

३३३.१. °तीर्थेशः.　३३४.३. स्वश्रियं.　३३५.२. सौऽनयत्.

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

शक्र आख्यद् भोः कोऽयमिहानीतो मनुष्यकः ।
देवोऽवग् देवपादानां भृत्योऽयं मे पुनः सुहृत् ॥३३७

इन्द्रः कुमारमाचख्यौ परिजानासि मामहो ।
कुमारः प्राह देवेन्द्र न जानामि किमप्यहम् ॥३३८

हरिर्व्याहरदासीस्त्वमिन्द्रसामानिको मम ।
जयशासनसाध्विन्द्रतपोलक्ष्मीलताफलम् ॥३३९

राट्पुत्रोऽथ भृशं दध्यौ किं सत्यं सर्वमप्यदः ।
किञ्चेन्द्रजालं किं स्वप्न आहो मम मतिभ्रमः ॥३४०

तं सन्दिहानमित्येष देव, उत्पाट्य रंहसा ।
महाविदेहे निन्ये श्रीसीमन्धरविभोः पुरः ॥३४१

ततश्च –

श्रीइन्द्रध्वजधर्मचक्रचमरच्छत्रत्रयाशोकयुङ्-
मर्त्यामर्त्यजलस्थलाम्बरचरत्तिर्यक्सुपर्यञ्चितम् ।
प्राकारत्रितयं मणीचयमयस्फारस्फुरत्तोरणं
श्रीसीमन्धरतीर्थपस्य जगतां सारं किलैक्षिष्ट सः ॥३४२

किञ्च –

दुर्वर्णस्वर्णरत्नोच्चयमयवरणैर्मोहराड्दुःप्रवेशं
श्रीयक्षाधीशदौवारिकरुचितचतुर्गोपुरद्वारसारम् ।
आकीर्णं भूर्भुवःस्वस्त्रितयजनतया तीर्थराजा सनाथं
श्रीश्रेयोद्वीपशाखापुरमवसरणं सैष वीक्षां बभूव ॥३४३

अपि च –

आग्नेय्यां गणभृद्विमानवनितासाध्व्यस्तथा नैर्ऋते
ज्योतिर्व्यन्तरभावनेशदयिता वायव्यगास्तत्प्रियाः ।
ऐशान्यां च विमानवासिवरनार्यः संश्रिता यत्र तत्
जैनास्थानमिदं चतुस्त्रिपरिषत्सेव्यं कुमारोऽविशत् ॥३४४

ततः कुमारं देवोऽसौ जगाद सुधियां निधे ।
पुण्यप्रकर्षमद्राक्षीर्वन्दस्व श्रीजगत्प्रभुम् ॥३४५

---

३४४.१. नैऋतो.

प्रभोः पुरस्तादीहादि कुर्वाणोऽथ नृपाङ्गजः ।
मुमूर्च्छ स च देवेन सिषिचे गन्धवारिभिः ॥३४६
तालवृन्तानिलहृतातुच्छमूर्च्छः पराप च ।
जातिस्मृतिं जगन्नाथकेवलस्येव वर्णिकाम् ॥३४७
प्रबुद्धः श्रीकुमारोऽथ तमुवाच सुरोत्तमम् ।
तवानुशास्तिमिच्छामि साधु साध्वस्मि बोधितः ॥३४८
अहो ते सत्यसंधत्वमहो तेऽन्योपकारिता ।
अहो स्वार्थानपेक्षित्वं तवाहो साधुसौहृदम् ॥३४९
यन्न श्रुतं यन्न दृष्टं यन्नराणां न गोचरः ।
भूर्भुवःस्वस्त्रयं तन्मेऽध्यक्षं त्वन्निश्रयाऽभवत् ॥३५०
ततः सुरकुमारौ तौ नमस्कृत्य जगत्प्रभुम् ।
वचोऽपातां सुधापायमहो पुण्योदयस्तयोः ॥३५१
जिनव्याख्यावसाने च गतौ तौ तं नदीह्रदम् ।
शान्तयित्वा हस्तिनं तमारोप्य नृपनन्दनम् ॥३५२
निर्विघ्नमस्तु ते वीर प्रतिबध्यस्व मा क्वचित् ।
कार्ये स्मार्योऽस्मीति चोक्त्वा शूरदेवो दिवं ययौ ॥३५३॥ युग्मम्
द्विपारूढः कुमारस्तु प्रस्थितः स्वपुरं प्रति ।
पदे पदे स्वशिबिरं चिन्तातुरमवैक्षत ॥३५४
कुमारं च तथा यान्तं प्रेक्ष्य सर्वेऽपि सैनिकाः ।
मराला मानसमिव प्रहृष्टाः पर्यवारयन् ॥३५५
श्रुत्वा स्वपुत्राभ्युदयं समुद्रोऽभ्यागमन्नृपः ।
तमस्तोमः क्षयमगान्मुदद्वैतं व्यजृम्भत ॥३५६
भुक्त्युत्तरं श्रीसमरसेनः सत्वरमभ्यधात् ।
जयशेखरभुवनमञ्जर्यौ पितराविति ॥३५७
अम्ब तात मया ज्ञाता विषया विषसन्निभाः ।
आपातमात्रमधुराः परिणामेऽतिदारुणाः ॥३५८

---

३४७.१. °तानल°.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदलं तात भोगैर्मे किन्तु चारित्रसेनया ।
मुक्तिराज्यमर्जयामि जयामि भववैरिणम् ॥३५९

ततो माताऽवदद्वत्स त्वद्दीक्षावचनश्रुतेः ।
हृदयं मे स्फुटतीव मा वादीस्तदिदं पुनः ॥३६०

कुमारोऽथाभ्यधान्मातः कोऽयं शोकोदयस्तव ।
जयश्रियो ह्यागमे स्यात् प्रत्युत प्रमदोदयः ॥३६१

माता —

स्वैरं विलस साम्राज्यसम्पदा यौवनावधि ।
भुक्तभोगस्ततो वीर रमेथाः संयमश्रिया ॥३६२

पुत्रः —

यस्यास्ति मृत्युना सख्यं यः शक्तोऽतः पलायितुम् ।
यश्चाजरामरोऽत्रास्ति मातर्भोगेच्छुरस्तु सः ॥३६३

माता —

अतिप्रियोऽसि मे वत्स जीवामि त्वां विना न हि ।
यावज्जीवामि तदहं तावन्मा सौम्य निष्क्रमीः ॥३६४

पुत्रः —

यथा प्रदीप्तात् सदनान्निर्गच्छन् वल्लभो जनः ।
न वार्यते वार्यते न तथैव भवचारकात् ॥३६५

माता —

निरास्वादा वालुकावद्दुश्चर्वा या जवा इव ।
दीक्षा ज्ञेया जिनेन्द्राणामत्र भग्ना महारथाः ॥३६६

पुत्रः —

निःसत्त्वानां सर्वमेतत् किन्तु सर्वे न तादृशाः ।
विना सत्त्वं गृहमपि दुर्निर्वाहमसंशयम् ॥३६७

धन्योऽसि सर्वथा वत्स संयमं यः प्रपत्स्यसे ।
किन्त्वनुज्ञाप्य पितरं दुष्करं व्रतमाशृणु ॥३६८

---

३६५.४. चारकान्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः कुमारः पितरं सादरं प्रत्यपीपदत् ।
तात त्वयाऽभ्यनुज्ञातः प्रपद्ये सिद्धिपद्धतिम् ॥३६९
तत्पुत्रस्य वचः श्रुत्वा तप्ततोमरसोदरम् ।
जयशेखरराजेन्द्रः सगद्गदमदोऽगदत् ॥३७०
पुत्रानाथ इवैकाकी दीक्षितस्त्वं गृहाद्गृहम् ।
यद्भ्रमिष्यसि तेनेदं हन्मे [नु] शतधा स्फुटेत् ॥३७१
तातानाथस्यैककस्य स्यातां किं मूर्ध्नि शृङ्गके ।
जिनधर्मं विनाऽनाथा एकका: सर्व एव हि ॥३७२

तथा हि –

प्राग्दुष्कृतोदये तात पितॄणां पश्यतामपि ।
पुत्रेण वेद्यते दुःखं नानारोगसमुद्भवम् ॥३७३
गर्भवासे प्रियायोगेऽप्रिययोगे जरागमे ।
व्ययेऽन्तराले दुर्गत्यामनाथैको व्यथां सहेत् ॥३७४
तन्नाथो वा सहायो वा कोऽपि धर्मं विना न हि ।
सनाथः ससहायश्च तद्धर्मेण भवाम्यहम् ॥३७५
इत्यस्य वैराग्यसिद्धरसैर्भिन्नमना नृपः ।
तन्मयत्वमिव प्राप्तस्तदुद्गारमिवामुचत् ॥३७६
धन्यस्त्वमेव येनेयं तृष्णावल्ल्युदमूल्यत ।
द्रव्यक्षेत्रादौ च येन प्रतिबन्धो व्यबाध्यत ॥३७७
मातापितृप्रियाभ्रातृस्नेहोऽनर्थनिबन्धनम् ।
त्वया यथावदज्ञायि सुलब्धं जन्म तत् तव ॥३७८
जानीम एव हि वयं विरसं भवनाटकम् ।
महामोहनटेनैव परमेवं विमोहिताः ॥३७९
जननी ते कृतार्थेयं पिता ते जगदुत्तमः ।
जगदुत्तमवैराग्यो यत् पुत्रस्त्वं पवित्रधीः ॥३८०
आवयोरपि संसारवार्धिपोतस्त्वमेव हि ।
तत् त्वरस्वैकतूर्येण प्रव्रजामो वयं समे ॥३८१

---

३७१.३. भ्रमिष्यसि.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततोऽरिकेसरीपुत्रो लघू राज्येऽभ्यषिच्यत ।
राजा राज्ञीकुमारश्च त्वरन्ते स्म व्रतश्रिये ॥३८२

तत्रैवावसरे शरच्छशधरज्योत्स्नासमुच्छालित-
क्षीराम्भोनिधिभृङ्गशृङ्गविलसड्डिण्डीरसध्र्यग्यशः- ।
स्तोमोदारविसारिजादरपटप्रावारिताशाङ्गनः
प्रोदैन्नन्दनकाननेऽद्भुतचतुर्ज्ञानी गुरुर्नन्दनः ॥३८३

उद्यानपालकेनाथ गुरुकल्पद्रुमोदयात् ।
वर्धापितः स्वर्णलक्षं नृपोऽदात् पारितोषिकम् ॥३८४
जयकुञ्जरमारुह्य राजा श्रीजयशेखरः ।
सान्तपुरः ससामन्तारिकेसरिनृपान्वितः ॥३८५
श्रीमान् समरसेनश्चाधिरूढो मङ्गलद्विपम् ।
पञ्चशत्या राट्कुमारैर्वयस्यैः परिवारितः ॥३८६
गत्वा श्रीनन्दनोद्याने त्रिःप्रदक्षिणनाद्भुतम् ।
नत्वा गुरुं परीवारं चासीनौ तौ यथौचिति ॥३८७
ततश्च भगवान् भाद्राम्भोधरध्वनिडम्बरः ।
विस्तारयामास धर्मदेशनां क्लेशनाशिनीम् ॥३८८
तथा हि —
असारः सैष संसारः कारागारसहोदरः ।
मूलस्तम्भौ तस्य परिग्रहारम्भौ सुनिश्चितम् ॥३८९
तयोः पुनः परीहारस्तत्प्रध्वंसनिबन्धनम् ।
ततः परिग्रहारम्भौ भङ्क्त्वा स्थ शिवसद्मनि ॥३९०
राज्ञा विज्ञापयाञ्चक्रे ततः श्रीनन्दनो गुरुः ।
पुत्रः समरसेनोऽयं प्रभो दीक्षां जिघृक्षति ॥३९१
वयं चानुयियासानः पुण्यवन्तममुं सुतम् ।
प्रसद्य सद्यो भगवन् पूर्यतां नः समीहितम् ॥३९२
गुरुरूचे वयमिहैतदर्थं हि समागताः ।
निष्प्रत्यूहं सिद्धमेव भवतां वाञ्छितं ततः ॥३९३
ततो राजा च राज्ञी च कुमाराणां च पञ्चभिः ।
शतैर्वृतः कुमारश्च दीक्षामासुस्तदन्तिके ॥३९४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो ज्ञानक्रियाभ्यासं ते समारेभिरेऽधिकम् ।
चतुर्दशापि पूर्वाब्धीन् कुमारस्त्वपिबन्मुदा ॥३९५

अवधिं मनः पर्यवं च स पुण्यात्मा पराप च ।
राजा राज्ञी चान्तकृतौ सिद्धिसौधमवापतुः ॥३९६

मुनिः समरसेनस्तु गुणरत्नमहाखनिः ।
स्वपदे स्थापयाञ्चक्रे गुरुणा गुरुगौरवात् ॥३९७

श्रीसर्वसङ्घप्रत्यक्षं श्रीसमरसेनसूरये ।
श्रीमान् नन्दनसूरीन्द्रोऽनुशास्तिमददादिति ॥३९८

धन्यस्त्वं येन विज्ञातः संसारगिरिदारकः ।
वज्रवद्दुर्भिदश्चायं महाभाग जिनागमः ॥३९९

इदं चारोपितं यत् ते पदं सत्सम्पदां पदम् ।
अत्युत्तममिदं लोके महासत्त्वनिषेवितम् ॥४००

धन्येभ्यो दीयते तावद्धन्या एवास्य पारगाः ।
गत्वास्य पारं धन्यास्तु पारं गच्छन्ति संसृतेः ॥४०१

भीतं संसारकान्तारात् समर्थस्य विमोचने ।
साधुवृन्दमिदं सर्वं भवतः शरणागतम् ॥४०२

संप्राप्य सगुणं धर्मं निर्मलं पारमेश्वरम् ।
त्राणं संसारभीतानां धन्याः कुर्वन्ति देहिनाम् ॥४०३

तदेते भावरोगार्तास्त्वं च भावभिषग्वरः ।
अतस्त्वयामी सज्जीवा मोचनीयाः प्रयत्नतः ॥४०४

गुरुश्च मोचयत्येता न प्रमत्तो हितोद्यतः ।
बद्धलक्षो दृढं मोक्षे निःस्पृहो भवचारके ॥४०५

कल्पोऽयमिति कृत्वा त्वमीदृशोऽपि प्रणोदितः ।
निजावस्थानरूपं हि चेष्टितव्यं सदा त्वया ॥४०६

युष्माभिरपि नैवैष सुस्थबोहित्थसन्निभः ।
संसारसागरोत्तारी विमोक्तव्यः कदाऽपि न ॥४०७

प्रतिकूलं न कर्तव्यमनुकूलरतैः सदा ।
भाव्यमस्य गृहत्यागो येन वः सफलो भवेत् ॥४०८

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

अन्यथा विश्वबन्धूनामाज्ञालोपः कृतो भवेत् ।
ततो विडम्बना सर्वा भवेदत्र परत्र च ॥४०९

ततः कुलवधून्यायात् कार्ये निर्भर्त्सितैरपि ।
यावज्जीवं न मोक्तव्यं पादमूलममुष्य भोः ॥४१०

ते ज्ञानभाजनं धन्यास्ते सद्दर्शननिर्मलाः ।
ते निष्प्रकम्पचारित्रा ये सदा गुरुसेविनः ॥४११

गुरवोऽनशनं कृत्वाऽन्तकृतः सिद्धिमैयरुः ।
सूरिः समरसेनस्तु विजहार महीतले ॥४१२

सुगुरुसमरसेनः सेनयेवातिमित्या परिवृत ऋषितत्या पालिताज्ञो जगत्या ।
चतसृभिरिह रिद्भिर्दीपिकाभिः समन्तात् किमपि हि जिनदत्ताध्वानमाविश्चकार ॥४१३

इति श्रीनिर्वाणलीलावतीमहाकथेतिवृत्तोद्धारे **लीलावतीसारे** जिनाङ्के
**श्री विजयसेनादि-महापुरुषपञ्चक-व्रतग्रहण-महर्षिदशकस्वर्गमन-जयशासन-जीवश्रीसमरसेनव्रतग्रहणाचार्यपदस्थापन-व्यावर्णनो** नाम द्वादश उत्साहः * ॥

---

* ग्रं. ४३९.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# त्रयोदश उत्साहः

इतश्च श्रीनेमिनाथविहारः पूतभूतलः ।
सुराष्ट्रेत्यस्ति विषयो विषयो न हि विद्विषाम् ॥१
भात्यत्र गिरिनगरं गिरिनारस्य डिम्भवत् ।
यत् प्रखेलत्यस्खलितैरखिलैर्धर्मखेलनैः ॥२
राट् तत्रासीद् वत्सराजो वत्सरा यस्य घस्रवत् ।
निष्कण्टकितविश्वस्य लीलयैवातिचक्रमुः ॥३
जयश्रीर्देव्यभात् तस्य जयश्रीरिव देहिनी ।
बहुभिः प्रार्थनीयाऽपि याऽऽश्रयन्न नरान्तरम् ॥४
तयोः परस्परप्रेमपारावारसमुद्भवम् ।
पिबतोः शर्मपीयूषमत्रैव स्वरवातरत् ॥५
ततो जयश्रियो देव्याः कुक्षौ शुक्तिपुटोपमे ।
मुक्तोपमो रामदेवदेवजीवः समागमत् ॥६
निशान्ते सा सहस्रांशुं तद्देवांशुसहस्रवत् ।
मुखे विशन्तमद्राक्षीज्जैनागारं तदेव च ॥७
प्रहृष्टा भूभुजे सा च स्वप्नमेनमचीकथत् ।
पतिरेको गुरुः स्त्रीणामिति ख्यापयितुं किल ॥८
राजाऽऽचष्ट प्रतिहताशेषतेजस्विमण्डलः ।
आखण्डलः क्ष्मातलस्य भविता देवि तेऽङ्गजः ॥९
विहाराहारव्याहारैः स्थानसंवेशनासनैः ।
हृद्यैश्च दोहदैर्देवी गर्भं पुण्यमिवैधयत् ॥१०
समयेऽसूत सा देवकुमारमिव दारकम् ।
सौभाग्यसुभगाकारं सौभाग्यमिव मूर्तिमत् ॥११
विमलसेन इत्याख्यां द्वादशेऽह्नि पराप सः ।
स्फायन् शशीव सर्वाभिः कलाभिः पर्यपूरि च ॥१२

७.४. जनागार.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कलापात्रीभिरुर्वीशपुत्रीभिर्युवराट् श्रिया ।
सममेव कुमारं तं भूपतिः पर्यणाययत् ॥१३

ततो विभिन्ने भवने ताभिः सममरंस्त सः ।
सूर्योदयास्तसमयाववुधत् पद्मषण्डतः ॥१४

कुमारस्य निजास्थाने सुखासीनस्य चान्यदा ।
सामन्तौ यशोधवलजयसिंहावुपेयतुः ॥१५

नत्वा यथास्वमासीनौ प्रारेभे तैर्मिथः कथा ।
प्रसङ्गाद्विस्मयकरी धातुवादकथाऽभवत् ॥१६

उवाच जयसिंहोऽथ धूर्तैर्विरचितान्यहो ।
धातुवादादिशास्त्राणि सत्यं नात्रैकमक्षरम् ॥१७

कुमारोऽथ न्यषेधत् तं मेत्याशातय प्राङ्नरान् ।
न सिध्यति तदुक्तं च सत्यसाहसवर्जिनः ॥१८

अन्योऽवादीन्मम सत्याद्यभावान्नैव सिध्यति ।
न साध्यति किं नाम सत्यसाहसवान् भवान् ॥१९

आख्यत् कुमारः किं रुष्टः को वक्ति मम सिध्यति ।
ऊचेऽन्यो यदि ते सिध्येत् कूर्चार्धं मुण्डयेर्मम ॥२०

ऊचे कुमारस्त्राताऽहं न कस्यापि विडम्बकः ।
अन्योऽवक् किमहस्तत् स्याद् यत्र त्रास्येऽस्मि केनचित् ॥२१

सरोषं राजसूः प्राह चेच्छक्तः सेवकोऽसि किम् ।
ऊचेऽन्यश्चेन्न सेवामि कः सेवयति मां बलात् ॥२२

तन्मित्र व्यसनं किं ते सेवाकष्टं करोषि यत् ।
यशोधवलोऽथाबुद्ध जज्ञे वैरस्यमेतयोः ॥२३

ततः कुमारं स प्राह तव तात प्रसादतः ।
असमीक्ष्याभिधानेऽपि नाप्रसादपदं वयम् ॥२४

अपि च –

भृत्यस्यागो मृष्यते यो गुणान् वक्ति च य प्रभुः ।
तस्यारिवर्गमथने भृत्याः प्राणान् ददत्यपि ॥२५

२५.४. भृत्या.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जयसिंहोऽवदद्थ यशोधवल मा वद ।
न सोऽस्ति योऽपराधेऽपीक्षिष्यते मम सम्मुखम् ॥२६

किञ्च –

रे चाटुक रे धिग धिक् ते यशोधवल पौरुषम् ।
यद्वा दाता कुमारस्ते देशं तेनासि चाटुकृत् ॥२७
यशोधवल आह स्म मर्यादैव हि जीवितम् ।
तन्मुक्तो मृत एवासि किं शौर्यं मृतमारणे ॥२८
त्वं च मे पितृष्वस्रीयस्तत्तवाग्रे भणामि किम् ।
एवं हि ब्रुवतोऽन्यस्य जिह्वामपहराम्यहम् ॥२९
अथावदज्जयसिंहो यशोधवल चाटुभिः ।
जीवं रक्षन् शूलविषादिभ्यस्तत्रास्यसे कथम् ॥३०
कुमारोऽवग् जयसिंह तवाग्रे ननु के वयम् ।
त्वमेव वीरतिलकस्त्वं तिलकयसि क्षमाम् ॥३१
क्रोधाविष्टोऽन्य ऊचेऽथ कस्त्वं नाम स्तनंधयः ।
ममाग्रे तव तातोऽपि चञ्चावत् पौरुषोज्झितः ॥३२
ततः क्रोधातिरेकेण कुमारोऽज्वलदग्निवत् ।
जाताकूतैः कुमारस्याङ्गरक्षैः स हतोऽसिभिः ॥३३
महाकलकलोऽथाभूत् रोदःकुक्षिभरिस्तदा ।
कुमारेण जयसिंहोऽघातीत्याख्यज्जनोऽभितः ॥३४
अज्ञाततत्त्वाः सामन्ता मन्त्रिणोऽथ पदातयः ।
सर्वेऽप्येकमतीभूय मिमिलुर्दुर्ग्रहा इव ॥३५
ततो राजा वत्सराजोऽचिन्तयन्मतिशेवधिः ।
एते सर्वेऽप्यविश्वस्ताः कुमारे मयि चाभवन् ॥३६
विग्रहे विड्वरं कुर्युः स्वतन्त्रस्य क्षयस्ततः ।
द्रुह्येयुर्वा कुमारायामी मिलेयुरथाऽरिभिः ॥३७

---

३६.२. सेवधिः.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततश्चैवमिह विहिते प्रतियन्त्यमी ।
नान्यथेति विनिश्चित्य कुमारं तद् विबोध्य च ॥३८

कोपाटोपाद्दारुगृहे कुमारं न्यस्य सर्वतः ।
आप्तान् प्राहरिकान् कृत्वा सामन्तादीन् नृपोऽभ्यधात् ॥३९॥ युग्मम्

दुष्टः पुत्रोऽपि निग्राह्यः शिष्टोऽनुग्राह्य इत्यसौ ।
राज्नीतिः कुलदेवीव समाराध्या सदैव नः ॥४०

इयं काष्ठाऽत्र नः प्रत्येतव्यं युष्माभिरञ्जसा ।
राजेत्याधाद् राज्यसौस्थ्यमहो मतिमतां मतिः ॥४१

तं कुमारमथ ज्ञानाज्ज्ञात्वा तादृग् विपद्गतम् ।
दध्यौ समरसेनोऽमुष्य बोधक्षणोऽधुना ॥४२

सोऽथास्मरत् शूरदेवमायातं तं जगाद च ।
कुमारोऽयं मदादेशयोग्यः शीघ्रं विधीयताम् ॥४३

तथेत्यङ्गीकृत्य देवस्तत्रागात् प्रत्युषःक्षणे ।
उद्दिश्य च कुमारं तं पपाठेति स्फुटाक्षरम् ॥४४

संसारमेतं धिग् धिग् भो यत्र मन्तु विनैव हि ।
प्रियोऽपि विप्रियं कुर्यात् पिताऽपि प्रतिकूलति ॥४५

जायेत राजाऽपि रङ्कः पद्गः स्याद् गजगाम्यपि ।
आज्ञादाय्यपि चादेश्यो गुप्तो भोग्यपि संवसेत् ॥४६

तद् भो बुध्यस्व बुध्यस्व न कोऽपि स्वोऽत्र तत्त्वतः ।
विमलसेन कुमार मा रज्य विषयाशुचौ ॥४७

पठित्वेति सुरः सोऽगात् कुमारस्त्वित्यचिन्तयत् ।
वैराग्यकृन्मां प्रतीदं पेठे केन सुभाषितम् ॥४८

द्वितीयेऽह्नि पुनर्देवो भृशं वैराग्यकृज्जगौ ।
यथागतं गतश्चायं कुमारः पृष्टवान् जनान् ॥४९

भो भोः केनाद्य पठितं जगदुः पारिपार्श्विकाः ।
न विद्मः कोऽप्यदृश्योऽयं केवलं श्रूयते ध्वनिः ॥५०

पुनस्तृतीयेऽह्नि सुरोऽपाठीद् वैराग्यकृद् बहु ।
किं बहूक्तेर्न संसारे सुखं वह्नौ सरोजवत् ॥५१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत् कुमार मुञ्च मुञ्च विषयाशाविडम्बनाम् ।
जिनधर्मे समुद्यच्छ सामग्री दुर्लभा पुनः ॥५२
ततः श्रीविमलसेनस्तमूचे भद्र कोऽसि भोः ।
सुरोऽवोचत् प्रस्मृतोऽस्मि भवतश्चिरसंस्तुतः ॥५३
कौशाम्ब्यां श्रीसुधर्मान्ते प्राव्रजाम वयं दश ।
सौधर्मे द्युसदोऽभूमोऽकार्ष्म बोधाय संश्रवम् ॥५४
स्वर्गात् त्वं रामदेवर्षिजीवोऽत्राभूर्नरेन्द्रसूः ।
तस्य ते बोधयेऽस्म्यागां तद् बुध्यस्व महामते ॥५५
इति श्रुत्वेहादि कुर्वन् जातिस्मरणमुज्ज्वलम्* ।
लेभे श्रीविमलसेनस्तृतीयमिव लोचनम् ॥५६
ततश्च प्राप्तसंवादः कुमारस्तं तुरं जगौ ।
अहो ते सत्यसंधत्वमहो सौजन्यमद्भुतम् ॥५७
निस्तारितो भवाम्भोधेरगाधादप्यहं त्वया ।
तदादिशाधुना कार्यं यद् विधातुं ममोचितम् ॥५८
देवोऽवदत् प्रव्रजाशु श्रीजयशासनात्मनः ।
पार्श्वे समरसेनस्य बोधितस्य मयैव हि ॥५९
स च प्रभुश्चतुर्ज्ञानी साधुसङ्घपरिष्कृतः ।
तव प्रव्राजनकृते स्वयमेव समेष्यति ॥६०
कारागारोदरस्थोऽहं दीक्षिष्येऽस्मि कथं सखे ।
ऊचे देवो मा विषीद यत् ते भवति पश्य तत् ॥६१
ततः पुरोपरि व्योम्नि विचक्रेऽसौ महाशिलाम् ।
अति प्रचण्डमनिलं सुघनं घनवार्दलम् ॥६२
व्योमस्थितोऽवदद्देवो भो भोः सामन्तमन्त्रिणः ।
दुराचारास्तथा राजन् कश्चिच्छरणमिच्छत ॥६३
देवो वा दानवो वा यः पाति युष्मानितो भयात् ।
मा ब्रूत यन्न भणितमेष वश्चूर्णयाम्यहम् ॥६४

* **47b** and **48a** are erroneously repeated after **56b** in the MS.

भवद्भिर्यत् कुमारोऽसौ निर्मन्तुश्चारके धृतः ।
तदसौ मान्यतां स्वामी क्रियतां येन वः शिवम् ॥६५

ततो राजा च देवी च प्रमोदाद्वैतमूहतुः ।
सामन्ताद्याश्च बिभियुर्मेनिरे च सुरोदितम् ॥६६

अथ श्रीविमलसेनो राज्ञा राज्येऽभ्यषिच्यत ।
सर्वैश्च मानयाञ्चक्रे चक्रे वर्धापनं महत् ॥६७

क्षणे चात्रोद्यानपालः स्वभालघटिताञ्जलिः ।
हर्षप्रकर्षादुत्तालः श्रीभूपालं व्यजिज्ञपत् ॥६८

देवाद्य नन्दनोद्याने नन्दनोद्यानतर्जने ।
चतुर्ज्ञानी श्रीसमरसेनसूरिरुपागमत् ॥६९

सर्वैरूचेऽभवत् कौतूहले प्रतिकुतूहलम् ।
कुमारराज्याभिषेके यज्जज्ञे सुगुरूदयः ॥७०

श्रीवत्सराजो विमलसेनादितनयैर्वृतः ।
सामन्तमन्त्रिपौरैश्च सर्वैः सह परिच्छदैः ॥७१

चतुरङ्गवरूथिन्या किञ्चिन्न्यञ्चितशेषया ।
नन्तुं ययौ गुरुतीर्थं नन्दनोद्यानमण्डनम् ॥७२

प्रणम्य विधिनाऽऽसीनं राजानं सपरिच्छदम् ।
श्रीगुरुर्भोजयामास व्याख्यारसवतीमिति ॥७३

आजन्मोपात्तसर्वंकषविषमकषायाटवीवह्निभीमे
दुर्दान्ताश्रान्तमत्तेन्द्रियकरटिघटाभग्नसाधिष्ठषण्डे ।
रागप्रद्वेषमोहप्रकटचरटकर्लुण्ट्यमानाखिलस्वे
संसारारण्यदेशे न खलु निवसतां शर्मणोऽभ्यस्तिरस्ति ॥७४

अभ्येतुं तदिमं सर्वदर्शिसर्वज्ञदर्शितम् ।
धर्मवर्त्म श्रयध्वं भो लभध्वं पदमव्ययम् ॥७५

श्रीदेशनारसवतीमेतामास्वाद्य जज्ञिरे ।
प्रशान्ततृष्णा बहुशोऽथ वृष्टिं चातका इव ॥७६

---

७२.१. वरुथिन्या.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः कुमारः संसारकान्तारोत्तारहेतवे ।
गुरून् विज्ञापयामास सततासन्नसेविवत् ॥७७

गुरुरूचे धीर वयमुपेमैतत्कृते स्वयम् ।
यत् त्वं नश्चिरसंसृष्टः प्रसादो भगवन् महान् ॥७८

ततश्च –

सम्बोध्य पितरौ भक्तिनानायुक्त्युद्गिरा गिरा ।
कारयित्वा तीर्थमहादिकं विजयसेनवत् ॥७९

नृपतिमन्त्रिमहेभ्यसुसार्थपप्रभृतिपुत्रशतैः सह पञ्चभिः ।
विमलसेनकुमार उपैद् व्रतं समरसेनगुरोः पदपद्मतः ॥८०॥ युग्मम्

पुरि पुरि जिनचन्द्रश्रीविलासं दधानः
सुगुरुसमरसेनोऽन्यत्र चक्रे विहारम् ।
सुमुनिविमलसेनेनापि तत्पादपद्मे
मधुमधुकरलीला निर्ममे निर्ममेण ॥८१

इति श्रीनिर्वाणलीलावतीमहाकथेतिवृत्तोद्धारे **लीलावतीसारे** जिनाङ्के **रामदेव महर्षिजीवश्रीविमलसेनकुमारप्रतिबोध-व्यावर्णनो** नाम त्रयोदश उत्साहः* ॥

---

* ग्रं. ८६.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# चतुर्दश उत्साहः

इतश्च –

क्षोणीललाटदेशे नु लाटदेशोऽस्ति विश्रुतम् ।
मणीतिलकसंकाशं भृगुकच्छं महापुरम् ॥१

राजाऽत्र कुसुमकेतुर्मानकेतुरिवाऽपरः ।
जगज्जैत्रशरो रेजे भवसर्वंकषः परम् ॥२

मङ्गल्या विनयोज्ज्वाला मिथ्यात्वविषनाशिनी ।
अदाह्या गुर्व्यकुत्स्या च श्रीशीलस्य रसायनम् ॥३

प्रदक्षिणावर्तरम्येत्यष्टस्पष्टगुणोल्बणा ।
स्थाने श्रीकनकलता नाम्ना जानेऽस्य देव्यभूत् ॥४॥ युग्मम्

भुञ्जानयोस्तयोर्भोगान् यथावसरमद्भुतान् ।
सुलक्षणमहासाधुजीवः स्वर्गात् ततश्च्युतः ॥५

वपुष्मदानन्दपिण्डसमपिण्डवपुर्लतः ।
कुलप्रदीपः पुत्रोऽभून्नाम्ना कुसुमशेखरः ॥६॥ युग्मम्

सोऽधीती सर्वशास्त्रेषु सर्वशस्त्रेषु कौशली ।
पतिः पाणिगृहीतीनां यौवराज्यश्रियोऽप्यभूत् ॥७

अन्यदोद्यानपालेन दत्तनाम्ना स भूपभूः ।
श्रीवसन्तावतारेणावर्धाप्यत कृताञ्जलि ॥८

सर्वाशाचक्रविचरन्मलयानिलशासनः ।
प्रगीतो मत्तमधुपैर्वाद्यत्पिकजयानकः ॥९

प्रतिद्रुमूर्धविस्मेरपुष्पशृङ्गारभासुरः ।
वसन्तराजो विलसत्युद्याने देवनन्दने ॥१०॥ युग्मम्

हस्त्यश्वरथपादातान्तःपुरेण वृतस्ततः ।
रन्तुं श्रीनन्दनोद्याने ययौ कुसुमशेखरः ॥११

---

७.१. सर्वा°.

इतश्चातीवरम्यात्वात् तस्योद्यानस्य सर्वतः ।
स्वैरचारितया देवजातेः क्रीडितुमुत्त्वरम् ॥१२

किन्नरद्वन्द्वमत्रागान्मिथःप्रेमोर्मिवर्मितम् ।
रम्ये च कदलीगेहे रहसि प्रविवेश च ॥१३॥ युग्मम्

तत्रैव रम्भाधाम्न्यागात् कुमारोऽपि रिरंसया ।
ज्ञात्वा च मिथुनं मध्ये कुमारोऽपासरद् द्रुतम् ॥१४

तद्‌द्वन्द्वनिःसारणाय नरं प्रैषीन्नरेन्द्रसूः ।
तद्‌द्वन्द्वं तेन पुंसोचे रे द्रुतं निःसरामुतः ॥१५

तया खरगिरा रुष्टो देवोऽवग्‌दर्शयामि ते ।
फलं दुर्विनयस्यास्य रे तिष्ठात्रैव दुर्मुख ॥१६

तद्वचो राजसूः श्रुत्वा पुंसाऽन्येन निषेव्य तम् ।
स्वागतोक्तिपूर्वमेतद् द्वन्द्वमेवमबीभणत् ॥१७

न कोपितव्यं भवद्‌भिः किञ्चित् प्रष्टव्यमस्ति मे ।
तदायात द्रोस्तलेऽस्येत्युक्ते पुंसा सगौरवम् ॥१८

सुरो जगाद न वयं कुमारादेशगोचाराः ।
चेत् प्रष्टव्यं किञ्चिदस्ति किं नात्रागत्य पृच्छति ॥१९

पुंसोचे तत् कुमारस्य तत्पार्श्वेऽगात् स चैककः ।
अभ्युत्तस्थे स युग्मेन प्रेम्णा स्वागतवादिना ॥२०

दत्तासनोऽथ किन्नर्याऽऽसीनोऽवादीन् नृपाङ्गजः ।
भवद्‌भ्यामन्वगृह्येऽहं यदुद्यानमलङ्कृतम् ॥२१

किं चानियोज्ययोरेव नियोगं युवयोर्ददे ।
नित्यं युयाभ्यामुद्यानमिदं पाव्यं निजक्रमैः ॥२२

स्यातां पवित्रे मन्नेत्र यद्युष्मद्‌दर्शनामृतैः ।
महतां दर्शनं तीर्थदर्शनाधिकमुच्यते ॥२३

ताभ्यामथोचे धन्ये नो नेत्रे श्रोत्रे च सत्तम ।
पपे यकाभ्यां त्वद्रूपं त्वद्वचश्च सुधोपमम् ॥२४

कौ युवामिति तत् पृष्टे तौ ब्रूतः किन्नराविति ।

---

१६.४. दुर्मुखः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं यैरत्रोपमीयन्ते गायनाः साधु वेत्सि भोः ॥२५
युष्मद्गीते कौतुकं गायतं क्षणमत्र तत् ।
ताभ्यां च गातुमारेभे चमच्चक्रे च राजसूः ॥२६
किन्नरोऽवक् कुमार त्वं वाद्यं किञ्चन वादय ।
वाद्यतालानुसारेण सुषमां गीतमेति यत् ॥२७
कुमारोऽवादयत् पटातोद्यं मिथुनकं तु तत् ।
जगौ विषमतालेन कुमारोऽवीवदत् तथा ॥२८
गीते विषमतालेऽपि न पुनः क्वचनास्खलत् ।
अथोचतुर्विस्मितौ तौ गाय त्वमपि राट्सुत ॥२९
जेगीयमानः कुमारः किन्नरावत्यशेत तौ ।
यथाप्रश्नं सर्वकलास्वेष तावत्यरञ्जयत् ॥३०
गुणैः कलाभीरूपेण विनयेन नयेन च ।
तस्य तुष्टं मयुयुगं वरं वृण्वित्यभाषत ॥३१
स्मृतावागन्तव्यमिति कुमारोक्तं प्रपद्य तौ ।
किन्नरौ स्वास्पदमितौ रन्त्वोच्चै राजसूरपि ॥३२
इतश्च पयसादेशे श्रीमज्जयपुरं पुरम् ।
जयश्रीवल्लभो रत्नवल्लभस्तत्र भूपतिः ॥३३
लीलावतीशिरोरत्नं रत्नचूलाऽस्य देव्यभूत ।
यां वीक्ष्येव रमागौर्यौ पत्युरङ्गं न मुञ्चतः ॥३४
तयोः प्राक्पुण्यसंसरस्फुरत्सौन्दर्यसुन्दरी ।
श्रीसुरसुन्दरीश्लाघ्या पुत्र्यभूत सुरसुन्दरी ॥३५

चञ्चच्चम्पकहेमकेतकनभोगङ्गासरोजश्रियां
ज्योत्स्नामौक्तिकचन्द्रकान्तमहसां सारं शिरीषश्रियाम् ।
यद्यादाय विधिः प्रमृज्य सुधया काञ्चित् सृजेत् सुन्दरीं
तस्या अप्युपदास्पदं प्रतिपदं मन्ये यदंह्रिश्रियः ॥ ३६

इतश्च —

वराटानामदेशोऽस्ति तत्र सिंहपुरं पुरम् ।
सिंहोऽरिदन्तिषु नभोवाहनोऽत्र महीपतिः ॥३७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य निःसामान्यरूपकमला कमलावती ।
अन्तःपुरमिवात्यन्तं विभूषयति हृत्पुरम् ॥३८
सा चान्यदा निशाशेषे स्वकीयोत्सङ्गशृङ्गगम् ।
मृगपुङ्गवमद्राक्षीत् साक्षीभूतं सुतश्रियः ॥३९
ततः पुरन्दरमुनिर्जीवो जीवातुरोजसाम् ।
तस्याः कुक्षौ रत्नखन्यामाद्यस्वर्गादवातरत् ॥४०
जन्मोत्सवो नामधेयोत्सवश्च भुवनोत्सवौ ।
सुरन्धर इति नाम चास्य कर्णोत्सवोऽभवत् ॥४१
कलाचार्योऽध्यापयंस्तं निष्प्रतिप्रतिभोदयम् ।
अध्यापकाध्याप्यभावविपर्ययममन्यत ॥४२
यौवराज्ये तथोदारदारराज्येऽभ्यषिच्य तम् ।
पृथक् प्रासादे स्वमूर्तप्रसादे नु न्यधान्नृपः ॥४३
अथ प्रत्यन्तिकाः केचिन्नभोवाहनभूभुजः ।
गिरिदुर्गबलात् सिंहा इव देशमुपाद्रवन् ॥४४
तद्देशवासिभिः सिंहद्वारे भूपस्य पुरस्कृतम् ।
कृतं च राजा दुर्धर्षामर्षादास्थानवीक्षितम् ॥४५
ततः सुरन्धरो राजः पादौ नत्वा व्यजिज्ञपत् ।
क्व देवः क्व च ते क्षुद्राः क्व मृगेन्द्रो मृगाः क्व च ॥४६
देवपादा ददत्वाज्ञां ममैवाज्ञानुजीविनः ।
तच्छिरः कमलैर्येनाभ्यर्चामि स्वामिनः पदौ ॥४७
राजा ततो व्याजहार वत्सास्मज्जीवितैरपि ।
सुचिरं नन्द जैवातृकतामासेदिवान् भुवि ॥४८
अस्मदीयो दण्ड एव दण्डं निर्माय विद्विषाम् ।
तदीयसर्वस्वमपि क्षणाद् दण्डं ग्रहीष्यति ॥४९
मन्त्र्यूचे विमलमतिर्विचारो नैष सुन्दरः ।
प्रतिहस्ता हि कार्याणि नाशयन्ति कुमित्रवत् ॥५०

---

४१.३. सुरंध.



Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

यतः –

दण्डाधिपाः कूटहृदो लोभात् स्वाम्यर्थनाशकाः ।
रिपुलञ्चामुपजीव्य दीव्यन्तीशक्रियालसाः ॥५१

कुमारस्य प्रयाणं तु सर्वथा न खलूचितम् ।
राज्यसारं कुमारोऽयं जीवताच्चन्द्रकालिकम् ॥५२

स्वामिनः स्वयमुद्योगो देव सम्प्रति साम्प्रतम् ।
सुस्वामिनः पुरः सर्वे यतः स्वाम्यर्थकारिणः ॥५३

राजाऽऽख्यद् युक्तमेवैतत् पुत्रस्तूचेऽवधार्यताम् ।
स्वपुत्रे स्वप्रतापस्यावतारं पश्यतु प्रभुः ॥५४

कुमारवाक्यानुरोधादन्वमन्यत तन्नृपः ।
उभयोरनुरोधात् तु बहूवमन्यत मन्त्र्यपि ॥५५

ततोऽनुरक्ताङ्गरक्षसामन्तामात्यवर्मितः ।
चतुरङ्गचमूभारैः शेषाशेषकणारुजम् ॥५६

प्रतिग्रामं प्रतिपुरं सौस्थ्यमुत्पादयन्नयम् ।
सुरन्धरकुमारः स्राक् प्रतस्थे स्थेमपर्वतः ॥५७॥ युग्मम्

तथा चम्वाऽतिभूयस्या प्रयाणैरविलम्बितैः ।
श्रुत्वा यान्तं तं कुमारं द्विषो दुर्गमशिश्रियन् ॥५८

कुमारस्तद्दुर्गसंनिधाने स्थाने वरीयसि ।
द्विपद्वीरदुर्निवारं स्कन्धावारं न्यवीविशत् ॥५९

तैः प्रत्यनीकैः स्वस्वामी हृतो जयपुरेश्वरः ।
श्रीरत्नवल्लभो भूपः समायासीदलक्षितः ॥६०

कुमारोऽल्पपरीवारः क्रीडया मृगयां गतः ।
तेन दृष्टः परिज्ञातो जगृहे हेलयैव हि ॥६१

पुण्योदयात् तेन पुत्रदर्शं दृष्टः सुरन्धरः ।
सन्धाय प्रत्यनीकैश्च स्वामिदर्शमदृश्यत ॥६२

स च राजा कुमाराय मेने तां सुरसुन्दरीम् ।
ततो जामातरममुं पुत्राधिकममंस्त च ॥६३

---

५१.२. लोभात्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतश्च सा जयपुरे राट्पुत्री सुरसुन्दरी ।
सखीदासीकञ्चुकिभिर्वृता सुभटवेष्टिता ॥६४

ययौ क्रीडितुमुद्यानमुद्यानस्येव देवता ।
सखीभि ऋतुदेवीभिरिव सार्धमरंस्त च ॥६५

तत्र चाम्रे श्रीकुसुमशेखरस्यातिसंस्तुतम् ।
स्वैरचारि क्रीडितुं तत् किन्नरद्वन्द्वमागमत् ॥६६

रम्भागृहे च कुसुमशेखरस्य गुणान् जगौ ।
तच्च गीतं कुरङ्गीव पपौ सा सुरसुन्दरी ॥६७

जगाम च तयोः पार्श्वे तौ पप्रच्छ च कौ युवाम् ।
क एष सुभगापीडो गीतः कुसुमशेखरः ॥६८

स किं भवति भवतोः किञ्च वां दत्तवानसौ ।
तावूचतुः सुरावावां नरः कुसुमशेखरः ॥६९

भृगुकच्छे पुष्पकेतुस्वर्णलतातनूद्भवः ।
तन्न नौ किञ्चिद् भवतीच्छावः किञ्चिन्न चामुतः ॥७०

किन्तु तस्य गुणग्रामनिकामाकृष्टमानसौ ।
गायावस्तं प्रतिपदं ध्यायावश्च प्रतिक्षणम् ॥७१

सुरसुन्दर्यथाभूत् सोत्सुका तत्सङ्गमोत्सवे ।
तेनैव हृतचित्तेव शून्यशून्याऽभवत् क्षणात् ॥७२

नीता गृहं सखीभिः सा ज्ञातवृत्तान्तयाऽम्बया ।
न जीवत्येषाऽन्यथेति राज्ञि यात्रां गतेऽपि च ॥७३

महद्धर्या प्रैषि कुसुमशेखराय स्वयंवरा ।
परिणिन्ये च महतो विच्छर्दाद्भृगुपत्तने ॥७४॥ युग्मम्

स च प्रत्यन्तिकपुरे स्थितः श्रीरत्नवल्लभः ।
सुरंधरमुवाचैहि तामुद्वह ममात्मजाम् ॥७५

कुमारोऽप्याह स्म पित्रनुज्ञयेदं करोम्यहम् ।
तत्सिद्धयै स नृपः सिंहपुरे प्रैषीन्नरांस्ततः ॥७६

---

६४.४. वृता.　　　६५.१. कीडितुं.

आगतास्तेऽभ्यधुर्देव नभोवाहनभूपतिः ।
भवदुक्तं बहु मेने संदिदेश च किञ्चन ॥७७

युष्मत्कृतकुमारावग्रहश्रवणशल्यिता ।
कुमारादर्शने देवी न भुङ्क्ते कमलावती ॥७८

तत् कुमारो गृहमेतु नत्वा च पितरौ द्रुतम् ।
समेष्यति भवत्पार्श्वे तन्मेने रत्नवल्लभः ॥७९

सम्भाविताधिककार्यसिद्ध्या प्रमदमेदुरौ ।
प्राप्तौ स्वं स्वं पुरं रत्नवल्लभश्रीसुरंधरौ ॥८०

अथ भूमीभुजा ज्ञातं यथा देव्या व्यसृज्यत ।
सुरसुन्दरी कुसुमशेखराय स्वयंवरा ॥८१

हाहा दुष्टुकृतं देव्या कृतस्य च कृतिर्न हि ।
प्रखिद्येति चिरं रत्नवल्लभो मौनमाश्रयत् ॥८२

सुरन्धरकुमारे च स्वपुरं द्रुतमीयुषि ।
आनन्दसागरः पित्रोरभ्रंलिहलर्यभूत् ॥८३

अन्यदाऽऽदिष्टः पितृभ्यामुद्वोढुं सुरसुन्दरीम् ।
सुरन्धरश्चारुचम्वाऽचालीज्जयपुरं प्रति ॥८४

अथाऽग्रतः सिंहापुरान्नभोवाहनराट्प्रियः ।
सुरन्धरकुमारस्य मित्रं भुवनवत्सलः ॥८५

दाता प्रियंवदो भोगी धनी नाम्ना धनावहः ।
अघोष्य (?) गुरुसार्थेनाचलज्जयपुरं प्रति ॥८६॥ युग्मम्

स च प्रत्यन्तचरटैर्ग्रहीतुमुपचक्रमे ।
ग्रहीतुं शक्यते नैव योद्धबाहुल्यतः परम् ॥८७

सौप्तिकं ते व्यधुः सार्थे योधा नष्टाः शृगालवत् ।
धनावहोऽसिना युध्यमानो जर्जरितोऽसिभिः ॥८८

चरटैर्जगृहे सोऽथ सार्थः सर्वो व्यलुण्टयत ।
धनावहं ससर्वस्वं गृहीत्वा चरटा ययुः ॥८९

---

८२.१. दुष्ट्०.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्सार्थोदन्तमज्ञासीत् प्राप्तस्तत्र सुरन्धरः ।
तत्रावास्य ततस्तेन चरटा भाणिता इति ॥९०

धनावहं सर्सवस्वं द्रुतमेव विमुञ्चत ।
दक्षिणेशपुरे यद्वा गृह्णीतावक्रयाश्रयम् ॥९१

विचार्य बहुशस्तेऽथ प्रधाननरपाणिना ।
धनावहं कुमाराय प्रददुर्व्यस्तवस्तुवत् ॥९२

सादरं स कुमारेणोपगूह्य स्थापितो रहः ।
आदिष्टा गौरवाद् वैद्याः प्रगुणीकुरुताश्वमुम् ॥९३

चरटानां तत्प्रधानैः कुमारेणेत्यभाण्यत ।
धनावहस्य सर्वस्वं दत्त मोक्षो न वोऽन्यथा ॥९४

यूयं मित्रार्पणान्मित्रं ममेत्येभ्योऽपसर्पथ ।
अन्येषां जीवितं नैव सहाम्यस्मि कृतान्तवत् ॥९५

चरटानां च तैः पुंभिः कुमारोक्ते निवेदिते ।
सार्थसर्वस्वदानात् तैः कुमारः प्रभुरादधे ॥९६

अथासाध्यतया वैद्यैः व्यमुच्यत धनावहः ।
कुमारसुहृदाऽनूचे जिनदासेन धीमता ॥९७

बाढं परिचितान्मृत्योर्मा भैषीर्धीरशेखर ।
एतस्य जित्वरं शस्त्रं हृदावह धनावह ॥९८

तच्चार्हन् देव एतस्य भाषितं ब्रह्मवान् गुरुः ।
प्रमाणमिति सम्यक्त्वं पञ्चाणुव्रतधारणम् ॥९९

परमेष्ठिनमस्कारोऽनशनं क्षमणं तथा ।
इति पण्डितमरणं सर्वमृत्युभयापहम् ॥१००॥ युग्मम्

सर्वमन्यद् विमुच्येदं धनावह दृढीकुरु ।
येनात्रापि परत्रापि वृण्वते त्वां शिवश्रियः ॥१०१

तेनाप्यूरीकृतं भावात् सर्वमेतत् समाधिना ।
विपद्य स च सौधर्मे जज्ञे वैमानिकः सुरः ॥१०२

सुरन्धरकुमारेण प्रान्ते संदिदिशे त्वसो ।
स्मृतः सन्निदधीथा मे तत् तेनाऽपि प्रतिश्रुतम् ॥१०३

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

तदौर्ध्वदेहिकं कृत्वा क्रमेणाथ सुरन्धरः ।
क्षेमाज्जयपुरं प्राप प्राविक्षच्च महोत्सवैः ॥१०४

श्रीरत्नवल्लभेनाऽथ हृत्वाऽमात्या इतीरिताः ।
मया यात्रां गतेनास्य मनिता सुरसुन्दरी ॥१०५

सा च मात्रा भृगुपुरे प्रहिता प्राक् स्वयंवरा ।
प्राप्तकालं तदिह किं विचार्य ब्रूत मन्त्रिणः ॥१०६

श्रीबुद्धिसागरोऽवोचद् देवेयं प्रियदर्शना ।
रत्नमालाकुक्षिरत्नमेतस्मै दीयतामिति ॥१०७

न पुनर्ज्ञाप्यतेऽमुष्य नैवेयं सुरसुन्दरी ।
तदभ्युपेत्य राट् चक्रे विवाहोत्सवमेतयोः ॥१०८

लीलागृहे कुमारोऽस्थात् प्रियदर्शनया सह ।
तत्सखीभिस्तदुचितपरिहासं व्यधत्त च ॥१०९

प्रियां चाऽऽख्यत् किं न सख्यः प्रेष्यन्ते सुरसुन्दरि ।
ततः सतालं सखीभिः स्मितं क्व सुरसुन्दरी ॥११०

देव प्रियदर्शनाऽसौ नैवेयं सुरसुन्दरी ।
ततः सुरन्धरो दध्यावसम्बद्धमिदं किमु ॥१११

धात्र्यूचेऽस्या नाम चक्रे जनन्या प्रियदर्शना ।
सुरसुन्दरीति पित्राऽमूर्जानन्त्येकमेव हि ॥११२

तन्नात्र विस्मयः कार्यस्ततो रेमे मुदा तया ।
तया च कमलिन्येव वासितं तस्य मानसम् ॥११३

धात्र्याऽथ नामवृत्तान्ते कथिते राट् सच्चकार ताम् ।
सत्कृत्य पुत्र्या सहामुं स्वं पुरं प्राहिणोत् नृपः ॥११४

पदे पदे प्रीण्यमानः सुजनैः शकुनैरिव ।
स च सिंहपुरं प्राप प्राविक्षच्च महोत्सवैः ॥११५

प्रियदर्शनया सार्धं रमयेव रमापतिः ।
सौधे दुग्धसिन्धुबन्धौ स व्यलासीद्दिवानिशम् ॥११३

वातायनस्थितोऽन्येद्युस्तया सह सुरन्धरः ।
खरारूढं चौरमेकं नीयमानं व्यलोकयत् ॥११७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः सखेदमूचे तां पश्येतः सुरसुन्दरि ।
इहैव स्वकृतकर्म विपाकमयमश्नुते ॥११८

प्रियदर्शना —

शतखण्डं ह्यन इव स्याद्गोत्रस्खलितेन हृत् ।
योषितामिति यन्त्रेव भर्त्रेदं वर्ज्यमादरात् ॥११९

सुरन्धर —

यदि ब्रूवीत दयितां दयितान्तरनामतः ।
दयितः स्यात् तदा गोत्रस्खलनं न स्वनामतः ॥१२०

प्रियदर्शना —

स्वनामवन्मम नाम चिरं घोषितमप्यहो ।
ममाभाग्येन केनेदमकस्मात् प्रिय विस्मृतम् ॥१२१
प्रिय प्रियदर्शनाहं नैवाहं सुरसुन्दरी ।
तदन्यनाम्ना मां जल्पन् गोत्रस्खलितमापिथ ॥१२२

सुरन्धर —

यद्येवं तव पित्रा किं कृताऽऽख्या सुरसुन्दरी ।
पितृक्लृप्ताख्यया वक्तुर्न मन्तुर्मे मनागपि ॥१२३

प्रियदर्शना —

या सुरसुन्दरी नाम्ना साऽम्बया भृगुपत्तने ।
पुरैव प्रैषि कुसुमशेखराय स्वयंवरा ॥१२४
सुरन्धरस्ततो ××××× नाऽस्मि वञ्चितः ।
यदि वा किं तयैषाऽपि प्राणेभ्योऽपि प्रिया मम ॥१२५

सुरन्धर —

द्विधा प्रियदर्शनाऽसि तत् त्वं मे सुरसुन्दरी ।
सुरसुन्दर्याः शिरसि किं विषाणं विजृम्भते ॥१२६

प्रियदर्शना —

महाप्रसादोऽयमद्य यद्यारोपो यथातथः ।
परं न काञ्चनारं स्यादारोपात् चम्पकं कचित् ॥१२७

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

लावण्यपुण्यास्तरुण्यः सन्तु तत्त्वान्तरं तु सा ।
द्राक्षाद्याः स्वादवः सन्ति मुधैवान्धः सुधान्धसाम् ॥१२८
कुमारोऽथाभजन्मौनममर्षात् त्वित्यचिन्तयत् ।
सुरन्धरस्तदाऽहं यद्यादास्ये सुरसुन्दरी ॥१२९
धनावहमथोद्दिश्य ब्रह्मणा सोऽष्टमं व्यधात् ।
धनावहसुरोऽथागात् किं करोमीति चाब्रवीत् ॥१३०
सुरन्धरोऽवक् कुसुमशेखरात् सुरसुन्दरीम् ।
ममार्पय सुरोऽवादीत् परदारकथाऽपि धिक् ॥१३१
कुमारोऽथाह सा नैव परदारा ममैव सा ।
यतो पित्रा ददे सा मे मात्रैव कृतमन्यथा ॥१३२
या येनोढा तस्य सेति सुरेणोक्ते च सोऽवदत् ।
न कर्ताऽसि मदिष्टं चेत् तद् वृथा किमिहागमः ॥१३३
यद्येष तव निर्बन्धस्तदाऽऽनीतैव सा सखे ।
इत्युदित्वा सत्यसन्धः सुरो दृश्येतरोऽभवत् ॥१३४
स चागमद् भृगुपुरं तत्रापि नृपमन्दिरम् ।
तत्रापि च श्रीकुसुमशेखरस्य निकेतनम् ॥१३५
तत्रापि चन्द्रशालायां शय्यायां स व्यलोकयत् ।
पत्या सह रतिक्लान्तां विश्रान्तां सुरसुन्दरीम् ॥१३६
इमामीदृग्विधावस्थां पत्या सह वियोजयन् ।
निष्ठ्यानामपि चास्पृश्यो भविष्याम्यस्मि पातकी ॥१३७
यद्वा भवतु यत्किञ्चित् कार्यमेवोररीकृतम् ।
प्राणान् प्राणाधिकं रामं ह्यस्मै दशरथोऽमुचत् ॥१३८
विचिन्त्येति सुरः सैष जहार सुरसुन्दरीम् ।
सद्यः सा च जजागार पूच्चकार च निर्भरम् ॥१३९
आर्यपुत्रार्यपुत्रास्मि ह्रियै केनापि पाप्मना ।
धाव धाव रक्ष रक्ष क्षत्रियोत्तम मां प्रिय ॥१४०
तस्याः करुणशब्देन विबुद्धो नृपनन्दनः ।
धीरा भवैष रक्षामीत्याख्यन्नसिसुदुःस्थितः ॥१४१

---

१३०.१. मियोदिश्य.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अङ्गरक्षसखोऽधावत् तस्याः शब्दानुसारतः ।
विद्युदुत्क्षिप्तकरणादपि प्राकारमत्यगात् ॥१४२

क रे यासि क्व रे यासि प्रियां हृत्वा ममासुर ।
मा भैषीस्त्वं प्रिये त्वां हि वेगात् प्रत्याहराम्यहम् ॥१४३

इति ब्रुवन्नेककोऽपि दधाव(?) वायुवेगतः ।
शालरुद्धैस्त्वङ्गरक्षैश्चिखिदे पूदकारि च ॥१४४

अन्यायजनपूत्कारैः पूर्णा तत् पूत्कृतिः सरित् ।
भृगुकच्छं कच्छमिव प्लावयामास सर्वतः ॥१४५

तत्तरङ्गैरभिहतः प्रबुद्धः पुष्पकेतुराट् ।
विज्ञातपुत्रवृत्तान्तः सद्यः सर्वचमूवृतः ॥१४६

अङ्गरक्षादिष्टदिशा कुमारान्वेषणव्रतीः ।
प्रहिण्वन्नभितः सैन्यांश्चचालाब्धिप्रवाहवत् ॥१४७॥ युग्मम्

प्रत्युद्यानं प्रतिसरः प्रत्यद्रि प्रतिवर्त्म च ।
कुमारमन्विष्य नृपस्तद्वार्तामप्यवाप न ॥१४८

त्र्यहं पर्यट्य कुसुमकेतुरेतुमना नहि ।
पुरं मन्त्रिगिरैवागादगतसर्वस्वमान्यसौ ॥१४९

अपुत्रस्य गृहं शून्यमित्युक्तं तुच्छमेव हि ।
अपुत्रस्य जगच्छून्यमिति पूर्णमवैन्नृपः ॥१५०

तथाऽपि धैर्यमालम्ब्य देव्याः सम्बोधनाय सः ।
अन्तःपुरमुपैच्छून्यं शून्यागारसहोदरम् ॥१५१

दृग्भ्यां प्रावृषमास्येन राहुमाहूतवत्तमाम् ।
पश्यन्तीं भुवमस्यां नु वेष्टुं तां वीक्ष्य राड् जगौ ॥१५२

देवि नाटकवन्नानारसावेशोद्भवो भवः ।
तदयं तत्त्वविदुषां न विषादमुदास्पदम् ॥१५३

देव्युवाच स्वामिपादपद्मनित्यविलास्यसौ ।
कुमारहंसोऽरण्यान्यां प्राणिति प्राणितेश किम् ॥१५४

---

१४८.४. नः.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तन्न यावत् तत्प्रवृत्तिस्तप्तशूची श्रुती मम ।
बाधते तावदेवाग्निं श्रये तद्दुःखजित्वरम् ॥१५५

अथ राजाऽवदद्देवि कुमाराधीनजीवितः ।
किमिहाहमवस्थास्ये सार्थ एकस्तदावयोः ॥१५६

अथ मन्त्री सुरगुरुर्विज्ञो व्यज्ञापयन्नृपम् ।
पृच्छयन्तां देव दैवज्ञाः कुमारागमनोत्सवम् ॥१५७

कुमारोदन्तं वदते लक्षदीनारदापनम् ।
उद्घोष्यतामानकेन मान्यन्तां कुलदेवताः ॥१५८

चतुर्दिशं च प्रेष्यन्तां कुमारान्वेषका नराः ।
अकस्मात् प्राणप्रहाणं कुमारालोकहृत् परम् ॥१५९

ततो राजाऽवदन्मन्त्रिन् कार्यैतद् द्रुतं द्रुतम् ।
मन्त्र्यूचे सिद्धमेवेदमवधारयतु प्रभुः ॥१६०

अथ नानाकथामुख्यविनोदैः कोविदोचितैः ।
प्रभुं विनोदयामासुः सामन्ताद्या निरन्तरम् ॥१६१

शिक्षयित्वाऽन्यदा सर्वं मन्त्रिणा ज्ञापितः पुमान् ।
नैमित्तिकोऽयं तद्देव पृच्छ्यतां तनयागमम् ॥१६२

ततः सम्मान्य राज्ञोचे प्रियंवद वद प्रियम् ।
कुमारोदन्तमस्माकमकस्मात् जीवितामृतम् ॥१६३

स मायया समादाय प्रश्नवर्णावलीमिमाम् ।
तत्काललग्नग्रहांश्च तथा वीक्ष्य स्वरोदयम् ॥१६४

राजानमवदद्देवानुभूतेऽर्थे ममोदितम् ।
चेत् संवदति तत् सत्यं मदुक्तं नान्यथा पुनः ॥१६५॥ युग्मम्

मन्त्रिशिक्षाविद्ययाऽथाब्रत देव त्वया प्रगे ।
मन्त्रिणः पुर इत्युक्ते मन्त्रिणा चेदमौच्यत ॥१६६

किमेतदस्त्यथ वा न मन्त्र्यूचे न तवोपरि ।
राज्ञोऽप्रतीतिस्तद् ब्रूहि कुमारस्यागमः कदा ॥१६७

प्रणिधाय निमित्त्यूचे षण्मास्या देव निश्चितम् ।
प्राप्य राज्यश्रियं क्षेमान् श्रीकुमारः समेष्यति ॥१६८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मन्त्र्यवादीद्देवमेतन्नात्र नः संशयोदयः ।
यत् कुमारो राजलक्ष्मीमर्जतीत्यतुषन्नृपः ॥१६९

सम्मान्य मन्त्रिणा नैमित्तिक उत्थापितो द्रुतम् ।
अन्यद्राजा प्रश्नितोऽसौ नैव ज्ञास्यत्यशिक्षितः ॥१७०

एवं कुमारागमनमनोरथरथस्थिताः ।
दिनान्निर्गमयामासुः सुखेन क्षितिपादयः ॥१७१

इतश्च धीरा भवेति मुहुर्जल्पन् स राजसूः ।
प्राप्तोऽटव्यां सुरेणोचे किं मुधा क्लिश्यसेऽनघ ॥१७२

तव सत्त्वपरीक्षार्थमगां मन्दमियच्चिरम् ।
अथातिवेगाद्यास्यामि नागन्तव्यमतस्त्वया ॥१७३

अन्यच्च नाहं स्वकृतेऽपहरामि तव प्रिया ।
किं तु प्राग्जन्मसुहृदो निमित्तं ह्यसौहृदात् ॥१७४

किञ्चानया दयितया न मेलस्तेऽधुनैव हि ।
षण्मासानन्तरं ह्येषा सती सङ्गम्यते त्वया ॥१७५

इत्युक्त्वा स तिरोभूतः कुमारस्तु हृतप्रियः ।
दूराध्वपादचारातोऽस्थात् तमालतरोस्तले ॥१७६

सर्वतः प्रेक्षते यावत् तावद्यमपुरीमिव ।
निर्मानुषतया भीमां पश्यत्येष महाटवीम् ॥१७७

प्रियाहृत्याऽफलायासात् पित्रदर्शनतश्च सः ।
दूनोऽपि व्यषदन्नैव भवस्वाभाव्यभावनात् ॥१७८

दध्यौ चाकारणक्रुद्धोऽतिशेते दुर्जनं विधिः ।
सर्वं विघटयत्येष यन्निमेषार्धमात्रतः ॥१७९

मम साहसमेकत्रान्यतो विधिविधानकम् ।
कार्यारम्भतुलाग्रेऽद्य द्रक्ष्यते यद् विजित्वरम् ॥१८०

इति ध्यात्वोत्तरीयं चास्तीर्य सुष्वाप भुव्यसौ ।
यावत् तावत् कुतोऽप्येत्य दन्दशूको ददंश तम् ॥१८१

तदीयविषमविषलहरीभिरसौ क्षणात् ।
विदधे सर्वदेशीयः प्रातिकूल्यमहो विधेः ॥१८२

---

१७४.३. किं कु.          १७८.१. °यासीत्.

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

इतश्चास्यामरण्यान्यामस्त्यप्रतिपथा पुरी ।
तस्यां राजा रामचन्द्रो रामदेवी च तत्प्रिया ॥१८३

तयोः पुत्री रमणमती रूपधेयश्रियो निधिः ।
सा च तारुण्यपूर्णाऽभूत् पुरुषद्वेषिणी परम् ॥१८४

राज्ञाऽन्यदा श्रुतं पुत्र्यामनूढायां ध्रुवं पितुः ।
तावन्तो नरकाः प्रोक्ता यावन्तो रक्तबिन्दवः ॥१८५

ततः खिन्नेन भूपेनाप्रच्छि नैमित्तिकोऽन्यदा ।
पुत्री मे रमणमती वरं कञ्चिद् वरिष्यति ॥१८६

स जगाद महापुंसः प्रेयसीयं भविष्यति ।
स चाहिदष्टोऽत्राटव्यामस्ति प्रगुणयाशु तम् ॥१८७

तदैव रामचन्द्रेण नरा प्रैष्यन्न सर्वतः ।
ददृशे तैः स कुमारो मृतकल्पोऽहिदंशतः ॥१८८

उत्पाट्य निन्ये स पुर्यां हूता गारुडिकास्ततः ।
सम्मान्य दर्शितस्तेषां राजा स नृपनन्दनः ॥१८९

सम्यग्विभाव्य तैरूचे वामाङ्गे स्त्री परे पुमान् ।
दष्टो न जीवत्ययं तु वामाङ्गे तेन जीवति ॥१९०

नासाधरचिबुकेषु वरांह्रितलमेढ्रयोः ।
न जीवत्यहिना दष्टोऽयं चान्यत्रेति जीवति ॥१९१

छिन्नेऽङ्गावयवे यस्य न निर्यात्यस्रबिन्दुकः ।
परासुं तं विजानीयान्निर्यात्यस्येति जीवति ॥१९२

ततश्च चच्चरीगानपूर्वं तैरुपचक्रमे ।
क्रमेणोत्थाय सोऽनर्तीद्राज्ञश्च प्रमदो हृदि ॥१९३

वर्धापनकमातेने श्रीरमणमती वृता ।
परिणीता च कुसुमशेखरेण महोत्सवैः ॥१९४

अथान्यदा रामचन्द्रः कुमारं पृष्टवानिति ।
धीमन् क एष वृत्तान्तः कुमारः प्रत्यवोचत ॥१९५

---

१८५.२. यावंदतो.

१९१.१. नाशा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राग्दुर्विहितदुष्कर्मताण्डवं सर्वमप्यदः ।
रामः पुनः प्राह कस्त्वं कुतः कथमिहागमः ॥१९६
कुमारेणाथ साद्यन्तः स्वोदन्तः प्रत्यपाद्यत ।
यावत् सुप्तस्तमालाधो जाने नातः परं पुनः ॥१९७
रामोऽवदन्महाभाग प्रतीपेनापि वेधसा ।
त्वद्दर्शनसुतोद्वाहाभ्यामतिप्रीणिता वयम् ॥१९८
अये कुमार संसारपारावारोऽयमीदृशः ।
न विषादो विधातव्यस्तदत्र मतिशालिना ॥१९९
सुरसुन्दरीवियोगदुःखशल्योद्दिधीर्षया ।
पत्युः पतिव्रताऽब्रूत पित्रे रमणमत्यथ ॥२००
तात श्रुतं मयाऽऽप्तेभ्यः संयुक्तानां सुरद्रुमः ।
चिन्तामणिर्वियुक्तानां शैलोऽस्ति प्रियमेलकः ॥२०१
नानानदीवनखण्डमेखलापरिमिण्डतः ।
अस्यामेव महाटव्यामितो योजनपञ्चके ॥२०२
ततो यस्तत्र गत्वा
'ॐ नमो भुयणभूसणस्स सव्वन्नुणो इह मीलय मीलय स्वाहा ।
मन्त्रस्यास्य सदासन्नपत्नीको ब्रह्मचर्यभृत् ।
प्राग्मासं करजापेन मासं पुष्पजपेन च ॥२०३
मासं च मधुहोमेन सर्पिर्होमेन मासकम् ।
उपचारं करोत्यस्य तुर्ये मासीष्टमेलकः ॥२०४॥ युग्मम्
व्याजहार कुमारोऽथ तेन कान्तापहारिणा ।
षण्मास्यन्ते प्रियामेलो ममादिष्टः किलाभवत् ॥२०५
मासद्वयमतिक्रान्तमेतावद्भिश्च वासरैः ।
नयामश्चतुरो मासान् प्रेयस्युक्तविधानतः ॥२०६
ज्ञाताशयोऽवदद्रामः कुमार त्वमिदं कुरु ।
सहैव रमणमत्या चम्पा च चतुरङ्गया ॥२०७
ततस्तदैव कुसुमशेखरः प्रियमेलकम् ।
जगाम करजापादिविधिं प्रारब्धवान् मुदा ॥२०८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वरमाहुतिपर्यन्ते कुण्डिकादण्डधारिभिः ।
स्कन्धनृत्यज्जटैरग्रे नृता (?) मुनिकुमारकैः ॥२०९
परितः प्रावृताङ्गीर्घनभूर्जतरुत्वचा ।
नितम्बचुम्बज्जटाभिस्तापसीभिश्च पृष्ठतः ॥२१०
अरुणास्यांह्रिणा नीलपक्षेण व्योमगामिना ।
शोणनीलाश्मात्मनेव शुकेन च समन्विता ॥२११
तन्मन्त्राकृष्टदेवीव सद्यः सा सुरसुन्दरी ।
कुतोऽप्येत्य कुमारस्य पादयोर्न्यपतद्बत ॥२१२॥ चतुर्भिः कलापकम्

प्राणेशविरहासौख्यमुष्णास्रैः किल मुञ्चती ।
सा तत्पदस्थिताऽरोदीद्रोदःकुक्षिभरिस्वरम् ॥२१३
आदाय बाहुलतयोः कुमारः प्राणवल्लभाम् ।
स्ववामोरुगद्दिकायां सरोमाञ्चं न्यवेशयत् ॥२१४
अथो रमणमत्याम्बुपूर्णेनैष स्वपाणिना ।
रक्तोत्पलपुटाभेन तस्याः प्राक्षालयन् मुखम् ॥२१५
स्वोत्तरीयपल्लवेन शिरीषमृदुनाऽऽदरात् ।
स्वर्णादर्शमिवामार्जीद् रामचन्द्री तदाननम् ॥२१६
प्रदत्ते च तया दिव्ये प्राणेश्वरनियोगतः ।
आसनेऽत्यन्तमासन्ने न्यषदत् सुरसुन्दरी ॥२१७
ते तापसाद्याः कुमारप्रणता ईरिताशिषः ।
आसनेषु प्रधानेषु निषेदुः खेदिताः पथा ॥२१८
अस्मिन्नवसरे राजकुमारोपान्तमेत्य सः ।
राजकीरः क्षीरपाणं श्रुत्योस्तन्वन् जगाविति ॥२१९
कुमार सद्गुणागार भुवनाधार सादरम् ।
प्रियेयं ते समानिन्येऽधुना यामस्तपोवनम् ॥२२०
सोऽप्यवादीत् पराणिन्ये यैरेषा मम वल्लभा ।
ते गौरव्यास्तदातिथ्यमाधेयं स्थीयतां ततः ॥२२१

२१०.२. °भूर्य°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आतिथ्यं चोचितं यद्वस्तदाख्याहि शुकोऽभ्यधात् ।
आधत्से यत् तदिष्टं नस्तेनोचेऽनुग्रहो महान् ॥२२२

किञ्च पृच्छया स्ववृत्तान्तमेषा तत्क्षणमास्यताम् ।
अयि प्रिये स्ववृत्तान्तं यथास्थितमुदाहर ॥२२३

पदे पदे वहद्बाष्पाऽथाचख्ये सुरसुन्दरी ।
यदा ते स सुरोऽवादीत् किं मुधा क्लिश्यसेऽनघ ॥२२४

तत ऊर्ध्वनिमेषेण स मां सिंहपुरेऽमुचत् ।
प्रियदर्शनापार्श्वस्थसुरन्धरमुखाग्रतः ॥२२५

तेन चोक्तं समानीता मित्रेयं सुरसुन्दरी ।
प्रतिपाद्येति तरसा स जगाम सुरालयम् ॥२२६

ततो भग्नीति सानन्दं सपत्नीति समत्सरम् ।
समुत्थायासनं दत्वा मामाख्यत् प्रियदर्शना ॥२२७

कुतः कथमिहायाता हे भगिन सुरसुन्दरि ।
विधिर्निष्कारणं क्रुद्धो जानातीति मयोच्यत ॥२२८

अथापाङ्गदृशा वीक्ष्य मामुवाच स भूपसूः ।
प्रिये दैवेन नानीता किन्तु देवेन मत्कृते ॥२२९

तदानन्दपदे कोऽयं विषादस्तव सुस्मिते ।
स्वामिन्यास्तव दासोऽस्मि त्वदधीना ममासवः ॥२३०

तद्विषादविषं मुञ्च सिञ्च मां करुणामृतैः ।
महादेवीपदे त्वां चाभिषिञ्चामि सुलोचने ॥२३१

ततो मयाऽऽर्यपुत्रोचे महाभाग सुरन्धर ।
सन्तोऽन्यदारेक्षणेऽपि सचेलं स्नान्ति शुद्धये ॥२३२

त्वं तु महाकुलीनोऽपि कथमेवं विभाषसे ।
स ऊचे त्वां पिता मेऽदान्नान्यदारास्ततोऽसि मे ॥२३३

मयाऽऽचख्ये यदि पित्रा दत्ता नोढा कथं त्वया ।
स मूढोऽभूताधुनैवोद्वहामि ननु सुन्दरि ॥२३४

---

२२४.४. कि.
२३३.१. माहा०.

ऊचे मया भुक्तभोगा परस्त्री परिणीयते ।
इतिस्थितिस्त्वत्कुले वा लोके वा किमु विद्यते ॥२३५

कषायितोऽथ सोऽब्रूत शाधीमां प्रियदर्शने ।
साऽवक् सेर्ष्यं मनुष्येषु शिक्षा दृषदि नो पुनः ॥२३६

ग्रामीणनटमूर्खाणां यद्वा योगः खलूचितः ।
अस्थानाभिनिवेशी त्वं नूनमेषाऽपि तादृशी ॥२३७

एवं तया भग्नमुखः सजोषं जुजुषे क्षणम् ।
पुनरज्ञानाभिमानात् सोऽवदन्मां गतत्रपः ॥२३८

मदुक्तेऽङ्गीकृते सुभ्रू तव श्रेयोऽन्यथा न हि ।
किमितोऽप्यधिकं मूढविधिः कर्तेत्यिवादिषम् ॥२३९

विधिना विहितं किं ते द्रक्ष्यस्येतर्हि मत्कृतम् ।
अथो कुमारं कुमारामात्योऽब्रत प्रभो शृणु ॥२४०

कादम्बर्यां महाटव्यां तापसोऽभून्महातपाः ।
स चातापन्निश्चलाङ्गस्तस्थौ स्थाणुभ्रमप्रदः ॥२४१

बलाकाऽत्रामुचद्विष्ठामेतस्यै कुप्यति स्म सः ।
गाढं मुमोच हुङ्कारं ततः सा भस्म्यभूत् क्षणात् ॥२४२

तेन ज्ञातं तपःशक्तिर्विस्फुर्जति ममेदृशी ।
यः करिष्यत्यभक्ति मे तं करिष्यामि भस्मसात् ॥२४३

स चान्यदा वराणस्यां भिक्षायां क्वाप्यगाद् गृहे ।
गृहिणी तत्र च पतिं भोजयत्यञ्जसाऽऽदरात् ॥२४४

तत्र भुक्ते चिरान्निन्ये भिक्षा तस्मै तपस्विने ।
स च क्रुद्धस्तदुपरि महाहुङ्कारमातनोत् ॥२४५

साऽप्यूचे नाहं बलाका भिक्षामादत्स्व चेत् क्षुधा ।
निपत्य तत्पदोः सोऽवक् कुतो वेत्सि बलाहिकाम् ॥२४६

जगाद सा यतस्त्वां भोः करिष्ये भस्मसात् क्षणात् ।
सोऽवग्भीतो भगवति शक्तिस्ते कुत ईदृशी ॥२४७

---

२३५.३. °स्त्वंत्कुले.

सोऽप्याह स्वप्राणनाथान्यन्मनसाऽपीतरः पुमान् ।
न ममेष्टस्ततः शक्तिरियमाविरभून्मम ॥२४८

दृष्टान्तस्यास्योपनयः स्वयं देव प्रबुध्यताम् ।
इत्थं कुमारामात्येन प्रोक्तेऽस्थात् सोऽवहित्थया ॥२४९

ततः प्रियदर्शनाया एतेनास्मि समर्पिता ।
एवं व्यतीयुरहानि हायनानीव कत्यपि ॥२५०

अश्रौषमन्यदा तत्रार्यपुत्रः क्वापि नाप्यत ।
न ज्ञायते क्व चास्तीति क्षारमापं क्षते ततः ॥२५१

तत्रान्यदाऽश्ववणिजाऽस्याश्वरत्नमढौक्यत ।
तदारुह्य स बाह्यालीमियाय सपरिच्छदः ॥२५२

धाराभिः पञ्चभिस्तत्र वाहयित्वाऽथ तं हयम् ।
चर्मयष्ट्याऽऽहत्य वेगान्मुमुचे स नृपाङ्गजः ॥२५३

वेगावेगादधावत् प्रागथ दिव्युत्पपात सः ।
ततो हर्षविषादाभ्यां पूच्चक्रे तत्परिच्छदः ॥२५४

नभोवाहनराजोऽथ तज्ज्ञात्वा हयसेनया ।
सुरन्धरकुमारस्य सद्योऽधाविष्ट पृष्ठतः ॥२५५

तदा सिंहपुरात् कान्त सर्वतोऽप्याकुलाकुलात् ।
मृगीवद् बन्धनात् सद्यः शीलं त्रातुं पलायिषि ॥२५६

प्राप्तोद्याने न जाने तु तातपत्तनपद्धतिम् ।
दृष्टाऽथ छिन्ननासौष्ठा तत्रैका चरिका मया ॥२५७

उक्ता च सा जयपुरे मामम्ब नयसे यदि ।
तदाऽवश्यं सुवर्णस्य शतं तुभ्यं ददाम्यहम् ॥२५८

स्वर्णमादाय हन्म्येनामत्रैवेति विचिन्त्य सा ।
चरिकाऽऽख्यत् क्व ते स्वर्णं ततः कान्त मयोच्यत ॥२५९

पुरे तत्र मम तातो वामदेवो वणिग्वरः ।
स दास्यते सुवर्णं ते दृष्ट्वा मां क्षेमशालिनीम् ॥२६०

२५७.३. °नाशो°.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

न दत्ते ते स्वर्णमसौ मातर्यदि कथञ्चन ।
कुर्वीथा मां तदा दासीं विक्रीणीथा धनेन वा ॥२६१
इत्युक्त्वाऽहं तया सार्धं प्रास्थिषि स्वपुरं प्रति ।
यावद्दृष्टः सार्थ एकस्तयाऽस्मि जगदे ततः ॥२६२
सार्थेनैव समं यामो मयोक्तमेवमस्त्विति ।
सार्धं सार्थेन तेनावां दिनानि कतिचिद्गते ॥२६३
अथ सा चरिका पापा सार्थवाहं रहोऽभ्यधात् ।
गृहाणैतां मम सुतां देहि स्वर्णसहस्रकम् ॥२६४
एवमस्त्विति सार्थेशः प्रत्यपद्यत तद्वचः ।
तच्च नाथ मया ज्ञातं ध्यातं च मम कर्म धिक् ॥२६५
अत्रान्तरे महासार्थः स विवेश महाटवीम् ।
ताभ्यां भीता त्वहं सार्थान्निश्यनश्यमलक्षिता ॥२६६
भ्राम्यन्त्यरण्ये भ्राम्यद्भिर्दृष्टाऽहं धादिवाहकैः ।
तद्दर्शनादस्मि भीता तैः समाश्वासिता पुनः ॥२६७
पृष्टा च सौम्ये काऽसि त्वं मयोचेऽस्मि वणिग्वधूः ।
महासार्थेन मद्भर्ता सह गच्छन् किलाऽभवत् ॥२६८
सार्थश्च लुण्टितश्चौरैर्नष्टाऽस्मि पतिताटवौ ।
यूयं तु प्रस्थिताः क्व स्थ तैरुक्तं भृगुपत्तने ॥२६९
मयोचे यदि मां तत्र नयध्वं नयशालिनः ।
तत्र प्राप्ता तदा स्वर्णशतं वो दापयाम्यहम् ॥२७०
शीघ्रमेवं हि तैरूचे तैः सह प्रस्थिताऽस्म्यथ ।
तन्मध्यादेकेन यूना प्रार्थिताऽहं पुनः पुनः ॥२७१
दध्ये मया न सार्थोऽयं शीलक्षेमङ्करो मम ।
ततो निश्येषु सुप्तेषु दिश्येकस्यामचालिषम् ॥२७२
वह्नेर्जयिनि मध्याह्ने काञ्चन प्रापमापगाम् ।
प्रक्षाल्य तत्र वदनं नाथ कृच्छ्रादपामपः ॥२७३
तस्यास्तीरे तमालाधो विश्राम्यन्ती व्यलोकयम् ।
शून्यशून्या दिशः सर्वा यमस्यापि भयङ्कराः ॥२७४

---

२६७.३. तद्दर्शना॰; २६७.४. समास्वासिता.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नागवल्ल्या पूगनगं कोक्या कोकं च सङ्गतम् ।
पश्यन्त्यकुण्ठामुत्कण्ठामार्यपुत्रे व्यधामहम् ॥२७५

अनभ्रवृष्टिवद्दैवानुकूल्येन कुतोऽप्युपैत् ।
सुलक्षणा भगवती तत्रासौ सौमनस्यभाक ॥२७६

प्रत्यायातजीविताशा ततस्तद्दर्शनेऽभवम् ।
अभ्युत्थाय प्रहृष्टाऽस्मि विस्मितैतामवन्दिषि ॥२७७

ततोऽहमेतया पृष्टा कुतः पुत्रि समागमः ।
अथाऽस्मि दीर्घं निःश्वस्य सद्यः प्ररुदिता भृशम् ॥२७८

अथैतया समाश्वास्य नीताऽहं तापसाश्रमम् ।
तत्रानमं कुलपतिं तत्पृष्टा सर्वमभ्यधाम् ॥२७९

तेनाऽनुशिष्टा संसारागारवैरस्यदर्शनैः ।
तदादेशात् तापसीभिः फलाहारमकारिषि ॥२८०

तापसैस्तापसीभिश्च सुदर्शनशुकेन च ।
बान्धवैरिव गौरव्यात्तत्रास्थां कतिचिद्दिनान् ॥२८१

अपरेद्युर्गुरुपार्श्वेऽस्मासु सर्वेषु वर्तिषु ।
कुतोऽपि द्वौ नरावेत्यावन्देतां तमृषीश्वरम् ॥२८२

आसीनौ गुरुणा पृष्टौ तौ स्वोदन्तमवोचताम् ।
आस्ते जयस्थलं नाम नगरं नगररञ्जितम् ॥२८३

वणिक्कुलाधिपस्तत्र प्रिया तस्य नलिन्यहो ।
तत्पुत्रौ शशिचन्द्राख्यावावामाबाल्यसौहृदौ ॥२८४

यौवनेऽनेकभाण्डौघैः प्रपूर्यावां वहित्रकम् ।
वार्धौ मनीषितभुवं प्राप्तौ लाभो महानभूत् ॥२८५

गृहीत्वा प्रतिभाण्डानि प्रत्यावृत्तौ गृहं प्रति ।
महासमुद्रे दुर्वातदुर्दिनाद्या उदैयरुः ॥२८६

प्रक्रतेषूपक्रमेषु बहुष्वपि वहित्रकम् ।
आवयोर्हृदयमिव सहसा शतधाऽस्फुटत् ॥२८७

स्फुटमाने तत्र पोते गृहीत्वा फलकं बलात् ।
आवाभ्यां मुमुचे स्वात्मा सिन्धौ निर्वेदतः किल ॥२८८

---

२७९.१. समास्वास्य. २८३.१. पृष्ठौ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततोऽपरापरोर्मीभिः प्रेरितं फलकं प्रभो ।
शशिनो मे प्राप तीरं प्रीणितोऽहं वनानिलैः ॥२८९

समुत्थाय फलैर्भुक्त्वा यानपात्रविपत्तितः ।
भ्रातृचन्द्रवियोगाच्च मया चिरमशुच्यत ॥२९०

धैर्यवीर्यमथालम्ब्य प्रस्थितः स्वपुरं प्रति ।
प्राप्तो महाटवीं नानातरुषण्डविमण्डिताम् ॥२९१

तत्र च शाबरीविद्यासाधनीयं मणीमयम् ।
खेचरैः कृतमद्राक्षं युगादिजिनमन्दिरम् ॥२९२

प्रविश्यात्र जगन्नाथ बिम्बमभ्यर्च्य सादरम् ।
तत्रैकान्ते दिनान्ते च स्वापस्थानमशिश्रियम् ॥२९३

अथार्कोऽस्तं स्ववन्मेऽगाद् विस्तृतं शोकवत्तमः ।
रजन्युपैदधृतिवत् त्रिदोष्या सन्न्यपत्यत ॥२९४

आत्मानं भ्रातरं स्वं च शोचन् यावत् शयेऽस्मि न ।
तावद् विद्याभृत्कुमारौ तत्रागातां जिनालये ॥२९५

देवाधिदेवं चाभ्यर्च्य वेदिकायां निषेदतुः ।
मिथश्च वस्तुसामर्थ्यकथामिति वितेनतुः ॥२९६

एकेनोचेऽस्य मन्त्रस्यास्या विद्यायास्तथाऽश्मनः ।
मूलस्य धातोर्देशस्य प्रभावोऽयमयं स्फुटम् ॥२९७

अन्येनोक्तं किं बहूक्तैः प्रभावो यादृशोऽधुना ।
प्रियमेलकशैलस्य तादृग् नान्यस्य कस्यचित् ॥२९८

आद्य आख्यत् कः प्रभावो गिरेरस्य क्व चास्त्यसौ ।
अन्य ऊचे स कल्पद्रुचिन्तामणिविजित्वरः ॥२९९

यथार्थनामा किञ्चैष बहुभिर्बहुधेक्षितः ।
यत्र चायं गिरिवरस्तत् सम्प्रति निगद्यते ॥३००

इतोऽस्ति दशयोजन्यां पुण्या पुण्यवती नदी ।
तस्याः सहस्रपत्रादि लात्वाऽशोकतरोस्तले ॥३०१

मणीशिलां चारणर्ष्यातापनास्पदमाचर्य च ।
उत्तराभिमुखं मित्र गम्यते पञ्चयोजनीम् ॥३०२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः प्रत्यक्षमेवैष दृश्यते गिरिशेखरः ।
इत्यादिसंकथां कृत्वा तौ यथास्थानमीयतुः ॥३०३
मया दध्ये जिनयात्रा ममात्रैवाफलत्तराम् ।
यतोऽमुष्मादुपायान्मे भ्राता सङ्गंस्यते ध्रुवम् ॥३०४
ततोऽस्मि सुप्तो बुद्धश्च जिनपूजापुरःसरम् ।
खेचरोक्तदिशा यावत् प्रस्थितस्तं गिरिं प्रति ॥३०५
तदैव दक्षिणं चक्षुस्त्रिः प्रपुस्फोर मामकम् ।
पूच्चक्रे वामतः श्यामा मृगोऽधावत् प्रदक्षिणम् ॥३०६
अथोद्यदुहृदवष्टम्भश्चलितोऽस्मि द्रुतं द्रुतम् ।
यथाश्रुतविधानाच्च क्षेमेण प्राप तं गिरिम् ॥३०७
दिनानि कतिचित् तत्र स्थितोऽस्मि गिरिपूजकः ।
तन्निकुञ्जे ययावस्मि पुष्पाण्युच्चेतुमन्यदा ॥३०८
विवरात् तत्र निर्यातौ तुम्बहस्तौ नरावुभौ ।
प्रत्यासत्तौ मया चन्द्रश्चन्द्रेणाऽस्म्युपलक्षितः ॥३०९
ततो मया सस्वजेऽसौ रुरोदैष पदो(?)ऽपतत् ।
पृष्टोऽस्म्यनेन चन्द्रेणाख्यां स्ववार्तामशेषतः ॥३१०
मया पृष्टेन चन्द्रेण स्वप्रवृत्तिरितीरिता ।
भ्रातस्तदा पोतभङ्गे फलकेनार्णवेऽपतम् ॥३११
अन्यान्योर्मिप्रेरितं च फलकं तटमासदत् ।
वेलावनानिलैः किञ्चित् प्रीणितोऽस्म्यत उत्थितः ॥३१२
त्वद्वियोगार्दितेनापि प्राणवृत्तिः फलैः कृता ।
प्रचेले च मया वेगात् स्वदेशाभिमुखं ततः ॥३१३
कियत्यपि गते मार्गे मिलितौ पुरुषावुभौ ।
एकः पुस्तकभृत् पृष्टो मया कोऽसि क्व यासि च ॥३१४
धातुवाद्यस्मि कल्पेन यास्यामि रसकूपिकाम् ।
लक्षवेधिरसाप्तौ च प्राप्स्यामि स्वर्णमक्षयम् ॥३१५
पुनर्मयोचे क्व पुनर्मित्रास्ति रसकूपिका ।
तेनोक्तं प्रियमेलाद्रौ मया दध्येऽथ बान्धव ॥३१६

३०६.३. स्पूच्चक्रे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रियमेलकशैलश्चेत् सत्यमेव तदाऽस्त्यपि ।
स्वभ्रातृशशिमेलार्थं तत्र यामि मिलत्वसौ ॥३१७

अथ क्व यासीति पृष्टोऽनेनाहं धातुवादिना ।
मया यथार्थमाख्यायि ततोऽनेनास्म्यभाषिषि ॥३१८

त्वमप्येहि रसतृतीयांशं दास्ये तवाप्यहम् ।
मया दध्ये कोऽत्र दोषः शशिप्राप्तौ महागुणः ॥३१९

ततोऽस्त्वेवमिति प्रोक्ते त्रयोऽपि चलिता वयम् ।
गच्छद्भिर्महती रज्जु स्रागस्माभिरवल्यत ॥३२०

ततः प्राप्ता इह गिरौ विवरद्वार्यनेन च ।
अस्मि प्रोक्तस्त्वमत्रैव रज्जुमादाय तिष्ठ भोः ॥३२१

द्वावप्यावां प्रवेक्ष्यावो विवरं बिभ्रतौ करे ।
षण्मासीघृतसंसिक्तमहिषीपुच्छदीपकम् ॥३२२

प्रविष्टौ तौ द्वारदेशे रज्जुहस्तस्त्वहं स्थितः ।
भ्रातरेकमहोरात्रं प्रातरद्यैष निर्गतः ॥३२३

एकाक्येव रसपूर्णं गृहीत्वा तुम्बकद्वयम् ।
महारज्ज्वनुसारेण ततो मामुक्तवानिति ॥३२४

वर्धाप्यसे चन्द्र मित्र सम्पूर्णास्ते मनोरथाः ।
तवोपभुञ्जतोऽपि श्रीर्न निष्ठास्यति वार्धिवत् ॥३२५

तत् तुम्बकं गृहाणैकं गच्छावः स्वस्ववेश्मनि ।
तत ऊचे मया यस्ते द्वितीयोऽभूत् सखे क्व सः ॥३२६

अनेनोक्तं मया मित्र रसकूप्यां स चिक्षिपे ।
न विना पुंबलिं हि स्याद् रससिद्धिः कथञ्चन ॥३२७

विवराच्चलितौ चावां मिलितस्त्वं च बान्धव ।
इति भ्रातृगिराऽतुष्यं रसप्राप्त्या विशेषतः ॥३२८

आवाभ्यां धातुवादी स प्रणतोऽगात् स्वमास्पदम् ।
आवां प्राप्तरसौ तत्रागच्छाव भगवन्निति ॥३२९

शश्युक्तमवधार्यार्यपुत्र चेतस्यदोऽदधाम् ।
प्रियमेलकशैले स्याद्ध्रुवं मे प्रियमेलकः ॥३३०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आकाराद्यैः कुलपतिर्विज्ञायाथ ममाशयम् ।
तापसतापसीकीरानेतान् द्रुतमदोऽवदत् ॥३३१

भो भोः सम्भूय युष्माभिर्नेतव्या सुरसुन्दरी ।
प्रियमेलकतीर्थेऽस्या येन स्यात् प्रियमेलकः ॥३३२

ततः पत्रपुष्पमध्यकृतेवातीववत्सलैः ।
एतैरत्राहमानिन्ये सत्योऽभूत् प्रियमेलकः ॥३३३

ततो भोः श्रीसिंहराजकुमारस्तामवोचत ।
प्रियेऽनुभूतं प्रभूतं दुःखं दुष्कर्मनिर्मितम् ॥३३४

पप्रच्छ साऽपि प्राणेश मुधा किं क्लिश्यसेऽनघ ।
इति देवगिरः पश्चात् किं त्वयाऽप्यन्वभूयत ॥३३५

स च स्वोदन्तपीयूषं तमालप्राप्तिमुख्यकम् ।
तत्समागमपर्यन्तं न्यधात् तत्कर्णकूपयोः ॥३३६

ततो रमणमत्यंह्री नत्वोचे सुरसुन्दरी ।
त्वं मम स्वामिनी प्राणनाथप्राणप्रदानतः ॥३३७

साऽप्यभ्यधादथ सुरसुन्दरीं प्रीतमानसा ।
त्वमेव मम सर्वत्र प्रष्टव्या ज्येष्ठभग्न्यसि ॥३३८

कुमारेणाथ रमणमत्यूचे सज्ज्यतां प्रिये ।
शीघ्रं भगवतामेषां भोजनातिथ्यमादरात् ॥३३९

साऽऽख्यद् सिद्धमेव देवार्चां कुरुत द्रुतम् ।
अनुदेवार्चनं भक्त्या भोजितास्तापसादयः ॥३४०

कीरः पुनः पूतभूतफलाद्यलमभोज्यत ।
पूगीफलादिसत्कारः सर्वेषामप्यतन्यत ॥३४१

तेन कान्तायुगलेन रतिप्रीतिश्रिणा सह ।
अथैकपात्रे बुभुजे कुमारः स्मरसोदरः ॥३४२

ततस्तेस्तापसोपान्ते निषेदुर्मेदुरा मुदा ।
कुमारोऽवग्भगवद्भिरन्वगृह्येऽस्मि सर्वथा ॥३४३

मन्ये युष्मदानुकूल्याद्विधिरप्यनुकूल्यभूत् ।
असम्भाव्यमिदं सर्वं मम संजघटे यतः ॥३४४

---

३३८.४. प्रष्ठव्या.

केवलं मद्वियोगेन न पितरावतिताम्यतः ।
प्राप्तस्याप्रतिपथायां विलम्बो भविता च मे ॥३४५

इत्युक्त्वैव कुमारेण दृगह्नदावुत्तरङ्गितौ ।
ततः शुकोऽवदत् पित्रोस्तवोदन्तं नयाम्यहम् ॥३४६

ततः कुमारः स्मेराक्षोऽवक् त्वमेव सुदर्शन ।
ईदृग्दुःखानलासारः प्रत्यायद्यनुजानते(?) ॥३४७

तापसा व्याहरन् कीरं गच्छागच्छेः पुनर्द्रुतम् ।
राजसूरब्रवीत् पूज्या अन्वगृह्णेतरामहम् ॥३४८

अथ प्रहृष्टवदनः पुनरूचे सुदर्शनः ।
कुमार मां प्रगुणय स विज्ञप्तिं ततोऽलिखत् ॥३४९॥

यथा

स्वस्ति श्रीभृगुपत्तने कुसुमकेतुश्रीमहाभूपते–
देवीस्वर्णलतायुतस्य विमलं श्रीपादपद्मद्वयम् ।
मूर्ध्नाऽऽनम्य मुहुर्मुदाऽप्रतिपथापुर्याः करौ कुड्मली–
कृत्यासौ कुसुमादिशेखर इदं विज्ञापयत्यादरात् ॥३५०

क्षेमश्रीर्मम रामदेवनृपतेः पुत्री मयोढा[ऽपि च]
संप्राप्ता सुरसुन्दरी द्रुतमुपेष्यामि प्रमोद्यं ततः ।
यच्चायं हि सुदर्शनः शुकवरो विज्ञापयत्येतद–
प्याकर्ण्य विशदप्रसादसदनैः श्रीतातपादैर्मयि ॥३५१

कण्ठाबद्धदिव्यलेखः संदिष्टाशेषवाचिकः ।
सुदर्शनो दिवोत्पत्य क्षणेनाभूददर्शनः ॥३५२

सम्मान्य तापसान् प्रैषीत् स्वयं कान्ताद्वयीसखः ।
पुरीमैदप्रतिपथां रामदेवस्तमभ्यगात् ॥३५३

प्रवेशकमहो जज्ञे जज्ञे वर्धापनं महत् ।
एवं सुखेन तत्रास्थाद्दिनान् कत्यपि राजसूः ॥३५४

इतश्च श्रीभृगुकच्छे प्रासादोपरिकुट्टिमे ।
श्रीकनकलतादेवीरुद्धार्धहरिविष्टरः ॥३५५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राजा श्रीकुसुमकेतुर्मितामात्यपरिच्छदः ।
लेखग्रैवेयकं कीरं नभस्यायान्तमैक्षत ॥३५६॥ युग्मम्
क्षणात् निपत्य पुरतो वर्त्मश्रममपास्य च ।
चमत्कृताशेषसभ्यं कीरो नरगिराऽपठत् ॥३५७
नरेन्द्रमौलिमाणिक्यरोचिर्यावकितक्रम ।
पुत्रोदन्तवसन्तेन देव वर्धाप्यसेऽधुना ॥३५८
देव देवस्य देव्याश्च श्रीमान् कुसुमशेखरः ।
सुरसुन्दरीरमणमर्त्यौ चांह्री नमन्त्यमी ॥३५९
इति श्रुत्वाऽवदद्भूपो मुदा विस्तार्य दोर्लते ।
स्वागतं ते स्वच्छ वत्सागच्छोत्सङ्गमलङ्कुरु ॥३६०
अथ तस्य महीभर्तुरनुज्ञाप्य शुकाग्रणीः ।
उत्सङ्गशृङ्गमारोहत् कुमारस्येव नन्दनः ॥३६१
व्यजिज्ञपच्च राजानं लेखं वाचापय प्रभो ।
प्रत्यक्षरं क्षरद्बाष्पं राट् स्वयं तमवाचयत् ॥३६२
लेखं कुमारागमनवर्धापकमवेत्य तौ ।
राजा राज्ञी च किमपि प्रमोदाद्वैतमूहतुः ॥३६३
तेषां त्रयाणां वृत्तान्तं कीरः क्षीरकिरागिरा ।
यथाश्रुतं नृपस्याख्यदेकसंस्तुतिकः किल ॥३६४
चुम्बं चुम्बं शुकं मूर्ध्नि न्यासं न्यासं स्ववक्षसि ।
भूपोऽतिहर्षवातूलः कथञ्चिदपि नातृपत् ॥३६५
नृपमत्युपरुध्याथ गृहीत्वा तं तथा व्यधात् ।
देव्याऽथामात्यसामन्ताः कौमारं भाग्यमद्भुतम् ॥३६६
द्राक्षादाडिमखर्जूरसहकारादिभिः फलैः ।
तं प्रीणयन्ती सा देवी तेष्वरोचकिनं व्यधात् ॥३६७
नृपसौधे क्षणेऽत्रागाद् विहर्तुं साधुयामलम् ।
राजा तत् प्रविशद् वीक्ष्याजूहवत् स्वस्य सन्निधौ ॥३६८

---

३६७.४. °रोचकितं.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्ष्मापतिः सपरीवारो भक्त्याऽवन्दिष्ट तौ मुनी ।
निविश्यतामासनयोरित्युवाच च गौरवात् ॥३६९
गोचराग्रप्रविष्टेन नासितव्यं महर्षिणा ।
द्वित्रैर्वाक्यैर्धर्मकथाऽप्याधेयाऽत्र प्रबन्धतः ॥३७०
राजंस्तवाथ सभ्यानामुपकारमवेत्य तु ।
स्थास्यावः क्षणमित्युक्त्वोपविष्टौ तौ महामुनी ॥३७१
भूपोब्रूताथ भगवन् पश्यामुं शुकमुत्तमम् ।
एतदीयोक्तिवैचित्र्याद् भृशं चित्रीयिता वयम् ॥३७२
मुनिना ज्ञानिना प्रोचेऽयं सपूर्व इवास्ति नः ।
शुकोऽवग् नास्मि युष्माभिः दृष्टः क्वापीति वेद्म्यहम् ॥३७३
किन्तु श्रुतं मया सन्ति क्वापि श्वेताम्बरर्षयः ।
कदाऽपि न पुनर्दृष्टाः सपूर्वोऽस्मि ततः कथम् ॥३७४
ज्ञान्युवाचासन्निहितमपि सन्निहितं यथा ।
ज्ञानेन ज्ञायते तस्माद् दृष्ट एवासि मूलतः ॥३७५
ततो विज्ञापयाञ्चक्रे राजा कुसुमकेतुना ।
भगवन् शुकवृत्तान्तं ब्रूहि राजन् निशामय ॥३७६
पुरा हि पुरि कौशाम्ब्यां सुधर्मस्वामिसन्निधौ ।
रामदेवश्रीविजयसेनाद्या दश दीक्षिताः ॥३७७
भगवन्तस्ततः श्रीमच्चम्पापुर्यां विजह्रिरे ।
तत्र श्रीविमलसेनो राजाऽवन्दिष्ट तान् गुरून् ॥३७८
साधून् नमस्यता तेन ददृशे गुरुसन्निधौ ।
श्रीमान् विजयसेनर्षिर्दध्ये दुर्मनसा ततः ॥३७९
सैष मेऽरि येन पुरा परितोऽस्मि विबाधितः ।
तदमुं वैरिणं हस्तप्राप्तं हन्मि स्वपाणिना ॥३८०
तच्चिन्तितप्रकटनाद् गुरुणा बोधितोऽथ सः ।
क्षमयामास विजयसेनर्षिं श्रावकोऽप्यभूत् ॥३८१
अथान्तरान्तरा दध्यौ न सुष्ठु विहितं मया ।
यत् तदा न हतः सोऽरिः पुनर्निन्दति दुष्कृतम् ॥३८२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रान्ते चासौ मासिकानशनाद् भवनपत्यभूत् ।
ततो नृतिर्यङ्नरकभवेषु बहुशोऽभ्रमत् ॥३८३
पुनर्नृषु श्रावकोऽभूद्विराध्य श्रावकव्रतान् ।
बभूव चमरेन्द्रस्येन्द्रसामानिकनिर्जरः ॥३८४
प्रान्ते चार्त्तध्यानतोऽसौ तिर्यगायुर्निबन्धनः ।
अत्रैव भरतक्षेत्रे प्रियमेलामहाटवौ ॥३८५
शाल्मलीशालिनो नीडे किलापीडे शुकोऽभवत् ।
पितृभ्यां पोष्यमाणश्च किञ्चित्संजातपक्ष्यभूत् ॥३८६॥ युग्मम्
अन्यदा पुङ्खितशरा शवरा यमकिङ्कराः ।
तत्राययुः पितृभ्यां सोऽवाचि मा चुङ्कृथा इति ॥३८७
तेष्वासन्नेष्वतिभयाच्चुञ्चकार शुकार्भकः ।
तस्य स्वरानुसारेण मुमुचुः शवराः शरान् ॥३८८
मृत्युभीत्या शुकार्भस्य पितरौ जग्मतुः क्वचित् ।
शुकार्भस्त्वप्रौढपक्षोऽपतद्भुवि भयातुरः ॥३८९
निन्ये लिल्ये तरुगहने न दृष्टस्तैः सपाप्मभिः ।
क्षुत्तृषार्त्तः कथमपि तमालगहनं ययौ ॥३९०
इतश्च दैवयोगेन तत्रागात् तापसेश्वरः ।
तेनाश्वास्य गृहीतोऽसौ पायितश्च सरःपयः ॥३९१
भोजयित्वा दाडिमादि फलान्यतिकलानि सः ।
विनेय इव वात्सल्यादानिन्ये तापसाश्रमम् ॥३९२
तं दृष्ट्वा तापसा ऊचुरहो कीरः सुदर्शनः ।
ततः कुलपतिनाऽसौ चक्रे नाम्ना सुदर्शनः ॥३९३
गुरूक्त्या मुनिकुमारैः पालितोऽध्यापितस्तथा ।
यथा व्यासवदाख्याता व्याख्याता च बभूव सः ॥३९४
अथ तत्राश्रमेऽभ्यागाद् वधूर्वः सुरसुन्दरी ।
तया सहैत् प्रियमेले कुमारोक्त्या त्विहायमैत् ॥३९५
प्रत्यक्षोदन्तसंवादात् परोक्षेऽनुमितिस्थितेः ।
प्रत्ययः साधु साधूक्तेऽथ जज्ञे तस्य पक्षिणः ॥३९६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ईहापोहौ कुर्वतश्च क्षणं मूर्च्छामुपेयुषः ।
नव्यचैतन्यवज्जातिस्मृतिरस्योदजृम्भत ॥३९७

ततो नत्वा मुनिराजं सोऽभ्यधात् पततां वरः ।
मया जातिस्मृतेर्ज्ञातं त्वद्वचो वज्रवर्मितम् ॥३९८

अहो महामुनेर्ज्ञानमिति तत्र सभासदः ।
धिक् संसारं यत्र देवस्तिर्यङ् स्यादिति चोचिरे ॥३९९

राजा तत्पारिषद्याश्च सम्यक्त्वालङ्क्रियाद्भुताः ।
तत्राहो युगपद्देशविरत्या परिणिन्यिरे ॥४००

राज्ञाऽथ प्रासुकाहारैर्गौरवात् प्रतिलाभितौ ।
महामुनी प्रस्थितौ तौ सोऽवग् विहगपुङ्गवः ॥४०१

प्रभो किमथ कार्यं मे किञ्च भावि भवान्तरम् ।
ऋषिर्बभाषे सकर्णपूर्णमाकर्णयोच्यते ॥४०२

अर्हन् देवो गुरुः साधुस्तदुक्तं तत्त्वमित्यदः ।
सम्यक्त्वमणुव्रतांश्च पालयेथाः शुकोत्तम ॥४०३

ततो राजगृहे सिंहराजेन्द्रतनुजन्मनः ।
श्रीमत्पद्मकेसरस्य दृढरथाख्यसारथेः ॥४०४

पुत्रो भविष्यति भवान् नागशर्माऽभिधानतः ।
त्वयाऽऽश्रमे दयालुत्वात् प्राङ्नरायुरबन्धि यत् ॥४०५॥ युग्मम्

ततः पद्मकेसरोद्भूकार्त्तवीर्यमहीपतेः ।
सारथीभूय तेनैव सह प्रव्रज्य सेत्स्यति ॥४०६

तत्संसारावारपाराद्प्रासस्त्वं(?) कीर मा स्म भूः ।
इत्युक्त्वा तौ मुनी कीरश्चैष जग्मुर्यथागतम् ॥४०७

अथाऽऽनन्दमहोर्मीभिः प्रेरितः पुष्पकेतुराट् ।
प्रस्थानेऽताडयद्भेरीं रोदःकुक्षिंभरिस्वराम् ॥४०८

ततो निस्वाननिस्वानैर्वाचालितकुलाचलः ।
चलयन्नचलापीठं चतुरङ्गचमूभरैः ॥४०९

---

४०३.४. शुकोत्तमः.

देव्या कनकलतया सह सामन्तमन्त्रिभिः ।
पुरीं प्रत्यप्रतिपथां प्रतिपन्थिकथातिगाम् ॥४१०
स्ववंशशेखरं प्रत्यानेतुं कुसुमशेखरम् ।
प्रतस्थे कुसुमकेतुः केतुदन्तुरिताम्बरः ॥४११॥ त्रिभिर्विशेषकम्
अविलम्बितप्रयाणैः प्राप्तस्तत्पुरसीमनि ।
मन्त्रिणा ज्ञापयामास स्वागमं रामभूपतेः ॥४१२
ततश्च श्रीरामचन्द्रः सश्रीकुसुमशेखरः ।
तमभ्यागान्महद्धर्याऽभूत् सर्वेषां प्रियमेलकः ॥४१३
श्रीपुष्पकेतुकल्पद्रू रामचन्द्रनृपार्चितः ।
सहग्रामसहस्रेणाफलत् करिहयादिभिः ॥४१४
कुमारं सह जायाभ्यामादाय भृगुपत्तनम् ।
प्राप श्रीकुसुमकेतुः केतुतोरणमालितम् ॥४१५
दीनानाथवहद्दानं निदानं हर्षसम्पदाम् ।
कुमारागमने राजा वर्धापनमचीकरत् ॥४१६
एवं च मेदुरामन्दानन्दतुन्दिलितात्मनाम् ।
तेषां दिनान्यनेकानि व्यतिजग्मुर्निमेषवत् ॥४१७
ततश्च भोः सिंहराजगुरुभिः शूरनिर्जरः ।
कुमारस्य चरणश्रीवरणाय न्यदिश्यत ॥४१८
सोऽथ देवस्तत्र गत्वा प्रत्युषःपाठकक्षणे ।
अन्तरिक्षेऽनीक्ष्यमूर्तिः पपाठ प्रस्फुटाक्षरम् ॥४१९
धिग् धिग् विषयमनसोऽसंप्राप्तविषयाः क्षणात् ।
विषयाविनिवृत्तत्वाद् दुर्गतिं यान्ति जन्तवः ॥४२०
त्वया कामकृते सौम्य किं न व्यसनमाप्यत ।
वियोगे सुरसुन्दर्यास्तत् कामेभ्यो नमस्कुरु ॥४२१
कामार्तेन दशास्येन लेभेऽत्रामुत्र किं ननु ।
सुभूमब्रह्मदत्तौ च कामासक्तौ किमापतुः ॥४२२

---

४१२.४. स्वांगमं.

पुमांसोऽन्येऽपि बहवः कामकिंपाकभोगिनः ।
सुदुर्गां दुर्गतिं प्रापुर्धिक् कामान् मुञ्च मुञ्च तत् ॥४२३

इत्यादिकं पठित्वाऽसौ सुरोऽयासीद् यथागतम् ।
द्वितीयेऽह्नि पुनस्तस्य वैराग्यायापठत्तराम् ॥४२४

पुनस्तृतीयेऽह्न्यपाठीत्तमां वैराग्यकार्मणम् ।
कुमारोऽचिन्तयदये वैराग्यं कः पठत्ययम् ॥४२५

ततः पृष्टाः कुमारेण पार्श्वस्थाः कः पठत्ययम् ।
त ऊचुर्नेक्ष्यते कश्चित् केवलं श्रूयते ध्वनिः ॥४२६

दध्यौ कुमारो यद्येष पुनः प्रातः समेष्यति ।
तदा प्रक्षाम्यस्म्यवश्यं सोऽथ तुर्यदिनेऽपठत् ॥४२७

किं नावधानं मद्वाक्ये कुमारवर दीयते ।
इति यावत् पठत्येष तावत् तं राट्सुतोऽभ्यधात् ॥४२८

कस्त्वं भोः किञ्च वैराग्यं पठस्येवं दिने दिने ।
सोऽवक् कुमार विस्मारिशीलता तेऽभवत् कुतः ॥४२९

यतः —

कौशाम्ब्यां श्रीसुधर्माग्रे प्रवव्राज सुलक्षणः ।
नवान्येऽपि दशाप्यापुर्दिवि शक्रसमानताम् ॥४३०

श्रीनेमिपृच्छया सूरमाननं प्रेत्य बोधये ।
तदेतत् स्मर कुमार त्वमेव हि सुलक्षणः ॥४३१

स्थित्वा दिव्यविमानेषु ताभिरद्भुतमीरुभिः ।
तया च सामानिकद्धर्या परीवारेण तेन च ॥४३२

किं दार्वश्मेष्टकागेहे योषाभिर्मलखानिभिः ।
अल्पीयस्या श्रियाऽनेन परिवारेण मुह्यसि ॥४३३

इति श्रुत्वा ततो देवादीहापोहादितोऽलभत् ।
न्यासीकृतमिव जातिस्मरणं पुष्पशेखरः ॥४३४

ततः कुमारस्तमूचे स्वागतं स्वागतं तव ।
महाभाग तथा धेहि प्रव्रज्या स्याद्यथा मम ॥४३५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथोचे शूरदेवेन भोस्त्वां बोधयितुं ध्रुवम् ।
श्रीसमरसेनसूरिसूरः प्रातरुदेष्यति ॥४३६

गम्यं त्वया तस्य पार्श्वे विधातव्यं तदीरितम् ।
इत्याश्रुतं कुमारेण देवः स्वस्थानमैयत ॥४३७

ततो यावत् कृतप्राभातिकावश्यकमङ्गलः ।
मातापित्रोर्वन्दनाय प्रस्थितः पुष्पशेखरः ॥४३८

उद्यानपालकोऽभ्येत्य तावत् प्रियनिवेदकः ।
प्रणिपत्य कुमारांह्री प्राञ्जलीति व्यजिज्ञपत् ॥४३९॥ युग्मम्

देव श्रीसुमनःश्रेणीसेव्ये श्रीतिलकाद्भुते ।
स्फुरत्पुन्नागपूगाढ्ये सर्वतोऽशोकमण्डिते ॥४४०

नानाशाखागतविप्रसेवितेऽद्भुतजातिके ।
उच्चैर्वंशे महोद्याने त्वत्प्रतिच्छन्दके किल ॥४४१

साधुशाखाविरोचिष्णुर्नानातिशयपुष्पितः ।
सुरासुरनरासेव्यपादमूलमहीतलः ॥४४२

चतुर्ज्ञानी देवतानां लीलावाससहोदरः ।
श्रीसमरसेनसूरिः कल्पद्रुः समवासरत् ॥४४३॥ चतुर्भिः कलापकम्

× × × × × × × × × ।
× × × × × × × × × ॥४४४

पारितोषिकवृष्ट्या संप्रीण्य प्रियनिवेदकम् ।
प्रमोदबाष्पमुदिरः सद्यः कुसुमशेखरः ॥४४५

गत्वा प्रणम्य पितरौ हर्षरोमाञ्चचञ्चुरः ।
गुरुराजागमोदन्तभणित्या स्वागवीवृधत् ॥४४६

ततः श्रीकुसुमकेतुस्तथा कुसुमशेखरः ।
सामन्तामात्यपौराद्यैः सार्धमन्तःपुरेण च ॥४४७

तं सद्गुरुं नमस्कर्तुं जगामोद्यानमुत्सुकः ।
त्रिःप्रदक्षिणनापूर्वं नमस्यामास चादरात् ॥४४८॥ युग्मम्

---

४४३.४. समरवासरत्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तौ यथास्थानमासीनौ ज्ञानधाराधरः प्रभुः ।
सद्देशनासुधावृष्ट्या प्रीणयामास सर्वतः ॥४४९

तथा हि –

रागद्वेषकषायमोहमुखरैर्भूतैः सदाऽधिष्ठिते
संसारावसथे चतुर्गतिचतुर्भूमे नृणां न्यूषुषाम् ।
नानोपद्रववृन्दमेव सततं सा तस्य वार्ताऽनृता
तद्भूतै रहिते निवस्तुमुचितं श्रीसिद्धिसौधे बुधाः ॥४५०

ज्ञानदर्शनचारित्रपवित्राः संनिवस्तुमिह हन्त लभन्ते ।
तद्बुधास्त्रितयमेतदवश्यं वश्यमातनुत यात च सिद्धिम् ॥४५१

तद्देशना सुधास्वादपरीणामस्य मात्रया ।
केऽप्यापुस्तिर्यङ्नृसुरा मिथ्यात्वविषसंहृतिम् ॥४५२
अपरे तु नृतिर्यञ्चो देशसन्तोषमप्यलम् ।
सर्वसन्तोषसम्पत्तिमप्यन्ये नरपुङ्गवाः ॥४५३॥ युग्मम्
अथ सर्वा सभोत्तस्थौ तस्थौ कुसुमशेखरः ।
ततो गुरुभिरूचेऽसौ सौम्यागाम भवत्कृते ॥४५४
यच्चिरं नः संस्तुतोऽसि किं न स्मरसि धीनिधे ।
कौशाम्ब्यादि शूरदेवप्रान्तं वृत्तान्तमात्मनः ॥४५५
यः प्राभातिकवैराग्यपाठी शूरामरः स च ।
तथा जयशासनर्षिदेवो मलयमण्डले ॥४५६
कुशावर्त्तपुरे श्रीमज्जयशेखरभूभुजः ।
देव्या तु वनमञ्जर्याः पुत्रः शूरप्रबोधितः ॥४५७
नन्दनाचार्यपादान्ते दीक्षितस्तैः पदे निजे ।
स्थापितश्च श्रीसमरसेनः सोऽहं नृपाङ्गजः ॥४५८॥ त्रिभिर्विशेषकम्
यो रामदेवर्षिजीवः सुराष्ट्राविषये पुरे ।
गिरिनगरेऽभूत् पुत्रो वत्सराजजयश्रियोः ॥४५९
कुमारो विमलसेनस्तेन देवेन बोधितः ।
मया परिव्राजितश्च राजर्षिः सैष वीक्ष्यताम् ॥४६०॥ युग्मम्

४५९.४. वत्साराज°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरन्दरर्षिदेवोऽपि वराटे सिंहपत्तने ।
नभोवाहनकमलावत्योः सूनुः सुरन्धरः ॥४६१
बोधितस्तेन देवेन दीक्षितश्च मया त्वसौ ।
सुलक्षणर्षिजीवस्तु त्वमेव कृतिनां वर ॥४६२
ततस्त्वद्बोधविधये वयमत्र समागताः ।
प्राञ्जलिः श्रीकुमारोऽवक् प्रभूणां स्वागतं खलु ॥४६३
पूज्यैरनुगृहीतोऽस्मि तत् कुर्वे सफलं जनुः ।
आपृच्छ्य मातापितरौ प्रेयस्यौ च द्रुतं द्रुतम् ॥४६४
सुरसुन्दरीरमणमत्यौ तत्पुर ऊचतुः ।
पृच्छ्ये किमार्यपुत्रावां सत्यः पत्यनुगाः खलु ॥४६५
आख्यत् कुमारः साधूक्तं युवाभ्यां स्वकुलोचितम् ।
राज्ये हि सर्वे सखायः प्रव्रज्यायां तु केचन ॥४६६
अथ कर्णे प्रविश्योचे कुमारं सुरसुन्दरी ।
येनापहारिताऽस्म्येष महर्षिः श्रीसुरन्धरः ॥४६७
कुमारेणाथ वन्दित्वा स्मित्वा चौच्यत मुन्यसौ ।
भगवन् सुरसुन्दर्या यद्यर्थोऽमुं गृहाण तत् ॥४६८
मुनिरुचे महाभाग सर्वाविद्यभिदापटुः ।
दीक्षा मया कृता कान्ता मुक्तिकान्तोत्सवप्रदा ॥४६९
कुमारः प्राह धन्योऽसि जीवितं ते फलेग्रहि ।
किन्त्वश्वापहृतेः पश्चान्महर्षे किं किमन्वभूः ॥४७०
कथं मुक्तिपुरीव्रज्यां प्रव्रज्यां प्रत्यपद्यथाः ।
यदि कथ्यं तदिदं मे प्रसद्य प्रतिपादय ॥४७१
अनुज्ञातोऽथ गुरुणा स्ववृत्तान्तमशेषतः ।
स मुनिः श्रीकुमारस्य वक्तुमेवं प्रचक्रमे ॥४७२
तस्मिन्नुत्पतिते वेगाद् याति चाश्वे विहायसा ।
मयेति चिन्तयाञ्चक्रे नाश्वमात्रमयं ध्रुवम् ॥४७३
तदयं हयरूपेण कोऽप्यहो मम वैरिकः ।
वैरिके धीरवीरैश्च प्रहर्तव्यमशङ्कितम् ॥४७४



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

ततश्छुर्या तुरङ्गोऽसौ कुक्षिदेशे मया हतः ।
छिन्नविद्यः खेट इव स पपात महीतले ॥४७५
तस्मादपतितादेव फालेनोत्तीर्णवानहम् ।
ऊरीकृत्य दिशं चैकां प्रतस्थे स्थेमवांस्ततः ॥४७६
अथाद्राक्षं वनषण्डमेकं पक्षिकुलाकुलम् ।
सम्भाव्यमानसलिलाशयमाशयसौस्थ्यकृत् ॥४७७
तस्मिन् विशन्नेव जिनभवनं भुवनाद्भुतम् ।
प्रेक्षामास तदासन्नं सरश्च भुवनाद्भुतम् ॥४७८
अङ्गावहोलिकां तत्राधायादायाम्बुजानि च ।
युगादिजिनमानञ्च प्राञ्चद्रोमाञ्चकञ्चुकः ॥४७९
नवैः स्तवैः प्रभुं स्तुत्वा शुद्धरागैः प्रगाय च ।
स्थितो बहिर्वेदिकायां यावत् पश्यामि सर्वतः ॥४८०
तावद्दिव्या नायिकैका निर्ययौ संरसस्ततः ।
तदन्वन्या अपि घना निष्पुण्यालभ्यदर्शनाः ॥४८१
ततो दध्ये मयाऽश्वेनापहारोऽपि ममेष्टकृत् ।
यदीदृग् दिव्यवनितादर्शनं समपादि मे ॥४८२
स्नात्वा ततः सरसि ता गृहीत्वा कमलानि च ।
समाजग्मुस्तत्र चैत्ये मयाऽभ्युत्तस्थिरे च ताः ॥४८३
करसंज्ञया निवेश्य मामिमा वीक्ष्य चार्चितम् ।
प्रभुं मिथः प्रोचुरार्चीदेष तत् समधार्मिकः ॥४८४
तच्च श्रुत्वा मया दध्ये प्रीणयिष्यन्ति मामिमाः ।
ततोऽपनीय मत्पूजामानर्चुस्ता जगत्प्रभुम् ॥४८५
स्तुत्वा गीत्वा च तीर्थेशं प्रस्थितास्तास्ततो मया ।
प्रणामपूर्वं भणिताः का यूयं किमिहागताः ॥४८६
ताभिरूचे यक्षकन्या जिनार्चार्थमिहागताः ।
मया पृष्टं पुनः केनाकार्यैतज्जिनास्पदम् ॥४८७
श्रीविद्याधरराजेनेत्युक्ते ताभिर्मयोच्यत ।
किमित्यस्यां महाटव्यां तेनेदं निरमाप्यत ॥४८८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऊचुस्ताः शाबरीविद्याऽटव्यां भगवतः पुरः ।
दीयते गृह्यते चापि तेनात्रेदं न्यधाप्यथ ॥४८९

मयोक्तमायात यूयं किमित्यत्रेति ता जगुः ।
सखे वरेन्द्रो यक्षेन्द्रीभूतः संप्रति वर्तते ॥४९०

स च प्राग्भक्तिरागेण प्रभुं जात्वर्चतिस्वयम् ।
कदाचित् प्रेषयत्यस्मानित्येमः स्वामिशासनात् ॥४९१

ऊचे मया भगवत्यो न मोघं देवदर्शनम् ।
तद्ब्रूतारिः योऽश्वरूपो मामित्यापदमानयत् ॥४९२

आस्तामेष ते वैरी देव एष सुहृत् तव ।
न चैषाऽऽपत् किन्तु संपन्मा भैषीः पुण्यवानसि ॥४९३

इत्युक्त्वा तास्तिरोऽभूवन् क्षणादेवेन्द्रजालवत् ।
अहं तु विस्मितस्तस्माच्चैत्यात् प्रास्थिषि सत्वरम् ॥४९४

दिव्यरूपं भिल्लवेषमधिज्यीकृतकार्मुकम् ।
सारमेयान्वितमथ नरमद्राक्षमग्रतः ॥४९५

तेनापि सहसाऽस्म्यूचे राजकुल नमोऽस्तु ते ।
निर्भयेन मयाऽप्यूचे कस्त्वं भोः कुत आगमः ॥४९६

ग्रामस्वामिसुतो ग्रामादासन्नादिति सोऽवदत् ।
मां नयात्र मयेत्युक्तः समागच्छेति सोऽब्रवीत् ॥४९७

तेन सार्धं यामि यावत् तावत् कुग्रामसन्निधौ ।
शबराः पुङ्खितशरा यमस्यापि भयङ्कराः ॥४९८

मारय मारयेत्युच्चैर्गिरः पेतुर्ममोपरि ।
मयैक्षि प्राङ्नरस्यास्यं किमेतदतिभीषणम् ॥४९९

सोऽपि विद्युद्घोषघोरमट्टहासममुञ्चत ।
शुनश्च प्रेरयामास मां प्रति प्रतिपन्थिवत् ॥५००

व्याघ्रवद्दत्तफालास्ते पृष्ठतः पार्श्वतोऽग्रतः ।
आगत्याकुलयामासुः प्रेतेशस्येव किङ्कराः ॥५०१

---

४८९.४. °प्यव.  ४९३.१. आस्ताने°.
५०१.१. दत्तफला°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभ्यायान्तं शुनं यावत् कृपाण्या प्रहराम्यहम् ।
गाण्डीवैः शबरास्तावदाजध्नुर्मूर्ध्नि मां समम् ॥५०२
विलेगुः सर्वतः श्वानास्ते च मेऽथास्म्यचिन्तयम् ।
ताभिरुक्तं पुण्यवांस्त्वं ह्याऽजायत किमन्यथा ॥५०३
अत्रान्तरे लोचचञ्चदुत्तमाङ्गस्तपःकृशः ।
ईर्यापथस्थिराक्षश्च मलाविलकलेवरः ॥५०४
निगृहीतेन्द्रियग्रामो निकामं कामजित्वरः ।
तत्रागमत् मुनिरेकः प्रशमो मूर्तिमानिव ॥५०५
तेन ते शबराः प्रोक्ता भोः किमित्येष मार्यते ।
तैरुक्तमेष भक्ष्यं नो भक्षयिष्याम एव तत् ॥५०६
मुनिः पुनरुवाचैतान्नरको जीवहिंसया ।
ते ऊचुस्तत् किमित्येवं देहिनो मारयत्यसौ ॥५०७
ऋषिः पुनर्बभाषैतान् नैष जीवान् हनिष्यति ।
मुनिं ते व्याहरन्ति स्म तत् किं प्रव्रजिष्यति ॥५०८
महर्षिणाऽथ जगदेऽसौ ध्रुवं प्रव्रजिष्यति ।
तैरुक्तं तद्गृहीत्वाऽमुं व्रजास्माभिरमोच्यसौ ॥५०९
ततोऽस्मि मुनिना प्रोक्त आगच्छागच्छ भद्र भोः ।
तेन सार्धं प्रस्थितोऽहं गतवांस्त्वरितक्रमम् ॥५१०
श्रान्तं विज्ञाय मां साधुर्निर्विष्टः शुद्धभूतले ।
ततो मयोचे भगवन् कस्त्वं सोऽवगहं मुनिः ॥५११
पुनरूचे मयाऽटव्यामत्र साधुः कथं ननु ।
के वाऽमी पुरुषा रौद्रा मां गृह्णन्ति किमित्यमी ॥५१२
मुनिर्जगादामी म्लेच्छा भोक्तुं त्वां गृह्णते त्वमी ।
मयोचे यद्यमी म्लेच्छाः किमिति त्वां न गृह्णते ॥५१३
तत् सत्यमाख्याहि विभो सर्वथाऽहं त्वदाश्रयः ।
किमर्थमपजह्रेऽहं कस्त्वं के शबरा अमी ॥५१४

५११.२. साधुनि॰. ५१४.२. त्वदाश्रवः.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृत्रिमैर्वचनैरेवं मा प्रतारय मां प्रभो ।
ततो मुनिर्मुनिरूपं संहृत्याभूत् सुरोत्तमः ॥५१५

ऊचे च पुरि कौशाम्ब्यां सुधर्मस्वामिसन्निधौ ।
वयं दश परिव्रज्य सौधर्मेऽभूम निर्जराः ॥५१६

श्रीनेमिवचनात् शूरनिर्जरः प्रेत्य बोधये ।
सर्वैरमान्यत सखे स चाहं शूरनिर्जरः ॥५१७

प्राच्यजन्मनि कौशाम्ब्यां योऽभूच्छ्रेष्ठी पुरन्दरः ।
स्वार्गात् स त्वमयं जातस्त्वद्बोधायाहमागमम् ॥५१८

परस्त्रीकामुकस्त्वं च न वाङ्मात्रेण बुध्यसे ।
इत्यश्वरूपेण मया व्योम्नाऽऽनीतो महाटवीम् ॥५१९

मया म्लेच्छश्वानरूपैर्बहुधाऽसि कदर्थितः ।
आश्वासितश्च मयैव कृत्वा रूपं महामुनेः ॥५२०

ततः कुमार जगदे स मया विबुधेश्वरः ।
एवमेवं व्यतिकरे महात्मन् प्रत्ययोऽस्तु कः ॥५२१

देवेनोक्तं स्मराभोगं विधाय सुधियां निधे ।
ईहादि सृजतो जातिस्मृतिः कान्ताथ मेऽमिलत् ॥५२२

तदुक्तिप्रत्ययाज्जातो देवोक्तौ प्रत्ययो दृढः ।
ततो मयोक्तमत्रैव दीक्षे नैव विलम्ब्यते ॥५२३

सुरोऽवग्दीक्षितस्येयं दुस्तरा ते महाटवी ।
स्वयं दीक्षाऽप्ययुक्ता तत् त्वां नये पितृसन्निधौ ॥५२४

तत्र प्राग्भवमित्रस्य श्रीजयशासनात्मनः ।
सूरेः समरसेनस्य दीक्षेथाः सौम्य सन्निधौ ॥५२५

इत्युक्त्वा मां स उत्पाट्य नभोवाहनभूभुजः ।
स्वागूपथान्वेषिणोऽरण्येऽश्वारूढं पुरतोऽमुचत् ॥५२६

श्रीसमरसेनसूरेर्निवेद्य मम वासनाम् ।
शूरदेवो दिवमुपैद् गुरुः सिंहपुरं पुनः ॥५२७

---

५२६.३. भाग्.

अपुष्पफलवत् प्राप्ते मयि प्रमुदितो नृपः ।
पुरमायन् पुरनरैर्गुरूदन्तेन वर्धितः ॥५२८
ततो विज्ञपयाञ्चक्रे मया वसुमतीपतिः ।
देव देवतरूनेतान् गुरून् वन्दामहे पुरः ॥५२९
अथ पृथ्वीश्वरोऽहं च तथैव सपरिच्छदौ ।
प्राणेमिव प्रभुं गत्वा सभायां च निषेदिव ॥५३०
ततः कुमार संसारारण्यनिस्तीर्णिदीपिकाम् ।
देशनां सूत्रयामास गुरुर्मोहगिरिस्वरुः ॥५३१
तथा मे प्राग्भवोदन्तवसन्तेन प्रभुर्व्यधात् ।
जातिस्मृतिलतां श्रद्धोत्पुष्पां दीक्षाफलोन्मुखीम् ॥५३२
ततः संबोध्य पितरौ प्रियां च प्रियदर्शनाम् ।
प्रियया प्रियमित्रैश्च सहादीक्षे नृपाङ्गज ॥५३३
इति श्रुत्वा प्रभुं नत्वा श्रीमान् कुसुमशेखरः ।
गृहे गत्वाऽऽह पितरौ श्रुतं भगवतो वचः ॥५३४
चतुर्गतिकसंसाराद्दुःखागारान्निरन्तरम् ।
निर्विण्णोऽहं तात मातरनुजानीत मां ततः ॥५३५
येनास्मि गुरुसार्थेशप्रोक्तदीक्षाध्वनाऽधुना ।
प्रस्थाय निर्वृतिपदं यामि नित्यसुखास्पदम् ॥५३६
पिताऽऽख्यत् तेऽधुना राज्यं वत्स दीक्षोचिताऽऽवयोः ।
क्रमव्यतिक्रमः कोऽयं भवता शिक्षितोऽनघ ॥५३७
भवान्धोर्मम निर्यातो दत्त हस्तावलम्बनम् ।
मा स्म क्षिपत तत्रैवेत्युक्त्वा पुत्रोऽपतत् पदोः ॥५३८
माताऽब्रवीन् शृणु वत्स त्वद्वियोगानिलोर्मिभिः ।
मम प्राणा अमी वेगादुड्डाय्यन्ते पलालवत् ॥५३९
पुत्रोऽवोचदम्ब तर्हि दीक्ष्यते सममेव हि ।
येन नात्र वियोगः स्यान्न चामुत्र शिवास्पदे ॥५४०
ततोऽवादीत् पुष्पकेतुर्निर्बन्धश्चेत् तवेदृशः ।
तदा कुसुमचूलोऽयं वत्स राज्येऽभिषिच्यते ॥५४१

---

५४१.२. निंबंध°.

त्वया तु सह सर्वेऽपि वत्स दीक्षामहे वयम् ।
पुत्रोऽब्रूत साधु तात क्षणं नात्र विलम्ब्यते ॥५४२

ततः सामन्तसचिवपर्यालोचपुरःसरम् ।
राजा श्रीकुसुमचूलः स्वयं राज्येऽभ्यषिच्यत ॥५४३

अथ श्रीकुसुम१.न्: सर्वतीर्थकृतोत्सवः ।
सार्धं कनकलतया श्रीसामन्तशतेन च ॥५४४

सुरसुन्दरीरमणमतीभ्यां परिवारितः ।
पञ्चशत्या च मित्राणां तथा कुसुमशेखरः ॥५४५

सुगुरु समरसेनाचार्यराट्पादमूले सकलकुशललक्ष्मीवल्लरीस्थूलमूले ।
जिनपतिमतविध्याधानपूर्वं वितेने चरणहरिणनेत्रोद्वाहलीलाविलासम् ॥५४६॥

त्रिभिर्विशेषकम्

इति श्रीनिर्वाणलीलावतीमहाकथेतिवृत्तोद्धारे लीलावतीसारे जिनाङ्के
**पुरंदरश्रेष्ठिजीव-श्रीसुरन्धरकुमारस्य सुलक्षणराजपुत्रजीव-कुसुमशेखरकुमारस्य**
**च दीक्षामहोत्सवव्यावर्णनो** नाम चतुर्दश उत्साहः ॥*

* ग्र. ५५८.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## पञ्चदश उत्साहः

इतश्च भारतेऽत्रैव विलसद्धर्मनन्दने ।
सर्वं×कर्मीणे भीमसहदेवधनञ्जये ॥१
गूर्जरत्रेतिदेशोऽस्ति सुधास्वादुफलाकरः ।
राजधानी विवेकस्य त्रिदिवस्येव खण्डलम् ॥२॥ युग्मम्
यो नानावाहिनीरम्यो महाभूभृत्कुलाश्रितः ।
देशान्तरैरजेयश्च देशराज इवाऽशुभत् ॥३
तत्र राजा रराजोच्चैरुदीर्णबलवाहनः ।
नरवाहन ऐश्वर्यान्नाम्ना श्रीबलवाहनः ॥४
बभौ यदीयदोःस्तम्भेऽवष्टम्भे राज्यसद्मनः ।
जयश्रीः पञ्चालिकेव नाराचैर्दृढिता दृढम् ॥५
शीलचन्दनसौरभ्यसौरभ्यितधराम्बरा ।
प्रेमपात्रमभूत् तस्य देवी मलयसुन्दरी ॥६
सुकृताम्भोधिसंभूष्णुसुखपीयूषपायिनोः ।
घस्राः सहस्रशोऽतीयुस्तयोर्दैवतयोरिव ॥७
अन्येद्युः कनकरथदेवः सौधर्मकल्पतः ।
कुक्षौ मलयसुन्दर्या नन्दनत्वमविन्दत ॥८
राकामृगाङ्कवत् कान्त्या समयेऽजायताङ्गजः ।
कुलमृगाङ्क इत्यस्य नाम चक्रे महोत्सवैः ॥९
क्रमात् कलाभिः सर्वाभिर्यः श्लिष्टः समदर्शनः ।
लीलयेव स्मरजयी विजिग्येऽनीदृशं हरम् ॥१०
कलापात्रीर्भूपपुत्रीरष्टाष्टाशारमा इव ।
महीयसाऽथ महसा पिता तेनोदवाहयत् ॥११
तासां समासां सुभगंकरण्या युवराट्श्रिया ।
तमुद्वाह्य कृतकृत्यंमन्यो मन्येऽभवन्नृपः ॥१२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्युन्नते विशाले च सुधानिर्मलनिर्मलैः ।
अभिन्नेऽपि नृपादभिन्ने सौधेऽदीव्यत् स तत्सखः ॥१३

ज्ञात्वा कुलमृगाङ्कस्य चारित्रावरणात्ययम् ।
बोधये सुगुरुः सैषोऽन्यदा तं देवमादिशत् ॥१४

मङ्खरूपं विधायागान्नगरं सोऽथ निर्जरः ।
जगच्चित्रकरं चित्रपटमादर्शयज्जने ॥१५

तथा हि —

अकृते रन्धने श्वश्र्वा स्नुषैषा पश्य पिट्टयते ।
ननान्द्रा खिस्यते चासौ भ्रातृजाया यदा तदा ॥१६

एषा स्नुषा कलहकृत् भिन्ते स्वस्यांबरं स्वयम् ।
श्वश्रैषाऽधुना वध्वा पिट्टयते हा निरङ्कुशम् ॥१७

तथा—

क्षारं राद्धमिदं किमद्य दयिते राध्नोषि किं न स्वयं
　　धिक् त्वां क्रोधमुखीमलीकमुखरस्त्वत्तोऽपि कः कोपनः ।
आः पापे प्रतिजल्पसि प्रतिपदं पापस्त्वदीयः पिता
　　दम्पत्योरिति नित्यदन्तकलहं भो भो जनाः पश्यत ॥१८

तथा —

श्वश्रूः क्रूरतया कटाक्षयति मां दुष्टा ननान्दाऽपि मे
　　भर्तुर्भग्न्यतिवल्लभाऽस्ति न चिरान्मे गर्भरूपं हले ।
आस्ते क्रोधमुखी च देवरवधूर्दग्धाऽस्म्यहं कर्मभिः
　　प्रायो भोज्यमनिष्टमित्ययमहो ब्रूते वधूटीजनः ॥१९

इत्यादि हास्यकृच्चित्रं दर्शयन् प्राकृते जने ।
भूरिभूरि लभत्येष मङ्खो गृह्णाति नो पुनः ॥२०

निर्लोभनतया तेन रञ्जितं निखिलं पुरम् ।
प्रियमित्रैः कुमारस्य तच्चित्रमकथ्यत ॥२१

---

१५.१. °यागोन्न°.
१८.२. °स्वतो°.



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

कुतूहलात् कुमारश्च मङ्खमेतमजूहवत् ।
सोऽप्यानमन् दूरतोऽपि कुमारेण न्यगद्यत ॥२२
रे पटे तव केनेदं लिखितं किञ्च वाऽस्त्यदः ।
कुमारेदमात्मनैव लिखितं वृत्तमात्मनः ॥२३
पटं वीक्ष्य कुमारोऽथ जगाद बत वर्णकाः ।
अहो रेखाप्राञ्जलत्वमहोरूपककौशलम् ॥२४
यथास्वरूपमेतन्मे प्रतिपादय मङ्ख हे ।
कुमार शृणु वीक्षस्व दर्श्यमानं मयाऽधुना ॥२५
लम्बां कन्थां करे कृत्वा स मङ्खो दर्शयत्यथ ।
कौतुकाक्षिप्तचैतास्तु निशामयति राजसूः ॥२६
अर्हत्सिद्धश्रुतचैत्यसङ्घादिप्रातिकूल्यतः ।
नृत्वं मु(?)हाय निष्पुण्यः सूक्ष्मद्रुष्वेष हाऽगमत् ॥२७
बादरेषु ततस्तेषु हा जगाम तपस्व्यसौ ।
उत्सर्पिण्यवसर्पिण्योः सन्तास्ते(?)ष्वस्य च स्थितिः ॥२८
तेभ्यो देवैष उद्वृत्तो जातो ही पश्य वायुषु ।
ततोऽप्यग्निषु तत्रास्थादसंख्यातमनेहसम् ॥२९
जातोऽप्सु पश्याथ भूष्वसंख्याता अवसर्पिणीः ।
ततः कथञ्चिदुद्वृत्य पश्यासौ द्वीन्द्रियेषु भोः ॥३०
जातः कृमिप्रभृतिषु संख्यातं समयं स्थितः ।
पश्याथागात् त्रीन्द्रियेषु कीटिकामत्कुणादिषु ॥३१
अथैष चतुरक्षेषु मक्षिकावृश्चिकादिषु ।
कुमार वीक्षस्व तस्थौ संख्यातान् हायनान् खलु ॥३२
संमूर्छिमनृतिर्यक्षु पञ्चाक्षेषु यथावयम् ।
ततः कुमार पश्यासौ प्रथमे नरकेऽगमत् ॥३३
तत्र च च्छिद्यते सैष पच्यते भिद्यते मुहुः ।
सागरोपममेकं तु तस्थौ तत्र नृपाङ्गज ॥३४
सरीसृपेष्वथोत्पद्यासौ गोधानकुलादिषु ।
नानाजीवांस्तत्र हत्वा द्वितीये नरकेऽपतत् ॥३५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छेदभेदादि तत्रापि सोढ्वाऽयं सागरत्रयम् ।
ततः पक्षिषु हिंस्रेषु जज्ञे पश्य नृपात्मज ॥३६
अथ पृथ्व्यां तृतीयस्यां सप्तसागरजीवितः ।
नारकोऽभूत् तत्र घोरघोरं दुःखं स सोढवान् ॥३७
ततः पश्यैष सिंहोऽभूद्यमस्येव सहोदरः ।
संहृत्य जीवान्नानाऽसौ तुरीये नरकेऽगमत् ॥३८
दशाब्धींस्तत्र च स्थित्वाऽनुभूयासुखमुत्कटम् ।
कुमाराथैष सर्पोऽभूत् पश्य हन्ति तनूमतः ॥३९
ततः पञ्चमनरके सप्तदशाब्धिजीवितः ।
तत्र सोढ्वा महादुःखं जातो मत्स्यो नरोत्तम ॥४०
पञ्चेन्द्रियवधादेश्च षष्ठपृथ्व्यामयं ययौ ।
द्वाविंशतिं सागराणि सहते पश्य वेदनाः ॥४१
महामत्स्यस्ततो जातः पश्यायं मत्स्यलक्षभुक् ।
ततोऽभूत् सप्तमपृथ्व्यां त्रयस्त्रिंशयब्धिजीवितः ॥४२
तत्र नारकहिंसादेर्मत्सीगर्भे समागतः ।
अन्तर्मुहूर्तं स्थित्वाऽत्र सप्तम्यां पुनरप्यगात् ॥४३
अप्रतिष्ठाननरके षट्षष्टिमिति तोयधीन् ।
अन्तर्मुहूर्तान्तरितान् वराकः पश्य तस्थिवान् ॥४४
ततो भ्राम्यंश्च तिर्यक्षु सिंहेभाश्वगवादिषु ।
क्षुत्तृष्णादिमहादुःखं ही वराकः सहत्ययम् ॥४५
शराङ्कुशकशारादिघातैर्गुरुभरैस्तथा ।
असावसातं सिंहादिभवे सन्ततमन्वभूत् ॥४६
श्रीकुमारैष महिषो जातमात्रः क्षुधाऽमृत ।
पुनश्च महिषो जातश्चामुण्डाया बलिः कृतः ॥४७
सैषोऽभवत् खरो भारं वाह्यते पश्य हन्यते ।
खरीं वीक्ष्य भरं क्षिप्त्वा भुङ्कुर्वन् धावतेऽधमः ॥४८
ततो गर्ताशूकरोऽभूद् विष्ठाद्यशुचिभक्षकः ।
अनार्यो जननीं भुक्त्वा मृतस्तद्गर्भमागमत् ॥४९

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

अथायं श्वाऽभवद्देव क्षुधार्तो व्रणचन्द्रकी ।
संप्रयुक्तो हहा शुन्या वराको हन्यतेऽधमैः ॥५०

जातश्छागो यायजूकैर्यागेऽहन्यत पाप्मभिः ।
मांसाशिभिः पश्य जघ्ने हहा मृगभवेऽप्यसौ ॥५१

स एष वनकोलोऽभूदश्वथट्टेन वेष्टितः ।
भित्त्वाऽश्वथट्टं प्रणश्यन् हतः शल्येन केनचित् ॥५२

कलविङ्कादिबालोऽयं जातः श्येनद्विकादिभिः ।
जलचारी च कैवर्तैर्वराकोऽहन्यतासकौ ॥५३

अथोत्पेदे वराकोऽयं मनुष्येषु कथञ्चन ।
रण्डाप्रोषितपत्यादेर्गर्भेऽगालि कदौषधैः ॥५४

रण्डादिगर्भे पुनरप्यायातो न मृतस्तथा ।
ही कुमार वराकोऽयमुज्झाञ्चक्रे श्मशानके ॥५५

स्त्रीगर्भे द्वादशसमाः स्थित्वा मृत्वा स्ववर्ष्मणि ।
जातः स्थितो द्वादशाब्दीं त्रिरष्टाब्द्येष जातवान् ॥५६

नारीगर्भे स्थितश्चैष तिर्यक् स्थित्वा न निर्गतः ।
कुमारवर जज्ञेऽसौ मातुः स्वस्य च मृत्यवे ॥५७

अयं गर्भे स्थित एव विकृत्य पृतनां घनाम् ।
युध्द्वा मृत्वा च हा गर्भनरकान्नरकं गतः ॥५८

कुमार जात एवायं रेवतीदोषतोऽमृत ।
पुनरुत्पन्न एवायं विनष्टो दन्तपीडया ॥५९

अयं च जातो विण्मूत्रापवित्रो रोदनोऽसकृत् ।
मक्षिकाभिश्च शूकावान् मातुः क्लेशाय केवलम् ॥६०

दरिद्रगेहे जातोऽयं शुष्काङ्गो गर्भगोऽपि हि ।
जातमात्रे च जननी हा कुमार व्यपद्यत ॥६१

पित्राऽयं चाजादिदुग्धैरवर्ध्यत पिताऽस्तमैत् ।
एष कर्परहस्तस्तु भिक्षते प्रतिमन्दिरम् ॥६२

---

५७.४. मातु.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुभोजनादेष कुष्ठगलन्नाशौष्ठकर्णकः ।
मक्षिकापिण्डको निर्भर्त्स्यते भिक्षार्थमागतः ॥६३

सैष मृत्वा पुनर्जातो नरो दारिद्र्यमन्दिरम् ।
पराभवमहापात्रं जीवन्नपि न जीवति ॥६४

क्षैरेयीं वीक्ष्य भुञ्जानान् याचते स्मैष मातरम् ।
रुदती साऽपि दुःखार्ता बाष्पैरेवोत्तरं ददौ ॥६५

तत एष क्षुधा मृत्वा कथञ्चित् कर्मलाघवात् ।
जातवानिभ्यतनयो व्युवाहेऽन्यसुतामसौ ॥६६

तद्व्यये हृतसर्वस्व इवासौ पश्य रोदिति ।
क्व गताऽसि प्रतिवद कान्ते कान्तविलोचने ॥६७

नैष भुङ्क्ते न पिबति ततो वातेन पूरितः ।
मृत्यवस्थामिव प्राप्तः परित्यक्तश्च वैद्यकैः ॥६८

ततोऽस्य पार्श्वे जननी पिता भ्राता च रोदिति ।
अयं तूत्पत्य पतति तप्तोर्व्यामिव मत्स्यकः ॥६९

कथञ्चिदेष प्रगुणीभूतः पित्रादयोऽहृषन् ।
एषोऽन्यदा गतो द्यूतेऽसंख्यं धनमहारयत् ॥७०

ततश्चाक्रुश्यते मात्रा पिता किञ्चिद् ददाति न ।
गृहे प्रवेशं नैवास्य भ्रातरोऽपि ददत्यथ ॥७१

द्यूतकारैश्च गर्तायां निक्षिप्यादायि मूर्धनि ।
एतस्य धूलीपिटकं पिता मोचयते न हि ॥७२

महाजनेन मेलन्या मोचितोऽसौ न यावता ।
एष जज्ञे पश्य चौरः खात्रं खनति पातकी ॥७३

आरक्षकैरेष दृष्टः खरमारोपितस्ततः ।
सर्वत्र भ्रमितः पुर्यामुद्बध्य पितृमन्दिरे ॥७४

पतितः पाशतः सैष शूलायामधिरोपितः ।
कथञ्चिच्छुभमृत्योश्च जज्ञे राज्ञोऽयमङ्गजः ॥७५

---

६७.१. भृत°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संप्राप्तयौवनः कामातुरो मन्त्रिपितृप्रियाः ।
सामन्तलोककान्ताश्च पापोऽभुङ्क्त बलादसौ ॥७६

पित्रा निर्वासितो देशान्निःसहायोऽथ निर्धनः ।
कामवज्ज्वानलोत्तप्तस्तिरश्चीरपि सेवते ॥७७

नष्टां रण्डामृद्धिमतीं धरत्येष स्मरातुरः ।
जातैरपत्यैः क्लिश्येत क्रमतो निष्ठिते धने ॥७८

वार्द्धके मुण्डितशिरा वराको जीर्णमञ्चके ।
सुप्तः पूत्कुरुते भार्यादयः शृण्वन्ति नो पुनः ॥७९

नृदुःखवर्णनायोक्ता भवा एते निरन्तराः ।
सप्ताष्टनृभवेभ्यस्तु ज्ञेयमन्तर्भवान्तरम् ॥८०

ततोऽयं व्यन्तरो जज्ञे स्त्रीपुंसादिग्रहस्पृहः ।
नानानर्थकरत्वाच्च मान्त्रिकेण न्यगृह्यत ॥८१

किल्बिषिकाभियोग्येष कुमाराजनि पाप्मतः ।
सोऽयं जातो व्यन्तरादिवाहनं हा निरूपय ॥८२

गन्धर्वादिश्च गन्धर्वानीके तु न रजत्ययम् ।
परर्द्धिदर्शनादेष देवभावेऽपि खिद्यते ॥८३

प्राप्तेऽपीन्द्राहमिन्द्रत्वे च्यवनादेष दुःखितः ।
एते देवभवा बोध्या नरतिर्यग्भवान्तराः ॥८४

एतश्च भृगुकच्छेऽसौ जसादित्याङ्गजोऽभवत् ।
वणिग्जसरविः सैष कदर्यो लोभसागरः ॥८५

गृहे शटितधान्यादि जरच्चीरं च यच्छति ।
पोतेन रत्नद्वीपेऽसौ ययौ पित्राद्यसम्मतेः ॥८६

पश्य तत्रैष रत्नानि प्रभूतश उपार्जयत् ।
चक्रे च वणिजं मित्रं रत्नद्वीपनिवासिनम् ॥८७

पाप्मनाऽनेन सोऽभाणि भृगुकच्छे मया सह ।
आगच्छ रत्नान्यादाय महालाभो भविष्यति ॥८८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स च मुग्धः सहानेन पोतेन प्रस्थितोऽम्बुधौ ।
अन्तःसमुद्रं ताम्बूले विषेणामार्यनेन सः ॥८९

रोदित्येष जसरविः स वणिग् व्यन्तरोऽजनि ।
ज्ञात्वाऽवधेः स स्ववृत्तमेतं चिक्षेप वारिधौ ॥९०

तीर्त्वाऽर्णवमयं दैवान्मिलितो धातुवादिनोः ।
[ ताभ्यां ] हन्तुमयं निन्ये कुमारैष पलायत ॥९१

निधये तरुपादं च खनन्नैष निवारितः ।
अधिष्ठातृव्यन्तरेण कोपाद्दूरे निचि[ क्षिपे ] ॥९२

यक्षिणीं साधयत्येष पापः प्रार्थयते च ताम् ।
तया ग्रहिलितः प्राप्तो गृहे पित्रा पट्टकृतः ॥९३

स्वयं स्वं पितरं हत्वा विषेणैष यशोरविः ।
मुक्तकण्ठं शठो रोदित्यवधारय धीनिधे ॥९४

पुनः कर्पासमादाय ययौ गर्जनकं प्रति ।
दवेन दग्धोऽसौ पापः प्रापन्नरकदुर्गतिम् ॥९५

वसुमित्रवणिक्पुत्रो वसुनन्दोऽभवत् ततः ।
कुर्वन्नसौ धातुवादं पित्राऽवारि न तिष्ठति ॥९६

भागं दत्वा पृथक्चक्रे निर्धनोऽथ निधिं खनन् ।
योगिनाऽसौ हतः किञ्चित् पश्चात्तापाद् व्ययं गतः ॥९७

राज्ञः पद्मरथस्याङ्गभूः कनकरथोऽभवत् ।
असौ पित्रा समं मन्त्रं भोः कुमारान्यदाऽकृत ॥९८

देव सामन्तमन्त्र्याद्याः पौरा जानपदास्तथा ।
एकैकशः स्वं गृह्णन्ते यस्य कोशः स हि प्रभुः ॥९९

चेट्या भिन्नं रहस्यं तत् सामन्ताद्यैः सपद्यपि ।
राजा दारुगृहे क्षिप्तोऽयं च कनकरथोऽनशत् ॥१००

प्राप्तश्च पुरि कौशाम्ब्यां श्रीसुधर्मास्यपङ्कजात् ।
स्वं चरित्रं निशम्यासौ जातिं स्मृत्वा निरक्रमीत् ॥१०१

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

कौशाम्ब्यां प्राव्रजन्नेते दश ते च दिवं [ गताः ] ।
श्रीनेमिपार्श्वेऽमी पृच्छन्त्यागामिभवसाधनम् ॥१०२
प्रभुरूचे शूरदेवात् प्रबोधो वो भविष्यति ।
प्रदीपादिव दीपानां प्रपद्यध्वं मुदं ततः ॥१०३
अयं च कनकरथश्च्युत्वाऽभून्नगरे पुरे ।
बलवाहनमलयसुन्दर्योरेष नन्दनः ॥१०४
स च त्वमेव कुमार नात्र कश्चन संशयः ।
शूरदेवोऽहं मङ्खरूपेणात्र समागमम् ॥१०५
पटोऽयं तव बोधाय मयाऽरच्यत चित्रकृत् ।
तत् कुमारवरेदानीं बुध्यस्व कुरु संयमम् ॥१०६
एतेऽनन्तभवाश्चात्र प्रोक्ताः सम्भवमात्रतः ।
वस्तुतस्तु जसरविमुख्या भवचतुष्टयी ॥१०७
इत्येतत् तद्वचः श्रुत्वाऽस्येहापोहं वितन्वतः ।
मूर्च्छाऽमूर्च्छत् कुमारस्य लोकैर्मङ्खोऽजिघांस्यत ॥१०८
जातिस्मरणमित्रे च मिलिते राजनन्दनः ।
तान् निषिध्यावदन्मङ्खं स्वं रूपं दर्शय प्रभो ॥१०९
स च देवो दिव्यरूपं दर्शयित्वा तिरोऽभवत् ।
तां वार्तां पितरौ श्रुत्वोचतुर्मा वत्स निष्क्रमीः ॥११०
पुत्रोऽवदत् तात मातरिदं वामपि युज्यते ।
निषेध[य]न्त यन्मामप्येतन्मोहविजृम्भितम् ॥१११
द्वितीयेऽह्नि श्रीसमरसेनसूरिः सहस्ररुक् ।
प्रातः सहस्राम्रवणे परापदुदयश्रियम् ॥११२
ततः सद्योऽपि सबलवाहनो बलवाहनः ।
श्रीमान् कुलमृगाङ्कश्च प्रभुं नन्तुं प्रजग्मतुः ॥११३
भगवन्तं नमस्कृत्य यथोचिति निषेदतुः ।
धर्मं श्रुत्वा नृपो जज्ञे दीक्षेच्छुः श्रीकुमारवत् ॥११४

१०९.४. निःक्रमी.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लघुपुत्रं श्रीअमरमित्रं न्यस्याऽऽत्मनः पदे ।
अकारयत् तीर्थमहादिकं विजयसेनवत् ॥११५

ततश्च –

स्म वहति बलवाहनो महीन्द्रः सकुलमृगाङ्ककुमारराड्जयन्तः ।
चरणभरमहो ततो मुनीन्द्रा ह्यहुत जिनेश्वरलीलया गुरुश्च ॥११६

इति श्रीनिर्वाणलीलावतीमहाकथेतिवृत्तोद्धारे **लीलावतीसारे जिनाङ्के कनकरथकुमार-जीव-श्रीकुलमृगाङ्ककुमार-दीक्षा-व्यावर्णनो** नाम **पञ्चदश उत्साहः** ॥*

---

११५.३. आकारयत्.

* ग्रं. १२२.



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

## षोडश उत्साहः

अथात्र भरतक्षेत्रे कुरुमण्डलमण्डनम् ।
त्रैलोकेऽप्यंप्रतिरूपाऽप्रतिरूपा पुरी बभौ ॥१
राजा दुर्योधनस्तत्र विरेजे धृतराष्ट्रसूः ।
सकर्णश्च परं धर्मात्मजपक्षप्रियङ्करः ॥२
युधिष्ठिरो द्विषां भीमः कीर्त्तिपूरैः सदाऽर्जुनः ।
सहदेवो नकुलश्च स श्रीदुर्योधनः परम् ॥३
पद्मोत्पलमृगाक्षीणि नोपमानानि यद्दृशोः ।
मन्ये विलासवन्ध्यत्वात् साऽस्य देवी सुलोचना ॥४
सुकेशी सुस्मिता स्वास्या या सुहस्ता सुवाक् [सुपात्] ।
स्वीर्या स्वङ्गी च किं तदाहूतिमात्रं सुलोचना ॥५
तौ चान्योन्यं वपुष्पात्रे सुखपीयूषपायिणौ ।
अस्तोदयौ न हि विदाञ्चक्राते अमराविव ॥६
स वैरिसिंहजीवो द्योर्देव्याः कुक्षाववातरत् ।
सुस्वप्नदोहदश्चैष समये समजायत ॥७
प्रत्यहं नवनवोऽस्य दशाहं जननोत्सवः ।
एकादशेऽह्नि सुषेण इति नामोत्सवोऽभवत् ॥८
सौभाग्यसुन्दरवपुस्ततः परमयं स्वयम् ।
दिवानिशमहो जज्ञे सर्वेषां नयनोत्सवः ॥९
आजन्म सकलोऽप्येष कल्प इत्येष भूभुजा ।
कलाचार्याय सकलकलार्थं ध्रुवमामार्प्यत ॥१०
उदूढनिःशेषकलं निष्कलङ्ककुलाङ्गनाः ।
तं पाणौ कारयाञ्चक्रे राट् स्वकीर्त्तिकृते ध्रुवम् ॥११
तत्र श्रीयौवराज्यश्रीः स्वयमेव समक्रमीत् ।
तां राट् संक्रमयन् स्नेहात् पौनरुक्त्यं विवेद न ॥१२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहर्निशमसौ राजचित्तसौधे वसन्नपि ।
स्ववधूकारणान्मन्येऽध्यास्त सौधान्तरं पुनः ॥१३

अन्येद्युर्जयपुरेशजयपुत्रीं नृसुन्दरी[ म् ] ।
स्वयंवरामुपयेमे कुमारेन्दुर्निशामिव ॥१४

श्वेतयित्वाऽभितः कीर्त्या शङ्खाभ्रकवलक्षया ।
चित्रयित्वा प्रतापेन कुरुविन्दसनाभिना ॥१५

आज्ञालाक्षावतारेण प्रोज्ज्वाल्य भुवनोदरम् ।
न्यायदौवारिकेणोच्चै रक्ष्यमाणोऽत्र सर्वतः ॥१६

रत्नरोचिर्विफलितप्रदीपद्युतिमण्डले ।
प्रधानेऽभ्यन्तरास्थाने निधाने सर्वसम्पदाम् ॥१७

पुण्यलक्ष्मीसखीराज्यकमलाकमलाकरे ।
स्वर्णरत्नोत्करोदारे श्रीसारङ्गाधिपासने ॥१८

अध्यासामासुषस्तस्य श्रीदुर्योधनभूपतेः ।
श्रीसुलोचनया देव्याऽलङ्कृतार्धासनश्रिया ॥१९

कुमारे श्रीसुषेणे चान्यासन्नासनमण्डने ।
यथौचितिनिविष्टैश्च वर्यसामन्तमन्त्रिषु ॥२०

प्रक्रान्तायां च साम्राज्यकिंवदन्त्यां समन्ततः ।
अन्तरन्तः परीहासोदन्ते च प्रविसर्पति ॥२१

रत्नकर्बुरितस्वर्णदण्डालङ्कृतपाणिकः ।
प्रियङ्करोऽन्यदा द्वाःस्थः पादौ नत्वा व्यजिज्ञपत् ॥२२॥ अष्टभिः कुलकम्

देव गर्जनकाधीशाप्रतिशत्रुमहीपतेः ।
सिंहद्वारेऽस्ति दूतोऽयं प्रभो यत् कृत्यमादिश ॥२३

द्रुतं प्रवेशयेत्युक्ते राजा दूतः सभामुपैत् ।
नत्वाऽऽसीनो विज्ञपयेत्यादिष्टो भूभुजाऽभ्यधात् ॥२४

विजनं कार्यतां देव राजोचे विजनं ह्यदः ।
यस्ते रहस्यं किमपि तन्निशङ्कमुदीरय ॥२५

---

१६:१. अज्ञा°.　　१९.४. श्रियः

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

दूतोऽब्रूत भुवीदानीं यत्प्रताप इरम्मदः ।
वैरिनारीक्षणैराभिर्माद्यन् सत्यान्वयोऽभवत् ॥२६

सोऽप्रतिशत्रुभूमीन्द्रो गर्जन् गर्जनकाधिपः ।
आज्ञापयति ते सम्यक् सावधानं निशामय ॥२७

यां नरसुन्दरीकन्यामुपयेमे त्वदङ्गजः ।
आसीन् मे सा वृता तत् तां प्रेषय द्रुतमेव भोः ॥२८

यद्वा गिरिं वा दरिं वा जलं वा स्थलमेव वा ।
शरणं प्रतिपद्यस्व नान्यथा जीवितं हि ते ॥२९

स्मित्वा दूतमथाब्रूत श्रीदुर्योधनभूपतिः ।
रे प्रभुस्ते स मे षत्तिः कुत एवंतरोऽस्य तत्(?) ॥३०

पुण्यक्षयाद् वा तस्येति मतिरद्य व्यजृम्भत ।
कन्दरासु स्थितं सिंहं रेकारयति कः सुधीः ॥३१

ततः प्रकुपितो दूतो भूताविष्ट इवावदत् ।
सदा त्वमेव मे स्वामितीर्थपादाम्बुजार्चकः ॥३२

तन्न किञ्चिदिदं राजन् भवदुक्तं ततो द्रुतम् ।
नृसुन्दरीमिमां देहि शरण्यं वा समाश्रय ॥३३

श्रीसुषेणकुमारोऽथ व्याजहेऽमुं सुदुर्मुखम् ।
पदोर्गृहीत्वा क्षिपत पुरीनिर्धमनेन भोः ॥३४

ततः क्षितिपतिः प्राह वत्सैतन्न खलूचितम् ।
दूते दण्डो न हि श्लाघ्यः किन्तु तत्रैव कुप्रभौ ॥३५

ततस्तातमनुज्ञाप्य चतुरङ्गचमूवृतः ।
तं प्रति श्रीसुषेणः स्राक् प्रतस्थे स्थेममन्दरः ॥३६

दूतं चाख्यद्द्रुतं गच्छ स्वप्रभोः प्रतिपादयेः ।
इदानीं पुरुषो भूयाः पातालेऽपि न मोक्ष्यसे ॥३७

निर्विलम्बैः प्रयाणैश्च कुमारः प्राप सीमनि ।
स्वदूतेन तमूचे च प्राप्तोऽहं क्षत्रियो भवेः ॥३८

---

३५.२. एतं न. ३६.४. स्थेन.°

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततस्तं सर्वप्रच्छन्नतादृग्विग्रहकारिणम् ।
परस्त्रीलिप्सुमसमवैरं मन्त्र्यादयोऽमुचत् ॥३९

सामन्ता मन्त्रिणः सर्वे श्रीसुषेणस्य तेऽमिलन् ।
ततः प्रधानत्यक्तः स प्रणनाश शृगालवत् ॥४०

श्रीसुषेणो गर्जनके प्रवर्त्य पितृशासनम् ।
महाबलांस्तत्र देशेऽस्थापयद् दण्डनायकान् ॥४१

वर्धापकं प्राहिणोच्च श्रीदुर्योधनभूभुजः ।
राजधान्यां स्वयं स्थित्वा सौस्थ्यं सर्वत्र चातनोत् ॥४२

ततः स्वराज्याभिमुखं ववले स बलेश्वरः ।
श्रीसुषेणो निजभुवि वसन्तपुरमाप च ॥४३

तत्र श्रीनन्दनोद्याने स्कन्धावारं न्यवेशयत् ।
क्रीडन् श्रीनरसुन्दर्या तस्थौ च कतिचिद्दिनान् ॥४४

इतः श्रीसिंहराजसुषेणमवबुध्य तम् ।
प्रबोधयोग्यं समरसेनसूरिरिहागमत् ॥४५

तत्रैव नन्दनवने तस्थौ च सपरिच्छदः ।
प्रभुं वंदारवः पौराः शुश्रूषुर्धर्मदेशनाम् ॥४६

तथा पौरादिभिर्वन्द्यमानान् निध्याय तान् गुरून् ।
श्रीसुषेणकुमारं तं पप्रच्छ नरसुन्दरी ॥४७

आर्यपुत्र पुरः केऽमी किमाचारं चरन्ति वा ।
कुमारोऽवगिमे श्वेताम्बरा धर्मं च कुर्वते ॥४८

प्रियाऽशास्त्रक्षुण्णगतिः कुमारं पुनरब्रवीत् ।
आर्यपुत्र धर्म इति कः शब्दार्थ उदीर्यते ॥४९

शास्त्राभ्यासी कुमारोऽपि प्रत्युवाच नृसुन्दरीम् ।
प्रिये दुर्गतिपात्यङ्गिधारणाद्धर्म उच्यते ॥५०

प्रियाऽऽह दुर्गतिः केयं प्रियोऽवक् नरकादिका ।
कथं नाथातीन्द्रियं हि नरकाद्यवसीयते ॥५१

अनुमानादिति प्रोक्ते कुमारेण प्रियाऽवदत् ।
प्रत्यक्षाविषये नाथानुमानं न प्रवर्तते ॥५२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुमानान्तरादेव तत्प्रवृत्तौ विदांवर ।
इतरेतराश्रयणानवस्थादि प्रसज्यते ॥५३

प्रियः प्राह प्रिये नात्र पूर्वदोषो स्थितिर्यतः ।
पूर्वानुमानं नान्त्याश्रिन् किन्तु पूर्वतराश्रयम् ॥५४

अनवस्थाऽपि नैवात्रावतरीतुं प्रगल्भते ।
द्वित्र(?)ज्ञानोदयेऽवश्यं जिज्ञासाविनिवृत्तितः ॥५५

किञ्च —

दृष्टसाधर्म्यतो वृत्त्याऽध्यक्षमप्यनुमानकम् ।
प्रवर्तकं ततस्तन्न भवेद् दूष्यानुमानवत् ॥५६

स्वप्न प्रत्ययदृष्टान्तात् प्रत्यक्षं न प्रमेति चेत् ।
तदाऽखिलव्यवहारोच्छेददोषस्तवापतेत् ॥५७

अपि चाप्तगिराऽप्येषा दुर्गतिर्बुध्यते बुधैः ।
साऽऽख्यदाप्तः क ऊचेऽसौ वीतरागस्त्रिलोकवित् ॥५८

न मृषाभाषणेऽमुष्य कारणं किमपीक्ष्यते ।
रागादिदूषितो ह्यज्ञः पुरुषो भाषते मृषा ॥५९

प्रेयस्यूचे तर्हि नाथ श्रुणुमः किं वदन्त्यमी ।
ततस्तौ दम्पती प्राप्तौ सूरिराजस्य सन्निधौ ॥६०

अपश्यतां प्रविशन्तौ प्रथमं तौ महामुनीन् ।
कायोत्सर्गवीरवज्रपर्यङ्काद्यासनस्थितान् ॥६१

नानालब्धितटिन्यब्धींस्तपःकृशितविग्रहान् ।
राजसामन्तमन्त्रीभ्यश्रेष्ठिसार्थपनन्दनान् ॥६२॥ युग्मम्

प्रेक्षांबभूवतुरथ व(?)दन्तस्तौ मुनीश्वरम् ।
सौम्यं सुधाकरमिव प्रभाकरमिवोज्ज्वलम् ॥६३

पयोधिमिव गम्भीरं धीरं काञ्चनशैलवत् ।
कल्पद्रुचिन्तामण्यादेर्माहात्म्यर्द्धिविजित्वरम् ॥६४॥ युग्मम्

ततो भक्त्या नमस्कृत्य तं सूरिं सपरिच्छदम् ।
आसांबभूवतुरिमौ प्राञ्जली सद्गुरोः पुरः ॥६५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रान्तरेऽवधिचरात् तं विज्ञाय नृपाङ्गजम् ।
श्रीमत्समरसेनस्य मुनीन्द्रस्योपजानुकम् ॥६६

पञ्च वर्णविमानानां धोरणीभिः समन्ततः ।
द्यां भुवं चान्तरा रम्यां सृजन्निव नवां दिवम् ॥६७

कलशैश्चविमानानां तामरसमयीमिव ।
दिवाऽपि च पताकाभिर्ज्योत्स्नाश्रेणिमयीमिव ॥६८

नान्दीतूर्यनिनादैश्च शब्दाद्वैतमयीमिव ।
गायद्भिर्गायनस्तोमैर्गान्धर्वैकमयीमिव ॥६९

नृत्यद्भिर्नर्तिकावृन्दैर्विद्युन्मालामयीमिव ।
मङ्गलपाठिनां पाठैः सन्मङ्गलमयीमिव ॥७०

कण्ठीरवद्वीपद्वीपिशार्दूलसरभादिभिः ।
यानैर्हंसहयाद्यैश्चभर्मा(?)विस्मयमयीमिव ॥७१

अगरैरमरीभिश्च गणनामतिगामुकैः ।
रूपान्तरैरिव निजैः परितः परिवारितः ॥७२

मनोवनेभश्रवणदृक्कुरङ्गैककार्मणम् ।
पदे पदे स्थिरं पश्यन् पुरः सङ्गीतकौतुकम् ॥७३

भास्वन्तमप्यभास्वन्तं तन्वंस्तनुविभाभरैः ।
श्रीशूरदेवस्तत्राऽगात् सौधर्मेन्द्र इवाऽपरः ॥७४॥ नवमिः कुलकम्

तावद्देवपरीवारः स प्रादक्षिणयत् प्रभुम् ।
गुरुभक्तिभराक्रान्त इव नीचैः ननाम च ॥७५

भगवन्तमनुज्ञाप्य सिंहासने निविश्य च ।
एकैकबाहोः स्त्रीपुंसपात्रैर्द्वात्रिंशता क्षणात् ॥७६

षोडश षोडश नाट्यान्याधाय पुरतः प्रभोः ।
उपदर्श्योपसंहृत्य नत्वा स्तुत्वा पुनः प्रभुम् ॥७७

विनयात् प्रश्नयित्वा च श्रुत्वा निर्वचनानि च ।
यथागतं जगामाशु स श्रीनिर्जरशेखरः ॥७८॥ त्रिभिर्विशेषकम्

---

६८.२. तामर्यस. ७३.४. पुरंः

कुमारस्तदिदं वीक्ष्य विस्मयस्मेरमानसः ।
दध्यावहो भगवतो भगवत्ता महाद्भुता ॥७९

पप्रच्छ च प्रभो कोऽयं महामाहात्म्यमन्दिरम् ।
अमानं महिमानं यश्चकारेति प्रभोः पुरः ॥८०

प्रभुर्जगाद कौशाम्ब्यां सुधर्मस्वामिनोऽन्तिके ।
वयं दशापि निष्क्रान्ता इत्यादि प्राग्गतक्रमम् ॥८१

श्रीवैरिसिंहजिवस्त्वं सुरात्मात्वेष निर्जरः ।
जयशासनजीवोऽहं त्वद्बोधार्थमिहागमम् ॥८२

अथेहापोहादि कृतस्तस्य श्रीराजजन्मनः ।
प्राग्भवव्यञ्जिकोद्बुद्धा स्राग् जातिस्मृतिदीपिका ॥८३

अमानज्ञानश्रद्धानसंवेगावेगतस्ततः ।
भक्त्या विज्ञापयामास गुरुं कुरुनृपात्मजः ॥८४

सम्बोध्य मातापितरौ रुचिरौचित्युक्तिभिः ।
प्रभो युष्मत्पदाम्भोजे श्रयिष्ये राजहंसताम् ॥८५

तत्रामात्यैरथाहूय पितरावन्वजिज्ञपत् ।
अतिसंवेगवैराग्यातिनिर्बन्धप्रबन्धतः ॥८६

अथ वरिवसितश्रीसर्वदेवाधिदेवः
प्रविरचितयथेच्छामानदानावदानः ।
जिनमहिमजुषोऽस्य श्रीगुरोः पादपद्मे
चरणमधु सकान्तोऽपात् सुषेणद्विरेफः ॥८७

इतिश्री निर्वाणलीलावतीमहाकथेतिवृत्तोद्धारे **लीलावतीसारे** जिनाङ्के **वैरिसिंहराजपुत्र-जीव-श्रीसुषेणकुमार-दीक्षा-व्यावर्णनो** नाम **षोडश उत्साहः*** ।

---

८४.४. नृपात्मजः
* ग्रं. ९०.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सप्तदश उत्साहः

इतश्च मगधाभिधे जनपदे सुदा(? धा)मास्पदे
ऽस्ति राजगृहपत्तनं वसुमतीशिरोमण्डनम् ।
इहास्त जयधर्मराट् क्रमपराक्रमस्वर्गिराट्
सती सुभगतावती प्रियतमाऽस्य पद्मावती ॥१

तदीयउदरान्तरे हरिणराजसुस्वप्नतो
ऽवतारमकरोत् सुरो विजयसेनराजर्षिसूः ।
प्रशस्यसमयेऽसकौ समजनिष्ट दिष्टाम्बुधिः
स सिंहनृपशेखरो विजयते भवानेव हि ॥२

य एष कथितः पुराऽत्र वसुदेवदेवः सको
ऽरिमर्दनसुताऽभवन्निभलवेन(?) लीलावती ।
स साधु धनदेवकोऽजनि सुरालयात् प्रच्युतो
ऽसकौ कमलकेसरस्तव सुनन्दनः सम्प्रति ॥३

प्रबोधसमयोऽधुना नृप तवेत्यसौ प्रेषितः
प्रगे पठितवान् सुरस्तव च धर्मरागोऽभवत् ।
वयं च तदिहागतास्तत इदं मया मूलतो
विरागमतिकारणं निजमुदीरितं विस्तरात् ॥४

इति श्रुतवतां क्षणान्नृपतिर्सिंहदेवी तनू-
रुहां हृदुदये जनुःस्मृतितमोऽपदः(?) प्रोदगात् ।
ततोऽखिलविलोकनाज्जगुरमी भवाब्धेस्त्वया
वयं मुनिप तारितास्तदधुना विधेयं दिश ॥५

तदा च सहसाऽऽगतो गुरुमुवाच शूरामरः
प्रबोधयितुमेष मां नृपसुतः प्रतिश्राव्यताम् ।
सुतोऽस्य भविताऽस्म्यहं यदथ राजसूरब्रवीद्
व्रतेच्छुरधुनाऽप्यहं तत इद कुतःसम्भवि ॥६



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जगावथ स निर्जरः स्फुरति ते चरित्रावृति-
स्तदाश्रय नृपश्रियं त्वदपरे तु दीक्षाश्रियम् ।
ततः स्वसमये भवानपि हि दीक्षिता सिंहत-
स्तदेतदमरोदितं सपदि ते समे मेनिरे ॥७

नृपः सपदि पद्मकेसरमथ स्वराज्ये न्यधात्
सुरोऽस्य विदधेऽद्भुतंनृपतिताभिषेकोत्सवम् ।
पिताऽस्य नृपतेरदात् समनुशास्तिदम्भान्निजा-
न्तरङ्गमपि वैभवं बत महाशयाः सर्वदाः ॥८

ततः पटहपूर्वकं मतमदापयत् सर्वतो
नृपो व्यरचयत्तरां जिनगृहेष्वथाष्टाहिकाः ।
नितान्तमपराधिनामपि हि बन्दिमोक्षं व्यधा-
दमारिमुदघोषयत् त्रिभुवनाभयारम्भवत् ॥९

सुचन्दनविलेपनैः किल यशोभिरापाण्डुरो
दुकूलवसनैश्च फेनिलपयोब्धिलीलां दधिः ।
समौक्तिकपरिष्कृतिच्छलसमक्षभास्वद्गुणः
प्रसूनविकचस्रजा स्रजित एव दीक्षाश्रिया ॥१०

सुरेण सह पद्मकेसरनृपेण क्लृप्तोत्सवः
सुरद्रुम इव प्रवर्तितमतप्रदानोद्धवः ।
दिगन्तरचरज्जनागमनकारिनांदीरवः
पुरो मगधमण्डलोच्छलितकाव्यकोलाहलः ॥११

सहस्रनरवाहिकां सुशिबिकां समध्यासितः
क्षितीश्वरकरस्फुरच्चमरपुण्डरीकाद्भुतः ।
पुरप्रवरसुन्दरीक्षपितलाजपुष्पार्चितः
सुकण्ठसधवाङ्गनासततगीततन्मङ्गलः ॥१२

व्रतोद्यदरिमर्दनप्रमुखमुख्यसामन्तयुक्
सुबुद्ध्यमलबुद्धिकप्रभृतिमन्त्रिवर्गान्वितः ।
सुसाध्व्यनुपमव्रताचरणचित्तलीलावती-
प्रियाप्रभृतिनाऽवरोधनजनेन संसेवितः ॥१३

७.१. निर्जर.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वयस्यवरिवस्यितः सजिनदत्तसुश्रावकः
परिव्रजितुमुत्सुकः सपदि सिंहभूमीश्वरः ।
पुरात् स्वरूपमान् ततः प्रचलितोऽथ नन्दीश्वरे
महोत्सवचिकीर्षया सुरपतिर्यथा दिद्युते ॥१४॥

पञ्चभिः कुलकम्

अथोपवनतीर्थमैत् सुगुरुदैवतालङ्कृतं
विहाय शिविकामसौ सपदि पादचारी ययौ ।
प्रदक्षिणयता गुरुं सह परिच्छदेन त्रिधा
ऽमुनावसुमतीशिना त्रिगतिका किलाकुण्डलि ॥१५
प्रणम्य पदपङ्कजं समरसेनसूरेर्गुरो-
र्व्रताय समुपस्थितः सह परिच्छदेनामुना ।
स सिंहनृपतिर्यदा खलु तदैव मोहद्विषो
महापुरवरेऽभवत् सततमेव भङ्गानकम् ॥१६
विमुच्य वसनादिकं सुमुनिवेषमेषोऽदधात्
समाङ्गकवचं किल प्रबलमोहनिर्जित्वरम् ।
रजोहृतिमुखांशुके सदसि खेटकेऽन्वग्रहीत्
कचोद्धृतिमिषात् किलाख्यदिति शात्रवोन्मूलनम् ॥१७
नमस्कृति पुरःसरं समयिकस्य सूत्रं जगौ
सुमन्त्रमिव मोहराट्सकलचम्ववस्थापकम् ।
प्रदक्षिणनया पुनः समरसेन सूरेर्गुरो-
र्जगाद करणत्रिकांतरयमेव मेऽतः परम् ॥१८
स सिंहनृपतिर्मुनिः सपदि सा च लीलावती
तके नृपतिमन्त्रिणः सजिनदत्तसुश्रावकः ।
महर्षिपदवीवृताः ससुरदानवैर्मानवैः
प्रमोदगुरु नेमिरे किमपि जिग्यिरेऽन्तर्द्विषः ॥१९
प्रणम्य सपरिच्छदं समरसेनसूरिं गुरुं
जगाम पुरि पद्मकेसरनृशेखरस्तत्र च ।
प्रतापविजिताहितः किमपि कीर्तिभागीरथी-
पवित्रितजगत्त्रयोऽन्वशिषदिन्द्रवत् स्वं पदम् ॥२०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विलाससुखमन्वभूत् सह सदैव पद्मश्रिया
तदीय उदरेऽन्यदा निगदितः शुभः स्वलाहलः (?) ।
इतः –
स शूरमुनिनिर्जरः सुततयाऽवतारं यया-
वसूत समये च तं कमलिनीव लीलाम्बुजम् ॥२१

चकार नृपपद्मकेसर उदारजन्मोत्सवात्
परं निजतनूद्भवे सपदि कार्तवीर्याभिधा ।
क्रमात् स सकलाः कलाः शुभकलाश्च राट्पुत्रिका
मुदाऽष्ट परिणीतवान् युवनृपश्रियं चाप्तवान् ॥२२

इतश्च स महामुनिर्गुरुमुखाम्बुजाद्द्वादशा-
ङ्गिकां च चतुरर्णवीमिव सुखान्मुदाऽधीतवान् ।
ततश्च स निजे पदे समरसेनसूरीश्वरैः
शिवास्पदनिबन्धने गुरुमहैरवास्थाप्यत ॥२३

तदनु स मुनिसिंहसूरिः समान्तात् स्खलनविरहितोद्यत्सत्क्रमोदारचर्यः ।
सपदि विजयदेवापास्तदुर्दर्शनेभोऽवृजिनमिह विहारं सारमुच्चैश्चकार ॥२४

**इति श्रीलीलावतीसारे** जिनाङ्के **श्रीसिंहमहाराजदीक्षा-सूरिपद-व्यावर्णनो**
नाम **सप्तदश उत्साहः** ॥*

---

* ग्रं. ५२.

## अष्टादश उत्साहः

अथ श्रीसमरसेनो विहितैहिकसत्कृतः ।
श्रीविमलसेनसुरन्धरौ कुसुमशेखरः ॥१

कुलमृगाङ्कः सुषेण इति पञ्चर्षिभिः सह ।
सन्ततक्षतषष्टकैरिति दुष्कर्म वर्ष्मवत् ॥२

तथा हि —

द्वादश प्रतिमा मुक्तावली च कनकावली ।
रत्नैकावल्यौ च गुणरत्नसंवत्सरं तथा ॥३

लघीयश्च महीयश्च सिंहनिष्क्रीडितं तथा ।
महीयश्च लघीयश्च भद्रं भद्रोत्तरं तपः ॥४

आचामाम्लवर्धमानं तपश्चान्द्रायणं तथा ।
इत्थं तपोभिः सुकृशाः शिवे मातुं नु तेऽभवत् ॥५॥ त्रिभिर्विशेषकम्

ज्ञात्वाऽथ समरसेनसूरीन्द्रः शेषमायुषः ।
सम्मेतशैलशिखरे महाशुद्धशिलातले ॥६

संस्तारकं समारुह्यानशनं प्रतिपद्य च ।
पद्मासनस्थः पूर्वाभिमुखो मौलीकृताञ्जलिः ॥७

गरीयस्तरसंवेगतरङ्गोत्तुङ्गमानसः ।
मधुरध्वनिनाऽऽरेभे वक्तुमाराधनामिति ॥८॥ त्रिभिर्विशेषकम्

नमोऽर्हते भगवते ज्ञानदर्शनशालिने ।
नृसुरासुरपूज्याय ज्यायसे जगतामपि ॥९

यादवान्वयसूर्याय संप्राप्ताक्षयसम्पदे ।
प्रवाद्यत्कीर्तितूर्याय सर्वतोऽपि निरापदे ॥१०

संसारार्णवनिर्मग्नजन्तुसन्तानतारिणे ।
कर्मवल्लीवितानैकनेमयेऽरिष्टनेमये ॥११॥ त्रिभिर्विशेषकम्

---

८.२. तरंगतरंगोतुंग°.

अर्हतां सर्वसिद्धानां मनःपर्यवशालिनाम् ।
अवधिज्ञानिनां सर्वश्रुतकेवलिनामपि ॥१२

पुरतः परमप्रीत्याऽतिचारमलमात्मनः ।
प्रक्षालयामि परितो निन्दागर्हादिवारिभिः ॥१३॥ युग्मम्

तथा हि —

अकालादिः श्रुतज्ञाने दर्शने शङ्कितादिकः ।
चारित्रे त्वसमित्यादिस्तपस्यकरणादिकः ॥१४

वीर्ये तु निगूहनादिर्योऽतिचारामयो मम ।
संजातस्तं चिकित्सामि निन्दागर्हादिभैषजैः ॥१५॥ युग्मम्

यच्च सूत्रार्थपौरुष्योः प्रतिलेखनकादिषु ।
कषायेन्द्रिययोगेषु दुश्चक्रे शोधयामि तत् ॥१६

महाव्रतानि पञ्चाप्याददे तेषां पुरः पुनः ।
अष्टादशाघस्थानानि क्षालयामि मुहुर्मुहुः ॥१७

क्षमयामि सर्वान् जीवान् क्षाम्यन्तु मयि ते समे ।
तेषां क्षाम्याम्यहमपि मैत्री सर्वेषु मेऽधुना ॥१८

आहारमुपधिं सर्वं वपुश्च चरमक्षणे ।
समक्षमर्हदादीनां व्युत्सृजामि त्रिधा त्रिका ॥१९

परमेष्ठिनमस्कारप्रत्याहारविधानतः ।
ध्यायन्नन्तर्मुहूर्तं स पादपोपगमं व्यधात् ॥२०

विदधदिति च पञ्चाचारिकाराधनां स
प्रतिसमयमुदीतोत्तुङ्गसंवेगवेगः ।
क्षपकमुनिपदव्या प्रस्थितो घातिघाता-
न्निरुपमितिमवापत् केवलज्ञानलक्ष्मीम् ॥२१

तदनु तदनुयातः पातयित्वा क्षणान्त-
र्दुरभिभवलवोपग्राहिकर्मारिवारम् ।
सममसममुनीनां पञ्चशत्या व्यलासीत्
सुगुरुसमरसेनः श्रीमहानन्दपुर्या[म्] ॥२२

---

१४.२. संकितादिकः. १९.४. न्युत्सृजामि. २१.२. °तोत्तंग°.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं विमलसेनोऽपि बुद्ध्वाऽऽयुःशेषमात्मनः ।
गुरूननुज्ञाप्य सार्धं गीतार्थैः प्रतिचारिभिः ॥२३

श्रीसम्मेतगिरेः शृङ्गे सुपुष्कलशिलातले ।
पद्मासन्यैवमूचेऽथ मौलिकुड्मलिताञ्जलिः ॥२४॥ युग्मम्

नमो भगवते नेमिस्वामिने शिवगामिने ।
भूर्भुवःस्वस्त्रयीपूज्यपादाय परमात्मने ॥२५

तथा —

नमोऽर्हद्भ्योऽस्तरागेभ्यः सम्यग्वाग्भ्यश्च केवलात् ।
अर्हत्सिद्धादिभेदेभ्यः सिद्धेभ्यश्च नमो नमः ॥२६

गणभृत्प्रमुखेभ्यश्चार्येभ्य स्तान्नमो नमः ।
उपार्येभ्यः सर्वाङ्गाध्यापकेभ्यो नमो नमः ॥२७

महाव्रताद्रीन्द्रभृद्भ्यः साधुभ्योऽपि नमो नमः ।
मनसा वपुषा वाचा वंदेऽस्मि परमेष्ठिनः ॥२८

तेषां च पुरतः सर्वानतिचारान् विशोधये ।
यदेते धर्मप्रासादसूत्रधारसहोदराः ॥२९

यन्मयाऽनादौ संसारे मिथ्यात्वावृतबुद्धिना ।
अनार्यमुपदिष्टं तद्गर्हे निन्दामि सर्वतः ॥३०

नास्ति जीवो नास्ति धर्मः सर्वज्ञो नास्ति कश्चन ।
नास्तिकेन मयोचे यद्गर्हे निन्दामि तत् त्रिधा ॥३१

यत् स्त्रीशस्त्राक्षसूत्रादिरागाद्यङ्ककलङ्किताः ।
देवत्वेन मयोच्यन्त गर्हे निन्दामि तत् त्रिधा ॥३२

पापश्रुतं यच्च मयाऽधीतमध्यापितं तथा ।
प्रतिक्रामामि तत् सर्वं सर्वथाऽपि हि सम्प्रति ॥३३

इष्टापूर्तादि पापं यत् क्वापि धर्मतया मया ।
उपदिष्टमनुज्ञातं गर्हे निन्दामि तत् त्रिधा ॥३४

---

२७.३. उपायेभ्यः.   ३४.१. इष्टापूत्ता°.

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

सम्यक्त्वं महाव्रतानि गृहीतान्यपि सद्गुरोः ।
पुनः सिद्धादिप्रत्यक्षं गृह्णाम्येष विशुद्धये ॥३५

अर्हत्सिद्धाचार्यचैत्यसङ्घश्रुतसधर्मसु ।
याऽऽशातना कृता काचित् तां निन्दामि मुहुर्मुहुः ॥३६

छद्मस्थो मूढचेतास्तु कियन्मात्रं स्मरेदिह ।
यन्न स्मरामि तत्रापि मिथ्यादुष्कृतमस्तु मे ॥३७

क्षमयामि सर्वान् जीवांस्त्रसस्थावरभेदिनः ।
पापप्रक्षालनादेवं शुद्धोऽहं सर्वथाऽधुना ॥३८

मुञ्चे चतुर्विधाहारं धर्मोपकरणं तथा ।
वपुश्च प्रान्त्यसमये परकीयमिवाधुना ॥३९

इत्येवं परमेष्ठिपञ्चकनमस्कृद्ध्यानधाराजल-
प्रक्षालप्रगलन्मलः सुविधिना गर्हाकृतश्रावणः ।
लात्वा श्रीजिनपालविध्यनशनं दिव्यं सुशुद्धिं गतः
प्राप श्रीविमलादिसेनऋषिराट् सत्केवलं निर्वृतिम् ॥४०

इति **श्रीनिर्वाणलीलावतीसारे** जिनाङ्के **श्रीसमरसेनसूरि-विमलसेन-महर्षि-निर्वाण-व्यावर्णनो** नाम **अष्टादश उत्साहः** * ।

* ग्रं. ४५.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## एकोनविंशतितम उत्साहः

तथा सुरन्धरमुनिर्ज्ञात्वा पर्यन्तमायुषः ।
नमस्कृत्य चैत्यसाधून् क्षमयित्वाऽखिलं गणम् ॥१

वितीर्णालोचनः क्लृप्तानशनो गीतसाधुयुक् ।
सम्मेते पद्मासनस्थः सुविशालशिलातले ॥२

पूर्वपुरुषदिक्प्राप्त्यै पूर्वाशाभिमुखः किल ।
मूर्धन्यस्तहस्तकोशोऽपाठीदाराधनामिति ॥३॥ त्रिभिर्विशेषकम्

नमो मिथ्यात्वतिमिरविध्वंसैकविवस्वते ।
क्रोधोषर्बुधमेघाय मानाम्भोदनभस्वते ॥४

मायावल्लीपरशवे लोभाम्भोधिघटोद्भवे ।
अरिष्ठनेमिने भक्त्या द्वाविंशाय जिनेशिने ॥५

अपि च –

सुरासुरनरस्वामिकृतामर्हन्ति येऽर्हणाम् ।
भूर्भुवःस्वस्त्रयीशानास्तेऽर्हन्तो मङ्गलं मम ॥६

त्रैलोक्यजयिनो रागद्वेषमोहमहारयः ।
यैर्हतास्तेऽरिहन्तारो भवन्तु मम मङ्गलम् ॥७

ध्यानाग्निना भवबीजमिथ्यात्वादिप्रदाहतः ।
ये न रोहन्ति संसारे तेऽरोहन्तश्च मङ्गलम् ॥८

क्षीणाष्टकर्मारयो ये भुञ्जते शिवसम्पदम् ।
कृतकृत्या भगवन्तः सिद्धास्ते मम मङ्गलम् ॥९

मतिश्रुतावधिमनःपर्यवकेवलाब्धयः ।
प्रत्येकबुद्धादयश्च साधवो मम मङ्गलम् ॥१०

क्षान्त्यादिर्दशधा धर्मः शुद्धः सर्वज्ञभाषितः ।
भवाम्बुधौ निरपायः पोतश्च मम मङ्गलम् ॥११

Lila.–49

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नारकामरतिर्यङ्नृसमुदायेऽत्र निश्चितम् ।
अर्हन्त उत्तमा एते भूधरेषु सुमेरुवत् ॥१२

व्यवहार्यास्तदन्येभ्यः सूक्ष्मकेभ्यस्तु बादराः ।
पर्याप्तास्त्वपर्याप्तेभ्यो निगोदेभ्यः परीत्तकाः ॥१३

नारकेभ्यश्च तिर्यञ्चस्तेभ्यो मर्त्यास्ततः सुराः ।
देवेभ्यो देवाधिदेवा अर्हन्तो ध्रुवमुत्तमाः ॥१४॥ युग्मम्

येषां गर्भे जनने च व्रते केवलमोक्षयोः ।
त्रैलोक्यं क्षुभ्यति यथा प्रमोदभ[र]मेदुरम् ॥१५

तथा हरिहरादीनां कस्याप्यन्यंतरस्य न ।
अर्हन्तो भगवन्तोऽमी ततोऽपि जगदुत्तमाः ॥१६

त्रैलोक्यमूर्ध्नि कोटीराः शाश्वताः शर्मभाजनम् ।
कृतकृत्या भगवन्तः सिद्धास्तद्भुवनोत्तमाः ॥१७

सुरासुरनराः सर्वे स्मरवीरस्य किङ्कराः ।
तज्जेतारः साधवोऽमी भवन्ति जगदुत्तमा ॥१८

सर्वज्ञभाषितो मर्त्यामर्त्यपूज्यश्च शाश्वतः ।
त्रिकोटीदोषमुक्तश्च धर्मो लोकोत्तमः स्फुटम् ॥१९

दुर्वारदुःखसम्भारागारसंसारचारतः ।
यैर्मोच्यते जगत् सर्वं तेऽर्हतः शरणं मम ॥२०

येषां नामोत्कीर्तनेन भक्तिरागान्नमस्कृतेः ।
सिद्धास्पदं प्राप्यते ते सिद्धाश्च शरणं मम ॥२१

सहाया असहायानां ये धर्मे शिववर्त्मनि ।
रत्नत्रयीभूषितास्ते साधवः शरणं मम ॥२२

यज्जगद्बान्धवैर्दिष्टं सर्वज्ञैः सर्वदर्शिभिः ।
नित्यारोग्याय तत् कुर्वे शरणं धर्मभैषजम् ॥२३

सर्वान् जीवान् क्षमयामि तेषु क्षाम्यामि सर्वतः ।
ददे मिथ्यादुष्कृतं च त्यजामि मलवद् वपुः ॥२४

१५.४. प्रमोदभमेदुरां.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुःशरणिकामिमां दृढतमां चतुष्पोतिकाम्
निरुद्धनिखिलास्रवासितपटाञ्चितां संश्रितः ।
व्यतीतभववारिधिः परमवित्तिशृङ्गारितः
सुरन्धरमुनिः शिवास्पदरसां समाशिश्रियत् ॥२५

अथ प्रान्त्याराधनाया ज्ञात्वाऽवसरमात्मवित् ।
प्रागुक्तयुक्तया सम्मेतगिरौ शुद्धशिलातले ॥२६

प्राङ्मुखः पद्मासनस्थो मुनिः कुसुमशेखरः ।
पर्यन्ताराधनामेवं मधुरध्वनिनाऽपठत् ॥२७

नमो देवाधिदेवाय भुवनत्रयबन्धवे ।
निस्तीर्णविस्तीर्णतमापारसंसारसिन्धवे ॥२८

जगत्त्रियदीपाय निष्प्रतीपाय तायिने ।
अरिष्टनेमये नित्यं नित्यनिर्वृतिदायिने ॥२९

प्राणातिपातमखिलं मृषावादमदत्तकम् ।
मिथुनं परिग्रहं च सर्वतो रात्रिभोजनम् ॥३०

गुरोः पुरः प्रतिख्यातं वरमप्यधुना पुनः ।
प्रत्याख्यामि प्रभोरग्रे प्रसद्य प्रेक्षतां प्रभुः ॥३१ युग्मम्

अशनं पानकं खाद्यं स्वादिमं सर्वमेव हि ।
यावज्जीवं विविधेनापथ्यदं व्युत्सृजाम्यहम् ॥३२

यदपीदं वपुः पूर्वं शीतादेर्यन्न रक्षितम् ।
सर्वथा तदपीदानीं व्युत्सृजाम्यस्मि पांशुवत् ॥३३

तथाऽनादौ भवे नानाविमानभवनादिषु ।
यन्ममत्वं मया चक्रे तत् त्यजामि कुमित्रवत् ॥३४

यच्च किञ्चिन्मे ममत्वं मानवीष्वमरीषु च ।
तिरश्चीषु च तत् सर्वं व्युत्सृजामि पलालवत् ॥३५

यन्मे ममत्वं पुत्रेषु पवित्रेषु गुणश्रिया ।
तदिदानीं व्युत्सृजामि स्वजामिप्रभृतिष्वपि ॥३६

---

३२.४. °पथ्यद.

यन्ममत्वं परीवारे प्रियमित्रेषु बन्धुषु ।
सर्वकालीनमधुना धुनामि पदधूलिवत् ॥३७

चतुरङ्गेषु सैन्येषु भाण्डागारे पुरे जने ।
मया ममत्वं यच्चक्रे तच्चक्रे थूत्कृतं यथा ॥३८

स इत्याराधनामुक्त्वा निषण्णस्तृणसंस्तरे ।
आरुक्षत् क्षपकश्रेणीं निःश्रेणीं शिवसद्मनि ॥३९

अमुं कुसुमशेखरं शुभसमाधिसूरप्रभा-
पहस्तिततमोरिपुं सपदि केवलश्रीः स्वयम् ।
स्वयंवर वरस्रजा वरयति स्म तद्भाजिनं
तमाशु शिवसुन्दरी सममुपायत प्रेमतः ॥४०

इति श्रीनिर्वाणलीलावतीसारे जिनाङ्के सुरन्धर-कुसुमशेखर-महामुनि-निर्वाण-व्यावर्णनो नाम एकोनविंशतितम उत्साहः ॥*

* ग्रं. ४४.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## विंश उत्साहः

अथ श्रीकुलमृगाङ्कः शशाङ्क इव पार्वणः ।
ज्ञात्वाऽस्तकालं सम्मेतास्तगिरिं समशिश्रियत् ॥१

शिलापट्टे दृढपद्मासनस्थायी पुरोमुखः ।
मौलिस्थकरमुकुलो वक्तुमेवं प्रचक्रमे ॥२

अरिष्टनेमे भगवन् भुवनैकविभूषण ।
आदिकर्तर् लोकनाथ लोकोत्तम तमोपह ॥३

तुभ्यमभ्यन्तरोल्लासिभक्तितोऽस्तु नमो नमः ।
शृणु प्रसद्य भगवन् ब्रुवे किञ्चिन् मनोगतम् ॥४॥ युग्मम्

तवैव पुरतो नाथाधुना निन्दामि दुष्कृतम् ।
आस्रवान् सकलानेव पिदधामि च सर्वतः ॥५

प्राणप्रहाणं रे जीव त्वया प्राप्तं मुहुर्मुहुः ।
तत्परिचितस्य प्राप्तौ क्षोभितव्यं त्वया न हि ॥६

नरके मार्गितमपि न त्वयेदं पराप्यत ।
सम्प्रत्यमार्गिते तत्र लब्धे हर्षो विधीयताम् ॥७

गर्भस्थोऽथ जायमानो बालोऽथ तरुणो जरन् ।
मुहुर्मृतोऽसि तत् सम्प्रत्यर्तिं मैव वृथा कृथाः ॥८

चक्रेश्वरश्रीधराद्या ये चात्रापरपौरुषाः ।
शाश्वतास्तेऽपि नाऽभूवंस्तत् किं त्वमिह खिद्यसे ॥९

ये वज्रकाया देवेन्द्रप्रातिहार्यसपर्यिताः ।
तेऽप्यर्हन्तः स्थिरा नात्र तत् काऽर्तिस्ते व्ययागमे ॥१०

इन्द्राहमिन्द्राः सर्वेऽपि च्यवन्ते स्वायुषः क्षये ।
तदात्मन्नात्मनात्मानं धैर्यवर्मितमातनु ॥११

तथा राध्नुहि पर्यन्तः समयं सम्यगात्मनः ।
पण्डितमृत्युना मृत्युञ्जयः स्या अभवोऽपि यत् ॥१२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्थं कुलमृगाङ्कस्याराधनां पठतोऽपि हि ।
आरूढस्य समाधिद्रोः क्षपकश्रेणिवीरुधम् ॥१३

केवलज्ञानस्तबकसौरभं जिघ्रतः क्षणात् ।
महोदयफलं हस्तकुशेशयमुपागमत् ॥१४ युग्मम्

प्रभो जगदिदं गिलत्यलमनित्यताराक्षसी
तदेतदनुपद्रुते नय पदे क्वचिन्मामिति ।
सुविज्ञपनतोऽमुना सुमुनिना ध्रुवं नेमिना
प्रहित्य परमां विदं ध्रुवपदेऽयमावास्यत ॥१५

एवं कियत्स्वप्यहस्सु सुषेणोऽपि महामुनिः ।
पर्यालोच्यायुःपर्यन्तं सम्मेताद्रौ शिलातले ॥१६

तृणसंस्तारमास्तीर्यात्तमाङ्गकरकुड्मलः ।
पर्यन्ताराधनामुच्चारयामास मृदुध्वनिः ॥१७॥ युग्मम्

श्रीयादवकुलाम्भोधिशरत्पर्वसुधांशवे ।
आजन्मसीममथितदुर्वारविषमेषवे ॥१८

कर्पूरपूरसुरभिकीर्तिव्याप्ताब्धिनेमये ।
नमस्याय त्रिजगतामों नमोऽरिष्टनेमये ॥१९॥ युग्मम्

तत्पुरः प्राणातिपातं मृषावादमदत्तकम् ।
अब्रह्मपरिग्रहं च संपरायचतुष्टयम् ॥२०

बन्धने कलहाभ्याख्यानके माया मृषा तथा ।
पैशुन्यान्यपरिवादमिथ्यात्वारतिरत्यथ ॥२१

इत्यष्टादशपापानां स्थानकान्यखिलान्यपि ।
मोहराट्स्थानकानीव नाशयामि समन्ततः ॥२२

चतुर्विधं तथाऽऽहारं प्रत्याख्यामि त्रिधा त्रिधा ।
सर्वाभीष्टमपि वपुस्त्यजामि तृणखण्डवत् ॥२३

किञ्च —

एकद्वित्रिचतुष्पञ्चेन्द्रिया जीवा भवाटवौ ।
अत्राणा अशरणाश्च निहन्यन्ते परस्परम् ॥२४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा –

पिता माता सुता भ्राता बन्धुमित्रनृपादयः ।
शरणं न भवन्त्यत्र स्वयं ह्यशरणा अमी ॥२५

तदसारेऽत्र संसारे सर्वज्ञोपज्ञ आगमः ।
क्षान्त्यादिर्दशधा धर्मः शरणं नापरः पुनः ॥२६

तच्च जीवाधुना लब्धं सुदुर्लभ्भमपि त्वया ।
ततः पर्यवसानेऽपि का चिन्ता तव साम्प्रतम् ॥२७

इत्येवं भावयन्नेव श्रीसुषेणमहामुनिः ।
शुक्लध्यानरत्नसानुमारुरोहातिरंहसा ॥२८

अर्धाऽधिरूढे तत्रैष परापत् केवलश्रियम् ।
सर्वाधिरूढे त्वद्वैतमुदं कैवल्यसम्पदम् ॥२९

संसारचारकगृहेऽशरणस्तमोन्धो
दुःखातुरोऽस्मि तदधीश्वर मामवेति ।
एतद्गिरेव विमलावृजिनप्रबोध-
धाम्ना स्वपार्श्वमनयत् प्रभुनेमिरेतम् ॥३०

इति श्रीनिर्वाणलीलावतीसारे जिनाङ्के श्रीकुलमृगाङ्क-श्रीसुषेण-महामुनि-निर्वाण-व्यावर्णनो नाम विंश उत्साहः ॥*

२६.२. मागमः
* ग्रं. ३३.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# एकविंशतितम उत्साहः

श्रीसिंहसूरिनृपतिः परतीर्थिकाज्ञामुत्थापयन् प्रतिपदं द्रढयन् जिनाज्ञाम् ।
ग्रामाकरादिषु विहृत्यतरां परेद्युः श्रीराजिराजगृहकाननमाजगाम ॥१

सद्यः प्रियंवद इति प्रथिताभिधान उद्यानपालकवरश्च तदागमेन ।
श्रीपद्मकेसरनृपं सहपुत्रपौत्रगोत्रं स्म वर्धयति तस्य परिच्छदं च ॥२

राजा प्रमोदभरनिर्भरहृन्निशान्तः स्वर्णांशुकादिनिकरप्रतिपादनेन ।
उद्यानपालकममुं सहपुत्रपौत्रगोत्रं स्म वर्धयति तस्य परिच्छदं च ॥३

सामन्तमन्त्रिवरपौरजनानुयातः सान्तःपुरश्च चतुरङ्गचमूवृतश्च ।
श्रीसिंहसूरिगुरुराजनमस्यनाय श्रीपद्मकेसरधराधिपतिश्चचाल ॥४

हे शेषकूर्मपतिदिग्द्विरदा इदानीं सर्वौजसा क्षितितलं सकलं प्रधत्त ।
श्रीपद्मकेसरनृशेखर एष सर्वऋद्धया प्रयाति गुरुराजसभाजनाय ॥५

गत्वोद्यानमसौ विहाय नृपतेश्चिह्नानि सूरीक्षणे
मूर्धन्यस्तसुहस्तकुड्मलमिषात् संगीर्णतच्छासनः ।
तत् तावत् परिवारयुक् क्षितिपतिज्योतिष्पतिः श्रीगुरुं
मेरुक्षोणिधरं प्रदक्षिणयति स्मानन्दरोमाञ्चितः ॥६

पञ्चाङ्गसंस्पृष्टमहीतलश्च तत्पादपद्मं स नमश्चकार ।
तत्र स्थिरस्थायुकपुण्यलक्ष्म्या भालस्थले संक्रमणाय मन्ये ॥७

यथास्थानासीने नृपतितिलके तत्र भगवान्
सुधाधाराधाराधर इव सुगम्भीरनिनदः ।
क्षणाद् बाह्याबाह्यप्रबलतरसन्तापशमनीं
सुधर्मव्याख्यानामृतरसमहावृष्टिमतनोम् ॥८

तथा हि—

कुले जन्म क्षीरार्णवनवनवोल्लोलविमले
सुलक्ष्मीरक्षीणा स्वपरजनतानन्दवसति ।
सुपात्रे श्रीदानं प्रशमपरिपाकः परिणतौ
परीपाकान् पुण्यश्रिय उदयते श्रीभरतवत् ॥९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा –

महाविदेहे किल पुण्डरीकिणी पुर्यामभूत् तीर्थपतिः श्रियो निधिः ।
श्रीवज्रसेनस्त्रिजगत्पतिस्फुरत्कोटीरकोटीमणिचुम्बितक्रमः ॥१०

पुत्रास्तदीया धुरि वज्रनाभो बाहुः सुबाहुश्च ततश्च पीठः ।
ततो महापीठ इति क्रमेण क्रमेण जज्ञुश्च धुरन्धरास्ते ॥११

श्रीवज्रनाभं विनिवेश्य राज्ये प्रदाय सांवत्सरिकं च दानम् ।
प्रभुर्दिदीक्षाक्षतमोहशत्रुर्जयश्रियं त्वाप च केवलर्द्धिम् ॥१२

अभ्यायायावायुधशालिकायां श्रीवज्रनाभस्य च चक्ररत्नम् ।
षट्खण्डमस्माद्विजयं प्रसाध्य स्वीकृत्य चक्रिश्रियमत्यभुङ्क्त ॥१३

अथाऽन्यदा तत्र पुरे व्यहार्षीत् श्रीधर्मचक्री प्रभुवज्रसेनः ।
श्रीवज्रनाभप्रमुखाश्च सर्वे पितुः समीपाज्जगृहुव्रतर्द्धि[म्] ॥१४

श्रीद्वादशाङ्गीं प्रथमोऽध्यगीष्टार्जीद्विंशतिस्थानकतोऽर्हदर्द्धि ।
एकादशाङ्गीमपरे तु पेठुः सर्वे तपस्यां विविधां वितेनुः ॥१५

वैयावृत्त्यधनेन बाहुसुमुनिश्चक्रीन्दिरामार्जयत्
सद्विश्रामणया सुबाहुयतिरप्यूर्जस्वलं दोर्बलम् ।
सर्वार्थे सुखशेवधौ ययुरमी तत्र त्रयस्त्रिंशतं
स्थित्वाऽब्धीन् भरते युगादिजिनराट् श्रीवज्रनाभोऽभवत् ॥१६

बाहुः श्रीभरतेश्वरोऽजनि सुबाहुर्बाहुबल्याख्यया
पीठो ब्राह्म्यजनिष्ट सोऽपि च महापीठोऽभवत् सुन्दरी ।
स्वे राज्ये वृषभेश्वरेण भरतः संस्थापितः स्वाम्युपैत्
दीक्षां केवलमासदच्च भरतश्चक्रेश्वरोऽजायत ॥१७

श्रीनाभेयजिनश्वरे शिवगते श्रीभारताधीश्वरो
राज्यं प्राज्यमभुक्त तीर्थमतनोत् तत् तादृगष्टापदे ।
वात्सल्यामृतकुल्ययाऽपि च परोलक्षांश्च साधर्मिकान्
संप्रीणन् गृहमेधितामपि वहंस्तीर्थभूयं भुवि ॥१८

---

१५.१. °द्वादशांगी.	१७.१. बाहु.



Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

स चाऽन्येद्युः स्नातः प्रतिपदधृतालङ्कृतिभरः
किलादर्शागारे स्ववपुरभिपश्यतन्नित इतः ।
विशोभां निर्वर्ण्याभरणरहितामङ्गलिमसौ
समन्तादप्यागन्तुकसुषममेवाङ्गमबुधत् ॥१९

ततस्तद्दृष्टान्तादखिलमपि संसारमभितोऽ
प्यसारं मन्वानः शुभतमपरीणामवशतः ।
दलित्वा घातीनि प्रबलतमकर्माणि सहसा
गृहस्थोऽप्याश्लिष्यद् बत बततमां केवलरमाम् ॥२०

शृण्वन्नेव हि पद्मकेसरनृपस्तत्सर्वमत्यद्भुतं
वैराग्याद्भुतभङ्गिमङ्ग्यकृत तामात्मैकवेद्यां ततः ।
ऊच्चैर्वीर्यविलासतः पवनतः कर्माम्बुदाली क्षता
सद्यः कैवलिकः प्रकाश उदगात् तस्यावनीभास्वतः ॥२१

अत्रैवावसरे प्रमोदविकसन्नेत्रारविन्दो हरिः
सर्वद्धर्या सपरिच्छदोऽथ सहसाऽयासीदनायास्यहो ।
क्ष्वेडानादजयारवैः किल तदा देवा जगर्जुर्घना
गन्धाम्भो ववृषुः सुमानि च ततः सद्यः पुपुष्पे च भूः ॥२२

आगू रत्नविमानमालितमहीपीठाश्चतुर्धाऽमराः
शक्रेणोच्यत पद्मकेसरनृपो धत्स्वर्षिवेषं प्रभौ ।
कृत्वा लोचमधत्त वेषमृषिराट् शक्रादिभिर्वन्दित-
श्चक्रे कैवलिकोत्सवश्च जगतीकौतूहलैकाकरः ॥२३

इन्द्रो व्यज्ञपयद् गुरून् प्रणमतामु केवलोद्भास्वरं
सूरिः साधु फलेग्रहिर्मम जहायासौऽधुनाऽभूदिति ।
आनन्दैकमयः प्रदक्षिणयितुं तं यावदेवोत्थित-
स्तावच्छुक्लसमाधिनाऽनवधिना तस्याप्युदैत् केवलम् ॥२४

---

१९.२. °र्शामारे.

२३.४. केवलिकौत्सवश्च.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वन्दाप्य एष न हि हन्त पिता गुरुश्चे-
त्यालोच्य केवलरमासमतां किलाधात् ।
पित्रार्ज्यकेवलसुधां यदि वा तपोभिः
प्राग्भोजितः सुत इमां स्वयमन्वभुङ्क्त ॥२५

अप्रयुक्तचरवैनयिकत्वात् सूरिरास्त हरिराह किमेवम् ।
पद्मकेसर उवाच सुरेन्द्रं केवलीन्द्रममुमित्यभिधासौ(?) ॥२६

तौ जातकेवलविदौ सहसा विदित्वा
हर्षप्रकर्षपरिपूरितमानसास्ताः ।
लीलावती च सुरसुन्दरिकामुखाश्च
भक्त्या प्रदक्षिणयितुं द्रुतमारभन्त ॥२७

शुभतमहृदो लीलावत्याः प्रदक्षिणने गुरोः
समगततरां नित्यं ज्ञानं ततो निविवेश सा ।
ध्रुवचिदुदयमन्यासामप्यजानत चक्रिरे
परममहिमां प्रीता ज्ञानित्रिकस्य सुरास्ततः ॥२८

तथा हि—

वाद्यन्ते दिवि देवदुन्दुभिगणा नृत्यन्ति दिव्याङ्गना
गीयन्ते त्रिदशाङ्गजाभिरभितस्तारस्वरं मङ्गलाः ।
ऊर्ध्वर्यन्ते दिवि केतवः फलमणिस्वर्णादिकं वृष्यते
यद्वा राजगृहं तदा ध्रुवमभूत् श्रीदेवराजः पुरम् ॥२९

प्रासादेऽगुरपरे सुरासुरा वासवस्तु भरतात्मजं यथा ।
कार्तवीर्यमुरुवीर्यसंपदं पद्मकेसरपदेऽभ्यषिञ्चत ॥३०

इन्द्रो जगाम सुरधामललाम ते तु
श्रीसिंहकेवलिमुखा वरकेवलीन्द्राः ।
मह्यां विजह्रुरखिलप्रतिबोधहेतो-
र्जज्ञे च केवलविदः परितः सुकालः ॥३१

श्रीपद्मकेसरनरेश्वरसारथित्वं संप्रापुषो दृढरथस्य सुतः च कीरः ।
संजातवानभिधया ननु नागशर्मा श्रीकार्तवीर्यनृवरस्य बभूव सुतः ॥३२

---

३०.१. आसादे.

अथाम्र(?)मलकेवला मुनिधुनीसहस्रान्विता
सदैव जगतीश्वरोद्धुरशिरोऽवतंसोपमा ।
जगत्त्रितयपावनी सुरसभाजिता जाह्नवी-
वदुद्यतविहारिणी भुवि रराज लीलावती ॥ ३३

भवार्णवमहातरी भगवती विहृत्याभितो
यदाऽनशनसुस्थिता स्थितवतीह लीलावती ।
तदैव सुरसुन्दरी रमणमत्युपैत् केवलं
सुरैः कृतमहामहा युगपदेव तिस्रोऽसिधन् ॥३४

किं प्रागजनुर्गुरुसुधर्मविभोर्भवान्तरं मूर्त्यन्तरं समरसेनमुनीश्वररस्य वा ।
श्रीकेवलश्रिय उत प्रचलन्निकेतनं श्रीसिंहसूरिरिह सिंह इवाऽजयच्चिरम् ॥३५

सैष श्रीसिंहसूरिस्तरणिरिव भुवो भासकस्तारकश्च
सैष श्रीसिंहसूरिर्विधुरिव जगतस्त्रायकः प्रीणकश्च ।
सैष श्रीसिंहसूरिस्त्रिदशशिखरिवत् प्रोन्नतोऽभीष्टदश्च
सैष श्रीसिंहसूरिस्त्रिजगति यदि वा निःसमानो बताभूत ॥३६

चिरं विहृत्या जगतीं विबोध्य श्रीसिंहसूरीश्वरआयुरल्पम् ।
वेद्यादिकर्माधिकमाकलय्य सद्यः समुद्घातमिति व्यधत्त ॥३७

तद्यथा —

चक्रे पूर्वक्षणेऽसौ निजतनुपृथुलं दण्डमात्मप्रदेशै-
रूर्ध्वाधोलोकमानं तदितरसमये त्वीदृशं स्वाक्पाटम् ।
स्फारं पूर्वापरेणेत्यथ परसमये दक्षिणेनोत्तरेण
क्षुब्धं तादृक्षमेवान्तरभरणमथानुक्रमात् संजहार ॥३८

क्षमयित्वा परितोऽपि सङ्घमनघं प्राप्तोऽथ शैलेशिकां
क्षपयित्वा निखिलानि तानि च भवोपग्राहिकर्माण्यपि ।
रुचितेऽनन्तकपञ्चकेन सततं लोकाग्रचूडामणौ
शिवसौधे समयेन राज्यलभत् श्रीसिंहसूरीश्वरः ॥३९

पद्मकेसरमुनीन्द्र केवलीमण्डलेषु सुचिरं विहृत्य सः ।
कार्तवीर्यनृपतेरनुग्रहं वीक्ष्य राजगृहमन्यदा ययौ ॥४०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं नमस्यितुमथाभ्यगान्मुदा कार्तवीर्यनृपतिर्महर्द्धिभिः ।
पद्मकेसरगुरुश्च देशनां क्लेशकन्दखननीं विनिर्ममौ ॥४१

अबुध्यत महीपतिर्झटिति कार्तवीर्यो यतो
महत्सुगुरोर्वचो भवति साक्षिमात्रं परम् ।
विधाय वसुधाधवं सपदि पद्मचन्द्रं सुतं
स्वयं तु स निरक्रमीत् स च शुकात्मकः सारथिः ॥४२

अभूच्च सकलागमोपनिषदां पदं सोऽचिरात्
ततश्च गुरुणा व्यधीयततरां स गच्छाधिपः ।
स्वयं तु गुरुरन्यदा विदधदेव सद्देशना-
मुपाक्रमत सत्वरं किमपि सर्वयोगच्छिदे ॥४३

तथा हि –

आदौ वाङ्मनसे स चादरे तनुयोगे न स तादृशाऽधीत् ।
एकेनैव निहन्ति पत्रिणा कृतहस्तो ह्युभये शरव्यके ॥४४

काययोगेन सूक्ष्मेण तं बादरं सोऽजयद् दन्तिनं तद्रदेनेव भोः ।
सूक्ष्मवाक्चित्तयोगावसावेकदा काययोगेन सूक्ष्मेण निर्जिग्यिवान् ॥४५

क्लृप्तकार्यं ततोऽसौ मुनिः सूक्ष्मकं काययोगं क्षणाद्गेहरत्नं यथा ।
स्वेन विध्यापयामास योगीश्वरः सोऽथ शैलेशी – – ⏑ – – – ⏑ – ॥४६

निरुद्धनिखिलाश्रयः सपदि पादपौपम्यकं विधाय विधिना क्षणात् किमपि वर्यपर्यङ्ककम् ।
निहत्य ⏑ ⏑ – – ⏑ – निबिडकर्मविद्विड्घटामसिध्यदनुरूपतां बत ययौ च वीरप्रभोः ॥४७

श्रीकार्तवीर्यो गणधारिरत्नं प्रबोध्य तान्तं विषयेषु भव्यान् ।
पर्यायमुच्चैः प्रतिपाल्य चान्ते संलेखनामारभतैवमेवम् ॥४८

चत्वारि वर्षाणि तपोऽष्टमान्तं तत्पारणे सर्वमिहैषणीयम् ।
पुनश्च चत्वारि तपोऽष्टमान्तं विना विकृत्या त्विह पारणं स्यात् ॥४९

संवत्सरौ द्वौ च तपश्चतुर्थमायाममेवात्र च पारणे स्यात् ।
षण्मासमन्यच्च तपोऽष्टमान्तमायाममत्रापि हि पारणे भोः ॥५०

४४.३. नैवं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षपमासमन्यद्दशमादिकं तप आचाममत्रापि हि पारणादिने ।
स्याद् द्वादशेऽब्दे खलु कोटिसंहितमाचाममत्रापि तपो विकृष्टकम् ॥५१

संलेखनामिति विधाय कृताष्टमोऽसौ
स्वाधीनतामगमयन् किल केवलर्धिम् ।
एवं तपोभिरभिपश्यति यत् सखीयं
सा काऽप्यहो विजयते बत मुक्तिकान्ता ॥५२

आरुह्य निष्प्रतिमवीर्यरथं ससूतः
श्रीकार्तवीर्यमुनिरायतमुक्तिसौधम् ।
सा सद्य एव किल केवललक्ष्मिकाख्या
सांमुख्यमङ्ग गमिता रमिता च तेन ॥५३

अतः(?) पेयं गेयं न नववसनं स्पर्शसुखनं
न विस्फारा हारा न च परिमलः कोऽप्यपमलः ।
रसोदारा सारा न च रसवती नापि सुदती
समुन्मीलल्लीला स्मरनिवसतिर्यत्र युवतिः ॥५४

कु - शंसो - स्मिन्निति हतगतिर्भ्राम्यतुतरां
परं त्यक्त्वाऽशेषं विषयपटलं निस्तुषधियः ।
निषण्णा अध्यात्मं शमशमनिशं शान्तमनसो
लभन्ते तद् यस्यावकरमपि नोचुर्विषयजम् ॥५५॥ युग्मम्

अवर्णैरस्पर्शैररसजनिसंस्थानतनुकै-
रगन्धैर्निःसङ्गैर्हतसकलवेदैरपि ततः ।
मुनीन्द्रैस्तैर्मुक्तौ सुखमनुपमं स्याद्यत इदं
वशीशा कर्षन्ति प्रशमसुखभङ्ग्याऽत्र यदणुम् ॥५६

न शोकोऽपि स्तोको न च खलु मृषा नाऽप्यशिशिषा
न चाधिर्न व्याधिर्जनिमृतिजरा न प्रसृमराः ।
सदामन्दानन्दामृतरसघनास्वादविधिना
समस्ता अप्यस्ता इव समभवंस्तेष्वपि लवम् ॥५७

---

५४.२. अनमलः .

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अमानं विज्ञानं विगमितमलं दर्शनमलं
निरीर्यं सद्वीर्यं प्रमदमुदितं दृग्विलसितम् ।
⏑ – – – – पञ्चव्रत ⏑ ⏑ ⏑ – – – ⏑ पलवत्
सदाऽश्नन्त(? न्तो) येऽन्तर्विदधति तकं सिद्धिरमितम् ॥५८

तदिदमनुपमानं मुक्तिशर्मातिमानं
सततमनुभवन्तः सर्वतः क्षेमवन्तः ।
सुगुरुसमरसेनाद्या मुनीन्द्राश्चतुर्विं-
शतितमजिनरत्नश्रीसुसङ्घं पृणंतु ॥५९

इति श्री**निर्वाणलीलावतीसारे** महाकथेतिवृत्तोद्धारे **श्रीलीलावतीसारे** जिनाङ्के **श्रीसिंहसूरि-श्रीपद्मकेसरराजर्षि-लीलावती-सुरसुन्दरी-रमणमती-श्रीकार्तवीर्य-सद्गुरु-केवलज्ञान-निर्वाण-व्यावर्णनो** नाम **एकविंशतितम उत्साहः** समाप्तः ।

तत्समाप्तौ च समाप्तोऽयं **श्रीलीलावतीसारो** नाम महाकथाविशेषः ॥

एवं च –

कौशाम्ब्यां विजयादिसेननृप इत्यादौ मया यत् प्रति-
ज्ञातं तन्महसा **जिनेश्वरगुरु**श्रीपादपङ्केरुहां ।
गीर्देव्याः स्फटिकेन्दुकुन्दकुमुदप्रालेयशङ्खद्युते-
रश्रान्तं प्रणिधानतश्च सुधिया सिद्धिं समध्यासितम्* ॥१

---

१.४. समध्यायितम्.　　* १ ॥ छ ॥ ग्रं. १५.

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

## [ ग्रन्थकारप्रशस्तिः ]

तीर्थे श्रीवर्धमानस्य श्रीसुधर्मस्वामिनोऽन्वये ।
**श्रीवर्धमानः** सुगुरुः सुधर्मस्वाम्युदैयत ॥१

तच्छिष्यमौलिमणिरैधत गूर्जरत्रासुत्रामदु**र्लभनरेश्वर**मूर्धसेव्यः ।
श्रीमान् **जिनेश्वर**गुरुर्गुरुधामपूरैः शूरं विजित्य बत सत्पथमैक्षयद्यः ॥२

सन्नीतिरत्नाकर(?)मुख्यतर्कान् **श्रीअष्टकादेर्विवृतीश्च** मृष्ट्वा ।
चम्पूमि – – वृतवाग्विलासां **लीलावतीं** यः सुकथामसूत ॥३

तत्पादपद्ममधुपो **जिनचन्द्रसूरि**राद्योऽद्युतन्निखिलवाङ्मयसिन्धुसिन्धुः ।
संवेगसारसरिते ⏑ ⏑ – ⏑ – – यत् तन्निबन्धमिषतः परितो निरीयुः ॥४

**श्रीस्तम्भना**भिधसुतीर्थमणिप्रदीपोऽभू – ⏑ – ⏑ ⏑ वरो**ऽभयदेवसूरिः** ।
आशैशवादपि हि यो विमुखो नवाङ्गया वृत्तिं ⏑ – ⏑ मितिकाञ्चिदहोनवाङ्गयाः ॥५

तत्पट्टनेताऽतुलसौविहित्यज्ञानाम्बुधिः **श्रीजिनवल्लभो**ऽभूत् ।
यद्दत्तसद्ग्रन्थसुधाप्रपास्ताः – – समस्तैरपि मुक्तिपान्थैः ॥६

तदीयगच्छाम्बुजखण्डचण्डभानुर्बभौ **श्रीजिनदत्तसूरिः** ।
यत्पादसेवा बत राजभिस्तैः स – ⏑ सम्पूर्णतमैर्वितेने ॥७

तदनु च **जिनचन्द्रसूरि**सिंहः समजनि शैशवशालिनाऽपि येन ।
प्रबलमदभरप्रवादिदन्तावलदलना खलु लीलयैव चक्रे ॥८

तत्पट्टपूर्वाचलहेलिकेलिः प्रद्योतन**श्रीजिनपत्य**धीशः ।
यस्योदये संप्रससार धाम नान्यस्य कस्याऽपि हि सर्वदिक्षु ॥९

अथाभ्युदयमासदत् प्रभु**जिनेश्वर**श्चन्द्रमा-
रमामदभिदं गणाम्बुधिविलासजाग्रत्करः ।
जिनेन्द्रभवनाचलाः प्रतिपदं यदीयोदये
बभुः प्रथमचन्द्रिकाकनककुम्भचण्डाद्भुताः ॥१०

---

२.१. °रेघत.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्तात्कालिकनव्यकाव्यकुसुमैरार्चीत् त्रिसन्ध्यं जिनान्
नानालब्धिनदीनदीपरिवृढो योऽनुव्यधाद्गौतमम् ।
श्रीक्ष्माऽभूष्यत यत् प्रतिष्ठिततमैः शिष्यैर्विहारैर्द्विधा
यद्वा यो विधिधर्मसीम्नि सुकृताद्वैतं बताघात् कलौ ॥ ११

सुगुरुसुरतरुस्ततोऽभ्युदीतः पृणति जगन्ति जिनप्रबोधसूरिः ।
सनयनसुमतिप्रभाघनाऽभिधं तमुपमामुपमां नय(?) ॥ १२

——ऐक्षयात् सततं मनीषितलताविस्तारधाराधरात्
श्रीसूरीन्द्रजिनेश्वरस्य सुगुरोः शिष्यावतंसाग्रणीः ।
एष श्री[ जिनरत्नसूरिरसृज ]न्निर्वाणलीलावती-
सारं सारमुदारभक्तिमधुरः प्राक्सूरिपादाम्बुजे ॥ १३

ब्रूमः प्रभुजिनेश्वर u u - u - - गुरुं
कवित्वपदविद्गुरुं यतिपसर्वदेवप्रभुम् ।
प्रमाणपदवीगुरुं विजयदेवसूरिं महा (?)
भिये (?) u u u - u - गमगुरुं नमस्कुर्महे ॥ १४

लीलावती द्विनवते शरदां सहस्रे श्रीवैक्रमेऽरचि जिनेश्वरसूरि[पादैः] ।
[तस्याश्च]संचितिरियं पुनरेकचत्वारिंशत्त्रयोदशशतेषु मया वितेने ॥ १५

सहैव लक्ष्मीतिलकानुबुद्धं बुद्धं u - - चरितं व्यधाम ।
लीलावतीसारममुं तु जैनेश्वरप्रबन्धेन सहाग्रजेन ॥ १६

प्राचीनसद्गुरुजिनेश्वर[सूरि] - - - - u - ममभिधानकथेतिवृत्तम् ।
पीयू[ ष ] - u u u - विदधेम ये ते (?)
हरते प्रगृह्य तदिदं सुधियो धयंतु ॥ १७

मार्गादि - u u u - u शि पुण्ययोगे जाबालिपत्तनवरे च [ सम ]र्थितोऽयम् ।
प्रत्यक्षरं गणनया u u सायुतार्धं सार्धं त्रिशत्यधिकमुक्तमनुष्टुभां भोः ॥ १८

अङ्कतोऽपि ५३५० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्या × × × × श्रुतपथपथिकेन जिनप्रबोधयतिपतिना ।
समशोधि रा ˘ ˘ णिनाऽसौ सौम्यमूर्तिगणिना च ॥ १९

छन्दोव्याकरणप्रमाण ˘ ˘ ¯ लंकारपारीणधीः
काव्यज्ञानविधानशोधनकलाचातुर्य ¯ ¯ ˘ • ¯ ।
आदर्शे प्रथमे मम क्रमयताऽमुं सौम्यमूर्तिर्गणिः
साहाय्यं ˘ ˘ ¯ ¯ ˘ ¯ ˘ रगणिप्रष्ठाः स मे(?) व्यादधुः ॥ २०

यावद्(?)द्वीपसरस्वतां क्षितिभृतां मेलं(?) मिथो वि[द्यते ?]
[याव – न]रजन्मरत्नकनकप्राग्भारसारश्रियम् ।
यावत् प्राञ्चति रत्नसानुशिखरी नि(?) ¯ ˘ ¯ ˘ ¯
¯ ¯ ¯ ˘ ˘ ¯ ˘ ¯ ˘ मुदियाद् व्याख्यायमानो बुधैः ॥ २१

[इति ग्रन्थप्रशस्तिः सम्पूर्णा ॥]
शुभमस्तु चतुर्विधश्रीश्रमणसङ्घस्य ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## Lexicographically important words and expressions with meanings, notes etc.

[ Abbreviations : **D.MP.** : 'A Critical Study of the Des'ya and Rare words from Puspadanta's Mahapurāṇa and his Other Apabhrams'a works' by R.N. Shriyan, 1969. **DN.** : Hemacandra's Desināmamālā. **DS.**; An Encyclopaedic Dictionary of Sanskrit on Historical Principsal, **Guj.** : Gujarati, **H.** : Hindi. **HP.** : Hemacandra's Paris'istaparvan. **HT.** : Helen Johnson's Translation of HP. **IAL.** : Turner's Comparative Dictionary of Indo-Aryan Languages. **LSJ.** : Lexicographical Studies in Jain Sanskrit by B. J. Sandesara and S. D. Parekh, **MW.** : M. Monier-Williams' Sanskrit-English Dictionary, **PSM.** : H. Sheth's Paiasaddamahannavo.]

### First Utsāha

Verse No.

१५ सार : उत्तम (IAL. 13355).

१७ मात्रा : शक्तिनर्म रसायनमात्रा (Guj. मात्रा).

,, सितापिण्ड : 'white lump-sugar.'

१९ सिध्–(cl. 1) : 'to attain Siddhi.'

२९ यथौचिति : यथौचित्यम्.

,, घन : बहु (Pk. घण, Guj. घणुं 'much, many'; IAL. 4424).

३२ मन्मनम् : अव्यक्तं वचनम् (Pk. मम्मणं; under DN, Hemacandra considers मन्मन to be a Sanskrit word.).

,, खेलय्–: क्रीडय्– (IAL 3918).

३४ जीवन्मृतिका (f.) जीवन्मृता 'dead though alive.'

३७ रीण (in रीणभाग्यिका) : क्षरित, नष्ट.

४१ पिच्छिल : अतिस्निग्ध (cf. IAL 8152).

४२ मन्दाक्ष (in मन्दाक्षमन्दाक्षी) : लज्जा. MW. gives reterence to the हर्षचरित for this sense. DN. VI 141 gives मंतक्ख as a देश्य word with the meanings लज्जा and दुःख.

४८ उत्पुच्छन : 'raising of the tail'. (उत्पुच्छ्– from the काशिका on the अष्टाध्यायी VI 2 196).

५१ उदञ्चत् : 'rising.'

५५ प्रतिलाभना : 'giving alms or presents (to monks and others)' (cf. Pk. पडिलाह्–, पडिलाहण).

५६ अमारिघोषणादान : हिंसानिवारणघोषणाकरण (Pk. अमारि = हिंसानिवारण).

६१ परिष्कार : आभूषण.

६२ वर्धय् : 'to congratulate some one' (Pk. वद्धय्).

,, ग्रहिलित : उन्मत्तीकृत (Pk. गहिलिय; cf. IAL 4366).

६५ प्रगे : 'on the morning of the next day.'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

६६ वन्दनमालिका : 'festoon of green leaves etc.'

,, सुम : कुसुम.

,, नरिनृतत् : pres. part of the intensive of नृत्.

,, केलि : कदली (Pk. केली, Old Guj. केलि; IAL 2712).

,, तलिक (in भास्वत्तोरणतपनीयतलिकम्, metri causa for भास्वत्तापनीय-तलिकतोरणम्) : तलिकतोरण was a type of festoon (Guj. तळियां तोरण.).

,, कौशालिका : उपहार.

,, काश्मीर : कुङ्कुम.

,, अलिक : भाल.

,, आकालिकम् : 'instantaneously.'

६८ संवस्त्रय्-: 'to clothe'.

७५ रिङ्ख्-: 'to crawl' (IAL 10735-36.)

७६ चान्द्र : कर्पूर (Pk. चंद).

,, उद्धूलन : 'besmear (with powder)'.

७८ स्नात्रकार : स्नापक.

७९ लुम्बि : 'hanging bunch of fruits)' (Pk. लुंबी; IAL 11089).

,, रमा : श्री, शोभा.

८२ प्रक्वण्- : 'to tinkle.'

,, घर्घर : नूपुर (cf. Pk. घग्घर, Sk. घर्घरा, घर्घरिका 'girdle of tinkling bells').

८३ झलज्झलन्ती : 'shining' (IAL 5352).

८३ ललन्तिका : 'a long pendulous necklace.' (cf. IAL 10916.)

८४, १२५ मणी (f.) : मणि (Pk. मणि f., H. मणि, मनि f.; IAL. 9731).

८५ चूला : चूडा (Pk.).

८७ नन्दनाक्रीड : नन्दनवन.

९४ तूर्यत्रिक : तौर्यत्रिक.

९७ श्वेतसप्ति : श्वेताश्व, अर्जुन.

१०० कमला : श्री, शोभा.

१०५ श्रुती : श्रुति.

,, द्युम्न : धन.

१०८ औपज्ञानुक : (अष्टाध्यायी IV 3 40).

११३ उत्त्वर : उत्सुक.

११६ मृड : शिव.

१२२ उपदा : उपहार.

१२३ नाभी : नाभि.

१२४ स्मार : स्मरसम्बन्धिन्

,, कूपी : 'a small well' (Guj. कुई.)

,, नाशा : नासा.

१२९ विरजनवसन : 'duster'.

,, उत्तारण : 'materials used to remove or ward off the effects of evil eye or black magic' (Guj. उतार, उतारण; IAL. 1791, 1792).

,, द्युत् : द्युति.

,, दीप्र : 'radiant'.

१३० मत्तवारण : 'balcony, turret.'

,, कनी : कन्या.

१३१, १३३ राजपाटी : 'king's routine round of the city along with the royal entourage' (Pk. रायवाडी, रायवाडिआ; the meaning of

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राजपाट्टिका given in MW. is to be corrected; राजपट्टिका recorded in MW. seems to be a wrong reading),

१३१ अवतर : 'descent (occurs also at शिशुपालवध I 43).

१३२ तारामैत्री : 'affectionate exchange of glances', 'love at first sight' (Pk. तारामेत्ती at कर्पूरमञ्जरी 28.3; Guj. तारामैत्री, तारामैत्रक).

१४० चतुष्कर्णम् : 'heard by four ears only.' (MW. records it from the पञ्चतन्त्र).

१४२ प्राभृत : उपहार (Pk. पाहुड).

१४३ भृशाय् : ?

१४६, १४९ वीवाह : विवाह.

१४७ राध : वैशाख (मास).

१४९ तेमन : 'sauce, secondary dish' (see तिम्मण, DMP 110; IAL 5949.)

,, घट्–: 'to shape, hammer' (Pk. घड्–; IAL. 4407.)

,, उच्छल्–: 'to spring up' (IAL 1843.).

१५० गौरव : 'dinner given by bride's party' (Guj. गोरव 'dinner given to the bridegroom's party').

,, धूलीभक्त : विवाहविधिविशेष.

,, प्रहीणक : 'sending gift of eats as a part of the marriage ceremony (Pk. पहेणय ).

,, उद्भास्वर : 'radiant.'

१५१ प्रावारिन् : प्रावारयुक्त.

१५२ आश्चर्यित : 'made wonderstruck.'

१५२ पारी 'a tablet or cake (of camphor.)'

१५४ धवलमङ्गल 'types of festive songs (See स्वयम्भूच्छन्दस् IV 16 – 21; छन्दोनुशासन V 40; मानसोल्लास, IV 16 549, 552),

१५५ थट्ट : 'row' (Pk.).

१५७ सम्प्रदानित : 'presented.'

१६१ प्रातिभ : प्रतिभासम्बन्धिन्.

१६२ लाभन : 'present (espectally of eats)' (Pk. लाहण, DN. VI 73, IIV 21; Guj. लहाणु.).

,, प्रतिलाभन : 'return present' (see लाभन).

,, कोष्ठपूरण : 'filling of a square.' (a literary game.).

१६३ स्रवन्ती : नदी.

,, व्यात्युक्षी : 'mutual sprinkling with water.' (recorded in MW. from the शिशुपालवध and the प्रसन्नराघव.)

१६४ धातु : गानस्वर. (see मानसोल्लास IV 16 15 f.)

,, मातु : गानशब्द.

१६८ विकुर्वणा : 'creating by magic powers' (Pk. विउव्वणा).

१७० औपवाह्य : 'elephant fit for riding.'

१७१ संधा : 'union.'

१८२ कवचहर : 'a क्षत्रिय youth of an age suitable for martial training' (कात्यायन on अष्टाध्यायी III 2 10)

१८३ तृष्णज् : 'thirsty' (अष्टाध्यायी).

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१८७ औन्नत्य : उन्नतता.

,, स्वादूकृति : 'sweetening.'

१८९ विध्याप् : 'to extinguish' (Pk. विज्झाव्, IAL 11703)

,, लक्ष्मि° : लक्ष्मी.

१९७ परिपन्थना : 'obstruction.'

२०२ देशना : धर्मोपदेश.

२०३ नासीर : अग्रानीक.

२०४ मारि : प्राणिवध (Pk. मारि.).

२०६ युगलधर्मिन् 'a twin' (inhabiting the Uttarakurus) (HT. I).

२०७ नीवृत् : 'vicinity, abode' (?)

२१० जैवातृक : चन्द्र (MW. records it from भामिनीविलास II 76).

२११ अपाटव : 'sickness.'

२१३ जीवातु : 'revivifier' (HT. III).

२१४, २४२ पादः आधार्यताम् etc. : गम्यताम् etc, (used respectfully in a formal discourse; cf. Guj. पधारो which ultimately derives from this usage.)

२१४ पङ्किलीकृत : 'made muddy.'

२३८ श्यामा : रात्रि.

,, अनेहस् : ?

,, पेयूष : पीयूष.

२३९ तर्णक : वत्स.

,, कामसुरभी : कामधेनु.

,, स्वःशाखिन् : कल्पद्रुम.

२४२ अधिभू : प्रभु.

२४३ भूपृष्ठ : भूप.

२४७ फलेग्रहि : 'fruitful', 'bearing fruits' (अष्टाध्यायी III 2 26; also in the नैषधीय).

२४८ तीर्थिक : 'follower of a religious sect' (Pk. तित्थिय.)

२५१ अध्यक्ष : 'perceptible to the senses.'

२५७ प्रवाक् : मुखर.

२६१ प्रतिसन्धि : (?)

२६२ पारिशेष्यतः : पारिशेष्यात्.

२६३ सर्वंकष : 'oppressing all' (qualifing खल).

,, सकर्ण : विद्वस्.

,, अपकर्णनीय : 'not to be heard.'

२६४ जल्पाक : वाचाट.

,, तूष्णीका : मौन.

२६६ कौटस्थ्य : कूटस्थता.

२६९ कक्षीकृ : 'to admit, accept.'

२७१ उत्कार्य : उत्कृष्ट.

२७२ गृहमेधिन् : गृहस्थ.

२७४ यौष्माकीन : 'your' (अष्टाध्यायी and HP).

२८७ श्राद्ध : 'a Jain believer, a Jain layman.' (Pk. सड्ढ, सड्ढ).

२८८ क्षोद : चर्चा, विचार.

,, वर्धाप् : 'to congratulate' (Pk. वद्धाव्, Guj. वधाव्; IAL 11343).

२८९ संघट्ट : संपर्क (occurs also in the नलचम्पू).

,, चञ्चुर : चपल (Pk. कर्पूरमञ्जरी III 23).

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२९१ समय : 'Jain Āgama.'

,, निश्चय : 'one of the Nayas in Jainism.'

२९३ समवसृ-: 'to halt for preaching' (Pk).

२९८ स्राक् : शीघ्रम्.

३०४ गर्जि : (मेघ)गर्जन. (IAL 4048)

,, अब्द : मेघ.

३०६ ०कम्र : ०कामिन्.

३०७ उरीकृति : स्वीकृति.

३१० प्रगुण : उत्कृष्ट.

३११ सूत्क : अत्युत्सुक.

* * *

## Second Utsāha

७ सध्रीची : सखी (also used in the भट्टिकाव्य).

११ सौवस्तिक : पुरोहित.

१४ वाणिज्यापुत्र : 'trader ? ' (cf, Guj. वाणोतर, वणजारो; IAL 11486, 11234.).

१५ क्रयाणक : 'goods for sale' (IAL 3584.).

,, भाण्डशाला : 'warehouse' (IAL 9441.).

२१, १९५ विड्वर : डमर ' mutiny ', 'revolt' (The expression is अकाण्डविड्वर 'a sudden mutiny.' PSM. has noted अकंडविड्डुर from the उपदेशपदटीका but it gives 'extent', 'pomposity' and 'terrible' as the meanings of विड्डुर.)

२३ वीकाश : विकास.

२९ गुरुमरुत्तर : प्रशस्तगुरुदेव.

३१ यथौचिति : vide I 29.

३४ ख : इन्द्रिय (MW. records it from भागवतपुराण VIII 23.).

३५ असुमत् : प्राणिन्.

३६ चौरिका ; चौर्य (Pk. चोरिआ).

३७ कुटुम्बीकृ – : 'to count as a kinsman.'

३८ अक्ष : इन्द्रिय.

४१, १२८ अनेहस् : वर्ष (?).

४७ ०किर् : 'pouring out' (MW. records it from the विद्धशालभञ्जिका.)

५४ डिम्भरूप : 'child' (Pk. डिंभरूव; cf. IAL. 5533).

५५ भुण्ड : 'hog' (DN. VI 106; Guj. भूंड).

,, उदरम्भरि : 'nourishing only (one's own) belly.'

५६ प्रहरकं दा – : ' to pay periodical visits.'

५७ भषण : भषक.

,, भषण : श्वन् (Pk. भसण).

५९ एषक : : एष: (अष्टाध्यायी VII 347.).

६४ कार्मण : 'sorcery, magic' (IAL 3075.).

६७ पाप्मिन् : पापिन्.

७२ नोदना : 'incitement.'

७४ असि : त्वम्.

७९, ८७ श्रीकरण : 'department of justice', 'law court.'

,, पूत्कृ : 'to cry out as a complaint' (Pk. पुक्कर-; IAL 8246).

Jain Education International For Private & Personal Use Only www.jainelibrary.org

७९ अक्षत्र (n.): an injustice, 'tyrrany or maltreatment' (incorrect for अक्षात्र; Old Guj. अखत्र; see e.g. रत्नचूडरास[1] 53; DS. references are from Jain texts)..

८० कण्टिका-वृत्ति : 'hedge of thorn bush' (IAL 2679, 12068).

८६ तुन्द : 'protuberant belly' (DMP 590; IAL 5860).

,, क्षुरी : 'knife.' (IAL 5860).

८७ श्रीकरण : See II 79.

९५ पोत : 'short dhoti' (Guj. पोतियुं; IAL 8400).

,, आवेष्ट : 'strangle' (IAL 1447.)

९७ डिम्भक : शिशु (DMP 589; IAL 5553.).

१०२ विध्याप्य् : See I 189.

१०६ देवकुलिका : 'a small shrine' (IAL 6526).

,, पुत्रभाण्ड : 'children and grand children' (HP.; Pk. पुत्तहंड, DMP 1017.).

१०८ पाप्मन् : पाप.

१०९ तुण्ड : 'mouth' (pajoratively) (DMP 112, 117; IAL 5853).

११३ मूटक : 'bale, bundle'.

१२१ धूम्रघूम्या : 'dark cloud of smoke' (धूम्या occurs in the मालतीमाधव; IAL. 6849).

,, आराडि : 'shriek' (DN. I 75 आराडी).

,, विकचकच : 'dishevelled hair.'

१२४ शोधित : 'searched' (Guj. शोधवु 'to search').

१२४ प्रदीपन : 'setting on fire, inflammation' (Pk. पलीवण; Guj. पलेवण; cf. IAL 8665).

१२५ गन्त्री : 'cart' (Sanskritised from Pk. गड्डी; IAL 4116).

,, सिण : शण (Pk; IAL 12272).

१३१ पिधापित : 'caused to close;' (पिधापयति is used in the भागवतपुराण; IAL 8194).

,, खानि : 'mine' (Pk; Old Guj. खाणि; IAL 3873).

१३७ देशहिण्डिन् : 'wandering from place to place.'

,, हिण्डिन् : 'wandering.'

१४३ कीकट : 'penniless' (abusively.).

१४४ अवलग् : 'to serve' (Pk. ओलग्ग-; DMP, 744; cf. IAL 822).

१४७ भट्ट : 'a member of the भाट caste'; a petty panegyrist in search of patronage. (Guj. भाट; IAL. 9366).

१४८ विनष्ट : 'spoiled' (Old Guj. विणठु; IAL. 11771).

१५१ कश्मल : 'foul.'

१५५ गोचर-चर्या : भिक्षाटन.

१६५ पट्टराज्ञी : 'chief queen' (Guj. पटराणी.)

१६४ °अनुमा : उपमा, 'resemblance.'

१६५ निःसर्पिष् : 'without ghee.'

१७० वर्धापन : 'celebration' (Pk. वद्धावण, Guj. वधामणुं.).

१७७ शिक्षापना : हितशिक्षाप्रदान (Guj. शिखामण.).

---

1. Ed. H. C. Bhayani, 1979.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१८३ पानीयहारिका : 'woman fetching water.' (Pk. पाणियहारी, Guj. पाणियारी, H. पनिहारी; IAL 8088).

१८४ करका : 'hail stone' (Guj. करा: IAL 2782).

,, राजपाटी : See I/131.

१८८ उष्-: 'to burn.'

१८९ काणय्-: 'to cause to become one-eyed by piercing an eye,'

,, खरम्यां वा न काऽपि वा : Probably to be emended as खुरल्यां वानकामिव. खुरली means 'practising archery' (MW.) and वानका may mean 'a target' (cf. वान 'a hole in the wall of a house,' MW.)

१९५ विड्वर : See II 21.

२०१ गोनस: 'a kind of large snake' (Pk. गोणस, IAL 4288.)

२०९ शरीरचिन्ता : 'natural bodily function.'

२१२ गृहोलिका : 'house lizard' (Pk. घरोलिया, Guj. घरोळी; IAL 4431.)

२१३ अस्मि : 'I.'

२१६ ला-: 'to take.'

२१९ गौरव्या (f.) : 'to be respected.'

२२२ अकर्ण : 'lacking in self-control' (?).

२२७ असिपुत्री : 'knife.'

२२८ सांराविण : 'uproar' (मालतीमाधव and नैषधीय).

२३१ कृपाणी : 'knife, dagger.'

२३५ प्रक्षरित : 'armoured' (Pk. पक्खरिय; Old Guj. पाखरिउ; IAL 8432).

२३९ संशीति : संशय.

२५२ कुध्- (in कुत्पिशाच) : 'anger.'

२५५ अर्वाग्दृश् : 'person of limited vision.'

२५६ मह : उत्सव.

२६३ चन्द्र : कर्पूर (cf. I 76.).

२६५ संवस्त्रय्-: 'to clothe' (See I 68.).

२६७ नभोधुनि : स्वर्णदी, गङ्गा.

२६९ भट्ट : See II 147.

,, थट्ट : 'group' (Pk.).

२७१ प्रतिलाभ् : See I 55.

२७३ चर्व्य : 'chewable' (food.).

,, चूष्य : 'what is to be sucked' (food.).

२७५ अमी-दान : अभयदान.

२७८ मारि : See I 204.

,, प्रगे : See I 65.

२७९ उल्लोच : 'canopy'.

,, मणी : See I 84.

,, °चण : 'prominen due to' (अष्टाध्यायी V 2 26.)

,, चरण : तपश्चरण.

२८० द्युसद् : 'a god.'

२८१ शिति : कृष्ण(पक्ष).

,, भ : नक्षत्र.

,, श्वेतरुचि : चन्द्र.

,, इनभू : सूर्यसुत, 'Saturn.'

## Third Utsāha

६ कणमन्द : 'as weak as a dust particle' (?).

७ धान्यकीट : 'an insect found in corn' (Guj. धनेडुं; IAL 6779.).

१२ जितकाशिन् : 'behaving like a conqueror'.

१४ गुप्तिप : 'prison-guard.'

,, अहंयुता : अहङ्कार.

२१ राजन् : चन्द्र.

२५ जन्युर्वी : जन्मभूमि.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२८ जनुस् : जन्मन्.

२९ कुज : मङ्गल(ग्रह).

,, लत्तित : 'kicked' (Pk. लत्ता 'kick'; Guj. लात; IAL 10931.)

३० आरतः : 'before' (Pk. आरओ).

,, पञ्चवर्षी : 'five years.'

,, निष्टाप्–:'to destroy' (Pk. णिट्ठव्-).

३२ अकर्मठ : 'ineffective.'

३४ तीत° : अतीत (Pk. तीअ).

,, °वर्तिन् : वर्तमान, 'present time.'

४५ टगमग (with ईक्ष्–) 'to stare' (Guj. टगमग, with जो– 'to see').

४९ तालय्– : 'to lock.'

,, उत्पाट्–'to cause to carry' (Pk. उप्पाड्, Guj उपाड्; cf. IAL 1809).

५० यामिक : प्राहरिक.

५२ चैत्य : 'temple.'

,, अतिजागरिन् : 'extremely wakeful'. (काशिका on अष्टाध्यायी VII 3 85).

५६ स्राक् : See I 298.

६१ क्षूण (n.) : 'offense' (Pk. खूण).

६३ धीसख : 'minister.'

,, अड्डण (n.) : 'shield' (Pk).

,, हति : 'blow'

६४ चन्द्रमौलि : 'a turban marked with brilliant spots' (Pk. मउलि; Guj. मोळियु 'turban').

६५ श्रेष्ठि : 'merchant'.

६७ निरोपित : 'ordered' (Old Guj. निरोप्–'to order'.)

,, किंराजन् 'a bad king' (अष्टाध्यायी II 1 64, V 4 70).

,, नीवृत् 'abode', (also I 207).

६९ °देश्य : °देशीय, 'resembling' (अष्टाध्यायी V 3 67).

७० सौवाङ्गज : 'grand child' (?).

,, खिल : 'desert, barren.'

,, शीतलिका : 'small pox' (Guj. शीळी; IAL 12490).

७२ न्यग्भू–: to 'subside' (?).

७५ घन : See I 29.

७६ कण्टिका : 'throny hedge.'

७७ कुक्षिंभरिः 'filling only his own belly' (अष्टाध्यायी III 2 26).

७९ मुण्ड : 'head'.

८१ वशंवद 'addicted to'.

८६ पार्श्वे 'near' (Guj. पासे.).

,, गुरुवन्दकः याति : 'comes to pay homage as to a guru' (a Prakritism).

,, अट्ट : हट्ट.

,, क्रयाण : 'merchandise,'

८७, ९० चरिका : परिव्राजिका.

९२ कम्र : 'being in love' (अष्टाध्यायी III 2 167).

९३ आरक्ष : 'guard' (आरक्ख, DN. I 15)

९४ जाङ्घिक : 'courier.'

९८ दत्तहस्तिक : 'supported,'

१०३ सरमासूता : शुनी.

१०४ विगुप्–: 'to revile, censure' (Pk, विगोव्-).

१०६ छगणिकाः 'dried cowdung cake' (Sk, Pk, छगण, Pk, छाणी; IAL 4952, 5007)

१०७ अभ्याख्या–:'to accuse falsely,'

११० पुण्ड्रक : तिलक.

११२ पाप : 'sin'.

,, विगुप् : See III 104.

११३ पक्त्रिम : 'ripe.'

११५ प्रदोष : 'wicked' (शिशुपालवध II 78).

Jain Education International For Private & Personal Use Only www.jainelibrary.org

११८ कश्मल : 'foul.'

११९ मगध : मागध, 'bard.'

१२१ गोर्वर : 'name of a village' (cf, IAL 4316).

१२३ तुक् : पुत्र.

१२४ अस्त : गृह, अस्ताचल.

१२७ शतखण्डित : 'broken into a hundred pieces, destroyed completely',

१२८ वश्य्–: 'to control' (denominative from वश्य).

१३० न्यक्कृ–: 'to humiliate.'

,, प्रजावती : 'elder brother's wife.'

१३७ कथंकारम्: 'how' (शिशुपालवध II 52.).

१३९ मस्तके पातय् : 'to dash on the head, make to suffer the bad consequences.' (a Prakritism).

१४० ग्रामकूट : 'village headman' (Pk. गामऊड, DN. II 89; Kannada गाउंड, गावडा).

१४२ आचम्–: 'to be clean' (Pk) · आचम्–).

१५० फलेग्रही : See I 247.

१५३ (b) दम्भ (m.): 'a burn '(Old Guj. डांभ, Mod. Guj. डाम; डांभ्– 'to burn.'.

१५६ भट्ट : ब्राह्मण.

१५७ भट्टिनी : ब्राह्मणी.

,, छन्न 'secretly' (Guj. छानुं.).

१५९ हील्–: 'to insult' (Pk).

१६२ वाध्रीणस : 'rhinoceros,'

१६३ एकिका : एकाकिनी.

१६५ पर्यश्रु° : 'bathed in tears.'

१६९ संव्यान : 'upper garment.'

,, पल्लव : 'hem of a garment.' (Guj. पालव.)

१७० पाटित : 'torn.'

१८२ अवक्रय-गेह : 'a rented house.'

१८४ क्रम : 'foot' (Pk. कम.).

१८६ रामणीयक : 'loveliness'

१८९ °कार्मण : (?)

,, लेखशालाकरण : 'schooling' (Guj. निशाळगरणुं).

१९० जानि : 'wife,'

१९२ पट्टिका : 'a wooden slab for writing' (G, पाटी.).

,, आरटित : 'bawling' (Pk, आरडिय, Guj. आरड्‌ 'to bawl.')

१९४ निष्कल : (I) 'ignorant of arts' (2) (?).

२०१ द्रोणमेघ : 'a rain-cloud making heavy down-pour' (Pk. दोणमेह).

,, मुद्गशैल : 'an impenetrably hard mountain' (Pk. मुग्गसेल.).

२०१ दृक्पाटव : 'power of the eye-sight.'

,, जगच्चक्षुस् : सूर्य.

२०२ अहंयु : अहङ्कारिन्.

२०३ शस्त्री : 'dagger.'

२०५ शण्ड : 'a bull set at liberty.' (Pk. संड, Guj. सांड; IAL 13331)

२०६ पिशाचकिन् : कुबेर (पतञ्जलि on अष्टाध्यायी V 2 129).

२०७ पूरुष : पुरुष.

२११ सृतं मम : 'I have nothing to do with, I have no use of.' (cf. the Gujarati idiom 'सर्युं' 'enough.')

२२६ अभ्यमित्र्य्–: 'to be advanced against or attacked' (भट्टिकाव्य and अष्टाध्यायी V 2 17).

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२२८ त्वजिह्वया बलिः क्रिये : 'I offer myself as victim for the well-being of your tongue' – an idiomatic expression of extreme praise. Ap. 'बलिकिज्जउं' सिद्धहेम VIII 4 338).

२३२ कषपट्टिका : 'touchstone' (Pk).

२३५ उन्नम्र : 'errect,'

,, विजित्वर : 'conquering.'

२४२ मषीमुखी (f.): 'black-faced.'

२४४ उच्चण्डू-: 'to throw up, to shoot upwards.' (cf. Pk. उच्चंडिय 'raised up').

२४५ उन्मदिन् : 'intoxicated.'

२५२ व्यध : 'piercing' (शिशुपालवध).

२५७ लेपकृत : 'plaster-cast.'

२६३ निःस्वानेष्ववलन् घाताः : 'sounding strokes fell on the kettle-drums' (cf. Old Guj. idiom 'वलिउ नीसाणे घाउ').

,, सांराविण : 'general acclamation of a number of people together' (मालतीमाधव).

२६७ वारिन् : 'restraining.'

२७० निर्घाटित : 'driven out (Pk' निग्घाडिय).

२७३ वृति : 'fence.'

## Fourth Utsāha

२ प्रहरकं दा : 'to keep watch, to attend' (cf. Guj. 'पहेरो देवो').

६ बकोट : कुत्सित-बक.

७ श्रावसार : 'a devout Jain layman'.

,, गोष्ठिक : 'priest of a Jain temple' (Guj. गोठी).

८ श्राद्ध : 'a devout Jain' (Pk. सड्ढ).

११ इन्दु : कर्पूर.

१८ उद्वृत्त : 'one who has left one kind of existence to be born into another'. (Pk. उव्वट्टिय).

२१ सरस्वत् : समुद्र (शिशुपालवध).

२३ क्रम : चरण.

२५ ककुभास्तिक : दिग्गज समूह.

,, हास्तिक : गजयूथ (अष्टाध्यायी IV 2 47).

२७ उदरंभरि : 'filling up the hollow.'

३० कलान्तर : 'interest.'

,, वणिज्या : वाणिज्य (Pk. वणिज्जा, Guj. वणज).

,, यानपात्र : नौका (Pk, जाणवत्त).

,, भाटक : 'fare' (Pk, भाडय, Guj. भाडु).

,, योनिपोष : 'raising seedlings.'

३१ इन्दु : कर्पूर.

३२ तुवरी : 'alum.'

३३ और्ववह्नि : 'the submarine fire.'

३३, ३४ लोष्टिक : 'rust of iron.' (?).

३४ प्रतीक : 'limb.'

३७ लञ्चा : 'bribe' (Pk. लंचा, Guj. लांच; IAL 10914).

,, व्यवहृ-: 'to trade.'

३८ महास्थाल : 'cooked offering on a sacred day,' (?)

३८, ४० तलवर : 'city guard' (Pk.).

३८, ४३ खोट्टिका : 'a counterfeit coin; coin alloyed with base metal.' (cf. IAL. 3931; Guj. खोटुं 'alloyed,' Pan. खोट 'alloy').

४१ स्थिरीभू-: 'to wait'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

४२ मार्ग्–: 'to ask for' (Pk मग्ग्–, Guj. माग्–).

४४ किराटक : 'vile merchant' (IAL 3173,)

४५ चतुष्किका : 'a set of four.' पुंश्चतुष्किका : probably means 'a group of four guards.' Compare Guj. चोकी 'keeping watch, watch-post,' (cf. IAL 4629).

४९ अध्वन्य : पथिक (अष्टाध्यायी V 2 16).

,, पराञ्च् : 'turned away'.

५३ क्रोड : 'lap'

५८, ६१, ६२ : जिस (in personal names जिसनाग etc.) for जस (Pk. जस॰, Sk. यशस्).

५८, ५९, ६१ आस (in personal names आसपालक etc.) : अश्व (Pk. आस).

६३ पाल्हण : 'name of a male'

,, माल्हण : ,, ,, ,,

,, काल्हण : ,, ,, ,,

,, जाल्हण : ,, ,, ,,

,, देवड : ,, ,, ,,

,, आसडक : ,, ,, ,,

६६ देहड : ,, ,, ,,

,, शैली : 'method, mode of conduct.'

६८ अध्यक्ष॰ : 'openly.'

७६ कौविन्दी : 'the wife of a weaver.'

,, वण्ठ ; 'a dwarf, cripple or vagabond.'

८१ भूषाकरण्डी : 'jwellery box.'

८६ शल्यहस्त : 'armed body-guard' (Old Guj. सेलहथ, Cf. Guj. शेलत 'a surname'),

८७ धाविका (f.) : 'washer.'

९७ विलक्ष : 'crest-fallen.' (Pk. विलक्ख).

९९ त्रुटित : 'escaped.'

१०१ शील्–: 'to do, to carry out.'

,, असकौ : असौ.

१०३ काचपिच्य (n.) : 'bothersome prattling.' (Guj. कचपच).

,, स्फोरित : 'flashed.'

१०५ विगुप्त : 'confused.'

११० डुम्ब : 'a man of low and untouchable caste of that name.'

११६ ईर्–: 'to go, to act.'

,, रा–: 'to give, to allow.'

,, ईरितुम् रा : 'to allow to move or act.'

१२४, १२५ : निशूकता : 'mercilessness' (here personified).

१२५ आश्रुत : 'agreed.'

१३४, २७० : अस्मि : अहम्.

१३५ ला– : गृह्– (Pk. ले–).

१३९ जीविका : 'livelihood.'

१४१ व्यूत : 'woven'.

१४२ सामग्री : 'means and materials.'

१४३ दीनार : 'a gold coin'

१४४ कर्मकर्मठ : '(a place) fit for carrying out work.'

१४९ कषपट्टक : 'touchstone.'

१४९, १६३ प्रसू : मातृ.

१५२ वारक : 'one's turn.' (HPari., Guj. वारो).

,, मेहला : महिला.

,, कामहेला : 'amorous dalliance (of women).'

१५४ प्रहर्षुल : प्रहर्षयुक्त.

१५९ शुध्- : 'to find out.'

१६० कर्णान्ते स्था- : 'to stand close to a person (for whispering).'

१६२ अस्मि : अहम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१६६ पादचारिका : 'moving on foot.'

१६६, २०२ पादोऽवधार्-: 'to go', Used to express politeness or respect. (Guj. पधारवुं).

१६७ आशाम्बर : 'a Digambara Jain.'

१७० कुहक : 'deception, fraud.'

१७३ संस्थास्नु : 'stopping, halting.'

,, मार्गिन् : 'guide, path-finder.'

१७४ दो- : 'to cut, reap, break.'

,, सैरिभ : महिष.

,, वानल : 'consuming dry fruits,' (?).

,, कण्ठीरव : 'an elephant in rut.'

१७५ ग्रहपति : सूर्य.

१७९, १८२ पाळी : 'bank' (Pk., IAL 8041).

१८० व्यासिध्- : 'to keep off, prevent' (शिशुपाल०).

१८१ अङ्गावहोलिका : 'bath' (Pk. अंगोहलि, Guj. अंघोळ; cf. IAL 142).

,, कणेहत्य : 'to satisfaction'. With पयः पपौ कणेहत्य compare कणेहत्य पयः पिबति in काशिका on अष्टाध्यायी I 4 66.

१८३, २०७ कुल्य : 'belonging to the family of.'

१८३ तटी : सरित् (Ap. तडी).

,, कम्र : 'lover' (?) (अष्टाध्यायी III 2 167).

,, उत्पित्सु : 'about to leap' (शिशुपाल°).

१८४ कम्प्र : 'trembling.'

१८५ चूला : चूडा (Pk.).

१८८ शकुनज्ञ : 'knower of omens.'

१९५ जीवातु : 'life-giving drug' (HPari.).

१९९ नरेन्द्र : वैद्य.

,, धातूपल : 'a wondrous stone turning base metals into gold.'

२०० प्रस्तर : 'stone' (Pk. Guj. पत्थर, IAL 8857).

,, प्रसाद्- : 'to give as a favour.'

२०३ धनायत् : 'being desirous of wealth.'

२०५ निशान्तेश : गृहपति.

२०६ ग्रामग्रामणी : 'village chief.'

,, पदिक : 'a foot-mark expert.' (cf. Guj. पगी).

२०७ हक्क्- : 'to call with a shout.'

,, विब्रू-: 'to make a false statement, lie.'

,, पुंबुव : 'making a show of bravery.'

२१३ कर्पर : 'skull' (Pk. कप्पर).

२१५ कामद्रु : कल्पवृक्ष.

२२० देवदिन्न : nomen proprium (Pk.; Sk. देवदत्त).

२२३ रोर : दरिद्र (Pk.; Hpari.).

२२९ श्राद्ध : 'a devout Jain lay follower.'

,, परिमोषिन् : 'a robber.'

२३० परिपाटी : '(visiting holy places) one by one on a round'. The sentence here is परिपाट्या चैत्यानि अनमत्. In later literature a pilgrimage of various holy places is called चैत्यपरिपाटी or in Old Gujarati चैत्यप्रवाडी and there are numerous Jain works bearing this name.

२३६ कथानक 'tale' (Pk. कहाणय; IAL 2705).

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२३९, २४५ भुक्ति : 'enjoyment of ownership (over a country, etc.)'. in देशभुक्ति, राज्यभुक्ति ((Pk, भुत्ति, IAL 9521).

२५५ प्रत्यनीक : प्रतिपक्षिन् , विरूद्ध (Pk. पडिणीय).

२५६ जिह्मग : सर्प.

२५७ मूर्च्छा : गृद्धि, आसक्ति (Pk. मुच्छा).

२६६ पार्श्वे : 'near' (Pk. Guj. पासे).

२६८ वित्ति : 'knowing'.

२७९ स्थानक : The construction तस्य स्थानकेन अहं तेन गणितः seems to be a Gujaratism : The corresponding Mod. Guj. is तेने स्थाने तेणे मने गण्यो.

२८४ समूलकाषं कष्– : 'to exterminate,'

२८६ काचपिच्य : 'useless, bothersome discussion.'

,, तलवर्गिक : 'feudatory.'

२९० उत्पाट : 'rooting up.' (Pk. उप्पाड; IAL 1820).

२९३ अप्रमद्वर : 'not at all careless, careful' (प्रमद्वर used in HPari.)

२९६ आभू– : 'to be present near, to assist' (?).

३०८ विध्यापू–: 'to be extinguished.' (Sanskritization of Pk. विज्झाव्– see IAL 11703).

३०६ पणाया : 'business, transaction.'

३०८ साकार : (?)

३१२ आतूपित : 'smeared' (Pk. तुप्प 'ghee', तुप्पिय 'smeared with ghee' IAL 5864).

३१३ पात्पद्म : पादपद्म.

३१७ निष्कर्षिका (f.) : 'that which pulls out.'

,, वरत्रा : 'rope, thong'' (cf. Guj, वरत 'rope tied to the well bucket').

३१८ चरट : 'thief' (Pk. चरड).

,, खिलीकृत : 'devastated'.

,, घण्टापथ : 'the main road, highway.'

३१९ विनट्– : 'to harass, give trouble' (Pk. विणड्–).

३२० कामसुरभी : कामधेनु.

,, कामकुम्भ : 'a wish-fulfilling magic pot.' (cf. Pk. कामघड and the कामघटकथा).

३२३ व्यतिगम : 'crossing.'

३२६, ३४८ : शरीरचिन्ता : 'call of nature.'

३२७ भुजि : भोजन (in भुजिक्षण 'dinner time' and स्निग्धभुजि 'sweet, fatty food').

३२७ कल्ये : 'yesterday.'

३२८ तालकं दा– : 'to lock' (cf. Guj. ताळुं देवुं).

३३४ प्राभृत : 'a present' (Pk. पाहुड).

३३५ स्वक : 'kinsman, relative' (Pk. सग, Guj. सगो, IAL 13894).

३३७ °देशिन् : 'preaching', (देशना 'preaching, serman' in Sk. Jani litrature; Pk. देसणा).

३४४ उपस्कर : 'small things of merchandise' (IAL 2264).

३४५ जसादित्य, माहिनी : Hybrid Sk. Pk. personal names.

३४६ विलग्– : 'hang on to' (Pk. विलग्ग्– Guj. वळग्, IAL 11881).

,, जनि : 'birth'.

३५० कुविन्द : 'weaver'.

,, मलविका : 'loft' (?).

३५१ देहचिन्ता : See IV 326.

३५२ पाटक : 'a residential area in a town.' (G. पाडो).

,, अरण्यरुदित : 'crying in wilderness'.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

३५८ ओम् : 'yes'.
३६० ठक्क 'a cheat' (Guj. ठग. cf. IAL 5489).
३६१ मलत्री : See IV 350.
,, भेरवयकम् : (?).
३७१ देवड : a personal name.
३७२ महस् : 'festival'.
३७३ वग्गड : a personal name.
३७४ दोःसहाय : 'a helping hand.'
३७७ °सू : सुत.
३८० भाण्य : कथ्य.
,, अपवरक : 'inner appartment.' (Pk. ओअरय, Guj. ओरडो. IAL 450).
,, अपटु : 'sick.'
३८१ स्त्राक् : झटिति
,, , ४०५ अस्मि : अहम्
,, , ३८५ क्षुरी : 'knife' (Guj. छरी; IAL 3727).
३८४ आतुर : 'sick' (Pk. आउर).
३९० शिष्टवान् : कथितवान् (Pk. सिट्ठ = कथित).

✶ ✶ ✶

## Fifth Utsāha

१ प्रवेदक : 'informer.'
७ सुम : कुसुम.
९ द्युसद् : 'a god.'
,, सौम्यतात : 'father of Budha i.e. the moon.'
११ अतिप्रगे : 'in the early morning.'
१६ उपष्टम्भक : 'supporter.'
१७ उपष्टब्ध : 'supported.'
१८ खेल्- : 'to play' (Pk; IAL 3918).
२० जन्त्व : जन्तु.
२३, २४ भग्नी : भगिनी.
,, ,, भाग्नेयी : भागिनेयी.
२५ ध्यामल : 'dark, dirty.' (Sanskritization of Pk. झामल; IAL 5369).
२७ उद्वृत्त : 'born in a higher class of beings.' (Pk. उव्वट्टिय).
,, कामल : 'jaundice.' (cf. Guj. कमळो).
२७, २९ अब्रह्म : अब्रह्मचर्य (Pk. अबम्भ).
२८ चाक्रिक : 'an oilman'.
२९ ग्रहिलित : 'possessed, maddened.' Pk. गहिलिय).
३१ दीप्र : 'radiant.'
३४ सूर्यजा : यमुना.
३६ कुवल : कुवलय (कथासरित्सागर).
३८ जिष्णु : विष्णु.
,, प्रजुषमाण : 'enjoying.'
३९ °वर्षुक (in °सुधावर्षुक) : 'pouring out,' (शिशुपालवध).
४० अश्यान : 'extensive.'
४६ महानट : शिव.
४९ पुंष्टिट्टिभ : 'an osprey among men, a parasite.'
५३ न पूर्यते : 'is not enough.' (Ap, पुज्जइ, Guj, पूगे)
५४ हस : हास्य.
५९ कार्मण : 'magic charm to make others completely subservient.' Pk. कम्मण, Guj. कामण. IAL 3075).
६१ °पादमूले : 'near.'
६४ कनी : 'girl.'
६९ वेलाकूल : 'sea-port.'
७२, ८३ रूत : 'cotton' (Sanskritization of Pk. रूअ, IAL 10798).

Jain Education International For Private & Personal Use Only www.jainelibrary.org

७२ गर्जन : 'the city of Gazna' (Pk. गज्जण).
८३ क्रयाणक : 'goods for sale,' (IAL 3584).
८४ सुखवाहन : 'palanquin,' सुखासन.
,, वेगसर : 'mule.'
८६ गर्जनक : see V 72.
८१ स्थेमन् : स्थैर्य.
९२ अमुदृक्ष : 'like those.'
९५, ९६ मन्द : 'sick' (Guj. मांदुं).
९६ पानीयं सहते न ते : 'the water does not suit your health' (cf. Guj. तने पाणी सहेतुं नथी).
९८ सुखासन : 'palanquin.'
९९ श्वासुर : 'father-in law's house-hold.' (Pk. सासुरय, Guj. सासरुं).
१०६ दवथु : 'heat' (अष्टाध्यायी III 3 89).
,, प्रोन्माथ : विनाश.
,, प्रपा-दायक : 'donor of road-side water-reservoir for travellers.' (for प्रपा see IAL 8681).
,, सत्रालय : सत्रागार 'a charity house distributing food to beggars.'
,, सौस्थ्य : सुस्थता 'welfare,'
१०७ °चण : 'renowned for' (अष्टाध्यायी v 2 26; HPari).
,, गर्जा : (मेघ)गर्जना.
विभायन (n). : 'terrifying.'
,, हक्का : 'threatening shout or call' (Pk, IAL 13938).
१०८ °पार्श्वे : 'near' (Guj. पासे).
११० रणरणक : 'longing due to separation from the loved one.'
,, पारापत : पारावत.
,, ललित : 'love-play' (Pk. ललिअ).
११५ मोट्टायित : 'silent expression of return love.'
११६ कोकी : चक्रवाकी.
११९ प्रतीच्छा : स्वीकृति (Pk. पडिच्छा).
१२० प्रियमेलक : 'bringing out a meeting with the beloved.'
१२१ अदःप्रद : 'giver of that'.
१२५ अनाकर्णितकम् : 'action of having not heard.'
१२७ सावहित्थम् : 'with dissimulation'.
,, भग्निका : भगिनी.
१२८ स्वर्णाक्त : 'gilted.'
१३२ प्रगुण (with व्यधा-) : 'to arrange properly.'
१३३ प्रबोधय् (with दीप) : 'to light'
१३५ ईषा ( in पर्यङ्केषा) : 'side piece (of a bedstead)' (Guj. ईस; IAL 1620).
१३६ स्वाप : 'sleep'.
१४१ वार्धानी : 'water pitcher' (HPari).
,, दन्तपवन : 'a small piece of wood to clean the teeth with' (IAL 6157).
,, वल् : 'to turn back,' 'return' (Guj. वळवुं; IAL 11405).
१४२ चतुःकर्णम् : 'heard by four ears only.'
१४७ आभाणक : 'proverb' (IAL 1228).
१५३, १५४ क्षूण (n.) : अपराध (Pk. खूण).
१५५ अर्धोपचारि : 'partial service, 'treatment or attention,'
१५६ पटु : स्वस्थ 'physically well.'
१५७ असि : त्वम्.
,, प्रतिचर्- : 'to look after a patient' (Pk. पडिअर्).
,, प्रसू : 'mother'.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१६२ भुजिक्षण : 'dinner time'.
,, भोज्यहारिका : 'a maid servant bringing dinner.'
१६३ ग्रह : 'insistence.'
